CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपि च ।

निष्कण्टकं राज्यमिदं प्रवृद्धमिमे निदेशावहिताश्च भूपाः ।
दिशो दशैतास्तव कामितानि यच्छन्ति चिन्तामणिभिः समानाः ॥
अमूनि पूर्वैर्भवतार्जितानि त्यागाय भोगाय वसूनि सन्ति ।
इच्छाविधेयश्च विलासिनीनामयं गणस्तेऽप्सरसां सदृक्षः ॥
निष्कारणं सर्वमिदं विहाय त्वं केन कामेन तपो हि कुर्याः ।
स्वर्गापवर्गार्थमिदं न सम्यग्दृष्टाददृष्टं खलु किं गरीयः ॥
अथाज्ञया कोऽपि न वर्तते ते तत्रोत्सृज क्रोधविषं न दोषः ।
भयेन किं मन्दविसर्पिणीनां कन्थां त्यजन्कोऽपि निरीक्षितोऽस्ति ॥
दुःस्वप्नशङ्का तव चेदथास्ति सत्त्वैः समस्तैः कुलदेवतायै ।
कृत्वा बलिं शान्तिकपौष्टिकार्थं पश्चात्प्रतिस्वप्नविधिं विधेहि ॥

अपि च तथा च । **निष्कण्टकमिति** । हे पुत्र, निष्कण्टकं क्षुद्रशत्रुरहितं इदं एतत् राज्यं प्रवृद्धं वृद्धिं गतम् । इमे भूपाः सामन्तवर्गाः निदेशावहिताश्च तवाज्ञावर्तिनः सावधाना वर्तन्ते । एता इमा दश दिशस्तव भवतः कामितानि वाञ्छितानि यच्छन्ति ददति । कथंभूता दिशः । चिन्तामणिभिः समानाः समाः ॥

अमूनीति । अमूनि एतानि पूर्वैर्यशोबन्धुयशोर्घान्तैर्भवतार्जितानि त्यागाय भोगाय अनुभवनाय वसूनि सन्ति । अयं एष विलासिनीनां कामिनीनां गणः समूहस्ते तव इच्छाविधेयश्च इच्छानुसारी वर्तते । 'विधेयो विनयग्राही' इति वचनात् । कथंभूतो विलासिनीनां गणः । अप्सरसां सदृक्षः रम्भातिलोत्तमामेनकोर्वशीनां सदृशः ॥

निष्कारणमिति । इदं सर्वं पूर्वोक्तं निष्कारणं निष्प्रयोजनं विहाय परिहृत्य त्वं भवान् केन कामेन केनाभिलाषेण तपस्तपश्चरणं हि निश्चयेन कुर्याः विदध्याः । इदं तपः स्वर्गापवर्गार्थं स्वर्गलोकमोक्षनिमित्तं सम्यग् वर्तते । हे पुत्र, दृष्टात् प्रत्यक्षफलात् अदृष्टमप्रत्यक्षं खलु निश्चयेन किं गरीयः किं गुरुतरं वर्तते । अपि तु न वर्तत इत्यर्थः । वृत्तत्रयेण समुच्चयालंकारः, आक्षेपश्च ॥

अथेत्यादि । अथ चेत् हे राजन्, कोऽपि कश्चित् पुमान् ते तव आज्ञया आदेशेन सह न वर्तते नास्ति तत्र तस्मिन् पुरुषे क्रोधविषं कोपहालाहलं उत्सृज मुञ्च । तत्र क्रोधविषोत्सर्जने कोऽपि दोषो नास्ति । हे राजन्, मन्दविसर्पिणीनां यूकानां भयेन भीत्या कोऽपि कन्थां शीतनिवारणं वस्त्रं त्यजन् परिहरन् किं निरीक्षितोऽस्ति । अपि तु न दृष्टोऽस्ति । दृष्टान्ताक्षेपालंकारः ॥

दुःस्वप्नेत्यादि । हे पुत्र, अथ चेत् तव भवतः दुःस्वप्नशङ्का दुष्टस्वप्नभयमस्ति,

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चेदं मनागपिकमलौकिकं वा। तथा हि—

मधुपर्के च यज्ञे च पितृदैवतकर्मणि।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः॥
एष्वर्थेषु पशून्हिंसन्वेदवेदार्थविद्द्विजः।
आत्मानं च पशूंश्चैव गमयत्युत्तमां गतिम्॥

तथा वेदेऽप्यात्मश्रेयोर्थमशेषविघ्नोपशमनार्थं च राजसूयपुण्डरीकाश्वमेधगोसववाजपेयादिषु वर्षिकामेष्टिकारीरित्यादिषु च यज्ञेषु प्रवृत्तोऽयं प्राणिवधः स च वधो न भवति।

तर्हि समस्तैः सत्त्वैः सर्वप्राणिवर्गैः कुलदेवतायै बलिं कृत्वा पश्चात् प्रतिस्वप्नविधिं दुष्टस्वप्नशमनविधानं विधेहि त्वं कुरु। किमर्थम्। शान्तिकपौष्टिकार्थं शान्तौ भवं नियुक्तं वा यत् कर्म तत् शान्तिकम्, पुष्टौ शरीरादिपुष्टिनिमित्तं भवं नियुक्तं वा यत्कर्म तत्पौष्टिकम्, शान्तिकपौष्टिके तयोरर्थः प्रयोजनं यस्मिन् प्रतिस्वप्नविधिर्विधानकर्मणि तत् शान्तिकपौष्टिकार्थम्। जातिमात्रालंकारः॥

न च नैव इदं कुलदेवतायै सत्त्वैर्बलिविधानकरणं मनागपिकं मनाग्भवं मनागपिकं कदाचित्कं न वर्तते वा अथवालौकिकं न वर्तते लोको नाम प्रसिद्धं न वर्तते। तथा हि। तदेव निरूपयति—**मधुपर्के इत्यादि**। मनुर्मनुनामा ऋषिरितीदृशमब्रवीज्जगाद। इतीति किम्। पशवस्तिर्यञ्चः अत्रैव एषु स्थानेषु हिंस्या हिंसनीयाः। अन्यत्र स्वादपोषणाद्यर्थे न हिंसनीया इत्यर्थः। अत्र कुत्र। मधुपर्के ब्राह्मणस्य गृहे ब्राह्मणो यदि प्राघूर्णक आयाति तदा तस्य पादौ प्रक्षाल्य दधिमधुघृतं पादौ गृहीत्वा परिमुच्यते, महोक्षं महाजं वा मारयित्वा सर्वब्राह्मणो भोज्यते, चन्दनेन पुष्पमालया च पूज्यते इति मधुपर्के। यज्ञे यागकर्मणि। पितृदैवतकर्मणि पितृकर्मणि श्राद्धकर्मणि, दैवतकर्मणि रुद्रादिपूजनविधाने। जातिः॥

एष्वित्यादि। एषु पूर्वोक्तेषु चतुर्षु अर्थेषु कार्येषु पश्चात् तिरश्चो हिंसन् मारयन् द्विजो ब्राह्मण आत्मानं निजप्राणिनं पशून् चैव तिरश्चः चैव उत्तमां गतिं गमयति ऊर्ध्वान्तरिक्षं प्रापयति। कथंभूतो द्विजः। वेदं वेदपाठं वेदार्थं च वेदवाच्यं वेत्तीति वेदवेदार्थवित्। समुच्चयालंकारः॥

तथा तेनैव मनुवचनस्मृतिशास्त्रप्रकारेण वेदेऽपि वेदशास्त्रेऽपि आत्मश्रेयोर्थं आत्मपुण्यार्थं अशेषविघ्नोपशमनार्थं च सर्वविघ्नविनाशनार्थं च अयं प्राणिवधः यज्ञेषु प्रवृत्तः प्रवृत्तिं गतः। केषु यज्ञेषु। राजसूयपुण्डरीकाश्वमेधगोसववाजपेयादिषु राजसूयं च यत्र राजा हूयते, पुण्डरीकश्च यत्र हस्ती हूयते, अश्वमेधश्च यत्र तुरङ्गमो हूयते, गोसवश्च यत्र गौर्ब्राह्मणो हूयते, वाजपेयं च वाजं अन्नं पेयं प्रायेण ब्राह्मणादिभोजनं पशुहोमश्च यत्र तद्वाजपेयम्, आदिशब्दात् अन्येऽपि यज्ञप्रकाराः सन्ति तेषु तथोक्तेषु। न केवलमेतेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतः ।

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा ।
यज्ञो हि भूत्यै सर्वेषां तस्माद्यज्ञे वधोऽवधः ॥

इति । **राजा**—(कर्णौ पिधाय निःश्वस्य च ।) किं नु खलु न करोति देहिनामयं मोहबन्धः, तस्य प्रसवभूमिरज्ञानसंबन्धश्चेति, कर्कशोदर्कवितर्ककर्करसंपातस्तिमितचेताः क्षणमात्रमितिकर्तव्यताविमूढमनःश्रोता इव भूत्वेदमवादीत्—प्रसीदाम्ब । वदामि किंचिदहम्, यदि तत्र भवती मयि दुष्पुत्रापवादपरागं न विकिरति । **माता**—पुत्र, मैवं मयि शङ्किष्ठाः । प्रतिष्ठस्व न्यायनिष्ठुरतया गोष्ठीसौष्ठवेषु । न खलु केवलमहं प्रसवधर्मिणी, किं तु भवत्पितुः प्रसादात्सकलव्यवहारवेदिनी च । यद्येवं युक्त एव पूर्वपक्षः ।

यज्ञेषु प्राणिवधः प्रवृत्तः । वर्षिकामेष्टिकारीरित्यादिषु च वर्षिकामेष्टिर्यागविशेषः, कारी च अप्रसूता गौर्यत्र हूयते इत्यादिषु च यज्ञेषु स च वधः प्राणिवधो न भवति ॥

यतः कारणात् । यज्ञार्थं पशवः सृष्टाः कृताः स्वयमेवात्मना स्वयंभुवा ब्रह्मणा । यज्ञो यागो हि निश्चयेन भूत्यै ऐश्वर्याय सर्वेषां याचकाचार्ययजमानादीनाम् । तस्मात् कारणात् यज्ञे यागे वधः प्राणिहिंसा अवधः इति ॥

राजा यशोधरः कर्णौ पिधाय मुद्रयित्वा निःश्वस्य च निश्वासान् गृहीत्वा इदमवादीज्जगाद । इदं किम् । देहिनां प्राणिनां अयं मोहबन्धः किं नु खलु न करोति । अपि तु सर्वपापमुत्पादयति । तस्य मोहबन्धस्य प्रसवभूमिरुत्पत्तिस्थानं अज्ञानसंबन्धश्च किं न करोतीति । कथंभूतो राजा । कर्कशोदर्कवितर्ककर्करसंपातस्तिमितचेताः कर्कशो निर्दयो योऽसावुदर्क उत्तरफलं तस्य वितर्को विचारणं स एव कर्करसंपातः पाषाणपतनं तेन स्तिमितं निर्व्यापारं विचारपरं चेतो मनो यस्य स तथोक्तः । राजा किं कृत्वा अवादीत् । क्षणमात्रं अल्पकालं इतिकर्तव्यताविमूढमनःश्रोता इव भूत्वा इतिकर्तव्यता कार्यनिर्धारस्तत्र विमूढं परिज्ञानरहितं मनःश्रोतः चित्तसंगतिर्यस्य स तथोक्तः । राजा किं अवादीत्—हे अम्ब हे मातः, प्रसीद त्वं प्रसन्ना भव । अहं किंचित् किमपि वदामि ब्रवीमि । यदि चेत् तत्र तस्मिन् वचने उदिते सति भवती त्वं मयि विषये दुष्पुत्रापवादपरागं कुपुत्रनिन्दाधूलीं न विकिरति न विक्षिपति । माता प्राह—हे पुत्र, मयि विषये त्वं एवं दुष्पुत्रकथनं मा शङ्किष्ठाः मा भयं त्वं कार्षीः । मा भैषीरित्यर्थः । हे पुत्र, न्यायनिष्ठुरतया गोष्ठीसौष्ठवेषु उपन्यासप्रगल्भासु प्रतिष्ठस्व प्रस्थापनं कुरु पूर्वपक्षं विधेहि । 'समवप्रविभ्यः–' इति वचनात् ष्ठाधातोरात्मनेपदम् । हे पुत्र, न खलु । न खल्विति वाक्यालंकारे । अहं केवलं तव प्रसवधर्मिणी जन्मदायिनी न भवामीति, किं तु भवत्पितुः प्रसादात् यशोधरमहाराजकारुण्यात् सकलव्यवहारवेदिनी च वर्ते । यदि एवं ततः पुत्र, मम पूर्वपक्षो युक्त एव । अहं पूर्वमुपन्यासं कुर्वे । तमेवोपन्यासं करोति—यस्मात् कारणात् हे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्मात् 'न धर्मांश्चरेत्, एष्यत्फलत्वात्संशयितत्वाच्च । को ह्यबालिशो हस्तगतं पादगतं कुर्यात् । वरमद्यकपोतः श्वोमयूरात् । वरं सांशयिकान्निष्कादसांशयिकः कार्षापणः' इति महान्खलु लोके लौकायतिकलोककोलाहलः । स चात्मनो गर्भादिमरणपर्यन्तायां सुघट एव । **राजा—**

सत्यं न धर्मः क्रियते यदि स्याद्गर्भावसानान्तर एव जीवः ।

न चैवम् ।

जातिस्मराणामथ रक्षसां च दृष्टिः परं किं न समस्ति लोके ॥

पुत्र, लोके खलु लौकायतिकलोककोलाहलो वादो महान् इत्यस्ति । इतीति किम् । न धर्मांश्चरेत् । कस्मात् धर्मान् न चरेत् । एष्यत्फलत्वात् धर्मचरणे फलं भविष्यद्वर्तते न वर्तमानकाले धर्मचरणफलं दृश्यते । न केवलं एष्यत्फलत्वाद्धर्मान् चरेत्, संशयितत्वात् । न ज्ञायते धर्मचरणे फलं भविष्यति न भविष्यति वा इति देहत्वाच्च धर्मं न चरेदित्यर्थः । अमुमेवार्थं आक्षेपेण दृढयति—हि यस्मात् कारणात् कः अबालिशः को विद्वान् हस्तगतं वस्तु सुवर्णादिकं पादगतं कुर्यात् । अर्थात् पादाभ्यां गृह्णीयात् । हस्तौ निकटवर्तिनौ वर्तेते, पादौ तु दूरस्थिताविति । तेन दृष्टमेव फलं गृह्णीयात्, अदृष्टं तु परित्यजेत् । वरमितीषद्रुचौ । श्वोमयूरात् प्रातर्लभ्यमयूरात् अद्य अस्मिन्नहनि लभ्यः कपोतः पारापतो वरं श्रेष्ठः । मयूरे मांसं महत्, कपोते मांसमल्पम् । यस्मात् कारणात् च । वरमितीषद्रुचौ । सांशयिकात् संशयभवात् निष्कात् अष्टशतप्रमाणसुवर्णात् असांशयिकः निश्चितः कार्षापणः गद्याणकमेकं सुवर्णवरश्रेष्ठम् । इति ईदृशं खलु निश्चयेन लोके लोकमध्ये लौकायतिकलोककोलाहलः चार्वाकलोकवादः सांख्यलोकवादो वा । स चात्मनः च चांभहितो (?) वर्तते । कोऽसौ लौकायतिकलोककोलाहलस्तमेवाह—गर्भादिमरणपर्यन्तायां गर्भादिः शुक्रार्तवजीवसंयोगः, मरणं शरीरेन्द्रियविषयैर्वियोगः, तदन्तायां सुघटः सुघटमान एव वर्तते ॥

राजा प्राह—**सत्यमिति** । सत्यं हे मातः, त्वद्वचनं सत्यम् । धर्मो न क्रियते न विधीयते यदि चेत् जीव आत्मा गर्भावसानान्तरः स्यात् गर्भश्च अवसानं मरणं तयोर्वान्तर एव भवति । न चैवं न च गर्भादिमरणपर्यन्तो जीवो वर्तते । कस्मात् । अमुमेवार्थं वृत्तार्धेन आक्षेपतया दृढयति—लोके जातिस्मराणां पुरुषाणां परं निश्चयेन दृष्टिः किं न समस्ति । अपि तु समस्त्येव । यदि गर्भादिमरणपर्यन्तो भवति जीवस्तर्हि जातिस्मरः पुमान् कथमेवं वक्ति—अहं पूर्वजन्मनि एवंविधो बभूव । रक्षसां च दृष्टिः कस्यचित् पित्रादिको दृष्ट्वा मृत्वा राक्षसो बभूव प्रेतावासे जन्म गृहीतवानिति श्रूयते । यदि जीवः गर्भादिमरणपर्यन्तस्तर्हि व्यन्तरः कथं संजातः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वयं कृतं जन्तुषु कर्म नो चेत्समः समस्तः खलु किं न लोकः ।
भूतात्मकं चित्तमिदं च मिथ्या स्वरूपभेदात्पवनावनीव ॥

एवं चेदमपि संगच्छते—

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः प्राप्तिम् ।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥

नवं वयश्चारुतरास्तरुण्यो रम्याणि हर्म्याणि शिवाः श्रियश्च ।
एतानि संसारतरोः फलानि स्वर्गः परोऽस्तीति मृषैव वार्ता ॥

दोषस्त्वमीषां पुनरेक एव स्थैर्याय यन्नास्ति जगत्युपायः ।
तत्संभवे तत्त्वविदां परं स्यात्खेदाय देहस्य तपःप्रयासः ॥

स्वयमित्यादि । जन्तुषु स्वयं कृतं कर्म स्वयमुपार्जितं कर्म चेन्नो वर्तते तर्हि समस्तः लोकः खलु समः समानः किं न भवति राजकिंकरगुरुशिष्यसधननिर्धनादिकः कथं घटते। इदं चित्तं एष आत्मा भूतात्मकं यदुच्यते पृथिव्यप्तेजोवायुनिष्पन्नं यदुच्यते तच्च मिथ्या असदेतत् । स्वरूपभेदात् विज्ञानसुखदुःखादिगुणवान् जीवः, भूतानि तु अचेतनानि तद्विपरीतानि वर्तन्ते। अस्मात् किं तत्स्वरूपभेदो वर्तते। पवनावनीव पवनश्चपलः, अवनी तु स्थिररूपा। तद्वदात्मा चपलज्ञानादिगुणवांश्च, भूतानि तु अचेतनानि धारणादिगुणसंयुक्तानि ॥

एवं च भेदप्रकारे सति इदमपि आर्यावृत्तं संगच्छते जन्मपत्रिकायां आदौ या लिख्यते । का चासावार्येत्याह—**यदुपचितमित्यादि** । यत् शुभाशुभं कर्म उपचित-मुपार्जितं अन्यजन्मनि तस्य कर्मणः प्राप्तिं उदयं व्यञ्जयति प्रकटीकरोति । किं तत् कथंभूतम् । शास्त्रमेतत् ज्योतिष्कशास्त्रम् । क इव । दीप इव तमसि द्रव्याणि घटपटादीनि व्यञ्जयति । यदि पूर्वजन्मसद्भावे उत्तरजन्मस्वरूपं कथं ज्योतिःशास्त्रं प्रकटयति । तेन ज्ञायते गर्भादिमरणपर्यन्तो जीवो नास्ति ॥

पुनश्च राजा प्राह—**नवमिति**। नवं वयो नवीनं यौवनम्। चारुतरास्तरुण्यः, रम्याणि हर्म्याणि, शिवाः शुभतराः श्रियश्च । एतानि संसारतरोः फलानि वर्तन्ते। स्वर्गः परोऽस्ति इति वार्ता मृषैव मिथ्या वर्तते । किं तु यौवनस्त्रीधनादिक इदमेव स्वर्गो वर्तते ॥

दोष इति । अमीषां यौवनादीनां पुनश्च एक एव दोषो वर्तते। यत् यस्मात् कारणात् जगति संसारे उपायः यौवनस्त्रीधनादिलक्षणः सुखहेतुः स्थैर्याय स्थिरत्वाय नास्ति । किं तु यौवनादिकं सर्वं अध्रुवमेव वर्तते । तदुक्तं शुभचन्द्रेण महाकविना ज्ञानार्णवमहाशास्त्रे—'गगननगरकल्पं संगमं वल्लभानां जलदपटलतुल्यं यौवनं वा धनादि । स्वजनसुतशरीरा-दीनि विद्युच्चलानि क्षणिकमिति समस्तं विद्धि संसारवृत्तम् ॥' तत्संभवे यौवनादीनां स्थिरत्वसद्भावे तत्त्वविदां तत्त्वज्ञानिनां परं केवलं तपःप्रयासः देहस्य खेदाय स्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बालस्य मौग्ध्यान्न तपोधिकारो युवा तपस्येद्यदि तत्र दण्डः ।
कुटुम्बभाराधिकृतश्च मध्यो वृद्धः पुनर्वृद्धिसहाय एव ॥
परोपरोधादयमेवमात्मा मिथ्याग्रहग्रस्तमनःप्रतानः ।
स्वयं विजानन्नपि दैवदूतैराकृष्य नीयेत भवभ्रमाय ॥

चरमोऽपि पक्षः श्रेयानेव । द्विधा खलु प्राणिनामापदो भवन्ति—संभवत्प्रतीकाराः, कालकृतावताराश्च । तत्राद्यानामुपशमनाय प्रतिस्वप्नविधिः श्रेयःसंनिधेरेव रणाजिरेषु राजव्यञ्जनव्याजेन द्विषद्विषधराणाममर्षविषवर्षस्य प्रतीकार इव । मध्यमस्तु पक्षोऽतीव मध्यमः ।

बालस्येत्यादि । हे मातः, बालस्य शिशोस्तपोधिकारो दीक्षाग्रहणनियोगो न वर्तते । कस्मात् । मौग्ध्यात् मुग्धस्वभावात् । यदि चेत् युवा तरुणस्तपस्येत् तपः कुर्यात् तत्र तपःकरणे दण्डः प्रायश्चित्तं वर्तते वपुर्दण्डनं कष्टं वा भवति । मध्यः अर्धवृद्धः पुमांस्तु कुटुम्बभाराधिकृतो भवति कुटुम्बोदरपूरणं करोति । पुनः पश्चात् वृद्धो वर्षीयान् वृद्धिसहाय एव कालान्तरेणोदरं पूरयति । जात्यलंकारः । तथा चोक्तं गुणभद्रेण महाकविना—'बाल्ये वेत्सि न किंचिदप्यपरिपूर्णाङ्गो हितं वाहितं कामान्धः खलु कामिनीद्रुमघने भ्राम्यन्वने यौवने । मध्ये वृद्धतृषार्जितुं वसुपशुः क्लिश्नासि कृष्यादिभिः वार्धेवार्धमृतः क्व जन्मफलिते धर्मो भवेन्निर्मलः ॥' इति ॥

परोपरोधादित्यादि । परोपरोधात् मातृपित्रादि आक्षेपात् अयं आत्मा एष जीवो मिथ्याग्रहग्रस्तमनःप्रतानो मिथ्याग्रहोऽसत्यपिशाचग्रहस्तेन ग्रस्तो गृहीतो मनःप्रतानो मनोव्यापारो यस्य स तथोक्तः वर्तते । स्वयमात्मना विजानन्नपि विशेषेण चेतन्नपि दैवदूतैः कृतान्तकिंकरैराकृष्य तान् नयित्वा भवभ्रमाय संसारपर्यटनाय नीयेत नीयते ॥

चरमोऽपि पक्षः शान्तिकपौष्टिकादिलक्षणः श्रेयानेव शुभ एव वर्तते । परं प्रणिपातेन न श्रेयानित्यर्थः । हे मातः, द्विधा खलु प्राणिनां आपदो विपत्तयो भवन्ति । कौ तौ द्वौ प्रकारौ । संभवत्प्रतीकारा आसन्नापदां प्रतीकाराः, कालकृतावताराश्च कृतान्तकृतोत्पत्तयश्च । तत्र तयोर्मध्ये आद्यानां संभवत्प्रतीकाराणां आपदां उपशमनाय प्रतिस्वप्नविधिः श्रेयःसंनिधेरेव पुण्याचरणादिव भवति । प्रतिस्वप्रविधिः क इव । रणाजिरेषु संग्रामाङ्गणेषु राजव्यञ्जनव्याजेन द्विषद्विषधराणां शत्रुसर्पाणां अमर्षविषवर्षस्य क्रोधविषवर्षणस्य प्रतीकार इव विद्याधरभेषजमन्त्रतोयहवनादिप्रतीकार इव । मध्यमस्तु पक्षः स्वप्नशङ्का इत्यादि यत्पठितं सः अतीव मध्यमः निकृष्टः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहोरात्रं यथा हेतुः प्रकाशध्वान्तजन्मनि ।
तथा महीपतिर्हेतुः पुण्यपापप्रवर्तने ॥

उक्तं च—

राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।
राजानमनुवर्तन्ते यथा राजा तथा प्रजाः ॥

इति । भूतसंरक्षणं हि क्षत्रियाणां महान्धर्मः । स च निरपराधप्राणिवधे नितरां निराकृतः स्यात् । नृपतिप्रतिष्ठानि च खलु देहिनां व्यवहारतन्त्राणि वर्तन्ते । नृपत्यायत्ताः पुण्यपापहेतवो वर्णाश्रमाणामाचारव्यवस्थाश्च । ते च नृपतयः कामक्रोधाभ्यामज्ञानेन वा यथैव शुभमशुभं वा कर्मारभन्ते तथैव जानपदा अपि । श्रूयते हि—वङ्गीमण्डले नृपतिदोषाद्भूदेवे-

---

अह इति । अहश्च रात्रिश्च अहोरात्रम् । 'अहः सर्वैकदेशसंख्यातपुण्यवर्षादीर्घादिश्च रात्रिः' इत्यनेन तत्पुरुषे अदन्तो निपातः । यथा येन प्रकारेण हेतुः कारणं वर्तते । कस्मिन् । प्रकाशध्वान्तजन्मनि प्रकाशे प्रकाशोत्पादे अहर्दिवसो हेतुः वर्तते, ध्वान्तजन्मनि अन्धकारोत्पादे रात्रिर्हेतुर्वर्तते । तथा तेन प्रकारेण महीपती राजा हेतुः प्रत्यहो वर्तते । कस्मिन् । पुण्यपापप्रवर्तने पुण्यस्य प्रवर्तने, पापस्य च प्रवर्तने ॥

उक्तं च—पूर्वभाषितं वर्तते चाणक्यसूत्रमित्यर्थः । **राज्ञीत्यादि ।** राज्ञि राजनि धर्मिणि धर्मिष्ठे सति प्रजा धर्मिष्ठा भवन्ति । पापे पापिष्ठे राजनि सति पापाः प्रजाः अपि पापिष्ठा भवन्ति । समे समाने मध्यस्थे राजनि प्रजा अपि समा मध्यस्था भवन्ति । प्रजा राजानमनुवर्तन्ते राजानः छन्दानुसारिणो भवन्ति । यथा राजा यादृशो राजा तथा प्रजा प्रजा अपि तादृश्यो भवन्ति ॥

हे मातः, भूतसंरक्षणं प्राणिनां प्रतिपालनं हि निश्चयेन क्षत्रियाणां राजपुत्राणां महान् गुरुतरो धर्मो वर्तते । स च धर्मो निरपराधप्राणिवधे निर्दोषजन्तुमारणे नितरां अतिशयेन निराकृतो निषिद्धः स्याद्भवेत् । नृपतिप्रतिष्ठानि च राजायत्तानि च खलु निश्चयेन देहिनां प्राणिनां व्यवहारतन्त्राणि व्यवहारशास्त्राणि क्रियविक्रियादिशास्त्राणि वर्तन्ते सन्ति । नृपत्यायत्ता राजाधीना पुण्यपापहेतवः पुण्यपापकारणानि वर्णाश्रमाणां ब्राह्मणक्षत्रियवैश्यशूद्राणां ब्रह्मचारिग्रहस्थवानप्रस्थभिक्षूणां च आचारः आचरणं व्यवस्थाः मर्यादाश्च वर्तन्ते । ते च नृपतयः कामक्रोधाभ्यां कामेन कोपेन चाज्ञानेन वा अज्ञानतया वा यथैव येनैव प्रकारेण शुभमशुभं वा पुण्यपापं वा कर्म आरभन्ते कुर्वन्ति तथैव तेनैव नृपतिप्रकारेणैव जानपदा अपि लोका अपि आरभन्ते । श्रूयते हि आकर्ण्यते हि—यस्मात् वङ्गीमण्डले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्वासवोपयोगः, पारसीकेषु स्वसवित्रीसंयोगः, सिंहलेषु च विश्वामित्रसृष्टिप्रयोग इति। ततश्च।

यथैव पुण्यस्य सुकर्मभाजां षष्ठांशभागी नृपतिः सुवृत्तः।
तथैव पापस्य कुकर्मभाजां षष्ठांशभागी नृपतिः कुवृत्तः॥

अपि च।

यः शस्त्रवृत्तिः समरे रिपुः स्याद्यः कण्टको वा निजमण्डलस्य।
अस्त्राणि तत्रैव नृपाः क्षिपन्ति न दीनकानीनशुभाशयेषु॥

तन्मातः, अहमैहिकामुत्रिकचरित्रानपत्रपस्तेषु प्राणिषु कथं नाम अस्त्रं प्रयोजयामि। किं च।

न कुर्वीत स्वयं हिंसां प्रवृत्तां च निवारयेत्।
जीवितं बलमारोग्यं शश्वद्वाञ्छन्महीपतिः॥

रत्नपुरपतने नृपतिदोषात् राजदोषात् भूदेवेषु ब्राह्मणेषु आसवोपयोगः मद्यपानम्। तथा नृपतिदोषात् पारसीकेषु राश्वानदेशेषु स्वसवित्रीसंयोगः··························। तथा नृपतिदोषात् सिंहलेषु च विश्वामित्रसृष्टिप्रयोगः श्रूयते वर्णसंकर आकर्ण्यते इति॥

ततस्तस्मात् कारणात्। **यथेत्यादि**। यथैव येन प्रकारेण सुकर्मभाजां पुण्यकर्मणां लोकानां सुवृत्तो नृपतिः सदाचारो राजा पुण्यस्य षष्ठांशभागी भवति, तथैव तेनैव प्रकारेण कुकर्मभाजां पापकर्मणां लोकानां कुवृत्तो नृपतिः दुराचारो राजा पापस्य षष्ठांशभागी भवति॥

अपि च तथा च। **य इत्यादि**। यो रिपुः शत्रुः समरे संग्रामे शस्त्रवृत्तिरायुधवान् स्यात् भवति। तथा च अथ वा निजमण्डलस्य निजदेशस्य यः कण्टको धाव्यादिदायकः भवति। तत्रैव शत्रौ नृपा राजानो अस्त्राणि क्षिपन्ति मुञ्चन्ति। न दीनकानीनशुभाशयेषु दीनेषु दुर्वलेषु कानीनेषु अकिंचित्करेषु शुभाशयेषु यतिवर्गादिषु अस्त्राणि न मुञ्चन्ति॥

तत्तस्मात् कारणात् हे मातः, अहं ऐहिकामुत्रिकचरित्रानपत्रप इहलोकपरलोकाचरणे अनपत्रपः अविद्धः सन् तेषु प्राणिषु दीनादिषु निरपराधेषु। नामेति संभावनायाम्। कथं केन प्रकारेण अस्त्रं खड्गादिकं प्रयोजयामि व्यापारयामि। अपि न कथमपीत्यर्थः॥

किं च। मनाग्विशेषं कथयामि—**नेति**। महीपती राजा स्वयं आत्मना हिंसां प्राणिघातं न कुर्वीत न कुर्यात्। प्रवृत्तां च अपरैः कृतां हिंसां निवारयेत् निषेधयेत्। महीपतिः किं कुर्वन्। जीवितं दीर्घायुष्कं बलं शरीरस्य सामर्थ्यं आरोग्यं शश्वन्निरन्तरं वाञ्छन्नभिलषन्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यो दद्यात्काञ्चनं मेरुं कृत्स्नां चापि वसुंधराम् ।
एकस्य जीवितं दद्यात्फलेन न समं भवेत् ॥
यथात्मनि शरीरस्य दुःखं नेच्छन्ति जन्तवः ।
तथा यदि परस्यापि न दुःखं तेषु जायते ॥

इति श्लोकत्रयं गतवत्येव दिने **हिरण्यगर्भस्य** मन्त्रिणः सुतेन **नीतिबृहस्पतिना** मामध्यापितवती भवत्येव । कथं नाम विस्मृता । विधेयमेव चाशुभमपि कर्म । को दोषो यदि हन्यमानस्येवात्मनो न भवेयुः सुलभ्यान्यापदि विजृम्भितानि ।

संतर्पणार्थं द्विजदेवतानां पुष्ट्यर्थमङ्गस्य च सन्त्युपायाः ।
अन्येऽपि लोके बहवः प्रशस्ताः सन्तः कुतः पापमिहाचरन्ति ॥
शुक्रशोणितसंभूतमशुचीनां निकेतनम् ।
मांसं चेत्प्रीणयेद्देवानेतद्व्याघ्रानुपास्महे ॥

य इति । यः पुमान् मेरुप्रमाणं काञ्चनं दद्यात् ददाति । कृत्स्नां चापि वसुंधरां दद्यात् । एकस्य जीवितमभयदानं दद्यात् । स पुमान् फलेन कृत्वा समं न भवेत् । जीवितदानस्य अधिकफलं प्राप्नुयादित्यर्थः ॥

यथेति । यथा येन प्रकारेण आत्मनि शरीरस्य दुःखं जन्तवो जीवा नेच्छन्ति, तथा तेन प्रकारेण यदि चेत् परस्यापि अन्यस्यापि जीवस्य यदि दुःखं नेच्छन्ति तर्हि तेषु जीवेषु दुःखमसातं न जायते नोत्पद्यते ॥

इति एतत् श्लोकत्रयं पद्यत्रितयं गतवत्येव दिने ह्यस्तने दिवसे हिरण्यगर्भस्य नाम्नो मन्त्रिणः सुतेन नीतिबृहस्पतिनाम्ना मां भवत्येव त्वमेव अध्यापितवती अपीपठत् । कथं केन प्रकारेण । नामेति संबोधने । विस्मृता विस्मृतवती । विधेयमेव च कर्तव्यमेव च अशुभमपि कर्म पातकं कर्तव्यम् । को दोषो वर्तते, अपि तु न कश्चित्, यदि चेत् हन्यमानस्येव मार्यमाणस्येव आत्मनो निजजीवस्य न भवेयुर्न भवन्ति । कानि न भवन्ति । आपदि आपदायां सुलभ्यानि सुप्राप्याणि विजृम्भितानि व्याप्टत्रप्रसराः ॥

संतर्पणार्थमित्यादि । द्विजदेवतानां ब्राह्मणकुलदेवतादीनां संतर्पणार्थं प्रीणनार्थम्, अङ्गस्य च शरीरस्य च पुष्ट्यर्थम्, अन्येऽपि जीवघातादपि बहवः अनेके प्रशस्ताः प्रशंसनीया लोके लोकमध्ये उपायाः सन्ति वर्तन्ते । तर्हि हे मातः, सन्तः सत्पुरुषाः कुतः कस्मात् कारणात् पापं हिंसादि कर्म इह अस्मिन् संसारे आचरन्ति कुर्वन्ति ॥

शुक्रेति । हे मातः, चेद्यदि मांसं कर्तृभूतं देवान् प्रीणयेत् तर्पयेत् । कथंभूतं मांसम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिथ्या चायं प्रवादः पशूपहारेण देवतास्तुष्यन्तीति ।

हताः कृपाणेन वनेऽपि जन्तवो बाढं म्रियन्ते गलपीडनाच्च ।
अदन्ति चैतान्स्वयमेव देव्यो व्याघ्राः स्तवार्हाः परमत्र सन्तु ॥
कृत्वा मिषं दैवमयं हि लोको मद्ये च मांसे च रतिं करोति ।
एवं न चेद्दुर्गतिसंगतिः स्याद्दुष्कर्मणां कोऽपर एव मार्गः ॥

यदि च हिंसैव परमार्थतो भवति धर्मः, कथं तर्हि मृगयायाः पापर्धिरिति रूढिः, मांसस्य च पिधायानयनम्, तत्संस्कर्तुर्गृहाद्बहिर्वासः, रावणशाक इति नामान्तरव्यपदेशः, पर्वदिवसेषु वर्जनं च ।

शुक्रशोणितसंभूतं शुक्रं पितुः सप्तमो धातुः, शोणितं रुधिरं मातुर्द्वितीयो धातुः, ताभ्यां संभूतमुत्पन्नम् । पुनः कथंभूतम् । अशुचीनां निकेतनं विष्ठादीनां स्थानम् । तर्हि एतस्मात् गच्छत यूयम्, व्याघ्रान् द्वीपिनः उपास्महे । तेऽपि यस्मात् मांसेन प्रीयन्ते ॥

मिथ्या चायं प्रवादः असत्योऽयं वादः । अयं कः । पशूपहारेण देवताः तुष्यन्ति संतोषमाप्नुवन्ति इति ॥

हता इति । हे मातः, जन्तवो वने । अपिशब्दात् नगरेऽपि । कृपाणेन हताः सन्तो बाढमतिशयेन म्रियन्ते गतासवो भवन्ति । न केवलं कृपाणेन हताः । गलपीडनाच्च गलमोटनाच्च म्रियन्ते । छागादीनां वस्त्रेण पूरयित्वा गलमोटनं कृत्वा मारयित्वा मारयन्ति कर्मचाण्डालास्तथापि म्रियन्ते । देव्यः कुलदेवतादयः स्वयमेव एतान् पशून् अदन्ति च किं नु खादन्ति च । अस्माद्दाने किमपेक्षां कुर्वन्ति । व्याघ्रास्तु स्तवार्हाः स्तुतियोग्याः परं निश्चयेन अत्र संसारे सन्तु भवन्तु । यतस्ते पशून् मारयित्वा स्वयं भक्षयन्ति, देवतास्तु अस्मान् प्रेरयित्वा मरणं कारयित्वा पश्चात् भक्षयन्ति । ततो देवताः स्तवनार्हा न भवन्ति ॥

कृत्वेति । अयं लोकः पापिष्ठो जनः दैवं देवतासंबन्धि मिषं कृत्वा हि निश्चयेन मद्ये च मांसे च रतिं करोति । देवता भवान्यादयः किल मद्यपाने मांसभक्षणे च रतिं कुर्वन्ति प्रीयन्ते इति कथयित्वा लोको मद्यादौ प्रवर्तते । एवं देवतामिषं चेत् न भवति तर्हि दुर्गतिसंगतिः नरकादिसंगतिः दुष्कर्मणां पापिष्ठानां अपरोऽन्यः क एव मार्गः स्यात् । अपि तु न कश्चिन्मार्गः स्यात् । देवतामिषं एव दुर्गतिमार्ग इत्यर्थः ॥

यदि च हे मातः, हिंसैव जीववध एव परमार्थतो निश्चयाद्धर्मो भवति संजायते, तर्हि मृगयाया आखेटकस्य पापर्धिरिति रूढिः प्रसिद्धिः कथं केन प्रकारेण भवति । मांसस्य च पिधायानयनं आवृत्यानयनं कथम्, तत्संस्कर्तुः मांसकारस्य गृहाद्बहिर्वासः कथम्, 'रावणशाक' इति नामान्तरव्यपदेशः मांसस्य रावणशाक इति ईदृशं नामान्तरकथनं कथम्, पर्वदिवसेषु च अष्टमी-चतुर्दशी-अमावास्या-एकादश्यादिदिनेषु वर्जनं कथम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावन्ति पशुरोमाणि पशुगात्रेषु भारत ।
तावद्वर्षसहस्राणि पच्यन्ते पशुघातकाः ॥

इति कथमियं पौराणिकी श्रुतिः ।

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदेयं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविबन्धो गुरुषु च विनतिः सर्वभूतानुकम्पा
सामान्यं सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष मार्गः ॥

इति कथमेतत्सर्वपथीनमुवाच **वररुचिः** ।

होमस्नानतपोजाप्यब्रह्मचर्यादयो गुणाः ।
पुंसि हिंसारते पार्थ चाण्डालसरसीसमाः ॥

इति कथमियं **व्यासोक्तिः** ।

यावन्तीति । यावन्ति पशुरोमाणि पशुगात्रेषु वर्तन्ते । हे भारत युधिष्ठिर महाराज, तावन्ति वर्षसहस्राणि तत्परिमाणाः वर्षसहस्राणि पशुघातका नरकेषु पच्यन्ते । इतीदृशी इयं एषा पौराणिकी श्रुतिः महाभारतशास्त्रश्रुतिः कथं वर्तते ॥

प्राणाघातादित्यादि । प्राणाघातात् प्राणव्यपरोपणात् निवृत्तिर्नियमः, परधनहरणे परद्रव्यापहरणे संयमो यावज्जीवनियमः, सत्यवाक्यं अनृतवचनपरिहारः, काले मुनिवेलायां शक्त्या निजवित्तानुसारेण प्रदेयं दानं भवति, परेषां परपुरुषाणां युवतिजनकथातः मूकभावः । परस्त्रीणामप्रशंसनमित्यर्थः । तृष्णास्रोतोविबन्धः तृष्णा लोभः सैव स्रोतो जलप्रवाहस्तस्य विबन्धः । परिग्रहपरिमाणमित्यर्थः । गुरुषु च दीक्षादेशकेषु विनतिर्नमस्कारः, सर्वभूतानुकम्पा सर्वेषु निर्गुणेषु गुणवत्सु च भूतेषु अनुकम्पा कारुण्यम्, सामान्यं सर्वसाधारणः सर्वशास्त्रेषु जैनशैवादिषु ग्रन्थेषु श्रेयसां पुण्यानां एष मार्गः अयं मार्गः । कथंभूतोऽयं मार्गः । अनुपहतविधिः । एतं मार्गं कोऽपि नोल्लङ्घत इत्यर्थः । इति कथं केन प्रकारेण एतदिदं सर्वपथीनं सर्वसाधारणं वररुचिः कात्यायनः उवाच ॥

होमेत्यादि । हे पार्थ हे अर्जुन, होमस्नानतपोजाप्यब्रह्मचर्यादयः होमश्च अग्निमुखे देवतानामाहुतिः, स्नानं च गङ्गाद्वारादौ जलस्नानम् । उक्तं च—'गङ्गाद्वारे कुशावर्ते बिल्वके नीलपर्वते । स्नात्वा कनखले तीर्थे संभवेन्न पुनर्भवे ॥' तपश्च सांतपनम् । उक्तं च— 'अहं सायमहं प्रातस्त्र्यहमद्यादयाचितम् । अहं परं च नाश्नीयात्कृच्छ्रं सांतपनं स्मृतम् ॥' जाप्यं मन्त्रजापः, ब्रह्मचर्यं च शीलरक्षणं होमस्नानतपोजाप्यब्रह्मचर्याणि तानि आदिर्येषां सत्यवचनादीनां ते तथोक्ता एते गुणाः हिंसारते पुंसि चाण्डालसरसीसमाः चाण्डालतडागोदकवदग्राह्याः । इतीदृशीयमेषा व्यासोक्तिर्व्यासस्य सत्यवतीपुत्रस्य उक्तिर्वचनं कथं वर्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे रतः।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम्॥

इति कथमिदमाह **वैवस्वतो मनुः**।

अवक्षेपेण हि सतामसतां प्रग्रहेण च।
तथा सत्त्वेष्वभिद्रोहादधर्मस्य च कारणात्॥
विमाननाच्च मान्यानां विश्वस्तानां च घातनात्।
प्रजानां जायते लोपो नृपतेश्चायुषः क्षयः॥

कथमिदमभाषत षाड्गुण्यप्रस्तावे **भारद्वाजः**।

चातुर्मास्येष्वर्धमासिकम्, दर्शपौर्णमासयोश्चातूरात्रिकम्, राजनक्षत्रे गुरुपर्वणि च त्रैरात्रिकम्, एवमन्यासु चोपहतासु तिथिषु द्विरात्रमेकरात्रं वा सर्वेषामघातं घोषयेदायुर्बलवृद्ध्यर्थमिति कथमुपनिषदि वदति स्म **विशालाक्षः**।

भूषितोऽपीति। भूषितोऽपि गृहस्थोऽपि चरेत्कुर्यात्। कम्। धर्मम्। अपिशब्दात् यतिरपि धर्मं चरेत्। यत्र तत्र यस्मिन् कस्मिन् ब्रह्मचर्याश्रमे वानप्रस्थाश्रमे भिक्षुकाश्रमे वा रतः धर्मं चरेत्। स कथंभूतः। सर्वेषु भूतेषु जीवेषु समः समतापरिणामः। लिङ्गं जटिमुण्डीत्यादिकं चिह्नं धर्मकारणं धर्महेतुर्न भवति। इतीदृशमिदमेतद्वैवस्वतो मनुः आदित्यपुत्रो मनुः कथमाह कथं ब्रवीति॥

अवक्षेपेणेति। अवक्षेपेण तिरस्कारेण हि निश्चयेन सतां साधूनां शिष्टानाम्, असतामसाधूनां प्रग्रहेण स्वीकारेण च, तथा तेनैव प्रकारेण सत्त्वेषु अभिद्रोहात् वधकारणात्, अधर्मस्य च कारणात् पापस्य प्रयोजनात्,

विमाननाच्चेति। मान्यानां विमाननात् भङ्गकरणात्, विश्वस्तानां च घातनात्, प्रजानां लोकानां लोपो विनाशो जायते। नृपतेश्च नरेन्द्रस्य आयुषः क्षयो जायते आयुस्त्रुट्यति। इदमेतद्वचनं षाड्गुण्यप्रस्तावे संधिविग्रहयानासनसंश्रयद्वैधीभावाः षाड्गुण्याः तदवसरे भारद्वाजो द्विजः कथमभाषत कथमुक्तवान्॥

चातुर्मास्येषु वर्षाकाले अर्धमासिकं पञ्चदश दिनानि अघातं घोषयेत्। दर्शपौर्णमासयोः ....चातूरात्रिकं................. । राजनक्षत्रे यस्मिन्नक्षत्रे राज्ञो जन्म बभूव, गुरुपर्वणि च संक्रान्त्यादिषु त्रैरात्रिकं त्रिदिनानि सर्वेषां अघातं घोषयेत्। एवममुना प्रकारेण अन्यासु च अपरासु च उपहतासु ग्रहणादिदूषितासु तिथिषु द्विरात्रं द्वे दिने एकरात्रं वा तस्मिन्नेव वासरे सर्वेषां अघातं घोषयेत् आयुर्बलवृद्ध्यर्थम्। इतीदृशं उपनिषदि वेदान्तशास्त्रे विशालाक्षः प्रभाकरऋषिः कथं वदति स्म कथमुवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आहारः साधुजननिन्दितो मधुमांसादिरिति कथं चेदं मृगयोपयोगानन्दं शबरवृन्दं निन्दितावादि **बाणेन** ।

माता—(स्वगतम् ।) अहो, मदीये सुते सांप्रतं जैनजनवात इव लग्नः प्रतिभासते । विषमश्च खलु भवत्ययं जनः, यस्माच्चिरं समयान्तरोपरचितप्रतीकाराण्यप्यन्येषां मनांसि प्रायेण पश्यतोहर इव हरत्यार्हतो लोकः । तद्वासनावासितं हि चेतो न ब्रह्मणापि शक्यतेऽन्यथाकर्तुम् । दुश्चिकित्स्यश्च खलु करिणां कूटपाकल इव प्राणिनां क्षपणकोपनीतश्चित्तस्याभिनिवेशः । कथितं च मेऽपरेद्युरेव **शिवभूतेः** पुरोहितस्यात्मजेनं **शिवशर्मणा,** यथा—अम्बादेवि, राजाद्य भूमणिकायां गतस्तरुमूलनिवासिनमवाससम**िन्द्रार्चितचरण**नामधेयमद्राक्षीत् । तद्दर्शननिवारणे च कृतकापेयमपि मामवमत्य तेन सह महतीं वेलामिति प्रश्नोत्तरपरम्पराप्रवृत्तमुदन्तमकार्षीत्—

आहारो भोजनं साधुजननिन्दितः साधुलोकगर्हितो मधुमांसादिरितीदृशं इदमेतच्च मृगयोपयोगानन्दं आखेटकजीवनानन्दं शबरवृन्दं निन्दिता गर्हिता बाणेन महाकविना कथमवादि कथमुक्तम् ॥

माता स्वगतं निजमनसि चिन्तयति—अहो आश्चर्यम् । मदीये सुते सांप्रतं जैनजनवातः जैनलोकवासना लग्न इव संगत इव प्रतिभासते मम चेतसि चमत्करोति । खलु वाक्यालंकारे । अयं जन एष लोको विषमश्च असाध्यश्च भवति । यस्मात् कारणात् चिरं दीर्घकालं समयान्तरोपरचितप्रतीकाराण्यपि समयान्तरैः शास्त्रान्तरैरुपरचिताः प्रतीकाराः चिकित्सितानि येषां मनसां तानि समयान्तरोपरचितप्रतीकाराणि अपरशासनविरचितवासनान्यपि अन्येषां अपरेषां लोकानां मनांसि प्रायेण अर्हतो लोको-जैनो लोको, हरति निजवासनां लगयति स्वशासनं प्रत्यानयति। क इव । पश्यतोहर इव चौर इव। तद्वासनावासितं जैनलोकभावनावासितं चेतो मनः ब्रह्मणा सृष्टिकर्त्रापि अन्यथाकर्तुं जैनवासनारहितं विधातुं न शक्यते न समर्थेन भूयते। कथम्। हि स्फुटमेतत्। क्षपणकोपनीतः दिगम्बरमुनिप्रापितः चित्तस्य मनसोऽभिनिवेशोऽभिप्रायो दुश्चिकित्स्यश्च दुःप्रतीकारश्च भवति। कथम्। खलु निश्चयेन। क इव। करिणां कूटपाकल इव हस्तिनां सद्यःप्राणहरज्वर इव । उक्तं च—'पाकलं कुलभैषज्ये पाकलो द्विरदज्वरः' । कथितं च निरूपितं च मे मम अपरेद्युरेव अन्यस्मिन्नहन्येव शिवभूतेः शिवभूतिनाम्नः पुरोहितस्य राजगुरुब्राह्मणस्य आत्मजेन शिवशर्मणा। किं कथितम्। यथा हे अम्बादेवि, राजा श्रीयशोधरः अद्य अस्मिन्नहनि भूमणिकायां वनक्रीडायां गतः तरुमूलनिवासिनं वृक्षमूलस्थितं इन्द्रार्चितचरणनामधेयं अवाससं दिगम्बरं अद्राक्षीद्विलोकितवान्। तद्दर्शननिवारणे च तद्गोष्ठीनिषेधे च कृतकापेय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

को भगवन्निह धर्मो यत्र दया भूप सर्वसत्त्वानाम् ।
को नामाप्तो यत्र हि न सन्ति सांसारिका दोषाः ॥
तज्ज्ञाने क उपायः शास्त्रं यच्चैकवाक्यतायातम् ।
तर्हि तपः किं विषयव्यासङ्गविनिग्रहो यत्र ॥
जीवः को यत्रैते भवन्ति बुद्ध्यादयः स्वसंवेद्याः ।
तस्यामूर्तस्य सतः शरीरबन्धः कथं भवति ॥
स्वकृतैः कर्मभिरेष प्रयाति जीवः शरीरबन्धं वा ।
वातेरितैः परागैर्भवति यथा संगमो नभसः ॥

मपि विहितचपलत्वमपि मां शिवशर्माणमवमत्य अवगणय्य तेन सह इन्द्रार्चितचरणनाम्ना दिगम्बरेण सह महतीं वेलां इतीदृशं उदन्तं वार्तामकार्षीत् चकार । कथंभूतमुदन्तम् । प्रश्नोत्तरपरम्पराप्रवृत्तं मदीयेन राज्ञा प्रश्नपरम्परा कृता, तेन तदुत्तरपरम्परा दत्ता, तस्यां प्रश्नोत्तरपरम्परायां प्रवृत्तः संजातः प्रश्नोत्तरपरम्पराप्रवृत्तस्तम् ॥

क इति । राजा प्राह—हे भगवन् हे इन्द्रार्चितचरणमुनिस्वामिन्, इह संसारे धर्मः कः । भगवानाह—हे भूप, सर्वसत्त्वानां सगुणनिर्गुणप्राणिनां यत्र यस्मिन् धर्मे दया कारुण्यं वर्तते स धर्मः । राजा प्राह—हे भगवन्, को नाम आप्तो देवो वर्तते । मुनिराह—यत्र दोषाः हि निश्चयेन न सन्ति । के दोषाः ! सांसारिकाः संसारे भवाः सांसारिकाः । सांसारिका दोषाः क्षुदादयः । उक्तं च—'क्षुत्पिपासा जरातङ्का जन्मान्तकभयाः स्मयाः । न रागद्वेषमोहाश्च यस्यास्ताः सप्त कीर्तिताः ॥' चकाराच्चिन्तारतिनिद्राविषादस्वेदविस्मया गृह्यन्ते । इत्यष्टादश दोषाः ॥

तज्ज्ञान इति । राजा प्राह—तज्ज्ञाने आप्तपरिज्ञाने क उपायः । मुनिराह—एकवाक्यतायातं पूर्वापरविरोधरहितं यच्च शास्त्रम् । राजा प्राह—तर्हि हे भगवन्, तपः किं दीक्षा का । मुनिराह—यत्र यस्मिन् तपसि दीक्षायां विषयव्यासङ्गविनिग्रहः विषयाणां स्पर्शरसगन्धरूपशब्दानां व्यासङ्गः संगतिस्तस्य विनिग्रहः परिहारो वर्तते ॥

जीव इति । राजा प्राह—जीवः क आत्मा को वर्तते । मुनिराह—यत्र जीवे एते अमी बुद्ध्यादयो बुद्धिसुखदुःखादयो भवन्ति वर्तन्ते । बुद्ध्यादयो गुणाः कथंभूताः । स्वसंवेद्याः स्वेनैव संवेद्या आत्मनैव ज्ञापनीयाः । राजा प्राह—हे भगवन्, तस्यात्मनः अमूर्तस्य सतो मूर्तिरहितस्य शरीरबन्धः कथं केन प्रकारेण भवति ॥

स्वकृतैरिति । मुनिराह—स्वकृतैरात्मनोपार्जितैः कर्मभिः कृत्वा एष जीवः शरीरस्य बन्धं मेलनं प्रयाति गच्छति । यथा येन प्रकारेण वातेरितैर्वायुप्रेरितैः परागै रजोभिः नभस आकाशस्य संगमो भवति मेलापकः स्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तैरेव गर्भवासे स नीयते निजफलोपभोगार्थम् ।
अशुचिनि मदनद्रव्यैर्निपात्यते श्रोत्रियो यद्वत् ॥
अस्मादृशां स धर्मः कथं तु निजशक्तितो व्रतग्रहणात् ।
किं व्रतमिह वाञ्छाया यो दर्शनपूर्वको नियमः ॥
किं दर्शनमिदमाहुर्या श्रद्धा युक्तितः पदार्थेषु ।
के पुनरमी पदार्था यैरेतद्वर्तते जगच्चक्रम् ॥

तत्प्रभृति न साभिलाषं सेवते मधूनि, न मांसमभिनन्दति, नाखेटकमनुमन्यते, न हव्यकव्यार्थमालभते पशून्, श्रुतिस्मृतिवाक्येषु च प्रतिकूलतया प्रयच्छत्युत्तराणीति । (प्रकाशम् । मुक्तौष्ठतया प्रसार्य समीपवर्तिनः ।)

तैरिति। तैरेव कर्मभिरेव स जीवः गर्भवासे संमूर्छनगर्भोपपादनलक्षणानुभवजन्मस्थाने नीयते प्राप्यते । किमर्थं गर्भवासे नीयते । निजफलोपभोगार्थं निजस्य कर्मणः शुभाशुभलक्षणस्य फलस्य सुखदुःखलक्षणस्य उपभोगार्थं अनुभवनार्थम् । यद्वत् यथा मदनद्रव्यैर्धात्रीकोद्रवादिकैर्द्रव्यैः श्रोत्रियश्चतुर्वेदपाठको ब्राह्मणः अशुचिनि विष्ठायां निपात्यते निक्षिप्यते ॥

अथ राजा प्राह—**अस्मादृशामिति**। हे भगवन्। तु इति प्रश्ने । स पूर्वोक्तः सर्वसत्त्वदयालक्षणो धर्मः अस्मादृशां अस्मद्विधानां पुरुषाणां कथं केन प्रकारेण भवति । मुनिराह—निजशक्तितः आत्मशक्त्यनुसारेण व्रतग्रहणात् व्रतस्वीकारात् । राजा प्राह—हे भगवन्, इह संसारे व्रतं किम्। मुनिराह—हे राजन्, वाञ्छाया यो नियमो निरोधस्तद्व्रतम् । कथंभूतो नियमः । दर्शनपूर्वकः सम्यक्त्वपूर्वकः ॥

राजा प्राह—**किमिति**। हे भगवन्, इदमेतत् दर्शनं सम्यक्त्वं किं आहुः किं ब्रुवन्ति मुनयः । मुनिराह—हे राजन्, या पदार्थेषु जीवाश्रवबन्धसंवरनिर्जरामोक्षलक्षणोपलक्षितेषु सप्तसु तत्त्वेषु श्रद्धा रुचिस्तद्दर्शनम् । श्रद्धा कथम् । युक्तितः तर्कशास्त्रानुसारेण । राजा प्राह—हे भगवन्, अमी एते पुनश्च पदार्थाः के वर्तन्ते । मुनिराह—यैः पदार्थैरेतदिदं जगच्चक्रं त्रैलोक्यं वर्तते भवति । प्रश्नोत्तरालंकारः ॥

तत्प्रभृति इन्द्रार्चितचरणमेलापकमादिं कृत्वा मधूनि मद्यादीनि क्षौद्राणि साभिलाषं रुचिपूर्वकं न सेवते न खादयति, मांसं नाभिनन्दति न प्रशंसति, आखेटकं पापर्धिं नानुमन्यते नानुमोदते, हव्यकव्यार्थं देवपितृकार्ये पशून् तिरश्चः नालभते न हिनस्ति, श्रुतिस्मृतिवाक्येषु च प्रतिकूलतया पराङ्मुखतया उत्तराणि प्रयच्छति प्रतिवचनानि ददाति । प्रकाशं चन्द्रमतिः प्रकटं वदति—किं कृत्वा पूर्वम् । समीपवर्तिनो लोकान् मुक्तौष्ठतया अधरं दीर्घं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रे मम पुत्रस्य च तन्त्रस्य च सर्वस्वखादिनः, प्रजानां च लञ्चालुञ्चाः, निशाचराः, किमेवमस्मत्पुत्रो भवतां नाशयितुं युक्तम्। ननु सदाहं निवारयामि भवतः, यदुतायमद्याप्यपरिपक्वबुद्धिः व्यलीकवैदग्ध्यात्मसमारोपितपण्डितंमन्यभावः श्रीविलासरसवासनासंजातसुकुमारप्रकृतिश्चन्द्रगहिल इव प्रसिद्धेष्वपि वस्तुषु विस्मयोत्फुल्ललोचनश्छिद्यमानगलश्छगल इवाहितकारिणोऽपि जनस्य मुग्धतयातीवमुखनिरीक्षणकुतूहली कदाचिदपि जगन्मोहनाभ्यस्तकौशलैरिन्द्रजालकैरिव दिगम्बरैर्न संगमयितव्य इति कोपसकम्पां वाचमुच्चारयन्ती तर्जयित्वा च मनाग्भ्रूक्षेपेण माम्—अहो असंजातबुद्धिपरिपाक चार्वाक, समाकर्णय। ज्ञातः खलु भवतोऽभिप्रायः। तत्राहमेव समर्था दातुमुत्तरमित्यभिप्रेत्येदमवादीत्—

कृत्वा प्रसार्य आलम्भं दत्वा। रे अरे मम पुत्रस्य तन्त्रस्य च सैन्यस्य च सर्वस्वखादिनः सर्वधनभक्षकाः, रे प्रजानां च लञ्चालुञ्चा उत्कोटग्राहकाः, रे निशाचराः पिशाचाः, अस्मत्पुत्रोऽस्माकं सुतः भवतां युष्माकं एवं दिगम्बरसंगमकरणप्रकारेण नाशयितुं किं युक्तं किं विनाशयितुं योग्यो भवति। ननु सदा अहं भवतो युष्मान् निवारयामि निषेधामि, यदुत यत् अयं अस्मत्पुत्रः अद्यापि अपरिपक्वबुद्धिर्वर्तते। अयं व्यलीकवैदग्ध्यात्मसमारोपितपण्डितंमन्यभावः व्यलीकेन असत्येन वैदग्ध्येन विद्वत्तया आत्मनि समारोपित आनीतः पण्डितंमन्यभावो पण्डितमात्मानं मन्यते पण्डितंमन्यः तस्य भावोऽभिप्रायो येन स तथोक्तः। पुनः कथंभूतोऽयम्। श्रीविलासरसवासनासंजातसुकुमारप्रकृतिः श्रियो विलासस्य रसस्य भोगानामनुरागस्य वासना तया संजाता सुकुमारा प्रकृतिः स्वभावो यस्य स तथोक्तः। या गर्भिणी स्त्री चन्द्रग्रहणे सति घरायां(?) स्वपिति तस्याः पुत्रश्चन्द्रग्रहिलो भवति। तद्वदयमपि प्रसिद्धेष्वपि वस्तुषु विख्यातेष्वपि पदार्थेषु विस्मयोत्फुल्ललोचनो वर्तते। विस्मयेन आश्चर्येण उत्फुल्ले लोचने वितर्के सितनेत्र इदं किमिति वदन्ति। छिद्यमानगलः द्विधाक्रियमाणकण्ठः छगलश्छाग इव अहितकारिणोऽपि खाटकिनो जनस्य मुग्धतया अविज्ञातस्वरूपत्वेन अतीवातिशयेन मुखनिरीक्षणकुतूहली वक्त्रालोकनविनोदवान्। अरे कदाचित् अपि दिगम्बरैः सह अस्मत्पुत्रः न संगमितव्यः न मेलनीय इति। कथंभूतैर्दिगम्बरैः। जगन्मोहनाभ्यस्तकौशलैः जगतां मोहने वशीकरणे अभ्यस्तमनुशीलितं कौशलं प्रवीणत्वं यैस्ते तथा तैः। पुनः कथंभूतैर्दिगम्बरैः। इन्द्रजालकैरिव इन्द्रजालविद्याविद्भिरिव। इति कोपसकम्पां कोपेन कम्पवतीं वाचं वाणीमुच्चारयन्ती मनाग्भ्रूक्षेपेण तर्जयित्वा निर्भर्त्स्य अहो यशोधर असंजातबुद्धिपरिपाक अनुत्पन्नमनुषीभूय..............

............इदं वक्ष्यमाणलक्षणोपलक्षितप्रकारेण अवादीज्जगाद। इदं कथमिति चेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न तर्पणं देवपितृद्विजानां स्नानस्य होमस्य न चास्ति वार्ता ।
श्रुतेः स्मृतेर्बाह्यतरे च धीस्ते धर्मे कथं पुत्र दिगम्बराणाम् ॥
उद्धाः पशूनां सदृशं ग्रसन्ते ये लज्जया शौचगुणेन हीनाः ।
त्वत्तः परस्तैः सह को हि गोष्ठीं करोतु देवद्विजनिन्दकैश्च ॥
नामापि पूर्वं न समस्त्यमीषामभूत्कलौ दर्शनमेतदीयम् ।
देवो मनुष्यः किल सोऽप्यनेकस्त एवमिच्छन्ति च निर्विचारम् ॥
धर्मे प्रमाणं खलु वेद एव वेदात्परं दैवतमत्र नास्ति ।
यो वेद सम्यङ् न हि वेदमेनं वर्णाश्रमाचारमसौ न वेद ॥
अथास्ति भक्तिस्तव दैवतेषु हरं हरिं वार्चय भास्करं वा ।
नयन्ति हृष्टाः स्वपुरीं क्षणेन तुष्टाः प्रयच्छन्ति च राज्यमेते ॥

नेति । हे पुत्र, एतेषां दिगम्बराणां धर्मे देवपितृद्विजानां तर्पणं न वर्तते, स्नानस्य होमस्य च वार्तापि नास्ति, श्रुतेर्वेदात् स्मृतेर्धर्मशास्त्रात् एते वाह्यतरे अतीववाह्या वर्तन्ते, ईदृग्विधानां दिगम्बराणां धर्मे ते तव धीः बुद्धिः कथं वर्तते ॥

उद्धा इति । ये दिगम्बराः उद्धाः ऊर्ध्वस्थिताः पशूनां सदृशं तिरश्चां समानं ग्रसन्ते भुञ्जन्ते । ये लज्जया अपत्रपया शौचगुणेन च मृत्तिकया पायुप्रक्षालनेन हीना वर्तन्ते । तैः दिगम्बरैः सह त्वत्तः परस्त्वत्परः कः पुमान् गोष्ठीं वार्तां करोतु विदधातु । कथम् । हि स्फुटम् । कथंभूतैः दिगम्बरैः । देवद्विजनिन्दकैश्च हरिहरहिरण्यगर्भादिदेवानां द्विजानां च ब्राह्मणानां निन्दकैः अपवादकारकैश्च ॥

नामेति । हे पुत्र, एतदीयं अमीषां दिगम्बराणां पूर्वं कृतयुगत्रेताद्वापरादिषु नामापि न समस्ति वर्तते । एतदीयं दर्शनं दिगम्बरीयं पूर्वं न मतं कलौ काले अभूद्बभूव । ते दिगम्बरा एवं अमुना प्रकारेण निर्विचारं यथा भवत्येवं इच्छन्ति च मन्यन्ते च । एवं कथमिति चेत् दिगम्बराणां मते मनुष्यः किल देवः सोऽपि अनेको वहुगणनः ॥

धर्म इति । हे पुत्र, धर्मे खलु वेद एव श्रुतिरेव प्रमाणं वर्तते। वेदात्परं अत्र संसारे दैवतं देवो नास्ति । वेद एव दैवतमित्यर्थः । यः पुमान् सम्यक्प्रकारेण एनं वेदं इमं वेदं न हि नैव वेद विजानाति । उक्तं च—'अहो ब्रुवश्च पञ्चानां नवानां च विदेस्तथा । अडादयो निपात्यन्ते तिवादीनां यथाक्रमात् ॥' यः पुमान् वेदं न वेद असौ पुमान् वर्णाश्रमाचारं चतुर्वर्णचतुराश्रमाचारं न वेद न जानाति ॥

अथेति । हे पुत्र, अथ चेत् तव भवतो दैवतेषु भक्तिरनुरागः अस्ति वर्तते । तर्हि त्वं हरं श्रीमहादेवम्, हरिं वा लक्ष्मीकान्तम्, वा अथवा भास्करं श्रीसूर्यमर्चय पूजय ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा—(स्वगतम्।) अहो, निसर्गादङ्गारमलिने हि मनसि न भवति खलु सुधासंबन्धोऽपि शुद्धये। यतः।

अन्तर्न विज्ञाय मुधानुरागिता स्वभावदुष्टाशयता विमूढता।
युक्तोपदेशे च विगृह्य वादिता भवन्त्यमी तत्त्वनिबन्धहेतवः॥

अपि च।

यः कार्यवादेषु करोति संधां स्वपक्षहानौ च भवेद्विलक्ष्यः।
तत्र स्वयं सामपरेण भाव्यं केनाप्युपायेन फलं हि साध्यम्॥
इयं हि तावज्जननी मदीया राज्यस्य साक्षादधिदेवता च।
सर्वं तदस्या घटते विधातुं प्रभुर्यदेवेच्छति तत्करोति॥

एते देवा हृष्टाः सन्तः स्वपुरीं निजनगरीं रुद्रलोकं विष्णुलोकं उर्वन्तरिक्षं नयन्ति। कथम्। क्षणेन शीघ्रतया। एते देवा रुष्टाः[1] कोपं प्राप्ताः सन्तः राज्यं च प्रयच्छन्ति ददन्ति॥

राजा श्रीयशोधरमहाराजः स्वगतं आत्मगतं चिन्तयति—अहो आत्मन्, निसर्गात् अङ्गारमलिने हि निश्चयेन मनसि न भवति खलु सुधासंवन्धोऽपि शुद्धये अमृतेन प्रक्षालनमपि निर्मलत्वात् न संजायते॥

यतः कारणात्। **अन्तरिति**। अन्तश्चित्तं न विज्ञाय अज्ञात्वा मुधानुरागिता वृथास्नेहः, स्वभावदुष्टाशयता वा स्वभावेन दुष्टहृदयत्वं तत्, तृतीयं विमूढता अज्ञानत्वम्, चतुर्थं युक्तोपदेशे च युक्तार्थेनैव विगृह्य बलात्कारेण वादिता वादित्वम्। अमी एते चत्वारः पदार्थाः तत्त्वनिवन्धहेतवः तत्त्वज्ञाननिषेधकारणानि भवन्ति संजायन्ते॥

अपि च तथा च। **य इत्यादि**। यः पुमान् कार्यवादेषु कर्तव्यविचारेषु संधां प्रतिज्ञां करोति। यद्येवं न भवति तदा मम जिह्वा छिद्यते इत्यादि प्रतिज्ञां करोति। स्वपक्षहानौ च निजपक्षनिग्रहस्थाने सति विलक्ष्यः निष्प्रतिपत्तिको भवेत्। तत्र तस्मिन् पुरुषे स्वयमात्मनः सामपरेण मृदुभाषिणा भाव्यं भवितव्यं भवनीयम्। केनाप्युपायेन फलं साध्यम्। कथम्। हि स्फुटमिति शेषः॥

इयमित्यादि। इयमम्बादेवी हि निश्चयेन तावत्प्रथमतो मदीया मह्यं हिता जननी माता वर्तते। न केवलं जननी, राज्यस्य साक्षात् प्रत्यक्षीभूता अधिदेवता च अधिष्ठात्री वर्तते। तत्तस्मात् कारणात् अस्या अम्बादेव्याः सर्वं मयि निर्घाटनादिकं विधातुं कर्तुं घटते संगच्छते। अमुमेवार्थं अर्थान्तरन्यासेन दृढयति—प्रभुः स्वामी यदेव इच्छति तत्करोति॥

---

१. 'तुष्टास्तोषं' इति स्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(प्रकाशम् ।)

अज्ञानभावादथ चापलाद्वा कारुण्यतो वाधिगतावकाशः ।
पूर्वं त्वयैवाहितकैर्गुणैर्वा ब्रुवे यदि क्षन्तुमनास्त्वमम्ब ॥
पुत्रस्य पित्रानुचरस्य भर्त्रा शिष्यस्य वादो गुरुणा च सार्धम् ।
सुशिक्षितस्यापि सुमेधसोऽपि न श्रेयसे स्यादिह नाप्यमुत्र ॥
देवाभिषेकार्चनवन्दनानि जपप्रसंख्याश्रुतपूजनानि ।
यथा स लोकः कुरुते तथाम्ब प्रष्टव्य एवैष जनो भवत्या ॥
मर्त्येषु चेत्सद्मसु नाकिनां वा विधाय पुण्यं पितरः प्रयाताः ।
तेषामपेक्षा द्विजकाकभुक्तैः पिण्डैर्भवेद्वर्षकृतैर्न कापि ॥
गत्यन्तरे जन्मकृतां पितॄणां स्वकर्मपाकेन पुराकृतेन ।
तत्रापि किं तेन न दृष्टमेतत्तृप्तिः परेषां परतर्पिणीति ॥

राजा प्रकाशं स्फुटं ब्रवीति—**अज्ञानेत्यादि** । हे अम्ब, यदि चेत् अहं ब्रुवे उपन्यस्यामि तत्सर्वं भवती क्षन्तुमनाः क्षमाकर्तुंहृदया भव । अहं कस्माद्ब्रुवे । अज्ञानभावात् अविज्ञातस्वरूपत्वात्, अथवा चापलाद्वा ब्रुवे, वा अथवा ....पूर्वं त्वयैव भवत्यैव आहितकैर्गुणैः अहं ब्रुवे । तत्क्षन्तुमर्हसीत्यर्थः ॥

पुत्रस्येत्यादि । हे मातः, पित्रा जनकेन सार्धं सह पुत्रस्य वादः इह अस्मिन् जन्मनि श्रेयसे शुभाय न स्यान्न भवेत्, अमुत्र भाविभावेऽपि श्रेयसे न स्यात् । तथा अनुचरस्य किंकरस्य भर्त्रा स्वामिना सह वादः श्रेयसे न स्यात्। तथा शिष्यस्य गुरुणा सार्धं सह वादः श्रेयसे न भवति। कथंभूतस्य पुत्रस्य अनुचरस्य शिष्यस्य च। सुशिक्षितस्यापि विद्योपादानं प्रापितस्यापि दत्तविद्यादानस्यापि । पुनः कथंभूतस्य । सुमेधसोऽपि शोभनबुद्धेरपि ॥

देवेत्यादि । हे अम्ब, यथा येन प्रकारेण प्रशस्त आर्हतो लोको देवाभिषेकार्चनवन्दनानि देवस्नपनपूजनस्तवनानि कुरुते, तथा जपप्रसंख्याश्रुतपूजनानि मन्त्रजालापध्यापनभारतीचर्चनानि कुरुते विधत्ते, तथा तेनैव प्रकारेण एष जनो लोको भवत्या त्वयैव प्रष्टव्यः । अहं किं कथयामीत्यर्थः ॥

मर्त्येष्वित्यादि । हे मातः, पितरः पूर्वजाः पुण्यं शुभं कर्म विधाय कृत्वा चेद्यदि मर्त्येषु मनुष्यभवेषु वा अथवा नाकिनां सद्मसु स्वर्गलोकेषु प्रयाता गतास्तर्हि तेषां पितॄणां द्विजकाकभुक्तैः ब्राह्मणवायसास्वादितैः वर्षकृतैः संवत्सरविहितैः कर्णागतैश्च पिण्डैः अपेक्षा न कापि भवेत् न काचित्संजायेत ॥

गत्यन्तर इत्यादि । हे मातः, पुराकृतेन पूर्वोपार्जितेन स्वकर्मपाकेन निजकर्मोदयेन गत्यन्तरे अन्यगतौ जन्मकृतां कृतजन्मनां पितॄणां पूर्वजनानां तत्रापि गत्यन्तरेऽपि तैस्तैः पितृभिः किमेतत्तेन नैव दृष्टं विलोकितम् । एतत्किम् । परेषां ब्राह्मणादीनां तृप्तिस्तर्पणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येनापि केनापि मिषेण मान्यैर्धर्मो विधेयः स्वहितैकतान्यैः।
अनेन कामेन कृतः पुराणैर्मार्गोऽयमात्माभ्युदयप्रवीणैः॥
निर्निमित्तं न कोऽपीह जनः प्रायेण धर्मधीः।
अतः श्राद्धादिकाः प्रोक्ताः क्रियाः कुशलबुद्धिभिः॥

किं च।

पर्वतीर्थातिथिश्राद्धवारवासरतारकाः।
नित्यं दातुमशक्तानां पुण्यायोक्ताः पुरातनैः॥
जन्मैकमात्माधिगमो द्वितीयं भवेन्मुनीनां व्रतकर्मणा च।
अमी द्विजाः साधु भवन्ति तेषां संतर्पणं जैनजनः करोति॥
द्वयेन मार्गेण जगत्प्रवृत्तं गृहस्थवृत्त्या यतिकर्मणा च।
तस्य द्वयस्यापि विभिन्नसृष्टेः शीतोष्णवन्नैकतया प्रवृत्तिः॥

परतार्पिणी भवति पितॄणां तर्पिका भवतीति किं तेन न दृष्टं न ज्ञातम्। तेऽपि श्राद्धादिकं न कुर्वन्ति न च तथा वर्तन्ते॥

येनापीत्यादि। हे मातः, येनापि केनापि मिषेण छद्मना मान्यैः सत्पुरुषैः धर्मो विधेयः। कथंभूतैर्मान्यैः। स्वहितैकतान्यैः आत्महिततन्निष्ठैः। अनेन कामेन अनया इच्छया पुराणैश्चिरंतनैरयं मार्गः श्राद्धलक्षणो मार्गः कृतो विहितः। कथंभूतैः पुराणैः। आत्माभ्युदयप्रवीणैर्निजात्मसौख्याप्राप्तिविचक्षणैः॥

निर्निमित्तमित्यादि। हे मातः, इह संसारे कोऽपि जनो निर्निमित्तं कारणं विना प्रायेण धर्मधीः धर्मबुद्धिर्न वर्तते। अत एतस्मात् कारणात् कुशलबुद्धिभिः श्राद्धादिकाः क्रियाः प्रोक्ताः॥

किं चास्ति विशेषः। **पर्वेत्यादि**। नित्यं सर्वकालं दातुं दानं कर्तुमशक्तानां पुरुषाणां पुरातनैश्चिरंतनैरेते अवसराः पुण्याय प्रोक्ताः। एते के। पर्व च अमावास्यादिकम्, तीर्थं च गङ्गागोदावर्यादिकम्, अतिथयश्च प्राघूर्णकाः, श्राद्धं च पक्षमध्ये भोजनदानम्, वारश्च आदित्यादिकः, वासरश्च यस्मिन् देवो पित्रादिको मृतः, तारका रोहिण्यादिनक्षत्रम्, पर्वतीर्थातिथिश्राद्धवारवासरतारकाः॥

जन्मेत्यादि। एकं जन्म आत्माधिगमः आत्मलाभः। उत्पत्तिरित्यर्थः। गर्भान्निःसरणमित्यर्थः। द्वितीयं जन्म व्रतकर्मणा च दीक्षाकर्मणा मुनीनां यतीनां भवेत्संजायते। अमी एते मुनयो द्विजा ब्राह्मणाः साधु भवन्ति समीचीनतया संजायन्ते तेषां मुनिलक्षणानि द्विजानां संतर्पणं चतुर्विधेन दानेन संप्रीणनं जैनजन आर्हतो लोकः करोति विदधाति। कथं भवत्योक्तं द्विजानां संप्रीणनं जैनानां न वर्तते॥

द्वयेनेत्यादि। हे मातः, द्वयेन मार्गेण जगदयं मनुष्यलोकः प्रवृत्तं प्रचरितम्। तत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्नात्वा यजेताप्तमथागमं वा पठेद्यदि ध्यानमुपाचरेद्वा ।
स्नानं भवेदेव गृहाश्रितानां स्वर्गापवर्गागमसंगमाय ॥
सरित्सरोवारिधिवापिकासु निमज्जनोन्मज्जनमात्रमेव ।
पुण्याय चेत्तर्हि जलेचराणां स्वर्गः पुरा स्यादितरेषु पश्चात् ॥

तदाह—

रागद्वेषमदोन्मत्ताः स्त्रीणां ये वशवर्तिनः ।
न ते कालेन शुद्ध्यन्ति स्नानात्तीर्थशतैरपि ॥

षट्कर्मकार्यार्थमथान्नशुद्ध्यै होमो भवेद्भूतबलिश्च नाम ।
सुधान्धसः स्वर्गसुखोचिताङ्गाः खादन्ति किं वह्निगतं निलिम्पाः ॥

किम् । गृहस्थवृत्त्या गृहस्थाचारेण, यतिकर्मणा च यत्याचारेण च, तस्य द्वयस्यापि गृहस्थ-यतिमार्गद्वयस्यापि एकत्वेन प्रवृत्तं न वर्तते । कथंभूतस्य तस्य । विभिन्नसृष्टेः पृथगाचारस्य । किं तत् । शीतोष्णवत् । यथा शीतं पृथग्गुणं पृथक् तथा गृहधर्मः पृथक् यतिधर्मः पृथक् ॥

स्नात्वेत्यादि । स्नात्वा आप्तं सर्वज्ञवीतरागमर्हन्तं यजेत, अथ अथवा अथानन्तरं वा आगमं जैनपुस्तकं आगममयीं सरस्वतीमूर्तिं वा यजेत पूजयेत् । तथा चोक्तम्—'बारह अङ्गं जिज्जा दंसणतिलया चरित्त वत्थ हरा च । उदंमुव्वाहरणा ये वेद द्वावसुय देवी यदि वा ॥' स्नात्वा पठेत् अध्ययनं कुर्यात्, वा अथवा ध्यानमुपाचरेत् कुर्यात् । गृहाश्रितानां गृहस्थानां स्नानं जलेन शरीरप्रक्षालनं भवेदेव भवत्येव नास्ति निषेधः । तत्स्नानं किमर्थम् । स्वर्गापवर्गागमसंगमाय गृहस्थाः पूर्वं स्वर्गं यान्ति, ततश्च त्वां इहागत्य मोक्षं व्रजन्ति । जिनदीक्षयेति शेषः ॥

सरिदित्यादि । हे मातः, सरित्सरोवारिधिवापिकासु नदीतडागसमुद्रदीर्घिकासु निमज्जनोन्मज्जनमात्रमेव ब्रुडनमात्रमेव चेत् पुण्याय भवति तर्हि, जलेचराणां तडागजलचराणां यादसां स्वर्गः पुरा स्यात्, इतरेषु ब्राह्मणादिगृहेषु पश्चात् स्वर्गः स्यात् ॥

तदाह तदुक्तम्—**रागेत्यादि** । ये पुरुषाः रागद्वेषमदोन्मत्ताः भक्षितधत्तूरसदृशाः, ये पुरुषाः स्त्रीणां वशवर्तिनो लम्पटाः, ते पुरुषाः कालेन दीर्घकालेनापि न शुद्ध्यन्ति तीर्थशतैरपि स्नानात् इति पूर्वभाषितं वर्तते । तथा चोक्तम्—'दुष्टमन्तर्गतं चित्तं तीर्थस्नानान्न शुद्ध्यति । शतशोऽपि जलैर्धौतं सुराभाण्डमिवाशुचि ॥'

षट्कर्मेत्यादि । षट्कर्मकार्यार्थं स्तम्भनमोहनवशीकरणोच्चाटनविद्वेषणमारणनिमित्तं षट्कर्मकार्यार्थं अथवान्नशुद्ध्यै अन्नपवित्रीकरणार्थं होमो भवेत् अग्निमध्ये आहुतीर्दीयते । न केवलं होमो भवेत्, भूतबलिश्च व्यन्तराणां प्राणनार्थं च । नामेति संभावनायाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत् 'अग्निमुखा वै देवाः' इत्यस्यायमर्थः—अग्निरिव भासुरं मुखं येषां ते तथा। चन्द्रमुखी कन्येतिवत्, न पुनरग्निरेव मुखं येषामिति, प्रतीतिविरोधात्।

मोक्षार्थमुद्युक्तधियां नराणां स्नानेन होमेन च नास्ति कार्यम्।
गृहस्थधर्मों न यतेर्यतेर्वा धर्मो भवेन्नो गृहिणः कदाचित्॥

तदुक्तम्—

विमत्सरः कुचेलाङ्गः सर्वद्वन्द्वविवर्जितः।
समः सर्वेषु भूतेषु स यतिः परिकीर्तितः॥
आपस्नानं व्रतस्नानं मन्त्रस्नानं तथैव च।
आपस्नानं गृहस्थस्य व्रतमन्त्रैस्तपस्विनः॥

सुधान्धसः सुधा अमृतमेव भक्तं येषां ते सुधान्धसः स्वर्गसुखोचिताङ्गाः निलिम्पा देवाः वह्निगतं अमौ वषट्कृतं किं खादन्ति। अपि तु न खादन्तीत्यर्थः॥

तत्तस्मात् कारणात् 'अग्निमुखा वै देवाः' इत्यस्य वेदवाक्यस्य अयमर्थो वर्तते। अयं कः। अग्निरिव भासुरं मुखं येषां ते तथा। अग्निमुखाः किंवत्। चन्द्रमुखीत्युक्तं तर्हि न कन्यायाः मुखं चन्द्र एव वर्तते, किं तु चन्द्रसदृशं मुखं कन्याया वर्तत इत्यर्थः। न पुनरग्निरेव मुखं येषां ते अग्निमुखा इत्यर्थो न वर्तते। कस्मात्। प्रतीतिविरोधात्। मुखस्य प्रतीतिदन्तौष्ठनासिकानेत्रकर्णादिकैर्भवेत्, न च तथा वर्तते॥

मोक्षार्थमित्यादि। मोक्षार्थं उद्युक्तधियां उद्यमपरबुद्धीनां नराणां मुनीनां स्नानेन होमेन च कार्यं नास्ति कार्यं न वर्तते। गृहस्थधर्मो यतेर्न वर्तते। यतेर्वा धर्मः कदाचिदपि गृहिणो नो भवेत्॥

तदुक्तम्—**विमत्सर इत्यादि**। विमत्सरः परेषां शुभद्वेषरहितः, कुचेलाङ्गः कुचेलमितिना वस्त्रं तद्वदङ्गं मलिनसमं यस्य स कुचेलाङ्गः, सर्वद्वन्द्वविवर्जितः सर्वेण द्वन्द्वेन कलहेन युद्धेन च विवर्जितो रहितः। सर्वेषु भूतेषु च समः समानबुद्धिः स पुमान् यतिः परिकीर्तितः यतिरिति कथितः॥

आपेत्यादि। हे मातः, आपस्नानम्। जलस्नानं। अथ 'अप्' इति व्यञ्जनान्तोऽस्ति, तथा 'आप' इति आकारान्तोऽप्यस्ति। तेन आपेन स्नानं आपस्नानम्। व्रतस्नानं व्रतेन स्नानम्। उपवासादिना स्नानमित्यर्थः। मन्त्रस्नानम्—'ओं अमृतोद्भवे अमृतं श्रावय श्रावय सं सें क्लीं ब्लूँ द्राँ द्रां द्रीं द्रीं द्रावय द्रावय सं हें ऱ्हीं क्ष्वीं हंसः स्वाहा' इति मन्त्रस्नानम्। तथैव च तेनैव प्रकारेण आपस्नानं गृहस्थस्य भवति। व्रतमन्त्रैस्तपस्विनः स्नानं भवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न स्त्रीभिः संगमो यस्य यः परे ब्रह्मणि स्थितः ।
तं शुचिं सर्वदा प्राहुर्मारुतं च हुताशनम् ॥

इति ।

ऋचः सामान्यथर्वाणि यजूंष्यङ्गानि भारत ।
इतिहासः पुराणं च त्रयीदं सर्वमुच्यते ॥

ततश्च श्रुतिस्मृतिभ्यामतीव बाह्येऽद्यत्वेनार्हत्समये कथं नाम ज्योतिषाङ्गे वचनमिदमुक्तम्—

समग्रं शनिना दृष्टः क्षपणः कोपितः पुनः ।
तद्भक्तस्तस्य पीडायां तावेव परिपूजयेत् ॥

सांख्यं योगो लोकायतं चान्वीक्षिकी। तस्यां च स्यादस्ति स्यान्नास्तीति

नेत्यादि । यस्य स्त्रीभिः संगमो न भवति, यः पुमान् परे ब्रह्मणि आत्मभावनायां स्थितो वर्तते, तं पुरुषं सर्वदा शुचिं प्राहुर्ब्रुवन्ति। विद्वांस इति शेषः । मारुतं च हुताशनं शुचिं प्राहुः । यथा वायुस्पर्शश्चाण्डालेऽपि लग्नः सन् राज्ञो नृपस्यापि लगति तत्र नास्ति दोषः । अपि तु चाण्डालादप्यानीयते । यतिः पुनर्मारुतवत् निःसङ्गः कर्मेन्धनदहनशीलत्वात् ब्रह्मचारी सदा शुचिरिति प्रसिद्धश्च ॥

ऋच इत्यादि । ऋच ऋग्वेदवाक्यानि, सामानि सामवेदवाक्यानि, अथर्वाणि अथर्वणवेदमन्त्राः, यजूंषि यजुर्वेदवाक्यं काण्ड्यः, अङ्गानि शिक्षाकल्पव्याकरणं छन्दोविचितिज्योतिषं निरुक्तं चेति षडङ्गानि ।हे भारत युधिष्ठिरमहाराज, इतिहासो भारतं रामायणं च । अन्यदपि पुराणम्। चकारात् मीमांसान्यायशास्त्रं च विगृह्यते। इदमेतत्सर्वं शास्त्रं त्रयी उच्यते कथ्यते ॥

ततश्च तस्मात् कारणात् श्रुतिस्मृतिभ्यां वेदधर्मशास्त्राणां अतीव बाह्ये बहिर्भूते अद्यत्वेन अद्यतनकालेन अर्हत्समये आर्हते संजाते सति कथं नाम ज्योतिषाङ्गे ज्योतिःशास्त्रे वेदाङ्गे इदं वक्ष्यमाणं वचनं कथमुक्तम् । इदं किमिति चेत्—

समग्रमित्यादि । समग्रं परिपूर्णं यथा भवत्येवं शनिना शनैश्चरेण दृष्टः सप्तमस्थाने स्थितिनावलोकितः क्षपणो दिगम्बरः कोपितः । तद्भक्तः शनिभक्तः क्षपणभक्तश्च तस्य शनेः क्षपणकस्य च पीडायां धातुक्षवाबाधायां तावेव शनैश्चरक्षपणकावेव परिपूजयेत् पूजनं कुर्यात् । नत्वन्यं देवं तत्पीडानिवारणार्थं पूजयेत् । उक्तं च—'दशमतृतीये नवपञ्चमे चतुर्थाष्टमे कलत्रे च । पश्यन्ति पादवृद्ध्या फलानि चैवं प्रयच्छन्ति ॥'

सांख्यमित्यादि ।सांख्यं उलूक्यदर्शनं सत्कार्यापरनामधेयम् , योगो नैयायकः, लो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नग्नश्रमणक इति बृहस्पतिराखण्डलस्य पुरस्तं समयं कथं प्रत्यवतस्थे।

प्रजापतिप्रोक्ते च चित्रकर्मणि—

श्रमणं तैललिप्ताङ्गं नवभिर्भित्तिभिर्युतम्।
यो लिखेत्स लिखेत्सर्वां पृथ्वीमपि ससागराम्॥

आदित्यमते च—

भवबीजाङ्कुरमथना अष्टमहाप्रातिहार्यविभवसमेताः।
ते देवा दशतालाः शेषा देवा भवन्ति नवतालाः॥

वराहमिहरव्याहृते प्रतिष्ठाकाण्डे च—

विष्णोर्भागवता मयाश्च सवितुर्विप्रा विदुर्ब्राह्मणां
मातृणामिति मातृमण्डलविदः शंभोः सभस्मा द्विजः।

कायतं चार्वाकमतम्, एतत्रयं आन्वीक्षिकी विद्या कथ्यते। तस्यां आन्वीक्षिकीविद्यायां स्यादस्ति नास्ति इतीदृशं वचनं नग्नः श्रमणको वदति। इत्येवंप्रकारेण बृहस्पतिः सुराचार्य आखण्डलस्य पुरस्तं समयं क्षपणकशासनं कथं प्रत्यवतस्थे कथं प्रतिपादितवान्॥

प्रजापतिप्रोक्ते च चित्रकर्मणि चित्रशास्त्रे। **श्रमणमिति**। श्रमणं तैललिप्ताङ्गं श्रमणतीर्थंकरपरमदेवं तैललिप्ताङ्गं कोटिभास्करसमानतेजस्कं नवभिः भित्तिभिर्युतम्। 'क्षालोऽथ वेदिरथ वेदिरथोऽपि सालवादीव(?)शाल इह वेदिरतोऽपि सालः। वेदी च भाति सदसि क्रमतः(?)यदीये यस्मै नमस्त्रिभुवनविभवे जिनाय॥' इति मधुमाधवीकथितक्रमेण नवभिर्भित्तिभिर्युतमित्याहुः। यो लिखेत् यश्चित्रकरो लिखति स चित्रकरः लिखति। सर्वां पृथ्वीमपि। अपिशब्दात् पातालं स्वर्गलोकं च लिखेदित्यर्थः। कथंभूतां पृथ्वीम्। ससागरामसंख्यातसमुद्रसहिताम्। सर्वद्वीपावतीमित्यर्थः। इतीदृशं प्रजापतिवचनं कथम्॥

आदित्यमते सूर्यसिद्धान्ते। **भवेति**। भवः संसारस्तस्य बीजं रागद्वेषौ तस्याङ्कुरौ-मोहनीयं कर्म तस्य मथनाः क्षयविधायिनः अष्टमहाप्रातिहार्यविभवसमेताः अष्टौ च तानि महाप्रातिहार्याणि अशोकवृक्षः, दिव्यपुष्पवर्षणम्, योजनगामिनी वाक्, चतुःषष्टिचामराणि, दिव्यं सिंहासनम्, कोटिभास्कराधिकलोचनप्रियशरीरतेजः, सार्धद्वादशकोटिपटहवाद्यानि, छत्रत्रयं चोपर्युपरि वर्तितानि, एवं विभवं ऐश्वर्यं तेन समेतास्तीर्थंकरपरमा देवा दशताला भवन्ति दशहस्तमाना भवन्ति। शेषा देवा हरिहरादय नवताला भवन्ति। तादृशं वचनं अर्हत्प्रतिमासूचकं आदित्यमतेः कथम्॥

वराहमिहरव्याहृते वराहमिहराचार्यकथिते प्रतिष्ठाकाण्डे च प्रतिष्ठाध्याये इतीदृशं कथं यदि दिगम्बरमतं कलौ समुत्पन्नम्। इतीति किम्—**विष्णोरित्यादि**। विष्णोर्भागव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाक्याः सर्वहिताय शान्तमनसो नग्ना जिनानां विदु-
र्ये यं देवमुपाश्रिताः स्वविधिना ते तस्य कुर्युः क्रियाम् ॥

निमित्ताध्याये च—

पद्मिनी राजहंसाश्च निर्ग्रन्थाश्च तपोधनाः ।
यं देशमुपसर्पन्ति सुभिक्षं तत्र निर्दिशेत् ॥

तथा—उर्व-भारवि-भवभूति-भर्तृहरि-भर्तृमेण्ठ-कण्ठ-गुणाढ्य-व्यास-भास-वोस-कालिदास-बाण-मयूर नारायण-कुमार-माघ-राजशेखरादिमहाकविकाव्येषु तत्र तत्रावसरे भरतप्रणीते काव्याध्याये सर्वजनप्रसिद्धेषु तेषु तेषूपाख्यानेषु च कथं तद्विषया महती प्रसिद्धिः । तस्मात्

ताः विष्णोः क्रियां प्रतिष्ठां भागवता वैष्णवा कुर्युः विदधुः । मयाश्च आदित्योपजीविनो ब्राह्मणाः सवितुः श्रीसूर्यस्य क्रियां प्रतिष्ठां कुर्युः । विप्रा ब्राह्मणां क्रियां विदुर्जानन्ति । मातॄणां सप्तमातॄणां ब्रह्माणीन्द्राणीवाराहीभैरवीचामुण्डाकर्णमोटीचर्चीभिधानानां इति क्रियां प्रतिष्ठां मातृमण्डलविदो मातृमण्डलविज्ञायकाः कुर्युः । शंभोः क्रियां सभस्मा भस्मसहितो द्विजो ब्राह्मणः कुर्यात् इति अर्थवशाद्विभक्तिविपरिणामः । शाक्या बौद्धाः सर्वहिताय बुद्धाय क्रियां प्रतिष्ठां कुर्युः । शान्तमनसो.........नग्नाः................-
.... विदुर्जानन्ति ते तु जिनानां प्रतिष्ठां कुर्युः । ये पुरुषाः लिङ्गिनो गृहस्था यं देवं उपाश्रिताः सेवापरास्ते पुरुषाः स्वविधिना निजशास्त्रोक्तविधानेन तस्य देवस्य क्रियां कुर्युः इति ईदृशं वाक्यं वराहमिहरः कथमुक्तवान्, यदि कलौ दिगम्बरा उत्पन्नाः ॥

निमित्ताध्याये च इतीदृशं वचनं कथम् । इतीति किम् । **पद्मिनीति** । पद्मिनी राजहंसाश्च निर्ग्रन्थाश्च तपोधनाः पद्मिनी कमलिनी यं देशं यस्मिन् देशे सरादौ उपसर्पन्ति प्रादुर्भवन्ति तत्र तस्मिन् देशे सुभिक्षं निर्दिशेत् कथयेत् । यं देशं राजहंसाश्च उपसर्पन्त्यागच्छन्ति तत्र देशे सुभिक्षं निर्दिशेत् ॥

तथा तेनैव प्रकारेण उर्वश्च भारविश्च भवभूतिश्च भर्तृहरिश्च भर्तृमेण्ठश्च कण्ठश्च गुणाढ्यश्च व्यासश्च भासश्च वोसश्च कालिदासश्च बाणश्च मयूरश्च नारायणश्च कुमारश्च माघश्च राजशेखरश्च ते आदिर्येषां हलायुध-कात्यायनादीनां ते च ते महाकवयस्तेषां काव्येषु तत्र तत्रावसरे तस्मिन् विदुषां प्रसिद्धे प्रघट्टके तथा भरतप्रणीते काव्याध्याये तथा सर्वजनप्रसिद्धेषु तेषु तेषु उपाख्यानेषु दृष्टान्तकथासु च कथं केन प्रकारेण तद्विषया दिगम्बरसंबन्धिनी महती प्रसिद्धिर्वर्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चत्वार एते सहजाः समुद्रा यथैव लोके ऋतवोऽपि षट् च ।
चत्वार एते समयास्तथैव षड् दर्शनानीति वदन्ति सन्तः ॥
यावत्समर्थं वपुरुद्धतायां यावच्च पाणिद्वयमेति बन्धम् ।
तावन्मुनीनामशने प्रवृत्तिरित्याशयेन स्थितभोजनास्ते ॥
बालाग्रकोटावपि यत्र सङ्गे निष्किंचनत्वं परमं न तिष्ठेत् ।
मुमुक्षवस्तत्र कथं नु कुर्युर्मतिं दुकूलाजिनवल्कलेषु ॥
शौचं निकामं मुनिपुंगवानां कमण्डलोः संश्रयणात्समस्ति ।
न चाङ्गुलौ सर्पविदूषितायां छिनत्ति नासां खलु कश्चिदत्र ॥
वदन्ति जैनास्तमिहाप्तमेते रागादयो यत्र न सन्ति दोषाः ।
मद्यादिशब्दोऽपि च यत्र दुष्टः शिष्टैः स निन्द्येत कथं नु धर्मः ॥

हे मातः, तस्मात् कारणात् । **चत्वार इत्यादि** । यथैव एते सहजाः स्वभावोत्पन्नाश्चत्वारः समुद्रा वर्तन्ते, यथैव लोके ऋतवोऽपि हिमशिशिरवसन्तग्रीष्मवर्षाशरल्लक्षणा षट् वर्तन्ते, तथैव तेनैव प्रकारेण एते अमी चत्वारः समया जैनजैमिनिशाक्यशंकरागमाः सांख्यलोकायततद्द्वयषड्दर्शनानीतीदृशं सन्तो वदन्ति प्रतिपादयन्ति ॥

यत्त्वयोक्तम् उद्धा ग्रसन्ते इति निन्दावचनं तस्येदमुत्तरम्—**यावदिति** । यावत्कालं उद्धतायां ऊर्ध्वतायां वपुः समर्थं वर्तते, यावच्च पाणिद्वयं बन्धमेति परस्परं मिलति, तावत्कालं मुनीनां अशने प्रवृत्तिर्भवतीतीदृशेनाशयेन ते स्थितभोजनाः ....॥

बालाग्रेति । बालाग्रकोटावपि यत्र सङ्गे परिग्रहे निष्किंचनत्वं निष्परिग्रहत्वं परममुत्कृष्टं न तिष्ठेत् भवति । तत्र दिगम्बरशासने मुमुक्षवः अहो मातः, दुकूलाजिनवल्कलेषु मतिं कथं नु कुर्युः । अपि तु न कुर्युः ॥

शौचमिति । तथा अशौचं यत्त्वयोक्तं तदप्यसत् । शौचं निकामं मुनिपुंगवानां कमण्डलोः संश्रयणात् ग्रहणात् समस्ति । अङ्गुलौ सर्पविदूषितायां सर्पदष्टायां खलु कश्चित् पुमान् अत्र संसारे नासां नासिकां न च छिनत्ति न छेदयति । यदपवित्रमङ्गं तदेव प्रक्षाल्यत इत्यर्थः ॥

वदन्तीत्यादि । एते जैना इह संसारे तमाप्तं वदन्ति । तं कम् । यत्राप्ते रागादयो दोषा न सन्ति । यत्र च धर्मे मद्यादिशब्दोऽपि अज्ञातवन्मद्यादिपानादिकं तच्छब्दोऽपि दुष्टो दोषवान् भोजनादित्यागाय भवति स धर्मः शिष्टैर्विद्वद्भिः । कथं नु इति प्रश्ने । निन्द्येत । अपि तु न निन्द्यत इत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परेषु योगेषु मनीषयान्धः प्रीतिं दधात्यात्मपरिग्रहेषु ।
तथापि देवः स यदि प्रसक्तमेतज्जगद्देवमयं समस्तम् ॥
लज्जा न सज्जा कुशलं न शीलं श्रुतं न पूतं न वरः प्रचारः ।
मद्येन मन्दीकृतमानसानां विवेकनाशाच्च पिशाचभावः ॥
आतङ्कशोकामयकेतनस्य जीवस्य दुःखानुभवाश्रयस्य ।
देहस्य को नाम कृतेऽस्य मांसं सचेतनोऽद्यात्क्षणभङ्गुरस्य ॥

उक्तं च—

तिलसर्षपमात्रं यो मांसमश्नाति मानवः ।
स श्वभ्रान्न निवर्तेत यावच्चन्द्रदिवाकरौ ॥
संदिग्धेऽपि परलोके त्याज्यमेवाशुभं बुधैः ।
यदि न स्यात्ततः किं स्यादस्ति चेन्नास्ति को हतः ॥

परेष्वित्यादि । परेषु जरासंधकंसादिषु योगेषु संबन्धेषु मनीषया कृत्वा यो देवः अन्धः क्रोधान्धः वर्तते, यो देवः आत्मपरिग्रहेषु सत्यभामारुक्मिणीप्रभृतिषु प्रीतिं दधाति, तथापि स हरिहरादिको यदि देवो भवति तर्हि एतत् प्रसक्तं एष प्रसङ्गः संजातः । एतत् किम् । समस्तं जगद्देवमयं वर्तते । यः शत्रुषु द्वेषं करोति, कलत्रादिषु प्रेम दधाति । तर्ह्यदेवः कोऽपि नास्ति, सर्वे देवा वर्तन्ते ॥

लज्जेत्यादि । मद्येन मन्दीकृतमानसानां जडीकृतचेतसां रुद्रादीनां लज्जा सज्जा छन्दोद्यमा न वर्तते, तथा मद्यपीनां शीलं ब्रह्मचर्यं कुशलं निपुणं न भवति, तथा पूतं श्रुतं न भवति, तथा प्रचारः प्रवर्तनं च वरः श्रेष्ठो न भवति । एतत्पूर्वोक्तं यदि न भवति, तर्हि किं भवति । विवेकनाशात् प्रमाददोषात् पिशाचभावः, मलिनव्यन्तरत्वं पिशाचत्व-मुच्यते, तद्भवति । उक्तं च लक्ष्मीचन्द्रेण महामुनिना—'मुहु विलिहि विमुत्त इसुण हु-ण्हुण मज्जहु दोसु । मतहो वहिणि जि अहिलस इत्थेन हु पायपवेसु ॥'

आतङ्केत्यादि । हे मातः, जीवस्यास्य देहस्य कृतकार्याय को नाम सचेतनो प्रेक्षा-वान् पुमान् मांसमद्यात् जरासं भक्षयेत् । कथंभूतस्य देहस्य । आतङ्कशोकामयकेतनस्य आतङ्कश्च सद्यःप्राणहरो व्याधिः, शोकश्च पश्चात्तापलक्षणः, आमयश्च सामान्यरोगः, तेषां केतनस्य निवासस्य । पुनः कथंभूतस्य देहस्य । दुःखानुभवाश्रयस्य दुःखोदयस्थानस्य । पुनः कथंभूतस्य । क्षणभङ्गुरस्य क्षणेन अल्पकालेन भङ्गुरस्य स्वयमेव विनाशनशीलस्य ॥

उक्तं च—**तिलेत्यादि** । यो मानवः तिलसर्षपमात्रं मांसमश्नाति स मानवः श्वभ्रान्न निवर्तेत न निर्गच्छेत् । कियत्कालम् । चन्द्रदिवाकरौ यावत् ॥

संदिग्धे इत्यादि । परलोके स्वर्गादौ संदिग्धेऽपि संदेहप्राप्तेऽपि बुधैर्विद्वद्भिरशुभं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मक्षिकागर्भसंभूतबालाण्डकनिपीडनात्।
जातं मधु कथं सन्तः सेवन्ते कललाकृति॥

तथा च स्मृतिः—

सप्तग्रामेषु यत्पापमग्निना भस्मसात्कृते।
तस्य चैतद्भवेत्पापं मधुबिन्दुनिषेवणात्॥

यथाजनाकूतमयं प्रवृत्तः परस्परार्थप्रतिकूलवृत्तः।
विधौ निषेधे च न निश्चयोऽस्ति कथं स वेदो जगतः प्रमाणम्॥

तथा हि—मांसं चेदाचरितुमिच्छसि, आचर। किं तु विधिपूर्वकमाचरितव्यम्। तदाह—

प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां तु काम्यया।
यथाविधिनियुक्तस्तु प्राणानामेव चात्यये॥

मद्यमांसाद्यास्वादनं पापं त्याज्यमेव परिहर्तव्यमेव। यदि चेत् परलोकं न स्यात् किमपि रुचिरं न स्यात् ततस्तर्हि किं स्यात्। अस्ति चेत् नास्ति कश्चार्वाको हतो निषिद्धः॥

मक्षिकेति। मक्षिकानां सरघानां गर्भेषु संभूता उत्पन्ना ये बालाण्डकास्तेषां निपीडनात् निश्चोतनान्मधु मधुक्षौ जातमुत्पन्नं सन्तो विद्वांसः कथं केन प्रकारेण सेवन्ते आस्वादयन्ति। कथंभूतं मधु। कललाकृति कललस्य गर्भवेष्टनस्य जरायुपटलस्याकृतिराकारो यस्य तत्तथोक्तम्॥

तथा च स्मृतिरन्यदपि स्मृतिशास्त्रं वर्तते—तत्किम्। **सप्तेति**। सप्तग्रामेषु अग्निना भस्मसात्कृते सति यत्पापं भवेत् तस्य पुरुषस्य च एतत् पापं भवेत् सप्तग्रामभस्मीकरणपापं भवेत्। कस्मात्। मधुबिन्दुनिषेवणात् इति॥

यथेत्यादि। हे मातः, स वेदः श्रुतिशास्त्रं जगतः प्रमाणं प्रमाणभूतः कथं भवति। कथंभूतो वेदः। अयं वेदः यथाजनाकूतं यथाजनेच्छप्रकृतिः यथाविषयादिकं लोको वाञ्छति, वेदेऽपि तथैव वक्ति। अपरं कथंभूतो वेदः। परस्परार्थप्रतिकूलवृत्तः परस्परमन्योन्यं अर्थप्रतिकूलः पूर्वापरविरोधसहितः वृत्तः प्रवृत्तिं गतः विधौ कर्तव्ये निषेधे च वेदे निश्चयो नास्ति॥

तथाहि तदेव यथाजनाकूतप्रवर्तनं दर्शयति—**मांसमित्यादि**। मांसं चेदाचरितुमिच्छसि मांसभक्षणं कर्तुमिच्छसि तर्ह्याचर। किं तु विधिपूर्वकमाचरितव्यं वेदोक्तप्रकारेण भक्षितव्यम्॥

तदाह मांसभक्षणे कोऽसौ विधिस्तमेव निरूपयति—**प्रोक्षितमिति**। मांसं प्रो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रीत्वा स्वयं वा ह्युत्पाद्य परोपहृतमेव च ।
अर्चयित्वा पितृन्देवान्खादन्मांसं न दुष्यति ॥

मातरि स्वसरि वा चेत्प्रवर्तितुमिच्छसि, प्रवर्तस्व । किं तु विधिपूर्वकं प्रवर्तितव्यम् । तदाह—गोसवे ब्राह्मणो गोसवेनेष्ट्वा संवत्सरान्ते मातरमप्यभिलषतीति । उपेहि मातरमुपेहि स्वसारमिति । एवमन्येऽपि सन्ति यथालोकाभिप्रायं प्रवृत्तास्ते ते विधयः ।

प्रसिद्धिरत एवास्य सर्वसाधारणी मता ।
को हि नाम भवेद्द्वेष्यो लोकच्छन्दानुवर्तनः ॥

हिताहितावेदि जगन्निसर्गतः परस्परस्त्रीधनलोलमानसम् ।
तत्रापि यद्यागम एष तन्मनोवशेन वर्तेत तदा किमुच्यते ॥

क्षितं कुशमन्त्रवारिपूतं भक्षयेत् खादयेत् । किमर्थम् । ब्राह्मणानां तु काम्यया ब्राह्मणानामिच्छया । कः पुमान् भक्षयेत् । यथाविधिनियुक्तः प्रोक्षणादिविधिनाधिकृतः प्राणानां चैव अत्यये विनाशे सति विधिमकृत्वा न भक्षयेत् ॥

यथा च विधिं दर्शयति—**क्रीत्वेति** । मांसं क्रीत्वा मूल्येन गृहीत्वा स्वयं चात्मनैव हि निश्चयेन उत्पाद्य जीवविध्वंसोत्कृतिपरोपहृतमेव वा पारणानीतं वा पितृन् देवांश्चार्चयित्वा मांसं खादन् पुमान् न दुष्यति न दोषवान् भवति । मातरि जनन्यां स्वसरि भगिन्यां वा चेद्यदि प्रवर्तितुमिच्छसि तर्हि प्रवर्तस्व मैथुनं कुरुष्व । किं तु विधिपूर्वकं प्रवर्तितव्यम् । तदाह तमेव विधिं निरूपयति—गोसवे गोसवयज्ञे ब्राह्मणो नापरः गोसवेन गोवधेन इष्ट्वा यज्ञं कृत्वा संवत्सरान्ते एकवर्षप्रान्ते मातरमपि जननीमपि । अपिशब्दात् भगिन्यादिमपि । परस्त्रियमभिलषति जन इति ईदृशं वचनं क्व वर्तते । उपेहि मातरमुपेहि स्वसारमिति । एवं अमुना प्रकारेण अन्येऽपि अपरेऽपि विधयः सन्ति वर्तन्ते वेदे ते ते प्रसिद्धा यथालोकाभिप्रायं प्रवृत्ताः ॥

प्रसिद्धिरित्यादि । अत एव कारणात् अस्य वेदस्य सर्वसाधारणी सर्वेषां सामान्या प्रसिद्धिः ख्यातिर्मता अभीष्टा । अमुमेवार्थमर्थान्तरन्यासेन द्रढयति—नामेति संभावनायाम् । लोकच्छन्दानुवर्तनः यथालोकाभिप्रायप्रवर्तनः पुमान् को द्वेष्यो भवेत् । अपि तु न कश्चिद्द्वेषणीयो भवतीत्यर्थः । कथम् । हि । स्फुटमिति शेषः ॥

हिताहितेत्यादि । हे मातः, जगत् संसारो निसर्गतः स्वभावेन हिताहितावेदि वर्तते । हितं पुण्यमहितं पापं ते द्वे वेत्तीत्येवंशीलं हिताहितावेदि । पुनः कथंभूतं जगत् । परस्परस्य अन्योन्यस्य च स्त्री च धनं च तत्र लोलं लम्पटं मानसं चित्तं यस्य जगतस्तत्तथोक्तम् । तत्रापि ईदृशे जगति यदि चेदेष आगमो वेदस्वरूपशास्त्रं तन्मनोवशेन जग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'सुरा न पेया, ब्राह्मणो न हन्तव्यः' इत्यपि वचनमस्ति । 'सौत्रामणौ य एवंविधां सुरां पिबति न तेन सुरा पीता भवति' इत्यपि । तथा 'ब्रह्मणे ब्राह्मणमालभेत' इति । अपि च—

शूद्रान्नं शूद्रशुश्रूषा शूद्रप्रेषणकारिणः ।
शूद्रदत्ता च या वृत्तिः पर्याप्तं नरकाय ते ॥
तथा मांसं श्वचाण्डालक्रव्यादादिनिपातितम् ।
ब्राह्मणेन ग्रहीतव्यं हव्यकव्याय कर्मणे ॥

इत्यपि ।

सद्यःप्रतिष्ठितोदन्ते सिद्धान्ते परमाग्रहः ।
किं वेदोक्तैरिमैः[1](?) सूक्तैरेत षिङ्गानुपास्महे ॥

दभिप्रायवशेन वर्तेत वर्तते, तदा तस्मिन् काले किमुच्यते किं कथ्यते । परस्परस्त्रीधनलोलमानसं विशेषेण भवत्येव ॥

अथ पूर्वापरविरोधं वेदस्य दर्शयति—'सुरा न पेया मद्यं न पेयम्, ब्राह्मणो न हन्तव्यः' इत्यपि वचनमस्ति वेदे । तद्वाक्यविरुद्धं वाक्यं यथा—सौत्रामणौ यज्ञे य एवंविधां सुरां पिबति यः पुमान् एवंविधां पैष्टीगौडीमाधवीलक्षणां सुरां मदिरां पिबति तेन पुंसा सुरा पीता न भवति, इत्यपि वाक्यं वर्तते । तथा च विरुद्धं वाक्यं दर्शयति—ब्राह्मणमालभेत ब्रह्मणे सृष्टिकर्त्रे ब्राह्मणं श्रोत्रियं आलभेत मारयेत्, इत्यपि च वाक्यं वर्तते ॥

अपि च तथा च मांसविरुद्धं वाक्यं दर्शयति—**शूद्रान्नमित्यादि** । शूद्रान्नं शोभनकर्मणा द्रवतीति शूद्रस्तस्यान्नम्, शूद्रशुश्रूषा सेवा, शूद्रप्रेषणकारिणः शूद्रस्य किंकरत्वं कुर्वन्तीति, शूद्रदत्ता च पुनर्या वृत्तिराजीवनम्, ते पर्याप्तं परिपूर्णं यथा भवत्येवं नरकाय नरकपाताय भवतीति भावः ॥

तथा च विरुद्धं वाक्यम्—**तथेति** । मांसं श्वचाण्डालक्रव्यादादिनिपातितं शुना कुर्कुरेण, चाण्डालेन मातङ्गेन, क्रव्यादा व्याघ्रादयस्ते आदिर्येषां खरटिक्यादीनां ते श्वचाण्डालक्रव्यादादयस्तैर्निपातितं पशून् मारयित्वा गृहीतं आनीतं ब्राह्मणेन वेदपाठकेन ग्रहीतव्यं ग्रहणीयम् । किमर्थम् । हव्यकव्याय कर्मणे देवपितृकार्याय, इत्यपि वचनमस्ति ॥

सद्य इत्यादि । सद्यस्तत्काले प्रतिष्ठित उदन्तो वार्ता यत्र स सद्यःप्रतिष्ठितोदन्तस्तस्मिन्नीदृग्विधे सिद्धान्ते परमाग्रहो यदि युष्माकमाक्षेपो वर्तते तर्हि इमैः(?)र्वेदोक्तैः सूक्तैः सुभाषितैः किम् । न किमपि । एत आगच्छत यूयम् । षिङ्गान् विटानुपास्महे सेवामहे वयम् । यदैवं पृष्टं तदैवोत्तरं पारदारिकविषये वर्तेत एव ॥

---

१. व्याकरणशास्त्रविरुद्धम् 'इमैः' इति प्रयोगोपादानं ग्रन्थकर्तुर्महदाश्चर्यकरम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमाणं व्यवहारेऽपि जन्तुरेकस्थितिर्मतः ।
को नामेत्थं विरुद्धार्थे सादरो निगमे नरः ॥

यदि च वेदोक्तेन विधिना विधीयमाना हिंसा न भवत्यधर्मसाधनम्, कथं तर्हि मार्यमाणः पशुरेवं संबोध्यते 'अन्वेनं मातानुमन्यतामनुपितानुभ्रातानुसगन्धोऽनुसखा सयूथ्यः' इति ।

अथ पौरुषेयागमवच्चोदनायां विचारे महत्पातकम् । तदाह—

मानवं व्यासवासिष्ठं वचनं वेदसंयुतम् ।
अप्रमाणं तु यो ब्रूयात्स भवेद्ब्रह्मघातकः ॥
पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥

इत्येतन्मुखभाषितम् ।

प्रमाणमित्यादि । व्यवहारेऽपि वाणिज्यादौ जन्तुर्जीव एकस्थितिरेकवाक्यतायुक्तः प्रमाणं मतः स्वीकर्तव्यम् । को नाम इत्थं पूर्वोक्तप्रकारं विरुद्धार्थे निगमे वेदे नरः पुमान् सादरो भवति । अपि तु न कश्चित् ॥

यदि च वेदोक्तेन विधिना निगमोक्तेन विधानेन विधीयमाना क्रियमाणा हिंसा अधर्मसाधनं न भवति, तर्हि मार्यमाणः पशुः एवममुना प्रकारेण कथं संबोध्यते संबोधनं प्राप्यते । एवं कथमिति चेत्—अन्वेनं हे पशो, एनं हिंसकपुरुषं माता अनुमन्यतां ज्ञायताम् । अनुपिता अनुमन्यतां ज्ञायताम् । अनुभ्राता अनुमन्यताम् । अनुसगन्धः संबन्धी अनुमन्यताम् । अनुसखा मित्रमनुमन्यताम् । कथंभूतः सखा । सयूथ्यः । समानयूथे भवः सयूथ्यः

अथ पौरुषेयागमवत् यथा पौरुषेयं शास्त्रं विचार्यते तथा चोदनायां वेदस्य वचने विचारे विचारणायां महत्पातकम् ॥

तदाह—**मानवमिति** । मानवं मनोरिदं मानवं व्यासवासिष्ठं व्यासस्येदं व्यासम्, वसिष्ठस्येदं वासिष्ठम्, व्यासं च वासिष्ठं वचनं शास्त्रं वेदसंयुतं वेदोक्तमेव वर्तते । यस्तु पुमान् अप्रमाणमसत्यं ब्रूयात्स ब्रह्मघातको भवेत् ब्राह्मणघातपातकी भवेत् स्यात् ॥

पुराणमिति । पुराणं रामायणं भारतादिकम्, मानवो धर्मः स्मृतिशास्त्रम्, साङ्गो वेदः शिक्षाकल्पव्याकरणच्छन्दोज्योतिषनिरुक्तलक्षणषडङ्गसहितो वेदः, चिकित्सितं च आयुर्वेदम्, एतानि चत्वारि शास्त्राणि आज्ञासिद्धानि । एतेषां वचनमेव मन्यते । हेतुभिर्न हन्तव्यानि हेतुवादेन निराकरणीयानि ॥

इति एतन्मुखभाषितं कपोलकल्पितमिदं श्लोकद्वयं ज्ञातव्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाहच्छेदकषाशुद्धे हेम्नि का शपथक्रिया।

तस्मात्

दत्तानुपात्रं सकलैः प्रमाणैर्दृष्टेषु तत्त्वेषु भवेत्प्रमाणम्।
अन्यत्र शास्त्रं तु सतां प्रवृत्त्यै पूर्वापरस्थित्यविरोधनेन॥
उमापतिः स्कन्दपिता त्रिशूली संध्यासु यो नृत्यति चर्मवासाः।
भिक्षाशनो होमजपोपपन्नः कथं स देवोऽन्यजनेन तुल्यः॥
देवेषु चान्येषु विचारचक्षुर्यथार्थवक्ता किमु निन्दकः स्यात्।
एवं न चेत्तर्हि यथार्थदर्शी भानुः प्रदीपोऽपि च निन्दकः स्यात्॥
यो भाषते दोषमविद्यमानं सतां गुणानां ग्रहणे च मूकः।
स पापभाक्स्यात्स विनिन्दकश्च यशोवधः प्राणिवधाद्गरीयान्॥

दाहेत्यादि। दाहः अग्नितापः, छेदश्च द्विधाकरणम्, कषा कषपट्टिकोपरि रेखापातनं ताडनलक्षणं ताडनस्य, एताभिः परीक्षिते शुद्धे हेम्नि सुवर्णे शपथक्रिया शपथकरणं का। न काचित्। दाहच्छेदकषाशुद्धे परीक्षायां अक्षमे हेम्नि शपथक्रिया का। न काचित्॥

तस्मात् कारणात्—**दत्तानुपात्रमित्यादि**। दत्तानुपात्रं अतिसंवादिस्वीकृतव्यवहारं सकलैः प्रत्यक्षानुमानादिभिः प्रमाणैः दृष्टेषु तत्त्वेषु शास्त्रेषु प्रमाणं सत्यं भवेत्। अन्यत्र परमते स्वर्गादौ अदत्तानुपात्रे अपरीक्षतो तत्त्वेषु शास्त्रं तु सतां विद्वज्जनानां प्रवृत्त्यै प्रवर्तनाय भवति। केन कृत्वा प्रमाणाय भवति। पूर्वापरस्थित्यविरोधनेन पूर्वापरविरोधरहितेनेत्यर्थः॥

उमापतिरिति। उमापतिः स्कन्दस्य पिता च स्कन्दस्य कार्तिकेयस्य पिता जनकः। ब्रह्मचर्यभङ्गकारीति भावः। तथा त्रिशूली। शत्रुविद्वेषकारीति भावः। संध्यासु यो नृत्यति प्रभाते मध्याह्ने अपराह्ने यो नर्तनं करोति। तथा चर्मवासा चर्मवासो वस्त्रं यस्य स चर्मवासाः। इत्यनेन मोहवान् सूचितः। तथा भिक्षाशनः भिक्षाभोजनकारी। इत्यनेन क्षुधादोषः कथितः। तथा होमजपोपपन्नो होमेन जपेन उपपन्नः स जगत्प्रसिद्धो रुद्रः अन्यजनेन तुल्यो रथ्यापुरुषेण समानो देवः कथम्। न कथमपीत्यर्थः॥

देवेष्वित्यादि। देवेषु च पुनरन्येषु गुर्वादिषु विचारचक्षुः दिगम्बरो यथार्थवक्ता सत्यवादी। उ इति संबोधने। हे मातः, किं निन्दकः गर्हकः स्यात्। अपि तु न स्यात्। एवं न चेत् यदि निन्दकः स्यात् तर्हि तदा यथार्थदर्शी यथार्थप्रकाशको भानुरपि प्रदीपश्च निन्दकः स्यात्। सोऽपि यथार्थदर्शी वर्तते॥

य इत्यादि। यः पुमान् अविद्यमानमसन्तं दोषं भाषते च, सतां साधूनां गुणानां ज्ञानादीनां ग्रहणे च मूकः अवाक् भवति, स पुमान् पापभाक् पापीयान् स्यात्। अविद्यमानदोषभाषित्वात् स पुमान् विनिन्दकश्च निन्दावान् भवति। स पापभाक् कथम्। अमुमे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथायमाप्तः पर एव न स्यादेवंविधो रुद्रगुणोऽपरस्तु ।
परः पुनः किंगुण एष देवः संसारदोषानुगतो न यो हि ॥
गुणाः कुतस्तस्य भवन्ति गम्याः शास्त्रात्प्रणीतात्स्वयमेव तेन ।
वने परोक्षेऽपि पतत्रिसार्थे दृष्टो ध्वनेस्तत्र विनिश्चयो हि ॥
सर्गस्थितिप्रत्यवहारवृत्तेर्हिमातपाम्भःसमयस्थितेर्वा ।
आद्यन्तभावोऽस्ति यथा न लोके तथैव मुक्तागममालिकायाः ॥
श्रुतात्स देवः श्रुतमेतदस्मादिमौ हि बीजाङ्कुरवत्प्रवृत्तौ ।
हिताहितज्ञे स्वयमेव दैवात्कि पुंसि जातिस्मरवत्परेण ॥

वार्थमर्थान्तरन्यासेन द्रढयति—यशोवधो यशोघातनं प्राणिवधात् हिंसाकरणात् गरीयान् गुरुतरो वर्तते ॥

यतः । अथेत्यादि । अथ चेत् अयं आप्तो रुद्रगुणो रुद्रलक्षणो देवः स एवाप्तो युष्माभिः कथ्यते । पर एव अर्हन् देवो न स्यात् । एवेति निश्चये । एवंविधः आप्तत्वसहितो रुद्रगुणो वर्तते । अयं तु सर्वज्ञो वीतरागो न भवति इति चेत् उच्यते—तर्हि परो रुद्रगुणः पुनः पुनरपि एष देवः किंगुणो वर्तते । यो देवः । हि निश्चयेन । संसारदोषानुगतो न भवति ॥

गुणा इत्यादि । स देव इति चेद्युष्माभिरुच्यते, तस्य गुणाः कुतः कस्मात् ज्ञातव्या भवन्ति शास्त्राद्गम्या भवन्ति । कथंभूताच्छास्त्रात् । तेनाप्तेन गुरुणा स्वयमेव प्रणीतात् उक्तात् तत्र शास्त्रे विनिश्चयो हि. निश्चयेन ध्वनेस्तद्वाचनात् निश्चयो दृष्टो निश्चयो जातः । अमुमेवार्थं दृष्टान्तेन द्रढयति—वने विपिने परोक्षेऽपि दृष्टेरगम्येऽपि पतत्रिसार्थे पक्षिसमूहे ध्वनिविनिश्चयो दृष्टः सर्वैरपि विज्ञातः । यस्य पक्षिणः ईदृशो ध्वनिर्वर्तते स पक्षी अमुकः पक्षी भविष्यति तद्ध्वनिरेव पक्षी ज्ञायते तथा येन देवेन यत् शास्त्रं प्रोक्तं तस्माच्छास्त्रादेव दोषवान्निर्दोषो ज्ञायते ॥

सर्गेत्यादि । यथा येन प्रकारेण लोके लोकमध्ये सर्गस्थितिप्रत्यवहारवृत्तेः सर्गस्य सृष्टेः, स्थितेश्च सर्गस्थित्रिकालस्य, प्रत्यवहारस्य संहारकालस्य च वृत्तेर्वर्तनस्य आद्यन्तभावो न वर्तते एतदुक्तं भवति । यथा सर्गादयो हिमसमयादयश्च अनादिकालेषु वर्तन्त एव । कथं वर्तन्त इति चेत् सर्गात् संहारो वर्तते, संहारात् सर्गो वर्तते, हिमादातपो भवति, आतपाद्वर्षाकालो भवति, तस्मात् पुनर्हिमकालो भवति, एकस्मादेकः सर्वदा वर्तते, तथैव तेनैव प्रकारेण मुक्तागममालिकायाः आद्यन्तभावो न वर्तते । देवश्रुतयोरपि आद्यन्तभावो नास्ति, मुक्ताद्देवात् आगमो भवति, आगमाच्छास्त्रान्मुक्तो देवो भवति ॥

तदेव निरूपयति—**श्रुतादित्यादि ।** श्रुतादागमात् स जगत्प्रसिद्धो देवोऽर्हन् भवति । अस्माद्देवादेतत् श्रुतं भवति । इमावेतौ श्रुतदेवौ हि निश्चयेन बीजाङ्कुरवत् प्रवृत्तौ प्रवृत्तिं गतौ ।

१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असंशयं हेतुविशेषभावाद्यथोपलः स्यात्कनकं तथैव ।
अन्तर्बहिश्चास्तसमस्तदोषो ज्योतिः परं स्यादयमेव जीवः ॥
अङ्गारवत्तद्धि न जातु शुध्येद्रूपान्तरं वस्तुनि यत्र नास्ति ।
दृष्टो मणीनां मलसंक्षयेण तेजःप्रभावः पटुभिः कृतेन ॥
भूता भविष्यन्ति भवन्ति चान्ये लोकत्रयज्ञाः क्रमशः क्षितीशाः ।
यथा तथाप्ता यदि को विरुद्धो बहुत्वमन्यत्र च बाढमस्ति ॥
हरिः पुनः क्षत्रिय एव कश्चिज्ज्योतिर्गणैस्तुल्यगुणो रविश्च ।
देवौ स्त एतौ यदि मुक्तिमार्गौ पृथुश्च सोमश्च कुतस्तथा न ॥

वीजादङ्कुरो भवति, अङ्कुराद्वीजं भवति । हिताहितज्ञे हितज्ञमहितज्ञं च दैवात् पुण्यात् पुंसि पुरुषे परेण किं कार्यम् । न किमपि । किंवत् । जातिस्मरवत् । यथा जातिस्मरः पुमान् अन्यं न पृच्छति किं तु स्वयमेव जानाति, एवं ज्ञानात् स्वयमेव जानाति । परेण किं कार्यम् । न किमपि कार्यमित्यर्थः ॥

असंशयमित्यादि । असंशयं यथा भवत्येवं हेतुविशेषभावात् कारणभेदस्य भावात् यथा उपलः कनकं स्यात् तथैव अन्तर्बहिश्च अन्तः कर्मक्षयोपशमादिभावः, वहिश्च गुर्वाद्युपदेशः, अस्तसमस्तदोषः क्षीणकर्ममलकलङ्कः अयमेव संसारी जीवः परं ज्योतिः सिद्धः स्यात् ॥

अङ्गारेत्यादि । अङ्गारवत् अनिलवत् तद्वत् तदेवात्मस्वरूपं अभव्यजीवलक्षणं जातु कदाचित् न शुद्ध्येत् शुद्धिं न प्राप्नुयात् । तत्किम् । यत्र वस्तुनि [अ]भव्यलक्षणे पदार्थे रूपान्तरं नास्ति । मिथ्यात्वं मुक्त्वा कदाचिदपि यः सम्यक्त्वं न याति न शुद्ध्येदित्यर्थः । पटुभिर्विचक्षणैः कृतेन विहितेन मलसंक्षयेण विनाशेन मणीनां रत्नानां तेजःप्रभावो दृष्टो विलोकितः । तथा चोक्तं समन्तभद्रेण महर्षिणा—'दोषावरणयोर्हानिर्निःशेषास्त्यतिशायनात् । क्वचिद्यथा स्वहेतुभ्यो वहिरन्तर्मलक्षयः ॥'

भूता इत्यादि । भूता अतीताः, भविष्यन्तोऽनागताः, भवन्तश्च वर्तमानाः, अन्ये लोकत्रयज्ञायकाः क्रमशो न क्रमेण यथा क्षितीशा राजानस्तथा तेनैव क्षितीशप्रकारेण यदि चेत् आप्तास्तीर्थंकरपरमदेवा भूता भविष्यन्ति भवन्ति तर्हि को विरुद्धः । न कश्चिद्विरुद्ध इत्यर्थः । अन्यत्र च परमते वहुत्वं प्रचुरत्वं बाढमतिशयेन अस्ति वर्तते, हरिहरहिरण्यगर्भनवग्रहतिथिदेवताद्वादशादित्यादिवत् ॥

हरिरित्यादि । हरिः श्रीनारायणः पुनः पश्चात् कश्चित् कोऽपि क्षत्रिय एव वर्तते । ज्योतिर्गणैस्तुल्यगुणः शुक्रशनैश्चरादिसदृशो रविश्च वर्तते । एतौ द्वौ हरिरवी यदि मुक्ति-

---

१. अत्र प्रसिद्धसाहचर्याभावाद्ब्रह्मप्रजापतिशब्दवन्नानङ्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशेषमेतद्वपुषा बिभर्ति दशावतारेण स वर्तते वा ।
शिला प्लवादर्पति विस्मयार्हं मातः कथं संगतिमङ्गतीदम् ॥
स्वयं स कुष्ठी पदयोः किलार्कः परेषु रोगार्तिहरश्च चित्रम् ।
अजा परेषां विनिहन्ति वातं स्वयं तु वातेन हि सा म्रियेत ॥
माता—(स्वगतम् ।)
गतः स कालः खलु यत्र पुत्रः स्वतन्त्रवृत्त्या हृदयेप्सितानि ।
कार्याणि कार्येत हठान्नयेन भयेन वा कर्णचपेटया वा ॥
युवा निजादेशनिवेशितश्रीः स्वयंप्रभुः प्राप्तपदप्रतिष्ठः ।
शिष्यः सुतो वात्महितैर्बलाद्धि न शिक्षणीयो न निवारणीयः ॥

मार्गौ देवौ स्तः स्याताम्, तर्हि पृथुश्च आदिक्षत्रियः सोमश्च चन्द्रस्तथा देवौ कुतो न स्याताम् ॥

अशेषमित्यादि । हे मातः, स हरिरेतदशेषं जगद्वपुषः शरीरेणोदरमध्ये बिभर्ति । वान्यद्दशावतारेण वर्तते यः सर्वनिजशरीरेण बिभर्ति स दशावतारान् कुतः स्थित्वा गृह्णाति । शिला प्लवादर्पति जले शिला तरतीति एतस्मादपि कथं केन प्रकारेण इदं विस्मयार्हं संगतिं अङ्गति व्रजति । कथं सङ्गः क्षतः(?) इत्यर्थः ॥

स्वयमित्यादि । सोऽर्कः किल पदयोः पादयोः स्वयं कुष्ठी कुष्ठरोगवान् वर्तते । चित्रं परेषु भक्तेषु रोगार्तिहरश्च रोगपीडाविनाशकश्च वर्तते । अमुमेवार्थं दृष्टान्तेनोच्छिनत्ति— अजा छागिका परेषां लोकानां वातं विनिहन्ति । स्वयं तु सा अजा वातेन वातरोगेण म्रियेत मृतिं गच्छेत् । इदमपि विस्मयार्थम् । किंतु अजा वातरोगेण न म्रियते इत्यर्थः ॥

माता चन्द्रमतिः स्वगतमात्मगतं चिन्तयति—**गत इत्यादि** । स कालः प्रस्तावः गतोऽतिक्रान्तः । खलु निश्चयेन । यत्र काले पुत्रो यशोधरः स्वतन्त्रवृत्त्या आत्माधीनत्वेन हृदयेप्सितानि कार्याणि कर्तव्यानि हठात् नयेन न्यायेन भयेन भीत्या वा कर्णचपेटया वा हस्ततलताडनेन वा कार्येत कार्यते । इदानीं तु कार्याणि हठादिना कारयितुं न शक्यत इत्यर्थः ॥

कस्मान्न कार्यते इदानीं तु असौ तावत्—**युवेत्यादि** । युवा शिशुर्न वर्तते । अपि च निजादेशनिवेशितश्रीः निजादेशे निवेशिता आरोपिता श्रीर्येन स तथोक्तः । पुनः कथंभूतः । स्वयंप्रभुः स्वयमेव सर्वेषां स्वामी समर्थो वा । पुनः कथंभूतः । प्राप्तपदप्रतिष्ठः प्राप्ता लब्धा पदे राज्यपदे प्रतिष्ठा शोभा येन स तथोक्तः । तेन कारणेन शिष्यः विद्यार्थी सुतो वा आत्महितः पुरुषैर्बलाद्बलात्कारेण न शिक्षणीयो नापि निवारणीयो निषेधनीयः । कथम् । हि । स्फुटमिति शेषः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(प्रकाशम्।)

तवोपदेशं खलु किं नु कुर्याद्विनीतचित्तस्य बहुश्रुतस्य।
को नाम धीमाँल्लवणाम्बुराशेरुपायनार्थं लवणं नयेत॥
विचक्षणः किं तु परोपदेशे न स्वस्य कार्ये सकलोऽपि लोकः।
नेत्रं हि दूरेऽपि निरीक्षमाणमात्मावलोके त्वसमर्थमेव॥
निघ्नन्ति निःसंशयमेव भूपाः पुत्रं च मित्रं पितरं च बन्धुम्।
स्वस्य श्रिये जीवितरक्षणाय राज्यं कुतः क्षान्तिपरायणानाम्॥
तदस्य दुःस्वप्नविधेः शमार्थं संरक्षणार्थं निजजीवितस्य।
दुर्वासनां वत्स विहाय जीवैर्विधेहि यज्ञं कुलदेवतायाः॥

किमङ्ग, महामुनिर्गौतमः प्राणत्राणार्थमात्मोपकारिणमपि नाडीजङ्घं न

प्रकाशं सर्वेषां स्फुटं माता ब्रूते—**तवेत्यादि**। हे पुत्र, तव भवतः। खलु निश्चयेन। नु इति प्रश्ने वितर्के वा। उपदेशं माता शिक्षाकर्त्री किं कुर्यात्। अपि तु न किमपि कुर्यादित्यर्थः। त्वं सर्वत्र विचक्षणो वर्तस इत्यर्थः। कथंभूतस्य तव। विनीतचित्तस्य विनयपरहृदयस्य। पुनः कथंभूतस्य तव। बहुश्रुतस्य अनेकेषु शास्त्रेषु प्रवीणस्य। अमुमेवार्थं प्राभृतीकरणार्थं दृष्टान्तद्वारेण द्रढयति—नामेति संभावनायाम्। को धीमान् कः प्रेक्षावान् पुरुषः लवणाम्बुराशेः लवणोदधिसमुद्रस्य उपायनार्थं प्राभृतीकरणार्थं लवणमक्षीवं नयेत नयति। अपि तु न कश्चिदित्यर्थः॥

विचक्षण इत्यादि। हे पुत्र, त्वं विचक्षणो वर्तसे। किं तु सकलोऽपि लोकः समस्तोऽपि जनः। केवलं त्वमेव न। परोपदेशे विचक्षणो भवति। न तु स्वस्य कार्ये विचक्षणः स्यात्। अमुमेवार्थं दृष्टान्तेन द्रढयति--हि यस्मात् कारणात् नेत्रं चक्षुर्दूरेऽपि वस्तु निरीक्षमाणं अवलोकयद्भवति। आत्मावलोके चक्षुर्विलोकने तु असमर्थमेव वर्तते॥

निघ्नन्तीत्यादि। हे पुत्र, भूपाः स्वस्य श्रिये लक्ष्मीनिमित्तं जीवितरक्षणाय आत्ममृत्युवञ्चनार्थं च निःसंशयमेव पुत्रं च निघ्नन्ति मारयन्ति, मित्रमभीष्टं निघ्नन्ति, पितरं च वप्तारं निघ्नन्ति, बन्धुं निघ्नन्ति। अमुमेवार्थेन द्रढयति—क्षान्तिपरायणानां क्षमवतां राज्ञां राज्यं कुतः। न कुतश्चिदित्यर्थः॥

तदित्यादि। तत्तस्मात् कारणात् अस्य दुःस्वप्नविधेर्विधानस्य शमार्थं शमनार्थं निजजीवितस्य आत्मायुषः संरक्षणार्थं च। हे वत्स पुत्र, दुर्वासनां दिगम्बरोपदेशं विहाय कुलदेवताया जीवैः पशुभिर्यज्ञं विधेहि पूजां कुरु॥

अङ्ग अहो पुत्र, गौतमो नाम महामुनिः प्राणत्राणार्थं प्राणरक्षणार्थं आत्मोपकारिणमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जघान। विश्वामित्रः सारमेयम्। एवमन्येऽपि शिबिदधीचिबलिबाणासुरप्रभृतीनामवनिपतीनां सुरभितनयादीनामितरेषां च सत्त्वानामालम्भनेनात्मनः शान्तिकर्माणि सम्यगारेभिरे।

यथा जलैः पङ्कजिनीदलानां पङ्कैर्न लेपो नभसो यथा च।
राज्ञस्तथा शुद्धमतेर्न पापैः संबन्धगन्धोऽस्ति कथंचनापि॥
विषं विषस्यौषधमग्निरग्नेरियं प्रसिद्धिर्महती यथैव।
पुण्याय हिंसापि भवेत्तथैव सर्वत्र हे पुत्र न षड्ढलानि॥

नाडीजङ्घं वानरं किं न जघान। अपि तु जघानैव। गौतमः किल तीर्थे यात्रासु चलितः। च्युतमार्गश्च महति कान्तारे पतितः। पिपासोष्णशोषः शुष्यति शेषकायः बुभुक्षाशुशुक्षणि संधुक्षमाणकुक्षिश्च स्वैरविहारिणा वानरेणोदकस्थानं नीतः। स मुनिस्तद्दर्शितं तोयं पीत्वा वानरं मारयित्वा कृततत्पिशितभोजनो वनं निस्ततार। हे पुत्र, विश्वामित्रो महामुनिः सारमेयं श्वानं कृतोपकारं किं न जघान। एषापि कथा तद्वदेव। एवममुना प्रकारेण अन्येऽपि राजानः सुरभितनयादीनां धेन्वादीनामितरेषां च अपरेषां सत्त्वानां प्राणिनां आलम्भनेन मारणेन आत्मनः स्वेषां शान्तिकर्माणि सम्यगारेभिरे आरब्धवन्तः। तथा हि—शिबिदधीचिनौ राजानौ तयोर्मांसास्थिभ्यां देवा आत्मनो विघ्नोपशमनं वृतदानवक्षयं कृतवन्तः। बलिबाणासुरौ तयोर्द्वयोर्यज्ञे बन्धनालम्भनाभ्यां निष्कण्टकां देवा महीं चक्रुः। शिबिदधीचिभ्यां यागः कृतः, बलिबाणासुरौ मारितौ। प्रवृत्तिशब्दात् वृतदानवं च मारितवन्तः। अवनिपतीनां राज्ञां सुरभितनयादीनां माहेयीप्रभृतीनां च सत्त्वानां पशूनां आलम्भनेन मारणेन आत्मनः शान्तिकर्माणि अन्येऽपि राजानः सम्यगारेभिरे। गोसवे यज्ञे तां माहेयीं आलभ्य मारयित्वा प्राप्य च रन्तिदेवो मुनिः स्वर्गं साधयामास। अत एव कारणात् चर्मप्रक्षालनात् चर्मल(ण्व)ती नदी बभूव। तदस्थिप्रक्षालनाच्च अष्ठीवती नदी संजाता॥

यथेत्यादि। यथा येन प्रकारेण जलैः पङ्कजिनीदलानां पद्मिनीपत्राणां लेपो न भवति। नभसः पङ्कैर्लेपो यथा न भवति। तथा तेनैव प्रकारेण शुद्धमते राज्ञः पापैः सह संबन्धगन्धः कथंचनापि प्रकारेण संबन्धगन्धः पापबन्धलेशोऽपि नास्ति॥

विषमित्यादि। यथैव येनैव प्रकारेण विषस्यौषधं विषं भवति, अग्नेरौषधं अग्निर्भवति, इयं महती प्रसिद्धिर्वर्तते, तथैव तेनैव प्रकारेण हिंसापि जीववधोऽपि पुण्याय श्रेयसे भवेत् संजायेत। हे पुत्र हे यशोधरमहाराज, सर्वत्र सर्वेषु क्षेत्रेषु षड्ढलानि न भवन्ति। क्वचिद्धीनानि, क्वचिदधीकानि, क्वचित् षडेव हलानि भवन्तीत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोब्राह्मणस्त्रीमुनिदेवतानां विचारयेत्कश्चरितं विपश्चित् ।
श्रुतिस्मृतीहासपुराणवाचस्त्यजात्मना चेन्न तवास्ति कार्यम् ॥
न कापि पुंसः पुरुषार्थसिद्धिः सूक्ष्मेक्षयातीवपरीक्षकस्य ।
जगत्प्रवाहेण तु वर्तितव्यं महाजनो येन गतः स पन्थाः ॥
विलासिनीविभ्रमदर्पणानि कंदर्पसंतर्पणकारणानि ।
क्रियाश्रमच्छेदकराणि हातुं मधूनि को नाम सुधीर्यतेत ॥
मताः समा मन्मथतत्त्वविद्भिर्मृताः स्त्रियो मद्यविवर्जिताश्च ।
ये भुञ्जते मांसरसेन हीनं ते भुञ्जते किं नु न गोमयेन ॥

यदि च मधुमांसनिषेवणे महादोषस्तदा कथमेतन्महर्षिभिरुदाहृतम्—

गोब्राह्मणेत्यादि । गावश्च ब्राह्मणाश्च स्त्रियश्च मुनयश्च गौतमादयो देवताश्च विश्वा···दयो गोब्राह्मणस्त्रीमुनिदेवतास्तासां चरितमाचारं को विपश्चित् विचारयेच्चर्चयेत् । अपि तु न कश्चिद्विपश्चिद्विचारयेदित्यर्थः । हे पुत्र, श्रुतिस्मृतीतिहासपुराणवाचः श्रुतिः वेदः, स्मृतिः धर्मशास्त्रम्, इतिहास इतिवृत्तम्, पुराणवाच रामायणमहाभारतादीनां वचनानि त्वं त्यज मुञ्च चेद्यदि आत्मना जीवेन सह तव कार्यं नास्ति । जीवार्थी चेत्तर्हि मा त्यज ॥

न कापीत्यादि । हे पुत्र, पुंसः पुरुषस्य कापि काचिदपि पुरुषार्थसिद्धिर्न भवति । कथंभूतस्य पुंसः । सूक्ष्मेक्षया सूक्ष्मदृष्ट्या कृत्वा अतीवपरीक्षकस्य । जगत्प्रवाहेण तु लोकमार्गेण तु वर्तितव्यं वर्तनीयम् । येन यथा मार्गेण महाजनो गतः महान् लोकः प्रवृत्तः स पन्थाः स एव मार्गः । अर्थान्तरन्यासालंकारः ॥

विलासिनीत्यादि । हे पुत्रक, सुधीः पुमान् । नामेति संभावनायाम् । मधूनि मध्वादीनि हातुं परिहर्तुं को यतेत यत्नं कुर्यात् । अपि तु न कश्चित् परिहरेदित्यर्थः । कथंभूतानि मधूनि । विलासिनीविभ्रमदर्पणानि विलासिनीनामुत्तमस्त्रीणां विभ्रमाणां अवलोकने दर्पणानि आदर्शसदृशानि । पुनः कथंभूतानि । कंदर्पस्य कामोद्रेकस्य संतर्पणे समुद्दीपने कारणानि हेतुभूतानि । पुनः कथंभूतानि । क्रियाश्रमच्छेदकराणि क्रियाणां खुरुलिकादीनां श्रमस्य छेदकराणि । आक्षेपालंकारः ॥

मता इत्यादि । हे पुत्र, मृताः स्त्रियो मद्यविवर्जिताश्चापि समा मताः । कैः । मन्मथतत्त्वविद्भिः कामशास्त्ररहस्यविचक्षणैः पुरुषैः । हे पुत्र, मांसरसेन हीनं ये भुञ्जते भोजनं कुर्वते पुरुषाः । नु इति वितर्के । गोमयेन सह गोविषा सह किं न भुञ्जते । अपि तु गोविट्सहितं भोजनं कुर्वन्तीत्यर्थः । उपमालंकारः ॥

यदि च यदि चेत् मधुमांसनिषेवणे महादोषो वर्तते, तदा तस्मिन् काले एतद्वचनं महर्षिभिः कथं उदाहृतं प्रोक्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेव भूतानां निवृत्तेश्च महत्फलम् ॥' इति ।

कथं च हव्यकव्यविधिषु प्रबन्धेन तद्ग्रहणम् । तदाह—

'तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन च ।
दत्तेन मांसं प्रीयन्ते विधिवत्पितरो नृणाम् ॥
द्वौ मासौ मत्स्यमांसेन त्रीन्मासान्हारिणेन च ।
औरभ्रेणाथ चतुरः शाकुनेनैव पञ्च वै ॥
षण्मासांश्छागमांसेन पार्षतेन हि सप्त वै ।
अष्टावेणस्य मांसेन रौरवेण नवैव तु ॥
दश मासास्तु तृप्यन्ति वराहमहिषामिषैः ।
शशकूर्मस्य मांसेन मासानेकादशैव तु ॥

एतत्किम्—**नेत्यादि** । मांसभक्षणे दोषः पापं न वर्तते, न च मद्ये दोषो वर्तते, न चैवं मैथुने दोषो वर्तते । किं तर्हि । भूतानां प्रवृत्तिरेव भवति, निवृत्तेस्तु मद्यमांसनियमात् महत्फलं भवति ॥

कथं च केन प्रकारेण हव्यकव्यविधिषु देवे त्रिकार्यविधानेषु प्रबन्धेन शास्त्रेण कृत्वा तद्ग्रहणं मांसग्रहणं वर्तते । तदाह तदेव निरूपयति—**तिलैरित्यादि** । …… ॥

द्वौ मासावित्यादि । द्वौ मासौ शास्त्रे मत्स्यमांसेन मीनामिषेण पितरस्तृप्यन्ति । त्रीन् मासान् प्रतिग्रसमासाख्या (?) हारिणेन हरिणमांसेन पितरस्तृप्यन्ति । अथानन्तरमौरभ्रेण वेषमांसेन चतुरो मासान् पितरस्तृप्यन्ति । शाकुनेनैव पक्षिमांसेनैव पञ्च मासान् पितरस्तृप्यन्ति ॥

षडित्यादि । वै निश्चयेन । छागमांसेन षण्मासान् पितरस्तृप्यन्ति । पार्षतेन मृगविशेषमांसेन सप्त मासान् पितरस्तृप्यन्ति । कथम् । हि निश्चयेन । वै इति पादपूरणे । अष्टौ मासान् एणमांसेन कस्तूरीमृगमांसेन पितरस्तृप्यन्ति । रौरवेण रुरुमृगेण नवैव मासान् पितरस्तृप्यन्ति ॥

दशेत्यादि । वराहमहिषामिषैः शूकरमहिषमांसैस्तु दश मासान् पितरस्तृप्यन्ति । शशकूर्मस्य मांसेन शशकरक्षयमांसेन एकादशैव मासान् पितरस्तृप्यन्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवत्सरं तु गव्येन पयसा पायसेन वा ।
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥' इति ।

राजा—(स्वगतम् ।)

ऐश्वर्यमेकं तिमिरं नराणामेवंविधो बन्धुगणो द्वितीयम् ।
किं नाम पापं न करोतु जन्तुर्मदेन मोहेन च निर्विचारः ॥
श्रियां मनोदर्पकरैर्विलासैरापातरम्यैश्च विलासिनीनाम् ।
प्रतारितान्तःकरणो दुरन्तां भवाटवीमेष विशत्यवश्यम् ॥
बलादमीभिर्विषयैर्वराकः प्रायेण जानन्नपि मोहितात्मा ।
मृत्योः पुरीवारिविहारभाजां वन्यः करीवास्पदमापदां स्यात् ॥

(प्रकाशम् ।)

नान्येषु पापं मनसा विचिन्त्यं साक्षात्स्वयं तत्क्रियते मयाद्य ।
त्वया श्रुता किं नु कथा न लोके सशालिशिक्थस्य वसोः प्रसिद्धा ॥

संवत्सरमित्यादि। गव्येन पयसा गोदुग्धेन पायसेन वा संवत्सरं पितरस्तृप्यन्ति । वार्ध्रीणसस्य गण्डकस्य मांसेन द्वादशवार्षिकी तृप्तिर्भवति ॥

राजा श्रीयशोधरः स्वगतं आत्मगतं चिन्तयति—**ऐश्वर्यमित्यादि** । ऐश्वर्यं नार्पतं एकं तावत् नराणां तिमिरमन्धकारं वर्तते । एवंविधो मात्रादिलक्षणो बन्धुगणो बन्धुवर्गो द्वितीयं तिमिरं वर्तते । नामेति संभावनायाम् । जन्तुः किं पापं न करोतु । अपि तु सर्वपापं करोत्वित्यर्थः । कथंभूतो जन्तुः । मदेनैश्वर्यगर्वेण मोहेन च एवंविधबन्धुवर्गमोहेन कर्मणा निर्विचारो निर्विवेकः । यथासंख्याक्षेपालंकारः ॥

श्रियामित्यादि । श्रियां लक्ष्म्यां सत्यां विलासिनीनां विलासैर्नेत्रशोभाभिः प्रतारितान्तःकरणो वञ्चितमना एष जन्तुरवश्यं निश्चयेन दुरन्तां दुष्टस्वभावां भवाटवीं विशति प्रवेशं करोति । कथंभूतैर्विलासैः । मनोदर्पकरैः हृदयमदजनकैः । पुनः कथंभूतैः । आपातरम्यैः प्रथमप्रारम्भे रम्यैः । रूपकालंकारः ॥

बलादित्यादि । अमीभिरेतैर्विषयैरिष्टस्रग्वनिताचन्दनादिभिः कारणभूतैर्मोहितात्मा परेष जन्तुर्वराको वर्पटकः प्रायेण जानन्नपि विदन्नपि बलात् आपदामास्पदं स्यात् । क इव । वने भवो वन्यः करीव । यथा वन्यः करी मृत्योः पुरीवारिविहारभाजां मरणस्य नगरीविहारवतां करिधरणस्थानं वारिरुच्यते । तद्विहारज्ञोऽजमास्पदं स्यात् । रूपकदृष्टान्तालंकारः ॥

प्रकाशम् । यशोधरो राजा सर्वं स्फुटमुक्तवान् ॥

नान्येष्वित्यादि । हे मातः, अन्येषु जीवेषु पापं तल्लक्षणं मनसा न विचिन्त्यं नो विचिन्तनीयम् । तत्पापं अद्य इदानीं मया यशोधरेण साक्षात्प्रत्यक्षेण कथं क्रियते । कर्तुं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिबेद्विषं यद्यमृतं विचिन्त्य जिजीविषुः कोऽपि नरो वराकः ।
किं तस्य तन्नैव करोति मृत्युमिच्छावशान्नैव मनीषितानि ॥
रजस्तमोभ्यां बहुलस्य पुंसः पापं सतां नैव निदर्शनाय ।
नाप्येनसामासजतामपेक्षा जातौ कुले वा रजसामिवास्ति ॥
जातिर्जरामृत्युरथामयाद्वा नृपेषु चान्येषु समं भवन्ति ।
पुण्यैर्जनेभ्योऽभ्यधिकाः क्षितीशा मनुष्यभावे त्वविशेष एव ॥
यथा मम प्राणिवधे भवत्या महान्ति दुःखानि भवन्ति मातः ।
तथा परेषामपि जीवहानौ भवन्ति दुःखानि तदम्बिकानाम् ॥

शक्यत इत्यर्थः । हे मातः, त्वया भवत्या । नु इति प्रश्ने । वसोः वसुनरेन्द्रस्य लोके प्रसिद्धा कथा किं न श्रुता । कथंभूतस्य वसोः । सशालिशिक्थस्य शालिशिक्थमत्स्यसहितस्य । एतत्कथाद्वयं कविः स्वयमेवाग्रे विस्तरेण कथयिष्यति । आक्षेपालंकारः ॥

पिबेदित्यादि । यदि चेत्कोऽपि कश्चिन्नरो मनुष्यो वराको हीनदीनो जिजीविषुर्जीवितुमिच्छुरमृतं विचिन्त्य पीयूषमिति कृत्वा विषं हालाहलं पिबेदास्वादयेत्, तस्य रसस्य तद्विषं किं मृत्युं मरणं नैव करोति । अपि तु करोत्येव । इच्छावशात् मनोरथवशात् मनीषितानि नैव भवन्ति । तथा धर्मबुद्ध्या पापं कुर्वन् किं पुण्यं लभते । अपि तु नैव लभत इत्यर्थः । अर्थान्तरन्यासालंकारः ॥

रजस्तमोभ्यामित्यादि । रजस्तमोभ्यां पापेन अज्ञानेन च बहुलस्य प्रचुरस्य पुंसः गौतमादेर्विश्वामित्रादेश्च पापं सतां विद्वज्जनानां हेयोपादेयविवेकिनां निदर्शनाय दृष्टान्ताय नैव भवति । तैः पापिष्ठैः स्थावरादिमांसभक्षणं पापं कृतं तथा सत्पुरुषा न कुर्वन्ति इत्यर्थः । एनसां पापानामासजतां संबध्यमानानां जातौ कुले वा मातृपक्षे अपेक्षा वाञ्छा कापि नास्ति । केषामिव । रजसामिव धूलीनामिव । यथा रजांसि उड्डीयमानानि सर्वेषामुपरि पतन्ति न कमपि वञ्चयन्तीत्यर्थः । उपमालंकारः ॥

जातिरित्यादि । जातिर्जन्म जरा मृत्युः, अथानन्तरमामयाद्वा नृपेषु अन्येषु चापरप्राणिषु समं समानतया भवन्ति । तत्र क्षितीशा राजानः पुण्यैः कृत्वा जनेभ्यः अभ्यधिका भवन्ति अतिरेकिणो भवन्ति । मनुष्यभावे तु अविशेष एव राजलोकयोर्न कश्चिद्विशेषोऽस्ति । जातिः, अतिशयालंकारश्च ॥

यथेत्यादि । हे मातः, यथा मम प्राणिवधे भवत्यास्तव महान्ति गुरूणि दुःखानि भवन्ति । तथा परेषामपि जीवहानौ तदम्बिकानां तन्मातॄणां दुःखानि भवन्ति । दृष्टान्तालंकारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परस्य जीवेन यदि स्वरक्षा पूर्वे क्षितीशाः कुत एव मम्रुः ।
शास्त्रं तु सर्वत्र यदि प्रमाणं श्वकाकमांसेऽपि भवेत्प्रवृत्तिः ॥
भवन्नकृत्यावहितो हि लोकः कदापि नेदं जगदेकमार्गम् ।
यद्धर्मबुद्ध्या विदधाति पापं तन्मे मनोऽतीव दुनोति मातः ॥
लोके विनिन्द्यं परदारकर्म मात्रा सहैतत्किमु कोऽपि कुर्यात् ।
मांसं जिघत्सेद्यदि कोऽपि लोलः किमागमस्तत्र निदर्शनीयः ॥
लोलेन्द्रियैर्लोकमनोनुकूलैः स्वाजीवनायागम एष सृष्टः ।
स्वर्गो यदि स्यात्पशुहिंसकानां सूनाकृतां तर्हि भवेत्स कामम् ॥
मन्त्रेण शस्त्रैर्गलपीडनाद्वा वेद्यां बहिश्चापि वधः समानः ।
स्वर्गो यदि स्यान्मखहिंसितानां स्वबान्धवैर्यज्ञविधिर्न किं तु ॥

परस्येत्यादि । परस्य गजवाज्यनादिजीवगणस्य जीवेन यदि चेत् स्वरक्षा भवति तर्हि पूर्वे चिरंतनाः क्षितीशाः कुत एव कस्मादेव मम्रुर्मृताः । यदि चेत् शास्त्रं तु सर्वत्र प्रमाणं भवति तर्हि श्वकाकमांसेऽपि प्रवृत्तिर्भवेत् । जात्यलंकारः ॥

भवन्नित्यादि । हे मातः, लोकोऽकृत्यावहितः पापकर्मणि सावधानो भवन् संजायमानो वर्तते । इदं जगत् कदापि कस्मिंश्चिदप्यवसरे एकमार्गमेकमताश्रितं न भवति । कथम् । हि निश्चयेन । यल्लोको धर्मबुद्ध्या पापं विदधाति तन्मे मम मनोऽतीव दुनोति उपतापं प्राप्नोति । जातिरियम् ॥

लोक इत्यादि । परदारकर्म परस्त्रीभोगो लोके जगति विनिन्द्यं विशेषेण गर्हणीयं वर्तते । एतत्परदारकर्म मात्रा सह जनन्या सह कोऽपि किमु कुर्यात् । अपि तु न कुर्यादित्यर्थः । यदि चेत् कोऽपि कश्चित् पुरुषः लोलो जिह्वालम्पटो मांसं जिघत्सेत् खादितुमिच्छेत् तत्र तस्मिन् मांसभक्षणे आगमः सिद्धान्तः वेदशास्त्रं किं किमर्थं निदर्शनीयः । अपि तु नोदाहर्तव्यमित्यर्थः । आक्षेपालंकारः ॥

लोलेत्यादि । लोलेन्द्रियैरिन्द्रियलम्पटैः लोकमनोनुकूलैर्यथालोकचित्तमनुलापुकैरेषोऽयं आगमो वेदसिद्धान्तः स्वाजीवनाय निजविषयपोषणाय सृष्टो रचितः । यदि चेत् पशुहिंसकानां गजवाज्यब्राह्मणादियज्ञकर्मणि वधकानां स्वर्गः स्यात् संजायते तर्हि स स्वर्गः काममतिशये सूनाकृतां खाटकिनां भवेत् संजायेत । आक्षेपालंकारः ॥

मन्त्रेणेत्यादि । मन्त्रेण अथर्वणमन्त्रेण सहिता वाक्येन वा शस्त्रैर्गलपीडनात् कण्ठमोटनाद्वा वेद्यां प्रालम्भनकुण्डे वहिश्चापि यागमण्डपबाह्ये वा वधो जीवघातः समानः सदृशपापो वर्तते । यदि चेत् मखहिंसितानां यज्ञे वषट्कृतानां पशूनां स्वर्गः स्यात् त्रिद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातः, आकर्णयात्रोपाख्यानम्, यन्मयापरेद्युरेव विद्यानवद्यनामकादुपासकादुपश्रुतम् । तथा हि—किलाखण्डलसभायां ब्राह्मणाचरणं प्रति विवदमानमनसौ द्वौ दिवौकसावेतत्परीक्षार्थमेकश्छगलच्छलेनापरस्तदाजीवनव्याजेन पाटलिपुत्रपुरबाहिरिकायामवतेरतुः । तस्मिन्नेवावसरे सपञ्चाशतं पञ्चशतीं छात्राणामध्यापयन्नुपाध्यायः सकलवेदवेदाङ्गोपाङ्गोपदेशावधेयः काङ्कायननामधेयः षष्टितमीदृशं प्राग्वंशं विधित्सुस्तत्रैवाजगाम । ईक्षांचक्रे च पुरुषेणाधिष्ठितमतीव महादेहमजम् । 'अहो, साधु भवत्ययमजास्तनंधयः खलु यज्ञकर्मणे' इत्यनुध्याय तं गोधमेवमभ्यधात्—'अरे मनुष्य, समानीयतामित इतोऽयं छागस्तव चेदस्ति विक्रेतुमिच्छा' इति । पुरुषः—'भट्ट, विचिक्रीषुरेवैनं यदि भवानिदं मे प्रसादीकरोत्यङ्गुलीयकम् ।' उपाध्यायस्तथा

शालयो भवेत् तर्हि । तु इति प्रश्ने । स्वबान्धवैः निजपुत्रादिकुटुम्बवर्गैः यज्ञविधिः किं न वर्तते । उपमालंकारः ॥

हे मातः, अत्र जीववध उपाख्यानं दृष्टान्तकथां त्वमाकर्णय यदुपाख्यानं मया यशोधरेण अपरेद्युरेव परस्मिन्नहन्येव विद्यानवद्यनामकादुपासकात् श्रावकादुपश्रुतमाकर्णितम् । तथा हि । तदेवोपाख्यानं दर्शयति—**किलेति** । आखण्डलसभायां सौधर्मैन्द्रसदसि ब्राह्मणाचरणं प्रति विवदमानमनसौ विवादं कुर्वतौ । ज्ञानयत्नोपछन्देषु वद इति करे विमतौ आत्मनेपदमित्यर्थः । द्वौ दिवौकसौ एतत्परीक्षार्थं ब्राह्मणाचारपरीक्षार्थम् एको देवश्छगलच्छलेन अपरो देवस्तदाजीवनव्याजेन छगलाजीवनमिषेण पाटलिपुत्रपुरबाहिरिकायां नगरसमीपवने अवतरेतुरवतीर्णौ । तस्मिन्नेवावसरे सपञ्चाशतं पञ्चशतीं सहस्रार्धं छात्राणां अध्यापयन् पाठयन् उपाध्यायः पाठकः सकलवेदवेदाङ्गोपाङ्गोपदेशावधेयः चतुर्वेदषडङ्गोपाङ्गानां उपदेशे अवधेया मर्यादा यस्य स तथोक्तः काङ्कायननामधेयः षष्टितमीदृशं प्राग्वंशं यज्ञं विधित्सुः विधातुमिच्छुः । 'प्राग्वंशः पुंलिङ्गे यज्ञगृहम्' इति दुर्गः । तत्रैवाजगाम तस्यामेव नगरबाहिरिकायां आजगाम आगच्छति स्म । ईक्षांचक्रे च दृष्टवांश्च पुरुषेणाधिष्ठितं महाशूद्रेण सहितं अतीव महादेहं वृषभसदृशमजम् । अहो आश्चर्ये । अयं अजास्तनंधयश्छागीपुत्रो यज्ञकर्मणे खलु भवति । कथम् । साधु यथा भवति । इत्येवमनुध्याय चिन्तयित्वा तं गोधं भारभटपुरुषं एवं अभ्यधात् उक्तवान्—अरे मनुष्य । सोऽपि काङ्कायन आत्मानं देवं मन्यमान इति भावः । समानीयतां प्राप्यतां इतः स्थानात् इत एतस्मिन् स्थाने अयं छागस्तव चेदस्ति विक्रेतुमिच्छा इति उक्तवान् । पुरुषो मनुष्य आह—भट्ट, विचिक्रीषुरेव विक्रेतुमिच्छुरेवाहमेनं छागं यदि भवान् इदं मे मम प्रसादीकरोति प्रसन्नो भूत्वा अर्पयति । किं तत् । अङ्गुलीयकं मुद्रिकाम् । उपाध्यायः काङ्कायनस्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधायापवर्त्य च तं पुरुषमात्मदेशीयं शिष्यमादिशति—'अहो कुशिक वत्स, बलीयानयमजास्तनंधयः । तदतियत्नमुपसंव्यानेन बद्ध्वानीयतामुदवसितम् । अहमप्येष तवानुपदमेवागच्छामि।' तथाचरति तच्छिष्ये स वसुधायां कुलिशकीलित इव निषण्णः संभूय सर्वैरपि तदन्तेवासिभिरुत्थापयितुमशक्यः 'प्रीयन्तामत्रैवास्य चेटस्य मांसेन विधिपूर्वकं देवाः पितरो ब्राह्मणाश्च' इत्यालापोल्बणरुषममर्षविषोन्मेषकलुषचक्षुषमाशु स्वयमेव वधायोद्धृतपर्वताकारपाषाणपरुषं स छगलस्तमुपाध्यायं मनुष्यवद्बभाषे—'ननु भट्टस्य किमर्थो महानेष प्रयासः' इति। भट्टः सभयः सविस्मयश्च प्रत्याचष्ट—'महापुरुष, तव स्वर्गगमनाय' इति। छागः—'अन्ये खलु ते वराकतनवः पशवो ये मखमिषेण भवता भक्षिताः। अत्र तु प्रस्तरप्रतिमाकवलन इव केवलं दन्तभङ्गस्तव' इति विचिन्त्य किंचिद्विहस्य च स्तस्तमस्तं (?) पुनरेवमवोचत्—

था विधाय मुद्रिकां दत्त्वा अपवर्त्य च प्रस्थाप्य च तं पुरुषं भारंभटं आत्मदेशीयं आत्मनो मनागूनं शिष्यमादिशति—अहो कुशिकनामन्। वत्सेति कोमलालापे। बलीयानयं अजास्तनंधयः। तत्तस्मात् कारणात् अतियत्नं यथा भवत्येवं उपसंव्यानेन उत्तरीयवस्त्रेण बद्ध्वा संयम्यानीयतां उदवसितं मम गृहम्। अहमपि एष तवानुपदमेव भवतः पश्चादेव आगच्छामि। आगमिष्यामीत्यर्थः। तच्छिष्ये तथा आचरति सति बद्ध्वा आनयति सति स छागो वसुधायां कुलिशकीलित इव निषण्णः संभूय मिलित्वा सर्वैरपि सार्धपञ्चशतैरपि तदन्तेवासिभिः भट्टान्तेवासिभिरुत्थापयितुमशक्यः न शक्यते। प्रीयन्तां प्रीतिं प्राप्नुवन्तु अत्रैव अस्य छागस्य चेटस्य दासस्य मांसेन विधिपूर्वकं वेदोक्तविधिना देवाः सवित्रादयः पितरः ब्राह्मणाश्च इत्यालापैरुल्बणरुषमुत्कटक्रोधं यथा भवत्येवं अमर्षविषोन्मेषकलुषचक्षुषं अमर्षः स एव विषं तस्योन्मेषेण प्रादुर्भावेण कलुषे आरक्ते चक्षुषी यस्य भट्टस्य स तथा तम्। आशु स्वयमेव वधाय उद्धृता उच्चलिता पर्वताकाराः पाषाणास्तैः परुषः कर्कशो यो भट्टः स तथा तम्। स पूर्वोक्तश्छगलस्तमुपाध्यायं मनुष्यवद्बभाषे उक्तवान्—नन्वहो, भट्टस्य किमर्थः केन कारणेन महान् एषोऽयं प्रयास इत्युवाच। भट्टो मनुष्यवद्बुवन्तं छागं दृष्ट्वा सभयः सविस्मयश्च प्रत्याचष्ट प्रत्युवाच—हे महापुरुष, तव भवतः स्वर्गगमनाय प्रयाणाय मम प्रयास इत्युवाच। छागो मनसि चिन्तयति—अन्ये पशवः खलु ते भवन्ति वराकतनवो अकिंचित्करशरीरा ये पशवो मखमिषेण भवता भक्षिताः। अत्र तु मयि विषये प्रस्तरप्रतिमाकवलने बिम्बचर्वणे इव केवलं तव दन्तभङ्गो भविष्यति। इति विचिन्त्य किंचिन्मनाग् विहस्य च स्तस्तमस्तं(?) भट्टं प्रति पुनरेवं वक्ष्यमाणलक्षणोपलक्षितप्रकारेण अवोचत् जगाद॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया
संतुष्टस्तृणभक्षणेन सततं हन्तुं न युक्तं तव ।
स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो
यज्ञं किं न करोषि मातृपितृभिः पुत्रैस्तथा बान्धवैः ॥' इति ।

तदनु भो महाराज, सा मदीयाम्बिका ममोक्तिषु निरुत्तरा सती परमुपायान्तरमपश्यन्ती 'लब्धप्रतिष्ठातन्त्रेषु हि राजपुत्रेषु स्वभावेन भवन्ति ज्ञातिविषये शाठ्यनिष्ठुराः समाचाराः । तदेते कुशलमतिभिः शान्तिकर्मणैव कर्तव्याः कार्येष्वभ्यन्तराः' इति, तथा 'महत्यपि हि पुत्रे सवित्रीणां बालकाल इव चाटुकारस्नेहला एवालापाः श्लाघ्यन्ते,न पुनः कर्णकटुकाः' इति च विचिन्त्य, 'मातः, अलमलमनेन ममाश्रेयस्करेणोपचारेण' इति मया सहबहुमानं

किमवोचदित्याह—**नाहमिति** । हंहो भट्ट, अहं छागः स्वर्गफलोपभोगतृषितो न भवामि स्वर्गभोगं न वाञ्छामि । मया त्वमभ्यर्थितः प्रार्थितो न वर्तसे यन्मां स्वर्गं प्रापय । अहं तु तृणभक्षणेन बदर्यादिपर्णचर्वणेन संतुष्टः संतोषं प्राप्तवान् । कथम् । सततं निरन्तरम् । किं करिष्यते । स्वर्गभोगिन् हे भट्ट, तव भवतो वर्णोत्तमस्य हन्तुं कर्मचाण्डालवन्मारयितुं न युक्तम् । त्वया यज्ञे विनिहता मारिताः प्राणिनो ध्रुवं निश्चयेन यदि स्वर्गं यान्ति तर्हि मातृपितृभिस्तथा तव पुत्रैस्तथा तव बान्धवैस्तव भ्रातृभिः कृत्वा यज्ञं यागं किं न करोषि किं न विदधासि इत्युवाच ॥

तदनु तत्पश्चात् भो महाराज हे श्रीमारदत्तमहाराज, सा मदीयाम्बिका मम माता ममोक्तिषु मद्वचनेषु निरुत्तरा सती प्रत्युक्तिरहिता सती परमन्यत् उपायान्तरं अपश्यन्ती अनवलोकमाना सती इति विचिन्त्य पादयोर्निपत्य मामेवमभ्यर्थितवती प्रार्थयामास । इति किं विचिन्त्य । लब्धप्रतिष्ठातन्त्रेषु सर्वजगत्प्राप्तसंमानसमुदायेषु हि निश्चयेन राजपुत्रेषु स्वभावेन ज्ञातिविषये कुटुम्बवर्गे शाठ्यनिष्ठुरा धूर्तत्वेन निर्दयाः समाचाराः कर्तव्यानि भवन्ति । तत्तस्मात् कारणात् एते राजपुत्राः कुशलमतिभिः शान्तिकर्मणैव सामोपायेनैव कार्येषु कर्तव्येषु अभ्यन्तरा आत्मवशाः कर्तव्याः इति । न केवलं इति विचिन्त्य । तथा तेनैव प्रकारेण इति च विचिन्त्य पर्यालोच्य । इतीति किम् । महत्यपि हि पुत्रे सवित्रीणां बालकाले इव शिशुप्रस्तावे यथा वाचा चाटुकारस्नेहला च प्रेम्णा मिथ्यासवनस्नेहपरा एव आलापा मिथ्याभाषणानि श्लाघ्यन्ते प्रशस्यन्ते, न पुनः कर्मकटुका आलापाः प्रशस्यन्ते । तेन अम्बिका किं क्रियमाणा । मया यशोधरेण इत्यमुना प्रकारेण च विनिवार्यमाणा । इतीदृशं किम् । हे मातः, अलमलं पूर्णं पूर्णं अनेनोपचारेण पादपतनविनयेन । कथंभूतेन उपचारेण । मम अश्रेयस्करेण । कथं विनिवार्यमाणा । सहबहुमानं बहुमानसहितं तथा भवत्येवम् । पुनः कथं यथा भवति । अतिप्रकटितकरुणामयं अतिशयेन प्रादुर्भावेण कारुण्यमयानीति यथा भवत्ये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनिवार्यमाणापि सप्रणयमतिप्रकटितकरुणामयमाविर्भूतबहुप्रश्रयं च पादयोर्निपत्य मामेवमभ्यर्थितवती—'पुत्र, अहमनाथेत्यनुकम्पया वा, मातेति वत्सलतया वा, मद्दर्शनायत्तजीवितेत्युपरोधेन वा, वृद्धेति दयालुतया वा, गुरुवचनमनुल्लङ्घनीयमित्याशयेन वा, भविष्यत्यवश्यमनेनाभ्यर्थितभङ्गेन पूर्वमाचरितस्यापि सुकृतस्य हानिरिति परामर्शेन वा, किमपरः कोऽपि नास्ति तव पण्डितंमन्यभावस्यास्पदं येन मयि जरत्यामेवमतीव विहितविचारचपलोऽसीत्युपालम्भनभयेन वा, युक्तमयुक्तं वा गुरुरेव जानातीति मार्गानुसारणेन वा, न भवति शुभं चेदनुष्ठानमहमेव स्यामेनसां भागीति मनीषया वा, चिरमियं महीयसि पदे स्थिता मयापमानिता सती न जीविष्यतीति संभावनेन

वम्। पुनः कथं यथा भवति। आविर्भूतबहुप्रश्रयं प्रकटीभूतप्रचुरविनयं यथा भवत्येवम्। एवं अभ्यर्थितवती। एवं कथमिति चेत्—हे पुत्र, यदि चेत् परलोकदोषाशङ्कनेन दुर्गतिगमनं भवेत्, अन्येन वा केनचित्कारणेन प्राणिघातेन प्रवर्तनेन व्याप्रियसे, तर्हि मा प्रावर्तिष्ठा मा प्रवर्तस्व। किं तु पिष्टकुक्कुटेन चूर्णकृतताम्रचूडेन कुलदेवतायै कुलदेवतानिमित्तं वलिं पूजां उपकल्प्य समर्पयित्वा तदवशिष्टं पिष्टं मांसमिति च परिकल्प्य मया सह अवश्यं निश्चयेन प्राशनीयं भक्षणीयमिति। कया कृत्वा प्राशनीयम्। इत्युमना प्रकारेण। अनुकम्पया वा कारुण्येन वा प्राशनीयम्। इतीति किम्। हे पुत्र, अहं अनाथा इति कारणात्। पुनश्च कया कृत्वा पिष्टं प्राशनीयम्। मम मातेयं वर्तते इति वत्सलतया वा स्नेहलतया वा। मद्दर्शनायत्तजीवितेत्युपरोधेन वा मम दर्शनायत्तं ममावलोकनाधीनं जीवितं ईदृशेन उपरोधेन आक्षेपेण वा। इयं वृद्धा वर्षीयसी वर्तते इति दयालुतया वा दयावत्तया वा। गुरुवचनं मातुः पितुश्च वचनं अनुल्लङ्घनीयमन[ङ्गी]करणस्यायोग्यमित्याशयेनाभिप्रायेण वा। अनेन सांप्रतिकेन अभ्यर्थितभङ्गेन अभिलषितापूरणेन पूर्वं पूर्वकाले आचरितस्य विधिपूर्वकमनुष्ठितस्य सुकृतस्य पुण्यस्य हानिर्नाशोऽवश्यमेव भविष्यतीति परामर्शेन विचारेण वा। 'हे पुत्र, तव पण्डितंमन्यभावस्य मूर्खत्वस्य आस्पदं प्रतिष्ठास्थानं किमपरः कोऽपि गुणो विधिर्वा नास्ति। अपि तु वर्तत एव। येन स्वभावेन गुणेन वा जरत्यां वर्षीयस्यामपि मयि एवमुक्तप्रकारेण अतीव अनिर्वचनीयं विहितविचारचपलोऽनुष्ठितविचारेण चपलश्चञ्चलोऽस्थिरप्रकृतिरसि' इत्युपालम्भनस्य अनिर्वचनीयताख्यातेर्भयेन वा। युक्तं योग्यं अयुक्तमयोग्यं वा गुरुरेव माता पिता वा जानातीति मार्गस्य सरणेरनुसरणेन स्वीकारेण वा। 'यदि शुभमनुष्ठानं न भवति तर्हि अहमेव एनसां पापानां भागी स्याम्' इति मनीषया बुद्ध्या वा। 'महीयसि पूज्यतमे पदे स्थाने स्थितापि मया अपमानिता सती इयं चिरं न जीविष्यति'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा, पुरा हि तस्या एव मम प्रभवन्ति वचांसि कुतो नाद्येति स्नेहानुगमनेन वा, नो चेदात्मानमेव करिष्यामि देवतोपहाराय त्वमेव तावदनुभवोभयकुलविशुद्धः श्रियोऽस्याः फलमित्यपवादबीभत्सया वा, यदि परलोकदोषाशङ्केनान्येन वा केनचित्कारणेन प्राणिघातेन व्याप्रियसे, मा प्रावर्तिष्ठाः। किं तु विनिवेदितदक्षिणोत्सवैर्वेदविद्भिर्वाडवैः परिश्रावितसकलसत्त्वोपहारफलोत्कटेन पिष्टकुक्कुटेन कुलदेवतायै बलिमुपकल्प्य तदवशिष्टं पिष्टं मांसमिति च परिकल्प्य मया सहावश्यं प्राशनीयम्' इति।

राजा—(स्वगतम् ।) 'अहो, महिलानां दुराग्रहनिरवग्रहाणि परोपघाताग्रहाणि च भवन्ति प्रायेण चेष्टितानि। स्त्रियो हि नाम भवन्तु भर्तृषु शय्याविषये पुत्रेषु च प्रतिपालनसमये प्रकामं निसृष्टार्था निरङ्कुशाचरणसमर्थाश्च, न पुनः पौरुषेयेषु कर्मसु। यस्मात्कमलिनीदलेषु जलकणस्येव नारीणां मनसश्चञ्चलतरत्वादतीव निःसारत्वाच्च। पुरुषोऽपि गृहकार्यादन्यत्र स्त्रियं प्रमाणं यन्नदीप्र-

---

इति संभावनेन विमर्शेन वा। 'तस्याः पुरा अप्रत्यक्षकाले एव मम वचांसि प्रभवन्ति, अद्य तत्समक्षं कुतो न प्रभवन्ति' इति स्नेहस्य प्रेम्णोऽनुगमनेन वा। 'नो चेत् नाङ्गीक्रियते मद्वाक्यं चेत् देवतोपहाराय दृढैव तव मतिश्चेत् तर्हि अहमात्मानमेव देवतोपहाराय देवतावलये करिष्यामि। उभयकुलविशुद्धो मातापितृवंशशुद्धस्त्वमेव तावद् अस्याः श्रियः फलमनुभव भुङ्क्ष्व' इति अपवादबीभत्सया निन्दानादेयतया वा। कथंभूतेन पिष्टकुक्कुटेन। वाडवैर्ब्राह्मणैः परिश्रावितसकलसत्त्वोपहारफलोत्कटेन परिश्रावितं विविधग्रन्थप्रमाणपूर्वकं बोधितं सकलसत्त्वानां प्राणिमात्रस्य य उपहारो बलिस्तस्य फलं यत्र अतएवोत्कटस्तेन। कीदृशैर्वाडवैः। विनिवेदितदक्षिणोत्सवैः विशेषेण निवेदितायै दक्षिणायै उत्सव उत्साहो येषां ते तथा तैः। पुनः कीदृशैः। वेदविद्भिः वेदांस्त्रय्याख्यान्विदन्ति ते तथा तैः।

राजा श्रीयशोधरः स्वगतमात्मगतं चिन्तयति—अहो इत्याश्चर्ये। महिलानां स्त्रीणां दुराग्रहनिरवग्रहाणि दुराग्रहेण अप्रतिषेध्येनाग्रहेणाभिनिवेशेन निरवग्रहाणि निष्प्रतिबन्धानि निर्निरोधानि परोपघाताग्रहाणि परोपघाते परहिंसायामाग्रहाणि चेष्टितानि कर्माणि प्रायेण बाहुल्येन भवन्ति। हि यतः। नामेति संभावनायाम्। स्त्रियः भर्तृषु शय्याविषये सुरतसमये, च पुनः पुत्रेषु प्रतिपालनसमये प्रकामं यथेच्छं निसृष्टार्थास्त्यक्तगृहकार्याः निरङ्कुशाचरणसमर्थाः श्वश्र्वादिभयरहितं यथा भवति तथा आचरणे कार्यसंपादने शक्ताः भवन्तु। न पुनः न तु पौरुषेयेषु पुरुषसाध्येषु कर्मसु। यस्मात्कारणात् नारीणां स्त्रीणां मनसश्चित्तस्य चञ्चलतरत्वादस्थिरत्वात् अतीव अत्यन्तं निःसारत्वान्निर्बलत्वाच्च। कुत्र कस्येव। कमलिनीदलेषु पद्मिन्याः पत्रेषु जलकणस्येव जलबिन्दोरिव। यथा पद्मपत्रेषु जलबिन्दोरस्थिरता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाहपतितः पादप इव न चिरं नन्दति। स्त्री तु पुरुषमुष्टिस्थिता खड्गयष्टिरिव साधयत्यभिमतमर्थम्। अभिनिवेशं च पुनः पापपुण्यक्रियासु प्रधानं निधानमामनन्ति मनीषिणः। बाह्यानीन्द्रियाणि तपनतेजांसीव शुभेष्वशुभेषु च वस्तुषु समं विनिपतन्ति। न चैतावता भवति तदधिष्ठातुः कुशलेन चादृष्टेन संबन्धः। संकल्पोपपन्नप्रतिष्ठानि च देवसायुज्यभाञ्जि शिलाशकलानि किमत्यासादयन् पुरुषो न भवति लोके महापञ्चपातकी। सकृदेव चाशुभसंकल्पमलिने मनसि दुरपवादकलुषिते सत्पुरुषचेतसीव दुर्लभाः खलु पुनस्तत्प्रसन्नतायामुपायाः। चिरेणापि च कालेन कृतः कल्याणकर्मणां प्रचयः प्रमादवशेन सकृदपि संजातविधिर्दुरभिसंधिः पावकनिक्षेपात्प्रासाद इव क्षणेन विनश्यत्यामूलतः। संकल्पेन

तथा नारीमनसोऽपि। यद्यस्मात्कारणात् पुरुषोऽपि गृहकार्यांतपाकादिकर्मतोऽन्यत्र स्त्रियं प्रमाणं न चिरं नन्दति। किं तु भोजनादिसमये पाकादिकर्मण्येव प्रमाणमङ्गीकरोति। क इव। नदीप्रवाहपतितः नद्याः प्रवाहे पतितः पादपो वृक्ष इव। यथा नदीप्रवाहे पतितः पादपो न चिरं नन्दति शोभते स्थिरो भवति। स्त्री तु पुरुषमुष्टिस्थिता पुरुषस्य मुष्टौ स्थिता पुरुषपरतन्त्रा सती अभिमतमर्थं साधयति। केव। खड्गयष्टिरिव उत्तमः खड्ग इव। कीदृक्। पुरुषमुष्टिस्थिता पुरुषस्य मुष्टौ स्थिता। न तु भीरोः क्लीवस्य वा मुष्टौ स्थिता। मनीषिणः पण्डिताः पुनरभिनिवेशमासक्तिमेव पापपुण्यक्रियासु प्रधानं मुख्यं निधानं स्थानम् आमनन्ति वर्णयन्ति। बाह्यानि चक्षुरादीनि इन्द्रियाणि शुभेषु पुण्यजनकेषु अशुभेषु पापजनकेषु च वस्तुषु कर्मसु तपनतेजांसीव सूर्यातपा इव समं] युगपत् विनिपतन्ति प्रवर्तन्ते। न च एतावता दर्शनादिमात्रेण तदधिष्ठातुः दर्शनस्पर्शनादिकर्तुः पुरुषस्य कुशलेन पुण्येन चान्यत् अदृष्टेन पापेन संबन्धो भवति। संकल्पोपपन्नप्रतिष्ठानि च संकल्पेन प्राप्तप्रतिष्ठाकर्माणि शिलाशकलानि पाषाणखण्डानि देवसायुज्यभाञ्जि देवसाम्यप्राप्तानि अत्यासादयन् आसादनां कुर्वन् पुरुषो मनुष्यः किं न भवति लोके महापञ्चपातकी। अपि तु भवत्येव। उक्तं च—'स्वामिद्रोहः स्त्रीवधो बालहिंसा विश्वस्तानां घातनं लिङ्गभेदः। प्रायेणैतत्पञ्चकं पातकानां कुर्यात्सद्यः प्राणिनः प्राप्तदुःखान्॥' हिंसानृतस्तेयब्रह्मपरिग्रहेभ्यो वा न वा महापञ्चपातकीत्युच्यते। सकृदेव एकवारमपि च पुनः अशुभसंकल्पमलिने पापपरिणामदूषिते मनसि खलु निश्चयेन पुनस्तत्प्रसन्नतायां मनोनिर्मलतायामुपाया दुर्लभा भवन्ति। कस्मिन्निव। दुरपवादकलुषिते दुरपवादमलिने सत्पुरुषचेतसीव। चिरेणापि च कालेन कल्याणकर्मणां पुण्यकर्मणां प्रचयः कृतः सन् प्रमादवशेन असावधानतया सकृदपि संजातविधिरुत्पन्नविधानो दुरभिसंधिर्नष्टाभिप्रायः क्षणेन मुहूर्तेन आमूलतो मूलादपि पुण्यकर्मप्रचयो विनश्यति। क इव। पावकनिक्षेपात् प्रासाद इव अग्निमोचनात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च भवन्ति गृहमेधिनोऽपि मुनयः। यथा—**उत्तरमथुरायां** निशाप्रतिमास्थितस्त्रिदिवसूत्रितकलत्रपुत्रमित्रोपद्रवोऽप्येकत्वभावनमानसोऽर्हद्दासः। मुनयश्च गृहस्थाः। यथा—**कुसुमपुरे** चिरादाकर्णितश्रुतसुतसमरस्थितिरातापनयोगयुतोऽपि **पुरुहूतदेवर्षिः**।

अस्ति च जगत्प्रसिद्धमिदमुदाहरणम्—एकस्मिन्नेव किल कामिनीकलेवरे मुनिकामिकुणपाशिनामभिनिवेशनिमित्तो विचित्रनिषेकः कर्मविपाक इति। किं च।

नरेषु संकल्पवशेन मन्मथो यथा प्रवर्तेत पयश्च धेनुषु।
तथैव कर्मण्युभयानि मानसाद्दधाति बोधाधिपतिर्विजृम्भितात् ॥

मन्दिरमिव। संकल्पेन पुण्यपरिणामेन च गृहमेधिनोऽपि मुनयो भवन्ति। यथेति दृष्टान्तः। यथा येन प्रकारेण उत्तरमथुरायां गोपाचलसमीपमथुरायां निशाप्रतिमास्थितः त्रिदिवेन देवविशेषेण सूत्रितः कृतः कलत्रपुत्रमित्राणां उपद्रवो मृतिर्यस्य स तथोक्तोऽपि एकत्वभावनमानस एकत्वानुप्रेक्षाभावनाचित्तः सन् अर्हद्दासनामा श्रेष्ठी मुनिर्बभूव। तथा हि—उत्तरमथुरायां किल अर्हद्दासनामा श्रेष्ठी चतुर्दशीनिशायां उपोषितः सन् श्मशाने स्थितः। स चिन्तयति—'एको मे शाश्वतो ह्यात्मा ज्ञानदर्शनलक्षणः।' इति भावनां भावयन् श्मशानारण्ये स्थितः। तद्व्रतप्रत्यवसादनपराभिर्नगरदेवताभिः कृतोपद्रवो मनागपि मनसि क्षोभं गतवतः मुनिमान्यता सपाये(?)ति। मुनयश्च संकल्पेन गृहस्था भवन्ति। यथा कुसुमपुरे पाटलिपुत्रनगरे चिरादाकर्णितश्रुतसुतसमरस्थितिः हेरिकाच्छ्रुतनिजपुत्रस्य संग्रामस्थितिः आतापनयोगयुतोऽपि सूर्यप्रतिमास्थितोऽपि पुरुहूतो नाम देवर्षिः दिगम्बरो गृहस्थसदृशो बभूव। तथा हि—पाटलिपुत्रनगरे किल पुरुहूतनामा नृपतिः पुत्राय राज्यभारं समर्प्य दीक्षां गृहीत्वा देवर्षिरिति नाम प्राप्तः पर्वतमेखलायां आतापनयोगस्थितो बभूव। खेचरतोपासनायागतेन श्रावकेण सह कृतोदन्तालेखवाहकात् अरातिभिः सह निजपुत्रस्याहवमाकर्ण्य जातामर्षः। स तु चेतसा कृतसमरव्यवसायः शैलाटिनीघटित इव तिष्ठन् अवधिज्ञानिना आकाशचारणेन भगवता स संबोधितः न खलु तदेव रूपमादाय एवं चिन्तयितुं युक्तमिति ॥

अस्ति च विद्यते च जगत्प्रसिद्धं सर्वलोके विख्यातमिदमुदाहरणं दृष्टान्तवचनम्। तत्किम्। एकस्मिन्नेव केवले एव किलेति कामिनीकलेवरे मृतवेश्याशरीरे मुनिकामिकुणपाशिनां मुनिश्च जिनमुनिः, कामी च विटो वेश्यारतः, कुणपाशिनस्तेषां मुनिकामिकुणपाशिनां अभिनिवेशनिमित्तः। अभिप्राये हेतुः—विचित्रनिषेकः विविधाश्रवः कर्मविपाको वर्तते इति। श्मशाने मृतवेश्यां दृष्ट्वा मुनिना चिन्तितम्—'कथमनया कामिन्या तपश्चरणं न कृतम्। वृथैव मृतेति'। इत्युक्त्वा.................................

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इयमिज्या च मे मोहविह्वला कालरात्रिरिव दुष्परिहारा जानुभञ्जिनीव मे गतिभङ्गाय प्रतिवस्थिता । तदत्राहम् 'इतस्तटमितो व्याघ्रः केनास्तु प्राणिनो गतिः' इतीदृशमन्यायमापतितो यद्यवगणयेयमस्याः प्रतिश्रुतम्, तदेत एव समीपवर्तिनो 'देवबुद्धेः फलमनाग्रहः' इत्युपदिशन्तो भविष्यन्त्युपाध्यायाः । सकलजनसमक्षं परमपमानिता चेयं जरती न जाने किं करिष्यति । स्वस्य च मनसि चोक्षापि(?) क्रियोत्प्रेक्षा । सा न भवति पुंसः श्रेयस्करी, या न रञ्जयति परेषां चेतांसि ।

तथा च लौकिकी श्रुतिः—किल बृहस्पतिः सद्वृत्तोऽपि चुङ्कारनगरे लोचनाञ्जनहरेण कितवेन मिथ्यापवाददूषितः शतक्रतुसभायां प्रवेशं न लेभे । अलब्धाशनांशेन तु षजकनाम्ना वाग्जीवनेन 'अयं भिक्षाभ्रमणव्याजेनार्भकान्भक्षयति' इत्युपहतश्चक्रपाणिः परिव्राड्वाराणस्याम् । मधुपेषु मध्ये पीतपयाश्च मार्कण्डतापसस्तापसाश्रमेषु । ज्ञानं च प्रतिकूलदैवोपनिपातमौषध-

---

....नाकलोकं गतः प्रवेशं नालभत । तथा चापरा कथा—अलब्धाशनांशेन अलब्धभोजनभोगेन तुशब्दः कथान्तरे षजकनाम्ना षजक इति नाम यस्य तेन षजकनाम्ना वाग्जीवनेन वन्दिना अयं एष परिव्राट् भिक्षाभ्रमणव्याजेन अर्भकान् भक्षयति इत्यनेन वचनेन उपहतो निन्दितः । कोऽसौ । चक्रपाणिः चक्रपाणिनामा परिव्राट् शिखाधारी नाम तपस्वी वाराणस्यां वाराणसीनगरे प्रवेशं न लेभे इत्येतत् । मधुपेषु मद्यपायिषु मध्ये पीतपयाश्च मद्यपीनां स्नेहवशात् तन्मध्यवर्तिपीतदुग्धोऽपि मार्कण्डो नाम तापसः अयं मद्यपानं कृतवानिति लोकैर्निन्दितः तापसाश्रमेषु प्रवेशं न लेभे । ज्ञानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिव न भवति विहितोपयोगमप्यर्थक्रियाकारि। किं नु खल्वज्ञो **द्वैपायनो** येन स तादृशं कर्म समाचचार। **पौलस्त्यो** नीतिशास्त्रेषु नाश्रौषीद्दाण्डक्योपाख्यानम्, येन स परदारानपाहरत्। **नहुषो** न सम्यगुपासिती गुरुकुले, येन सप्तर्षीन्संयुग्यानकार्षीत्। **प्रजापतिर्जड** एव एडो वा, येनात्मदुहितरि मनश्चकार। **वररुचिश्च** वृषलीनिमित्तमासवनिपोद्वहनमिति।

न ज्ञायकत्वं प्रतिकूलदैवोपनिपातं पायकर्मौं(?)पधमिव विहितोपयोगमपि कृतसेवनमपि अर्थक्रियाकारि न भवति ज्ञानकार्यं न साधयति। किं नु खलु अज्ञो द्वैपायनो मुनिर्येन कारणेन स द्वैपायनः तादृशं द्वारावतीभस्मीकरणकर्म समाचचार सम्यगाचरितवान्। किं तु ज्ञानं किं करोति, कर्मोदयः प्रधानम्। अस्य कथा—उर्जयन्तौ गिरौ किल अरिष्टनेमिभगवतः समवसरे नारायणो गणधरदेवेन चापृच्छन्—'हे भगवन्, एवं समृद्धद्वारवत्याः किं कुतोऽपि व्ययो भविष्यति।' इति। वरदत्तः गणधर उवाच—'अनया चिन्तया किम्।' इति ब्रुवन्नपि हरिणा कृतनिवन्धो वभाषे—'द्वादशवर्षेषु गतेषु द्वैपायनकुमारात् दाहो भविष्यति।' तद्वचनं द्वैपायनः श्रुत्वा असत्यं कर्तुमिच्छुः गृहीतव्रक्षः द्वादशापि वर्षाणि पूर्वदेशे अतिक्रम्य अधिकमासमलक्षयन् द्वारवतीद्वारदेशे कृतकायोत्सर्गः पाणिविह्वलितमतिना मातङ्गेन विहितखलतिमस्तगुञ्जादाघ(?)श्च कोपात् अग्निकुमारो भूत्वा तां नगरीं ददाह। पौलस्त्यो नीतिशास्त्रेषु नाश्रौषीत् पौलस्त्यो रावणनरेन्द्रः नीतिशास्त्रेषु किं न अश्रौषीत् न शुश्राव। किं न श्रुतवान्। दाण्डक्योपाख्यानं दाण्डक्यनृपकथान्तरम्, येन कारणेन स पौलस्त्यः परदारान् परकलत्रमपाहरत् अपहृतवान्। अस्य कथा—दाण्डक्यो नाम राजा किल मृगयायां गतः सन् सर्वस्यामटव्यां प्रस्थितस्य ब्रह्मर्षेराश्रमपदे प्राप्तयौवनां कन्यामभिलाषितवान्। ततः ब्रह्मर्षिशापात् सबन्धुराष्ट्रो विननाश। नहुषः नहुषो नाम राजा गुरुकुले सम्यक् उपासिता उपासनमुपासितं विद्यते यस्य स उपासिती। व्याकरणे अधीतीत्यादिवत्। तथा चोक्तमाशाधरेण महाकविना—'अस्मिन्निमे स्वस्त्य(?)यान्ये भक्तिरागादधीतिनाम्। स्वस्तिमन्तः स्वयं शश्वत् सन्तु स्वस्त्ययनं जिनाः॥' नहुषो नाम राजा गुरुकुले किं सम्यक् न उपासिती गुरुकुलं किं न उपासितवान्, येन कारणेन सप्तर्षीन् संयुग्यान् वृषभवद्वाहनान् अकार्षीचकार। अस्य कथा—नहुषः किल मनुष्यभावेऽपि व्रतमाहात्म्यात् ऐन्द्रं पदं लब्ध्वा बृहस्पतेः अपूर्ववाहनं रथं सम्यग् संमानयन् तन्निशम्य सप्तर्षीन् कृत्वा रथे योजितवान्। तत्र अगस्त्योऽतीव कष्टतया······ तदंशगच्छतः सर्प सर्पेति चक्रवत् विहितः सौत्रतोदनस्य शापात् शेषो नाम सर्पो बभूव। प्रजापतिर्ब्रह्मा जडो निर्विवेक एव एडो वा बधिरो वर्तते, येन कारणेन आत्मदुहितरि निजसुतायां मनश्चकार भोक्तुमियेष कालव्याजेन समागतायामात्मदुहितरि चित्तं चकार। पुनर्जातविवेकः 'स्मरस्य खल्वयमपराधः' इति मत्वा हरलोचनानलगोचरतया मदनं शशाप। भस्मितवानित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(प्रकाशम्।) अम्ब, न बालकेलिष्वपि मे कदाचित्प्रतिलोमतां गतासि। न वेद्मि कथमद्यैव ते चन्द्रमतेरप्यस्थाने दुराग्रहमलीमसा मतिः समजनीति। तत्पर्याप्तमत्रालापपरम्परया। भवतु। भवत्येवात्र प्रमाणम्। उत्तिष्ठ। ननु तवैव पूर्यन्तामत्र कामितानि। आहूय त्वमेवादिश कृकवाकुविनिर्माणे शिल्पिनः। साधु समाज्ञापय त्वमेव भगवतीभवनशोभारम्भाय देवभोगिनम्। अनुशाधि त्वमेव यशोमतिकुमारस्य राज्याभिषेकदिवसगणनाय मौहूर्तिकान्। एवमन्यान्यपि विधापय त्वमेव देवद्विजपरिजनपूजापुरःसराणि गृहकार्याणि। अहो वैरिकुलकमलाकरनीहार प्रतीहार, विसृज्यतामयमशेषोऽपि यथायथमनुजीविनिवहः। अहमप्येष चिरप्रवृत्तवार्तासंजातश्रमो मनागप्यस्माद्वसुमतीतिलकात्सभाम-

---

अत एवाग्निर्यथेष्टाशनोऽभवत्। 'बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति' इति। वररुचिश्च कात्यायनः वृषलीनिमित्तं चेटीकारणेन आसवनिपोद्वहनं मद्यघटोच्चालनं चकारेत्येव। अस्य कथा—वररुचिः स्खलितब्रह्मचर्यतया सकललोकाधिके नाम्नि वर्तमानो देवताख्यविलासिन्या तैस्तैः कूटकपटचेष्टितैर्वश्यतां नीतः। श्यामकान्तं यथा चोसा(?) तमेवमवोचत्—'सर्वमुपपन्नमेवैतत्। किं तु यदि मद्यघटं निजशिरसि निधाय उज्जयिनीप्रदक्षिणां करोषि त्वम्।' इति। सोऽपि कामान्धबुद्धिस्तथैव प्रत्यपद्यतेति॥

यशोधरमहाराजः प्रकाशं व्यक्तमुवाच—अम्ब हे मातः, बालकेलिष्वपि मे मम कदाचित् कस्मिंश्चिदवसरेऽपि प्रस्तावे प्रतिलोमतां प्रतिकूलत्वं न गतासि। न वेद्मि न जाने कथं केन प्रकारेण अद्यैवास्मिन्नेवाहनि ते तव चन्द्रमतेरपि निर्मलबुद्धेरपि अस्थाने अयोग्याचरणे दुराग्रहमलीमसा दुष्टाग्रहे अतिमलिना मतिर्बुद्धिः समजनि संजातेति। तत्तस्मात् कारणात् पर्याप्तं अलं अत्रास्मिन् कार्ये आलापपरम्परया बहुवचनया। भवतु संजायताम्। भवत्येव त्वमेवात्रास्मिन्कार्ये कुर्कुटमारणतत्पललभक्षणलक्षे प्रमाणं कर्तव्यतया सत्यरूपा। हे मातः, उत्तिष्ठ उत्था भव। ननु निश्चयेन तवैव भवत्या एव पूर्यन्तां अत्र कामतानि। आहूय आकार्य त्वमेव भवती एव आदिश आदेशं देहि कृकवाकुविनिर्माणे कुर्कुटकरणे शिल्पिनो लेपिकारान्। साधु रुचिरं यथा भवत्येवं समाज्ञापय आदेशं देहि त्वमेव भगवतीभवनशोभारम्भाय कुलदेवतागृहशोभाकरणाय देवभोगिनं देवब्राह्मणं देवार्चकम्। अनुशाधि आदेशं देहि त्वमेव यशोमतिकुमारस्य राज्याभिषेकदिवसगणनाय राज्याभिषेककरणे लग्नशोधनाय मौहूर्तिकान्। एवममुना प्रकारेण अन्यान्यपि गृहकार्याणि त्वमेव विधापय कारय। कथंभूतानि गृहकार्याणि। देवद्विजपरिजनपूजापुरःसराणि देवपूजाद्विजपूजापरिजनपूजाप्रभृतीनि। अहो हंहो वैरिकुलकमलाकरनीहार शत्रुसमूहकमलवनहिमसमान हे प्रतीहार, विसृज्यतां विमुच्यतामयमेषः अशेषोऽपि सर्वोऽपि यथायथं यथाख्यानं अनुजीविनिवहः किंकरसमूहः। अहमपि एष चिरप्रवृत्तवार्तासंजातश्रमः वृहद्वेलासंजाता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ण्डपाददूरदेशवर्तिनि तस्मिन्मदनविलासनामनिवासभवने स्वैरविहाराय गच्छामि । तदनु तस्मिन्मयि शय्यातलमलंकृतवत्यहो विक्रमालंकार, सा मदीयामृतमतिमहादेवी दिवसादीयमादातुमागत्य गतात्कुसुमशेखरकात्पुष्पबटोर्मदनदमयन्तिकायाः प्रसाधिकाया दुहितुर्विनोदकलहंसिकायाश्च सध्रीच्याः संजातसकलसेवावसरायां संसदि प्रवृत्तमुदन्तमाकर्ण्य, 'न खलु मे यामिनीसमाचरितसाहसादस्य वसुमतीपतेरपरमेवंविधकूटकपटानुष्ठानमस्ति । मन्ये च दुष्करमेवमस्यास्थिरचित्तस्य चिरकालभावीनि भविष्यन्त्यायूंषि । कुलवधूनां ह्ययमन्यश्च देवद्विजाग्निसमक्षं मातापितृविक्रीतस्य कायस्यैव भवतीश्वरः, न मनसः । तस्य पुनः स एव स्वामी यत्रायमसाधारणः प्रवर्तते परं विश्रम्भविश्रमाश्रयः प्रणयः । तथा हि—

लापसमुत्पन्नखेदः मनागीषदप्यस्मात् एतस्मात् वसुमतीतिलकात् वसुमतीतिलकनामधेयात् सभामण्डपात् अस्थानीग्रहात् अदूरदेशवर्तिनि निकटवर्तिनि तस्मिन् मदनविलासनाम्नि निवासभवने मयि शय्यातलं पल्यङ्कतलमलंकृतवति सति अहो विक्रमालंकार पराक्रमपञ्चानन श्रीमारदत्त महाराज, सा मदीया मह्यं हिता अमृतमतिमहादेवी दिवसादीयं दिनव्ययभागदेयं आदातुं ग्रहीतुं आगत्य गतात् गृहीत्वा व्याघुटितात् कुसुमशेखरकात् कुसुमशेखरनामधेयात् पुष्पवटोर्विद्यार्थिनः सकाशात् । न केवलं तस्मात् । मदनदमयन्तिकायाः मदनदमयन्तिकानामधेयायाः प्रसाधिकायाः शृङ्गारकारिकाया दुहितुः पुत्र्याः विनोदकलहंसिकायाश्च विनोदकलहंसीनामधेयायाश्च सध्रीच्याः सख्याः पुत्र्याः सकाशात् संजातसकलसेवावसरायां समुत्पन्नसर्वसेवाप्रस्तावायां संसदि सभायां प्रवृत्तं संजातं उदन्तं वृत्तान्तमाकर्ण्य श्रुत्वा गविष्ठिरनामानं अमात्यं निजमन्त्रिणं प्रहितवती प्रेषयामास ममान्तिकं मुक्तवती । किं कृत्वा पूर्वम् । इति वितर्क्य पर्यालोच्य । इतीति किम् । न खलु मे मम यामिनीसमाचरितसाहसात् कृतदुर्विलासात् अपरं अन्यत् अस्य वसुमतीपतेः नरेन्द्रस्य एवंविधकूटकपटानुष्ठानं कूटमायामण्डले अनुष्ठानं कारणं नास्ति । मन्ये च अहमेवं जाने एवममुना प्रकारेण अस्य यशोधरस्य अस्थिरचित्तस्य आयूंषि जीवितानि चिरकालभावीनि दीर्घाणि भविष्यन्ति तत् दुष्करं मन्ये । निकटतरमृत्युरेष वर्तते इत्यर्थः । कुलवधूनां हि निश्चयेन अयं यशोधरः अन्यश्च एतस्माद्भिन्नोऽपरश्च कोऽपि देवद्विजाग्निसमक्षं प्रत्यक्षं मातापितृविक्रीतस्य दत्तस्य कायस्यैव शरीरस्यैवेश्वरः स्वामी भवति । न मनसः न तु चित्तस्य स्वामी भवति । तस्य मनसः पुनः स एव पुमान् स्वामी प्रभुर्भवति । स कः । यत्र यस्मिन्पुरुषे अयमेव प्रणयः विश्रम्भविश्रमाश्रयः विश्वासस्य दुःखनिवारणस्थानम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरापि किं न रेमे गङ्गा सह महेश्वरेण, राधा नारायणेन, बृहस्पतिपत्नी द्विजराजेन, तारा च वालिना। महासत्त्वेषु हि जगति न किंचिद्दुष्करमस्ति। अन्यत्र विरक्ते चेतसि रागप्रत्यानयनात्। को हि नामायःपिण्ड इव तप्तातप्ते मनसि संधातुमर्हति। किं च परमकुहन एव पुरंध्रीषु बुद्धिमानवाप्नोति स्वश्रेयसम्। अन्यथा कृत्याराधक इव ध्रुवं पञ्चजनः पञ्चतामञ्चेत्। भवेद्वावश्यमक्षिगतः। तदेष यावन्न मयि रोषविषं वर्षति तावदहमेवास्य तद्वर्षामि।

तथा हि तदेव निरूपयति—पुरापि पूर्वकालेऽपि महेश्वरेण सह गङ्गा किं न रेमे। अपि तु रेम एव। अस्य कथा—शन्तनोर्नाम नृपस्य पत्नी पाणिगृहीता वसन्तसमये किल कैलासपर्वते गङ्गानाम्नी सखीभिः सह कृतदोलरतिस्तत्रैव उमया सह संचारैः मक्री(?) स्वकीयगीतासंकर्णनाकृष्टं ईश्वरं भुक्तवती तामनुभूय भूतपतौ श्रीमहादेवे गौरीचरितं श्रितवती गिरिसुतया तमन्वेषमाणया तत्रागतया गङ्गया सार्धं ईश्वरमालोक्य वृत्तमिदं प्रावर्तत—'का त्वं सुन्दरि जाह्नवी किमिह ते भर्ता हरो नन्वयं अम्भस्त्वं किल वेत्सि मन्मथरसं जानात्ययं ते पतिः। स्वामिन् सत्यमिदं न हि प्रियतमे सत्यं कुतः कामिनामित्येवं हरजाह्नवीगिरिसुतासंजल्पितं पातु वः॥' राधा नारायणेन सह किं न रेमे। अपि तु रेम एव। राधा गोपी नारायणेन सह रतिं चकार इति सुप्रसिद्धमुपाख्यानं एतत्। उक्तं च—'अङ्गुल्या कः कपाटं प्रहरति कुटिले माधवः किं वसन्तो नो चक्री किं कुलालो न हि धरणिधरः किं द्विजिह्वः फणीन्द्रः। नाहं घोराहिमर्दी किमसि खगपतिर्नो हरिः किं कपीश इत्येवं गोपवध्वा चतुरमभिहितः पातु वश्चक्रपाणि[illegible] बृहस्पतेर्वाचस्पतेः पत्नी भार्या द्विजराजेन चन्द्रेण सह किं न रेमे। अपि तु रेम एव। [illegible] —बृहस्पतिपत्नी चन्द्रस्य सह निधुवनं विधाय बुधाभिधानमसुवत् बुधमलब्ध[illegible]गौ विधुर्गुरुशापात् कुष्ठी बभूव। तारा च वालिना सह किं न रेमे। अपि तु रेम[illegible]रा सुग्रीवमहिला वालिना सह चिरं चिक्रीडेति महती लौकिकी श्रुतिर्वर्तते। मह[illegible] महासाहसेषु हि निश्चयेन जगति संसारे न किंचिद्दुष्करमतिदुःसाध्यं किमपि नास्ति[illegible] अन्यत्र विरक्ते चेतसि रागप्रत्यानयनात्। विरक्ते मनसि रागः प्रत्यानेतुं न शक्यत इत्य[illegible] को हि नामायःपिण्डे इव तप्तातप्ते मनसि संधातुमर्हति। हि निश्चयेन। कः पुमान्। नाम[illegible] संभावनायाम्। अयःपिण्डे लोहगोलकाविव तप्तातप्तं न युनक्ति अतप्तेन सह तप्तं च [illegible]युक्तं तप्ते मनसि चित्ते द्वे संधातुं मेलयितुमर्हति। अपि तु न कश्चिदर्हतीत्यर्थः। तप्तेन सह अतप्तं न युनक्ति। किं चास्ति विशेषः। परं केवलमकुहन एव ईर्ष्यारहित एव बुद्धिमान् पुमान् पुरंध्रीषु स्वश्रेयसं कल्याणमवाप्नोति। ईर्ष्यालुस्तु म्रियत इत्यर्थः। अन्यथा कृत्या देव्या आराधकः पुमान् इव यथा ध्रुवं निश्चयेन पञ्चजनः पुरुषः पञ्चतामञ्चेत् मरणं प्राप्नुयात्। भवेद्वावश्यमक्षिगतः वाथवा अवश्यं निश्चयेन अक्षिगतो द्वेष्यो भवेत्। तत्तस्मात् कारणात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा चेयं ममात्मजस्य राज्याभिषेकवार्ता प्रतिस्वप्नविधि किंवदन्ती च बाढमुच्छलिता । सा यदि दैवात्तथैव परमार्थसती तदाचिरात्प्रकामं मे मनोरथाः फलिताः । सिद्धं च मे समीहितम् । न चैतदाश्चर्यम् । अनुकूलं हि दैवं करोति कुरङ्गमपि कण्ठीरवातिवर्तनम् । अचलानपि च विदारयति नलदण्डेन । केवलमत्रोत्तायकत्वं परिहर्तव्यम् । उत्तायकस्य हि पुरुषस्य हस्तायातमपि कार्यं निधानमिव न सुखेन जीर्यति । भवति च जीवितव्यसंदेहाय । किं च न खलु बुभुक्षितवशादुदुम्बराणि पच्यन्ते । नाप्युद्भवच्छक्यते पातुम्' इति च वितर्क्य, तथा—

'अनुनयत वदत मधुरं यत्कार्यं तदपि मानसे कुरुत ।
रौति कलं हि मयूरः सविषं च भुजङ्गमं दशति ॥

एष राजा यावत्कालं मयि ममोपरि रोषविषं क्रोधपुत्रं न वर्षति न रक्षति तावत्कालं अहमेव अस्य राज्ञ उपरि तत् रोषविषं वर्षामि मुञ्चामि । यथा च येन प्रकारेण इयं एषा ममात्मजस्य राज्याभिषेकवार्ता प्रतिस्वप्नविधि किंवदन्ती च दीक्षाग्रहणं लोकवार्ता च बाढमतिशयेनोच्छलिता उद्गता वर्तते । सा किंवदन्ती इयं यदि चेत् दैवात् पुण्ययोगात् तथैव परमार्थसती सत्येन सत्या भविष्यति तदा अचिरादिदानीमेव प्रकाममतिशयेन मे मम मनोरथाः फलिताः वाञ्छितानि पूर्णानि संजातानि । मे मम समीहितं सिद्धं च सेत्स्यत्येव । न च नैव एतत् मनोरथसिद्धिलक्षणं कार्यं आश्चर्यं न वर्तते । अनुकूलं हि दैवं पुण्यं यदा हितं भवति तदा कुरङ्गमपि कण्ठीरवातिवर्तनं करोति सिंहस्यापि मारकं करोति । अचलानपि च विदारयति नलदण्डेन अनुकूलं दैवं अचलानपि च पर्वतानपि च नलदण्डेन पोटगलदण्डेन विदारयति शतखण्डीकरोति । अत्र कार्ये केवलं उत्तायकत्वं उत्सुकत्वं अस्थिरत्वं परिहर्तव्यम् । हि यस्मात् कारणात् उत्तायकस्यास्थिरस्य पुरुषस्य हस्तायातमपि कार्यं निधानमिव सुखेनानायासेन न जीर्यति परिणमति । जीवितव्यसंदेहाय च भवति । उत्तायकत्वे मरणमपि चोत्पद्यत इत्यर्थः । किंच विशेषमाह—न खलु बुभुक्षितवशात् उदुम्बराणि जघनेफलानि सलपूसस्यानि न पच्यन्ते न परिणमन्ति । नापि नैव उद्भवदुत्कलत् जलादिकं पातुं शक्यते । आस्वादितुं शक्यते इत्यर्थः । इति च वितर्क्य सचिवं गविष्ठिरं प्रहितवती । पुनश्च किं कृत्वा पूर्वं सचिवं प्रहितवती । इति च विमृश्य इति च पर्यालोच्य । इतीति किम् । तथा तेनैव प्रकारेण अनु[दा]त्तायकप्रकारेण ।

अनुनयतेत्यादि । अनुनयत यूयं मानयत । मधुरं कर्णामृतप्रायं वदत ब्रूत । यूयं यत्कार्यं कर्तव्यं मानसे चित्ते वर्तते तदपि तच्च कुरुत कुरुध्वम् । अमुमेवार्थं दृष्टान्तेन द्रढयति—मयूरः शुक्लापाङ्गः सरस्वतीवाहनः हि यस्मात् कारणात् कलं मधुरं रौति शब्दं करोति । सविषं विषसहितं भुजङ्गमं च दशति भक्षयति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूर्ध्ना वहति लोकोऽयं यथा दग्धुमिहेन्धनम् ।
अनुशील्य क्षयं नेयस्तथारातिर्महात्मना ॥
पुंसामसारसत्त्वानां किं कुर्याद्विक्रमक्रमः ।
भस्मीभवन्ति काष्ठानि तेजसानुगतान्यपि ॥
ज्ञानवानपि कार्येषु जनः प्रायेण मुह्यति ।
हस्तन्यस्तप्रदीपस्य किं न स्खलति शेमुषी ॥
प्रायः सरलचित्तानां जायते विपदागमः ।
ऋजुर्याति यथा छेदं न वक्रः पादपस्तथा ॥
रक्तभावं समस्तानां प्रदर्श्येदिति[1] यः पुमान् ।
आदित्यवत्स किं न स्यात्पादाक्रान्तजगत्त्रयः ॥

मूर्ध्नेत्यादि । अयं लोकः यथा इन्धनं काष्ठभारं इह संसारे दग्धुं भस्मीकर्तुं मूर्ध्ना मस्तकेन वहति· उच्चलति, तथा तेनैवेन्धनभारौघप्रकारेण अरातिः शत्रुः अनुशील्य समाधानं नीत्वा क्षयं नेयो विनाशं प्रापणीयः । केन कर्तृभूतेन । महात्मना नीतिशास्त्रचुञ्चुना । दृष्टान्तः ॥

पुंसामित्यादि । पुंसां असारसत्त्वानां सत्त्वरहितानां विक्रमक्रमः पराक्रमपरिपाटिका किं कुर्यात् । अपि तु न किमपि कुर्यादित्यर्थः । अमुमेवार्थं दृष्टान्तेन द्रढयति—काष्ठानि इन्धनानि तेजसा अनुगतान्यपि अग्निना सहितान्यपि भस्मीभवन्ति दहन्ते ॥

ज्ञानवानित्यादि । ज्ञानवानपि जनः प्रायेण कार्येषु मुह्यति अज्ञानवान् भवति । आक्षेपेण द्रढयति—हस्तन्यस्तप्रदीपस्य करकृतदीपकस्य पुरुषस्य शेमुषी किं न स्खलति । अपि तु स्खलत्येव ॥

प्राय इत्यादि । सरलचित्तानां पुरुषाणां प्रायो भूयस्त्वेन विपदागमः मरणं जायते । अमुमेवार्थं दृष्टान्तेन द्रढयति—ऋजुः सरलः पादपो यथा छेदं याति द्विधा भवति तथा वक्रः पादपः छेदं न याति । एतावता कुटिलेनैव भवितव्यम् ॥

रक्तभावमित्यादि । यः पुमान् [समस्तेषु रक्तभावमनुरक्ततामनुरागं दर्शयेत्, स किं पादाक्रान्तजगत्त्रयः पादेन चरणेनाक्रान्तं जगत्त्रयं येन तादृक् जगत्त्रयस्वामी न स्यात् । अपि तु स्यादेव । अमुमेवार्थं दृष्टान्तेन द्रढयति—आदित्यवत् । यथा सूर्यः पूर्वमरुणतां दर्शयति, ततः किरणैर्जगत्त्रयमाक्रामति ॥

---

१. 'दर्शयेदिति' इत्येव पाठो भवेत्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहिर्मृदुर्लघूत्थानः पूर्वं यः स्यात्प्ररोहवत् ।
किमसौ न भिनत्त्येव प्राप्य कालं महीभृतः ॥
शूरोऽपि सत्त्वयुक्तोऽपि नीतिं वेत्ति न यो नरः ।
तत्र संनिहिता नित्यमापदः शरभोपमे ॥

अपि च ।

धूर्तेषु मायाविषु दुर्जनेषु स्वार्थैकनिष्ठेषु विमानितेषु ।
वर्तेत यः साधुतया स लोके प्रतार्यते मुग्धमतिर्न केन ॥

इति च विमृश्य, शठप्रतिशठन्यायेन किमपि निःशलाके शिक्षयित्वा कुमारवयस्येनालकभञ्जनेनाधिष्ठितं गविष्ठिरममात्यं प्रहितवती। स तथैवागत्य प्रविश्य च निवेदितावसरो मामुन्मूलितमगमिवातीव परिम्लानम्, आ-

---

बहिरित्यादि । यः पुमान्] पूर्वं प्रथमं बहिर्बाह्ये मृदुः कोमलः स्यात् भवति, लघूत्थानश्च स्यात् गुर्वितरोत्पत्तिश्च भवति । किंवत् । प्ररोहवत् पिप्पल्याङ्कुरवत् । असौ पुमान् कालं प्राप्य महीभृतः नृपात् किं न भिनत्ति । अपि तु भिनत्त्येव । यथा प्ररोहे अङ्कुरो मृदुर्लघूत्थानः कालेन पर्वतमपि भिनत्ति । आक्षेपः ॥

शूर इत्यादि । शूरोऽपि सत्त्वयुक्तोऽपि यो नरः नीतिं न्यायशास्त्रं न वेत्ति न जानाति, तत्र नरे नित्यं आपदो मृत्यवः संनिहिताः समीपवर्तिन्यो भवन्ति । कथंभूते तत्र नरे । शरभोपमे अष्टापदसदृशे । यथाष्टापदो मेघगर्जनेनैव म्रियते । उपमालंकारः ॥

अपि च तथा च । **धूर्तेष्वित्यादि ।** धूर्तेषु वञ्चकेषु, मायाविषु सकपटेषु, दुर्जनेषु शत्रुषु, स्वार्थैकनिष्ठेषु आत्मकार्यतत्परेषु, विमानितेषु मानभङ्गं प्रापितेषु, पुरुषेषु यः पुमान् साधुतया हिततया वर्तेत प्रवर्तेत स मुग्धमतिर्निर्विवेकः केन पुरुषेण न प्रतार्यते। अपि तु सर्वेणापि वञ्च्यत इत्यर्थः । आक्षेपालंकारः ॥

पुनश्च किं कृत्वा अमात्यं सचिवं प्रहितवती। शठप्रतिशठन्यायेन शुकपिच्छलुञ्चनस्त्रीशिरोमुण्डनप्रकारेण किमपि अनिर्वचनीयं निःशलाके एकान्ते गविष्ठिरं सत्यासत्यं शिक्षयित्वा शिक्षां दत्त्वा। कथंभूतं गविष्ठिरम्। कुमारवयस्येन कुमारकालमित्रेण अलकभञ्जनेन अलकभञ्जननामकेन अधिष्ठितं सहितम्। स गविष्ठिरो मां प्रति एवममुना प्रकारेण व्यजिज्ञपत्। तथैव निःशलाकशिक्षणप्रकारेण आगत्य उपढौक्य। न केवलं आगत्य। किंतु प्रविश्य च तिलकभवनविलासनाम्नि भवने प्रवेशं कृत्वा। कथंभूतः सन् प्रविश्य। निवेदितावसरः द्वारपालेन सूचितावसरः। पुनश्च किं कृत्वा व्यजिज्ञपत्। मां अवलोक्य दृष्ट्वा। कथंभूतं माम्। अतीव परिम्लानं अतिशयेन गात्रविनाससहितम्। कमिव। उन्मूलितं अगमिव यथोन्मूलित उत्पादितः अगो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिख्यपरामृष्टं चित्रमिव मलिनच्छायम्, अग्निलङ्घितं रत्नमिव नष्टतेजसम्, उत्पाटितपक्षं तार्क्ष्यमिव गलितप्रभावमवलोक्य 'महान्खल्वस्य महीपतेर्नवग्रहस्येव गजस्य दौर्मनस्याभिनिवेशः। कुतोऽन्यथाद्यैवायं नीलिकोपदेहदूषितदेहस्त्रिपथगाप्रवाह इव नितरां मलीमसच्छविः समयादि' इति परामर्शविस्मितान्तरङ्गः कृतागमनपर्यनुयोगश्चैवं मां व्यजिज्ञपत्—'देव, देवीसंमुखेनेदमाह—यदुत देवः किलाद्य दुःस्वप्नोपशमनार्थं भगवत्याः **कात्यायन्याः** पिष्टकुक्कुटेन बलिमुपहर्तुमादृत इति कर्णपरम्परया श्रुतम्, तद्यदि सत्यं तदास्तामसौ ताम्रचूडस्तावत्। अहमेवात्मना परिकल्पिततदुपहारवर्त्मना परितोषयामि भगवतीम्। प्रशाम्यन्तु देवस्य सर्वेऽपि प्रत्यूहव्यूहाः। प्रवर्धतां च देवस्ये-

---

वृक्षः परिम्लानो भवति। पुनः कथंभूतम्। मलिनच्छायं मलीमसतेजसम्। किमिव। आलिख्यपरामृष्टं चित्रमिव लिखित्वा(?)दिलोपितमालेख्यमिव। पुनः कथंभूतम्। नष्टतेजसं दीप्तिरहितम्। किमिव। अग्निलङ्घितं रत्नमिव यथाग्निनाकुलितं माणिक्यं नष्टतेजो भवति। पुनः कथंभूतम्। गलितप्रभावं नष्टमाहात्म्यम्। कमिव। उत्पाटितपक्षं तार्क्ष्यमिव लुञ्चितपत्रं गरुडमिव। अवलोक्य कथंभूतः सन् गविष्ठिरः मां व्यजिज्ञपत्। इत्यमुना प्रकारेण परामर्शविस्मितान्तरङ्गः परामर्षेण विचारेण विस्मितमाश्चर्यं प्राप्तमन्तरङ्गं यस्य स तथोक्तः। पुनः कथंभूतः सन्। कृतागमनपर्यनुयोगः प्रश्नो यस्य स तथोक्तः। किमर्थं भवानागत इति मया पृष्ट इत्यर्थः। इतीति किम्। महान् खलु अस्यैतस्य महीपतेर्यशोधरमहाराजस्य दौर्मनस्याभिनिवेशः। उद्गतचित्तताभिप्राय इत्यर्थः। उक्तं च—'दुर्विमाना अन्तर्मनाः स्यादुक्तमनाः'। कस्येव। नवग्रहस्य गजस्येव सद्योगृहीतस्य हस्तिन इव। कुतोऽन्यथा अद्यैवायं अन्यथा यद्ययं दुर्मना न भवति तर्हि अद्यैव इदानीमेव अयं राजा नितरामतिशयेन मलीमसच्छविः मलिनतादूषितकान्तिः कुतः समयादि संजातः। क इव। त्रिपथगाप्रवाह इव गङ्गानदीपूरमिव। कथंभूतः त्रिपथगाप्रवाहः। उज्ज्वलस्यापि गङ्गाप्रवाहस्य मलिनताहेतुगर्भितं विशेषणमाह—नीलिकोपदेहदूषितदेहः नीलिकया गुलिकया उपदेहेन उपचयेन मिश्रणेन दूषितो मलिनीकृतः देहः कायो यस्य त्रिपथगाप्रवाहस्य स तथोक्तः। एवं कथमिति चेत्—हे देव, देवीसंमुखेन इदं वचनमाह ब्रवीति। इदं किमित्याह—यदुत यदेव देवो नरेन्द्रः किलेति अद्य अस्मिन् दिवसे दुःस्वप्नोपशमनार्थं दुःस्वप्नोपशान्त्यर्थं भगवत्याः परमेश्वर्याः कात्यायन्याः कात्यायनीनामकुलदेवतायाः पिष्टकुक्कुटेन बलिं पूजां उपहर्तुं दातुं आदृत आदरपरो वर्तते इतीदृशं कर्णपरम्परया लोकवार्त्तया श्रुतं मया आकर्णितम्। तत् बलिदानं यदि चेत् सत्यं वर्तते, तदा तस्मिन् काले आस्तां तिष्ठतु असौ ताम्रचूडस्तावत्कालम्। अहमेव आत्मना स्वयमेव परिकल्पिततदुपहारवर्त्मना विहिततत्पूजामार्गेण भगवतीं भवानीं चण्डिकां परितोषयामि प्रीणयामि। एवंकृते देवस्य मम स्वामिनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दमाचन्द्रार्कमसमश्रीप्राज्यं राज्यम् । न च मया विना भवति देवस्य कोऽप्यूनः प्रदेशः । मद्विधानां हि देवस्य किंकरीणामतीव सुलभत्वात् । नीतिरपि तथास्ति—

'आत्मानं सततं रक्षेद्दारैरपि धनैरपि ।' इति ।

अथ ममैवंविधे प्रेषणावरोधे देवो न करोति करुणां तदा मिथुनचरस्य पक्षिणश्चक्रवाकीव देवस्याहं सहचर्यत एव रात्रौ वियुक्तासि, सरसः कमलिनीवात एव जडरतासि, जलनिधेर्वेलेवात एव चपलासि, नभसः शशिप्रतिमेवात एव सकलङ्कासि, विटपिनश्छायेवात एवान्योपभोग्यासि, कुलशैलस्य मेखलेवात एव क्षुद्राधिष्ठितासि, तपनस्य प्रभेवात एव संतापिकासि, रथस्य मार्गभूमिरिवात एव पांशुलासि, प्रदीपस्य शिखेवात एव

सर्वेऽपि प्रत्यूहव्यूहा विघ्नसमूहाः प्रशाम्यन्तु उपशमं यान्तु । देवस्य इदं राज्यं आचन्द्रार्कं प्रवर्धतां च । कथंभूतं राज्यम् । असमश्रीप्राज्यं अनुपमं यातुः(?) । देवस्य मम प्राणवल्लभस्य कोऽपि प्रदेशः किमपि स्थानं न च मया विना ऊनो भवति । मद्विधानां मम सदृशानां किंकरीणां दासीनां देवस्य हि निश्चयेन अतीव सुलभत्वात् । नीतिरपि न्यायमार्गोऽपि तथास्ति— आत्मानं सततं रक्षेत् प्रतिपालयेत् दारैरपि स्त्रीभिरपि धनैरपि । अथ चेत् मम एवंविधे वलिविधानलक्षणे प्रेषणावरोधे कार्यकारणार्हणकर्तव्ये यदि देवः करुणां दयां न करोति मम मरणं नेच्छति तदा तस्मिन् काले देवस्य मम वल्लभस्य अहं सहचरी भवामि । केव । मिथुनचरस्य पक्षिणश्चक्रवाकस्य चक्रवाकीव । यशोधरश्चिन्तयति—अत एव कारणात् रात्रौ वियुक्तासि । पुनश्च केव सहचरी भवामि । सरसः कमलिनीव । यशोधरश्चिन्तयति—अत एव जडरतासि मूर्खे कुब्जे रता वर्तसे । पद्मिनी तु जलरता भवति । पुनश्च केव सहचरी भवामि । जलनिधेः वेलेव अब्धिविकृतिरिव । यशोधरश्चिन्तयति—अत एव कारणात् त्वं चपला असि वर्तसे । पुनश्च केव सहचरी भवामि । नभसः आकाशस्य शशिप्रतिमेव चन्द्रमूर्त्तिरिव । यशोधरश्चिन्तयति— अत एव कारणात् सकलङ्का कलङ्कसहिता असि वर्तसे । पुनश्च केव सहचरी भवामि । विटपिनो वृक्षस्य छायेव अनातप इव । यशोधरश्चिन्तयति—अत एव कारणात् अन्योपभोग्यासि जारभोग्या वर्तसे । पुनश्च केव सहचरी भवामि । कुलशैलस्य मेखलेव तटीव । यशोधरश्चिन्तयति—अत एव कारणात् क्षुद्राधिष्ठितासि क्षुद्रेण हीनेन कुब्जेन सहिता वर्तसे । यथा कुलशैलमेखला क्षुद्राधिष्ठिता व्याघ्रादिसहिता भवति । पुनश्च केव सहचरी भवामि । तपनस्य प्रभेव द्युतिरिव । यशोधरश्चिन्तयति—अत एव संतापिकासि संतापदायिनी वर्तसे । पुनश्च केव सहचरी भवामि । रथस्य मार्गभूमिरिव । यशोधरश्चिन्तयति—अत एव पांशुलासि कुलटा वर्तसे । मार्गभूमिरपि धूलीसहिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मलिनोद्गारासि, वसन्तस्य वनलक्ष्मीरिवात एव मन्मथकथासनाथासि, मलयाचलस्य चन्दनलतेवात एव कटुस्वभावासि, गजस्य मदलेखेवात एव कामचारप्रवर्तनासि, हिमगिरेर्गङ्गेवात एव नीचानुगतासि, रत्नस्य रागवर्तिरिवात एव परभागघटितासि। एवमन्यदपि ममान्यथार्थोपकल्पनविषयमभिधाय तद्देवस्य सर्वदा राज्यसुखं दायभागिनीव समांशतयानुभूयेदानीमेकाक्येवं परमार्थेनोपस्थितप्रत्यवायवचनमनीषया वा देवः प्रव्रजति। अहं तु पुत्रस्य श्रियमनुभवन्ती गृह एव प्रतिष्ठामि। इत्यतीवासंगतमुभयकुलानुचितं शिष्टजनविगर्हितं च। न चैवमावयोरनुष्ठानाधिष्ठितयोः कोऽप्यागमविरोधो जनापवादानुबन्धो वा। तथा चोक्तम्—

भवति। पुनश्च केव सहचरी भवामि। प्रदीपस्य शिखेव ज्वालेव। यशोधरश्चिन्तयति—अत एव मलिनोद्गारासि धूमोद्गमनकारिणी वर्तसे। पुनश्च केव सहचरी भवामि। वसन्तस्य वनलक्ष्मीरिव मधुमासद्वयस्य वनलक्ष्मीर्यथा सहचारिणी भवति। यशोधरश्चिन्तयति—अत एव मन्मथकथासनाथासि कामकथासंयुक्तासि। पुनश्च केव सहचरी भवामि। मलयाचलस्य चन्दनलतेव मलयपर्वतस्य चन्दनवल्लीव। यशोधरश्चिन्तयति—अत एव कटुस्वभावासि कटुपरिणामिनी वर्तसे। पुनश्च केव सहचरी भवामि। गजस्य मदलेखेव दानधारेव। यशोधरश्चिन्तयति—अत एव कारणात् कामचारप्रवर्तनासि यथेष्टपर्यटनासि। पुनश्च केव सहचरी भवामि। हिमगिरेर्गङ्गेव हिमाचलस्य जाह्नवीव। यशोधरश्चिन्तयति—अत एव नीचानुगतासि नीचानुगामिनी वर्तसे। पुनश्च केव सहचरी भवामि। रत्नस्य रागवर्तिरिव मणेस्तेजोवर्तिरिव। यशोधरश्चिन्तयति—अत एव कारणात् परभागघटितासि परस्य विटस्य भागाय निर्मिता वर्तसे। यथा रत्नवर्तिः परभागेन शोभया घटिता भवति। एवमनुना प्रकारेण अन्यदपि ममानेन अन्यथार्थोपकल्पनविषयं काकुवक्रोक्तिविषयं अभिधाय उक्त्वा तत्तस्मात् कारणात् देवस्य मम प्राणवल्लभस्य सर्वदा सर्वकालं राज्यसुखं नार्पतं सौख्यं दायभागिनीव भागधेयभागिनीव समांशतया समभागतया अनुभूय भुक्त्वा इदानीं एकाकी एक एव देव एव एवममुना प्रकारेण देवः प्रव्रजति दीक्षां गृह्णाति। देवः किमर्थं प्रव्रजति। परमार्थेन मोक्षसुखाभिलाषकतया उपस्थितप्रत्यवायवचनमनीषया वा आगतया अनिराकरणबुद्ध्या वा। अहं तु पुत्रस्य यशोमतेः श्रियं लक्ष्मीमनुभवन्ती भुञ्जाना गृह एव मन्दिर एव प्रतिष्ठामि। इति अतीव असंगतं अयुक्तं वर्तते। न केवलमसंगतं उभयकुलानुचितं श्वशुरपितुः कुलायोग्यम्। शिष्टजनविगर्हितं निन्दितं च वर्तते। न च नैव एवममुना प्रकारेण आवयोस्तव मम च अनुष्ठानाधिष्ठितयोश्चारित्रायुक्तयोः कोऽपि कश्चिदागमविरोधो न वर्तते। जनापवादानुबन्धो लोकापवादसंबन्धो वा न वर्तते। तथा चोक्तम्—सहचरी भवामि इत्युपरिवचनमस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम् ।
पुत्रेषु दारान्निक्षिप्य वनं गच्छेत्सहैव वा ॥
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषितम् ।
पतिं शुश्रूषयेद्यन्तु तेन स्वर्गे महीयते ॥'

किं च—

'विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः ।
उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः ॥' इति ।

तथा च श्रुतिः—किल वानप्रस्थभावेऽपि **रामस्य सीता** सधर्मचारिण्यासीत् । **द्रौपदी धनंजयस्य, सुदक्षिणा दिलीपस्य, लोपामुद्रागस्त्यस्य, अरुन्धती वशिष्ठस्य, रेणुका च जमदग्नेरिति** । पतिविरहे ह्येकेनाप्यङ्गुष्ठेन तपस्यन्त्यः स्त्रियो भवन्त्यवश्यं धिक्कारगोचराः । यथा **प्रयागे** प्रायोपवेशनस्थितापि **ब्रह्मबन्धू** ब्राह्मणी **गोविन्देन** परिव्राजा

संत्यज्येत्यादि । ग्राम्यं सर्वलोकसाधारणं आहारं भुक्तिं संत्यज्य, श्यामाकनीवारादिफलपत्रादौ च प्रवृत्तिं कृत्वेत्यर्थः । सर्वं परिच्छदं परिवारं संत्यज्य पुत्रेषु उद्वहेषु दारान् कलत्राणि निक्षिप्य पुत्रान् समर्प्य वनं गच्छेद्व्रजेत् वाथ वा दारैः सहैव गच्छेत् ॥

नास्तीत्यादि । स्त्रीणां पृथग्भिन्नो यज्ञः क्रतुर्नास्ति, न व्रतम्, नापि उपोषितमुपवासो वर्तते । किं तर्हि । पतिं भर्त्तारं शुश्रूषयेत् । यद्यस्मात् कारणात् नु इति वितर्क्यं तेनैव कारणेन स्त्री स्वर्गे महीयते पूज्यते ॥

किं च विशेषोऽस्ति—**विशील इत्यादि** । विशीलः शीलरहितः, कामवृत्तो वा स्वेच्छाचारी वा, गुणैर्वा परिवर्जितो गुणरहितो वा । ईदृग्विधः पतिः साध्व्या पतिव्रतया उपचर्यः सेवनीयः । कथम् । सततम् । किंवत् । देववत् ब्रह्मविष्णुमहेश्वरसूर्यादिवत् ॥

तथा च श्रुतिर्वेदेऽप्युक्तमस्ति—किलेति श्रूयते । वानप्रस्थभावेऽपि वनप्रस्थानकालेऽपि रामस्य काकुत्स्थस्य सीता जनकप्रतिपालिता सुता सधर्मचारिणी सहगमना आसीद्बभूव । धनंजयस्यार्जुनस्य द्रौपदी पाञ्चाली द्रुपदनृपनन्दना वानप्रस्थभावे सधर्मचारिणी आसीत् । सुदक्षिणा दिलीपस्य सहचारिणी आसीत् । लोपामुद्रानाम्नी अगस्त्यभार्या अगस्त्यसहचारिणी आसीत् । अरुन्धतीनाम्नी वशिष्ठस्य सहचारिणी आसीत् । रेणुका च कन्या कुब्जजा जमदग्नेः परशुरामस्य पितुः सहचारिणी आसीत् । पतिविरहे भर्तुर्विप्रलम्भे हि निश्चयेन एकेनापि अङ्गुष्ठेन पादज्येष्ठेन तपस्यन्त्यः कुर्वन्त्यः स्त्रियो अवश्यं निश्चयेन धिक्कारगोचरा भवन्ति । निन्द्या भवन्तीत्यर्थः । यथा धिक्कारप्रकारेण प्रयागे चटतितीर्थे प्रायोपवेशनस्थितापि सती ब्रह्मबन्धूनाम्नी ब्राह्मणी गोवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सह किल परीवादभागिनी बभूवेति । तथोक्तग्रहणदिवसे चाम्बदेव्या सह मदीये निलये प्रवहणं कर्तव्यमिति चाभ्यर्थ्य विरते तस्मिन्नहमिदमवादिषम्—'अहो सत्ययुधिष्ठिर **गविष्ठिर**, यदि नर्मकर्मणापि कदाचिन्महादेव्याः प्रतिकूलमाचरितवानस्मि तदा त्वमेवात्र साक्षी । तदेवं निवेदय देव्याः—यदाह भवती तत्सर्वं देवेन प्रतिपन्नम् । अन्यत्र पूर्वमुत्थापितात्पक्षात् । इति निवेदितेतिकर्तव्ये सबहुमानं विसर्जिते च तदमात्ये मया चिन्तितम्—'अहो महादेव्यामतीव खलु संवीणताबहिःस्थायाम् । किं च—

राज्यस्थितं मामवहाय यैषा कुब्जेन सार्धं रतिमातनोति ।
सा मे वनस्थस्य मुमुक्षुवृत्तेर्भवेत्सदाचारमतिः किलेति ॥
देवैर्मनुष्यैरथ राक्षसैर्वा निसर्गतो गूढतरप्रचारा ।
ईदृक्तया ज्ञातुमियत्तया वा न शक्यते स्त्रीजनचित्तवृत्तिः ॥

न्देन परिव्राजा गोविन्दनामकेन शिखाधारिणा तपस्विना सह किलेत्यरुचौ परीवादभागिनी बभूव गोविन्देन भुक्तेति निन्दां प्राप । तथोक्तग्रहणदिवसे च अम्बदेव्या सह चन्द्रमत्या सार्धं मदीये निलये प्रवहणं कर्तव्यं गणभोजनं विधातव्यमिति ईदृशं चाभ्यर्थ्य याचयित्वा तस्मिन् गविष्ठिरे विरते सति अहं यशोधर इदमीदृशमवादिषमुक्तवान् । किं अवादिषमित्याह—अहो सत्ययुधिष्ठिर युधिष्ठिरमहाराजवत् सत्यवादिन्, हे गविष्ठिर महादेव्याः सचिव, नर्मकर्मणा प्रियकरेणापि कदाचित्कस्मिंश्चिदवसरे महादेव्याः अमृतमतेः प्रतिकूलमहितं अहमाचरितवानस्मि कृतवान् वर्ते तदा त्वमेवात्र साक्षी तस्मिन् काले भवानेव प्रतिभूर्वर्तते । तत्तस्मात् कारणात् देव्या मत्कान्ताया एवं निवेदय कथय । एवं कथमिति चेत्—यत्किमपि भवत्याहेति तत्सर्वं देवेन राज्ञा प्रतिपन्नमङ्गीकृतम् । पूर्वमुत्थापितात्पक्षादिति पूर्वमुक्तात्पक्षाद्देवीशरीरबलिदानकार्यादन्यत्र विना । इतीदृशं निवेदितेतिकर्तव्ये निर्धारितकार्ये सबहुमानमतिसंमानसहितं यथा भवत्येवं तदमात्ये देव्या मन्त्रिणि विसर्जिते सति मया यशोधरेण चिन्तितम् । किं विचारितम् । अहो महादेव्यां अतीवातिशयेन अबहिःस्थायां आकार उभौ खलु निश्चयेन संवीणता समीचीनत्वं वर्तते ॥

किं च विशेषमाह—**राज्यस्थितमित्यादि** । राज्यस्थितमिदं राज्ये प्रवर्तमानं मामवहाय त्यक्त्वा यैषा महादेवी कुब्जेन सार्धं रतिं भोगानुभवमातनोति आचरति । सा देवी मे मम वनस्थस्य वने तिष्ठतः मुमुक्षुवृत्तेर्मोक्षाभिलाषिणः किलेत्यरुचौ सदाचारमतिर्भवेत् शीलवती संजायेत । आक्षेपः ॥

दैवैरित्यादि । देवैरिन्द्रादिप्रमुखैः, अथ मनुष्यैः पुरुषैः, अथ राक्षसैः क्रव्यादैर्वा स्त्रीजनचित्तवृत्तिः ज्ञातुं न शक्यते । कथंभूता स्त्रीजनचित्तवृत्तिः । निसर्गतः गूढतरप्रचारा अतीव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इहैव वात्स्यायनगोत्रजस्य पुत्री भृगोः काञ्चनिकेतिनाम्नी ।
पतिं च पुत्रं च विटं च हत्वा भर्त्रा तु सार्धं दहनं विवेश ॥

अथवैतदप्यस्यामसंभाव्यम् । राभसिको हि लोकः प्रायेणान्धयष्टिरिव परामर्शमकृत्वा शुभाशुभाय वा कर्मणे तोलयत्यात्मानम् । इयं पुनः प्रकृत्यैव विषजातिरिव दुष्टस्वभावा, मकरदंष्ट्रेव कुशीलिनी, कर्णिसुतकथेव बहुकूटकपटवेष्टिता, कुमारविद्येवानेककुहुकवेदिनी, खड्गीव जिह्वयापि स्पृशन्ती दारयत्यङ्गानि । छलयति च नियतिरिव बुद्ध्या बृहस्पतिमपि पुरुषम् । मदीयं तु विलसितं स्वहस्ताङ्गाराकर्षणमिव मे संजातम् । अस्याश्च खल्वबिल्वसंयोगसमम् ।

कालश्च सकृदभ्येति यं नरं कालकाङ्क्षिणम् ।
दुर्लभः स पुनः कालस्तस्य कर्म चिकीर्षतः ॥

गहनरूपा । चित्तवृत्तिः कथं ज्ञातुं न शक्यते । ईदृक्तया ईदृशी चित्तवृत्तिर्वर्तते, इयत्तया एतावती चित्तवृत्तिर्वर्तते, एतत् ज्ञातुं न शक्यते । अतिशयालंकारः ॥

इहैवेत्यादि । इहैव भरतक्षेत्रे उज्जयिन्यां नगर्यां वात्स्यायनगोत्रजस्य वात्स्यायनऋषिकुले संजातस्य भृगोर्भृगुनामब्राह्मणस्य पुत्री काञ्चनिकेतिनाम्नी पतिं च पुत्रं च विटं च कामुकं न एतत्रयं हत्वा भर्त्रा सार्धं तु दहनं विवेश गमनं चकार । आक्षेपः ॥

अथवा एतदपि अस्यां महादेव्यां असंभाव्यम् । इयं म्रियते इति न घटते, मां मारयिष्यति, इयं न मरिष्यतीत्यर्थः । किमितीयं न मरिष्यते, कस्मान्न मरिष्यते । यस्मात् कारणात् राभसिको हि लोको अविचार्य उत्सुकत्वेन कार्यकर्ता लोकः प्रायेण अन्धयष्टिरिव परामर्शमकृत्वा विचारणामविधाय शुभायाशुभाय वा यथा कर्मणे आत्मानं तोलयति संशयं नयति । यथा अन्धस्य पुरुषस्य यष्टिरविचारपूर्वं यत्र तत्र पतति तथा लोकः अविचार्य कार्यं करोति । लोकः खलु म्रियते, इयं तु न मरिष्यत इत्यर्थः । इयं महादेवी पुनः प्रकृत्यैव दुष्टस्वभावा वर्तते । केव । विषजातिरिव । यथा विषभेदः स्वभावेन दुष्टो भवति तथा इयम् । पुनः कथंभूता इयम् । मकरदंष्ट्रेव कुशीलिनी दुष्टशीला वर्तते । पुनः कथंभूता इयम् । कर्णिसुतकथेव मूलदेवचरित्रमिव बहुकूटकपटवेष्टिता वर्तते । पुनः कथंभूता इयम् । कुमारविद्येव कुमारो धूर्तशास्त्रकर्ता तस्य विद्येव अनेककुहुकवेदिनी मायाकारज्ञायिका वर्तते । पुनः कथंभूता इयम् । खड्गीव वार्धीणसीव जिह्वयापि स्पृशन्ती अङ्गानि दारयति । इयं देवी बुद्ध्या कृत्वा बृहस्पतिमपि पुरुषं बृहस्पतिसदृशमपि तं छलयति प्रतारयति । केव । नियतिरिव । मदीयं तु विलसितं मम चेष्टितं स्वहस्ताङ्गाराकर्षणमिव मे संजातम् । अस्याश्च विलसितं खल्वबिल्वसंयोगसमं संजातम् । यथा समुद्रमुक्ता कीलिका युगच्छिद्रे प्रविशति तथा इयमपि ॥

काल इत्यादि । कालश्च प्रस्तावः सकृदेकवारं अभ्येत्यागच्छति । यं कालकाङ्क्षिणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतदेवार्थशास्त्रस्य नित्यमध्ययने फलम् ।
यत्परानभिसंधत्ते नाभिसंधीयते परैः ॥

इति मां च नीतिमसौ बहुधा पठति । स्वभावसुभगावेशोऽपि च शास्त्रोपदेशः स्त्रीषु शस्त्रीष्विव पयोलवः परं परोपघातायैव प्रभवति । किं च ।

इच्छन्गृहस्यात्मन एव शान्तिं स्त्रियं विदग्धां खलु कः करोति ।
दुग्धेन यः पोषयते भुजङ्गीं पुंसः कुतस्तस्य सुमङ्गलानि ॥

इति बुद्धिवृद्धैरुपदिश्यमानमिदं पूर्वमेव नाचरितम् । तदहमेवमाकलयेयम्—मत्तपःप्रत्यवायपरः सकलजनरञ्जनकरश्चायमस्याः सर्वोऽपि मृदुनोपायेन कार्योपक्रमः । श्रूयते ह्यात्मनः किल स्वच्छन्दवृत्तिमिच्छन्ती विषदूषितमद्यगण्डूषेण **मणिकुण्डला** महादेवी **यवनेषु** निजतनुज-

नरं प्रस्तावपवाञ्छकं पुरुषं स पुनः कालोऽवसरः दुर्लभो भवति । किं कुर्वतः । तस्य कर्म चिकीर्षतः कर्म कर्तुमिच्छतः । अत्रायमर्थः—इयं जानाति यशोधरस्य मृत्युकरणे अयमेव प्रस्तावः स पश्चान्नायास्यति । जात्यलंकारः ॥

एतदित्यादि । एतदेवेदमेवार्थशास्त्रस्य नीतिशास्त्रस्य नित्यमध्ययने सदाकालपठने फलम् । एतत्किम् । यत् परान् शत्रून् अभिसंधत्ते वञ्चयति, परैः शत्रुभिर्न अभिसंधीयते न वञ्च्यते । जातिः ॥

इतीदृशीं मां मत्यं च नीतिं शास्त्रं असौ देवी बहुधा अनेकप्रकारेण पठति । स्वभावेन प्रकृत्या सुभगावेशोऽपि परेषां प्रीतिजनकाभिप्रायोऽपि शास्त्रोपदेशः स्त्रीषु विषयप्रकृतः सन् शस्त्रीष्विव असिपुत्रिकास्विव पयोलवो जललेशः परं केवलं परोपघातायैव प्रभवति संजायते ॥

किं च विशेषोऽस्ति—**इच्छन्नित्यादि** । गृहस्य निजावासस्यात्मनः जीवस्य शान्तिं निर्विघ्नतां इच्छन्नभिलषन् कः पुमान् खलु स्त्रियं विदग्धां चतुरां करोति । अपि तु न कश्चिदित्यर्थः । यः पुमान् भुजङ्गीं दुग्धेन पोषयते पुष्णाति तस्य पुंसः सुमङ्गलानि शोभनसुखानि कुतः । न कुतोऽपीत्यर्थः ॥

इतीदृशं शास्त्रं बुद्धिवृद्धैर्विद्वद्भिरुपदिश्यमानमिदं शास्त्रं पूर्वमेव आदित एव मया नाचरितं न कृतम् । तत्तस्मात् कारणात् अहमेवममुना प्रकारेण आकलयेयं जानामि । एवं कथमिति चेत्—अस्या महादेव्याः सर्वोऽपि कार्योपक्रमः कार्यादितः मत्तपःप्रत्यवायपरः परमदीक्षायां दोषतत्परः । न केवलं मत्तपःप्रत्यवायपरः सकलजनरञ्जनकरश्च मृदुनोपायेन कोमलोपायेन वर्तते । श्रूयते हि यस्मात् कारणात् आत्मनः स्वस्य किलेत्यरुचौ यवनेषु म्लेच्छमण्डलेषु मणिकुण्डलानाम्नी महादेवी आत्मनः स्वच्छ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राज्यार्थमजराजं राजानं जघान, विषालक्तकदिग्धेनाधरेण **वसन्तमतिः सूरसेनेषु सुरतविलासम्**, विषोपलिप्तेन मेखलामणिना **वृकोदरी दशार्णेषु मदनार्णवम्**, निशितनेमिना मुकुरेण **मदिराक्षी मगधेषु मन्मथविनोदम्**, कबरीनिगूढेनासिपत्रेण **चण्डरसा पाण्डुषु मुण्डीरम्**, इति ।

यतः ।

यथोच्छिखण्डा मण्डूक्यो लोकविप्लवहेतवः ।
तथा स्त्रियः स्वभावेन भर्तृव्यसनतत्पराः ॥

सांप्रतं च मे समस्तापि कार्यपरिणतिः 'शिरो मुण्डयित्वा नक्षत्रप्रश्नः' इतीमं न्यायमनुसरति । न चास्ति मत्तः परोऽतीव प्रमादी । यस्मात्

अन्तःपुरे भूमिपतिर्मदान्धः करोति यः संगतिमङ्गनाभिः ।
तस्य ध्रुवं स्यादचिरेण मृत्युर्बिलप्रवेशादिव दर्दुरस्य ॥

न्दवृत्तिं स्वेच्छाचारमिच्छन्ती निजतनुजराज्यार्थं विषदूषितमद्यगण्डूषेण विषमिश्रितसुरागुलगुलकेन अजराजनामानं राजानं जघान मारितवती । तथा च श्रूयते – सूरसेनेषु सूरसेननाम्नि देशे वसन्तमतिनाम्नी महादेवी विषालक्तकदिग्धेन विषेण मिश्रो योऽसावलक्तको लाक्षारसस्तेन दिग्धेन लिप्तेन अधरेण सुरतविलासं नाम राजानं जघान । तथा च श्रूयते—दशार्णेषु वृकोदरीनाम्नी महादेवी विषोपलिप्तेन मेखलामणिना कटिमेखलारत्नेन मदनार्णवं नाम राजानं जघान । तथा च श्रूयते—मगधेषु मगधनाम्नि देशे मदिराक्षीनाम्नी महादेवी निशितनेमिना तीक्ष्णधारेण मुकुरेण दर्पणेन मन्मथविनोदं नाम राजानं जघान । तथा च श्रूयते—पाण्डुषु पाण्डुनाम्नि देशे चण्डरसानाम्नी महादेवी कबरीनिगूढेन केशविन्यासगुप्तेन असिपत्रेण मुण्डीरं नाम राजानं जघानेति ॥

यतः कारणात्—**यथेत्यादि** । यथा येन प्रकारेण उच्छिखण्डाः शिखासहिता मण्डूक्यो दर्दुर्यः वर्षासु लोकविप्लवहेतवः लोकानां उत्पातकारणं भवन्ति । तथा तेनैव प्रकारेण स्वभावेन प्रकृत्यैव स्त्रियो भर्तृव्यसनतत्परा भवन्ति भर्तुः कान्तस्य पक्षे राज्ञो दुःखोपनिपातिन्यो भवन्ति । दृष्टान्तालंकारः ॥

सांप्रतं च मे मम समस्तापि कार्यपरिणतिः कर्तव्योदयः शिरो मुण्डयित्वा क्षौरकर्म कृत्वा नक्षत्रप्रश्नः नक्षत्रप्रच्छनं इति ईदृशं इमं एतं न्यायं नीतिं अनुसरति अनुगच्छति । इतिशब्देनोक्तार्थत्वात् प्रश्नशब्दात् प्रथमैव । उक्तं च—'पुष्यपुनर्वसुरेवतीचित्राश्रवणधनिष्ठामृगाश्विनीहस्ताण्यगुणो नवभिः क्षुरकर्म वलधृतिकार्यकरः शुभकर्ता ।' इति । न चास्ति मत्तः परो मत्परः अतीव प्रमादी ॥

यस्मात् कारणात्—**अन्तःपुरे इत्यादि** । अन्तःपुरे शुद्धान्ते भूमिपतिर्यो राजा मदान्धः सन् अङ्गनाभिः संगतिं करोति, तस्य भूमिपतेः ध्रुव अचिरेण मृत्युः स्यात् । बिलप्रवेशात् दर्दुरस्येव । दृष्टान्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति प्रत्यहमधीयानोऽपि तस्या दुष्कर्मणः सद्मनि संवासपरः समभवम्। अपि च।

अज्ञानभावादथवा प्रमादादुपेक्षणाद्वात्ययभाजि कार्ये।
पुंसः प्रयासो विफलः समस्तो गतोदके कः खलु सेतुबन्धः॥

विहाय शास्त्राण्यवमत्य मन्त्रिणो मित्राण्यवज्ञाय निरुद्ध्य बान्धवान्।
भवन्ति ये दुर्नयनीतयो नृपाश्चिराय तिष्ठन्ति न तेषु संपदः॥

न चापि मे सन्ति विनीतचेतसस्तुलासमाः कार्यविचारकर्मणि।
अमी सदा ये च समीपवृत्तयो मनः परं ते मदयन्त्युपाकृताः॥

अपि च।

प्रशास्ति यः श्रोतृवशेन धर्मं नृपेच्छया यो निगृणाति कार्यम्।
अकल्पकामोपचयेन वैद्यस्त्रयस्त एते कलिकालपादाः॥

इतीदृशं शास्त्रं प्रत्यहं निरन्तरमधीयानोऽपि पठन्नपि तस्याः दुष्कर्मणो दुरात्मिकायाः अमृतमतेः सद्मनि निवासे संवासपरः सहवासतत्परोऽहं समभवं संजातः॥

अपि च तथा च। **अज्ञानेत्यादि**। अज्ञानभावात् ज्ञानरहितत्वात् अथवा प्रमादात् असावधानतया उपेक्षणाद्वा अनादराद्वा कार्ये अत्ययभाजि कालातिपातसहिते सति पुंसः समस्तः प्रयासः श्रमो विफलो निरर्थको भवति। गतोदके जलनिर्गमे सति सेतुबन्धः पालिबन्धः कः खलु वर्तते। न कश्चिदित्यर्थः। आक्षेपः॥

विहायेत्यादि। विहाय परित्यज्य शास्त्राणि नीतिसिद्धान्तान् अवमत्य अवगणय्य मन्त्रिणः मित्राणि अवज्ञाय सखीन् अनादृत्य बान्धवान् निरुध्य आदृत्य ये नृपा दुर्नयनीतयो भवन्ति तेषु नृपेषु चिराय संपदो लक्ष्म्यो न तिष्ठन्ति नासते। जात्यलंकारः॥

न चापीत्यादि। न चापि मे मम विनीतचेतसः विनयग्राहिणः न सन्ति न वर्तन्ते। कथंभूतास्ते विनीतचेतसः। कार्यविचारकर्मणि तुलासमास्तुलासदृशदण्डसमाना न सन्ति। कार्यविचारका न सन्तीत्यर्थः। ये च अमी एते सदा समीपवृत्तयो वर्तन्ते निकटवर्तिनः सन्ति। ते परं केवलं उपाकृताः स्वीकृताः सन्तः मनो मानसं चित्तं मदयन्ति मदयुक्तं कुर्वन्ति। ते शास्त्रबाह्या वर्तन्ते इत्यर्थः। उपमालंकारः॥

अपि च तथा च। **प्रशास्तीत्यादि**। यः पुमान् श्रोतृवशेन श्रावकाधीनत्वेनधर्मक्रियां प्रशास्ति कथयति। यः श्रोता यद्धर्मरतो भवति व्याख्यातापि तं धर्ममुपदिशतीत्यर्थः। नृपेच्छया यः कार्यं निगृणाति राजाभीष्टं मन्त्रं मन्त्री कथयति। अकल्पकामोपचयेन ज्वरादिरोगपीडितपुरुषेच्छावर्धनेन कृत्वा यो वैद्यो भवति रोगिणो यादृशं रोचते तादृशमेवोपदिशति। ते एते पूर्वोक्ता धर्मशास्त्रमन्त्रकथकरोगीच्छासमानवैद्यास्त्रयः कलिकालपादा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकैकमेषां गुणमाकलय्य मया ह्यमी मन्त्रिपदे नियुक्ताः ।
सिंहेषु दृष्टं यदि नाम शौर्यं क्षेमास्ति किं तैः सह संगतस्य ॥
प्रवर्तते यो नृपतिः खलानां प्रमाणयन्नात्महिताय वाचः ।
नूनं स कल्याणमतिर्न किं स्यादाशीविषैः केलिकरो यथैव ॥
प्रतिक्षणं संशयितायुषो ये न येष्वपेक्षास्ति च कार्यवादे ।
त एव मन्त्रेऽधिकृता नृपाणां न ये जलौकासमवृत्तयश्च ॥

किं च ।

प्रजाविलोपो नृपतीच्छया स्यात्प्रजेच्छया चाचरिते स्वनाशः ।
न मन्त्रिणां वेधविधायिनीवत्सुखं सदैवोभयतः समस्ति ॥

भवन्ति । कलिकालः पापिष्ठः त्रिभिः पादैः प्रवर्तते । यद्यस्य चत्वारः पादा भवन्ति तदा सर्वः अधर्म एव वर्तेत इत्यभिप्रायः । रूपकालंकारः ॥

एकैकेत्यादि । एषां मन्त्रिपदे नियुक्तानां एकैकं गुणं दयावत्वादिकं आकलय्य ज्ञात्वा मया अनुमीयते मन्त्रिपदे नियुक्ता अधिकृताः । एकैकेन गुणेन कार्यकृतो न भवन्तीत्यर्थः । यदि चेत् । नामेति संभावनायाम् । सिंहेषु शौर्यं दृष्टमवलोकितं तर्हि तैः सिंहैः सह संगतस्य मिलितस्य पुंसः किं क्षेमास्ति कुशलं भवति । अपि तु न भवतीत्यर्थः । आक्षेपालंकारः ॥

प्रवर्तते इत्यादि । यो नृपतिः खलानां वाचः आत्महिताय प्रमाणयन् सन् प्रवर्तते । स नृपतिः नूनं किं कल्याणमतिर्न स्यात् । अपि तु भवत्येव । क इव कल्याणमतिर्भवेत् । आशीविषैः सर्पैः सह यथैव येन प्रकारेण केलिंकरः पुमान् कल्याणमतिर्भवेत् । तथापीत्यर्थः । काकुवक्रोक्त्यलंकारः ॥

प्रतिक्षणमित्यादि । प्रतिक्षणं ये मन्त्रिणः संशयितायुषः संशयं प्राप्तजीवितव्याः असौ राजा अस्मान् मारयिष्यति इति भयभीतचेतसो भवन्ति । येषु मन्त्रिषु कार्यवादे मन्त्रोपदेशे अपेक्षा धनग्रहणेच्छा च नास्ति न विद्यते । त एव मन्त्रिणः मन्त्रे नृपाणां अधिकृता अधिकारिणो भवन्ति । ये मन्त्रिणः जलौकासमवृत्तयश्च न भवन्ति यथा जलौका रक्तपाः स्तने धृताः सत्यो रुधिरमाकर्षन्ति न तु क्षीरम्, तथा ये मन्त्रिणः दोषान् गृह्णन्ति न गुणान् उपदिशन्ति त एव मन्त्रिणः अधिकृताः । उपमालंकारः ॥

किं च विशेषमाह—**प्रजेत्यादि** । नृपतीच्छया राजेच्छया प्रजाविलोपः स्यात् । प्रजेच्छया आचरिते च स्वनाशो भवति । यतो राजा धनं धातुं न वाञ्छति । तेन कारणेन मन्त्रिणां उभयतः प्रकारेण राजेच्छया प्रजेच्छया चलतां मन्त्रिणां सदैव सुखं न समस्ति किंतु दुःखमेव भवति । किंवत् । वेधविधायिनीवत् यथा वेधविधायिनी घण्टकिका मस्तके घट्टनेन कुठ्यते, मुखे तु पाषाणादिको मुखभङ्गं करोति । उपमालंकारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाप्यमीभिः कुशलोपदेशैर्भाव्यं नृपे दुर्नयचेष्टितेऽपि ।
अन्धः स्खलेद्यद्यपि चात्मदोषादाकर्षकं तत्र शपन्ति लोकाः ॥
यतो यथार्थं वदतां नराणामात्मक्षयः स्यात्परमेक एव ।
राष्ट्रस्य राज्ञो ध्रुवमात्मनश्च मिथ्योपदेशस्तु करोति नाशम् ॥
तदेतदित्थं मम दुर्नयेन दुर्मन्त्रिणां संश्रयणेन चैव ।
यथायथं कार्यमिदं प्रयातं देवोऽपि शक्तो घटनाय नास्य ॥
गविष्ठिरस्यापि मया पुरस्तात्किंचित्प्रतिज्ञाविषयीकृतं च ।
सत्यच्युतानां किमु जीवितेन राज्येन वा लोकविगर्हितेन ॥
दैवे तु पुंसः प्रतिकूलवृत्तौ विवेकिता नैव भवेद्गुणाय ।
किं लक्ष्मणस्यास्ति रणेषु भङ्गः सीतामसौ येन मुमोच रामः ॥

तथापीत्यादि । तथापि यद्यप्येवं उभयतोऽपि सुखं न वर्तते तथापि दुर्नयचेष्टिते अन्यायकारके नृपे अमीभिः मन्त्रिभिः कुशलोपदेशैः श्रेयस्करोपदेशैः भाव्यं भवितव्यम् । अमुमेवार्थं दृष्टान्तेन द्रढयति—अन्धः पुमान् आत्मदोषात् निजचक्षुर्दोषात् यद्यपि स्खलेत् तथापि तत्र अन्धे आकर्षकं अतानकं पुमांसं लोकास्तत्र शपन्ति आक्रोशन्ति । मन्त्रिणमेव दूषयन्तीत्यर्थः । दृष्टान्तालंकारः ॥

यतो यथार्थमित्यादि । यतो यस्मात् कारणात् यथार्थं सत्यं वदतां नराणां मन्त्रिणां परं केवलमेक एव आत्मक्षयः स्यात् सचिव एव म्रियते । मिथ्योपदेशस्तु मिथ्यामन्त्रस्तु राष्ट्रस्य देशस्य राज्ञो नृपस्य आत्मनश्च सचिवस्य च ध्रुवमिति निश्चयेन नाशं करोति विध्वंसं विदधाति । समुच्चयालंकारः ॥

तदित्यादि । तत्तस्मात् कारणात् एतत् पूर्वोक्तं इदं कार्यं यथायथमात्मानुसारेण प्रयातं नष्टम् । केन प्रणष्टम् । मम दुर्नयेन । न केवलं मम दुर्नयेन दुर्मन्त्रिणां संश्रयणेन चैव । अस्य कार्यस्य घटनाय देवोऽपि न शक्तः । समुच्चयालंकारः ॥

गविष्ठिरस्येत्यादि । गविष्ठिरस्यापि पुरस्तात् मया किंचिद्वचनं प्रतिज्ञाविषयीकृतं प्रतिज्ञातम् । प्रतिपन्नमित्यर्थः । तद्यदि न करोमि महादेवीमन्दिरं न गच्छामि न च भुजे, तर्हि सत्यच्युतानां पुरुषाणां जीवितेन प्राणितेन किमु । वाथ वा राज्येन किमु । न किमपि । कथंभूतेन जीवितेन राज्येन च । लोकविगर्हितेन लोकैर्निन्दितेन । आक्षेपालंकारः ॥

दैवे इत्यादि । दैवे पुंसः प्रतिकूलवृत्तौ पराङ्मुखे सति विवेकिता चतुरत्वं गुणाय नैव भवेत् गुणकारिणी न स्यात् । अमुमेवार्थं लोकप्रसिद्धदृष्टान्तेन द्रढयति—लक्ष्मणस्य सौमित्रे रणेषु किं भङ्गोऽस्ति भवति । येन कारणेन असौ रामः श्रीसीतां मुमोच वनमध्ये सीतां एकाकिनीं मुक्त्वा लक्ष्मणस्य साहाय्यं कर्तुं गतः । दृष्टान्ताक्षेपौ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदत्र दैवमेव शरणम् ।' इति विचिन्त्य किंचिन्निद्रासुखमनुभूय प्रबुध्य च

'कुर्वन्मन्दितिमन्दिरेषु करिणामानन्दलीलारसं
नासाग्रस्फुरितेन केलिरभसं वाजिव्रजानां वहन् ।
क्रीडाशैलनिकुञ्जकन्दरभुवां नृत्तं दधन्केकिना-
मद्यायं किमकाण्ड एव नगरे तूरध्वनिः श्रूयते ॥'

इति **बुधप्रबोधं** संधिविग्रहिणमापृच्छमाने, वातायनोपान्तवर्तिनी निवर्त्य च नेत्रे

'नृत्यैः समं वारविलासिनीनां संगीतकस्यापि महाप्रबन्धः ।
गृहेषु सर्वेषु च पूर्णकुम्भाः पुष्पाक्षतव्याकुल एष लोकः ॥'

हे मारदत्त महाराज, त्रिशूलिनीनिलयं चण्डिकाभवनं अहं अनुजगाम चन्द्रमतेर्मातुः पृष्ठतो गतवान् । किं कृत्वा पूर्वम् । इतीदृशं विचिन्त्य । इतीति किम् । तत्तस्मात् कारणात् अत्रास्मिन् कार्ये चण्डीभवनगमनादिकाय दैवमेव शरणं गतिरिति । तथा चोक्तम्—'नेता यत्र बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः स्वर्गं दुर्गमनुग्रहः खलु हरेरैरावणो वाहनः । इत्याश्चर्यबलान्वितोऽपि बलभिद्भग्नः परैः संगरे तद्व्यक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥' पुनश्च किं कृत्वा पूर्वम् । किंचिन्मनाक् निद्रासुखमनुभूय । पुनः किं कृत्वा । प्रबुध्य च जागरित्वा च । कस्मिन् सति त्रिशूलिनीनिलयमनुजगाम । वैकुण्ठमतिना वैकुण्ठमतिनामकेन वरिष्ठकेन क्षेत्रपालेन इत्यागत्य विज्ञप्ते सति । कस्मिन् सति विज्ञप्ते । इत्यमुना प्रकारेण बुधप्रबोधं बुधप्रबोधनामानं संधिविग्रहिणं महाद्भूतं आपृच्छमाने मयि पृच्छति सति । इतीति किम् । भोः संधिविग्रहिन् । **कुर्वन्नित्यादि** । अद्य अयं अकाण्ड एव अप्रस्ताव एव नगरे तूरध्वनिः किं श्रूयते । किं कुर्वन् ध्वनिः । मन्दितिमन्दिरेषु राजमन्दिरेषु करिणां आनन्दलीलारसं कुर्वन् । पुनः किं कुर्वन् । नासाग्रस्फुरितेन घोणास्फुरणेन वाजिव्रजानां केलिरभसं क्रीडोत्सुकत्वं वहन् आचरन् । पुनः किं कुर्वन् । केकिनां मयूराणां नृत्तं दधन् । कथंभूतानां केकिनाम् । क्रीडाशैलनिकुञ्जकन्दरभुवां क्रीडाशैलानां ये निकुञ्जा लतादिपिहितोदरस्थानानि तेषु कन्दरेषु भू स्थानं येषां ते तथा तेषाम् । जात्यलंकारः ॥

किं कृत्वा पूर्वं संधिविग्रहिणमापृच्छमाने मयि सति । वातायनोपान्तवर्तिनी गवाक्षसमीपवर्तमाने द्वे नेत्रे निवर्त्य च । पुनश्च कस्मिन् सति वरिष्ठकेन विज्ञप्ते । इत्यस्य च एतस्य च हेतुविमर्शजातचेतसि मयि सति कारणलोचनोत्पन्नमनसि मयि सति । इतीति किम्—**नृत्यैरित्यादि** । नृत्यैः समं वारविलासिनीनां संगीतकस्यापि गीतनृत्यवादित्रस्यापि महाप्रबन्धः प्रघट्टको वर्तते । सर्वेषु गृहेषु पूर्णकुम्भाः मङ्गलकलशाश्च वर्तन्ते । एष लोक पुष्पाक्षतव्याकुलश्च वर्तते । समुच्चयालंकारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यस्य च हेतुविमर्शजातचेतसि मयि, 'देव, परिकल्पितनिखिलनमसितोपचारा चन्द्रमतिमहादेवी सपरिवारा चण्डिकाचरणार्चनायोच्चलिता प्राप्ता च पुरवीथीमध्यम्, यतोऽयमाकर्ण्यते महानातोद्यध्वनिः। तदर्थं चैष नगरे पौराणामुद्यामोद्यमः। तत्र देवः कालविलम्बनमकृत्वा सज्जीभवतु मज्जनादिषु क्रियासु।' इत्यागत्य वैकुण्ठमतिना वरिष्ठकेन विज्ञप्ते तथैव तद्वचनं सफलीकृत्य,

न व्रतमस्थिग्रहणं शाकपयोमूलभैक्षचर्या वा।
व्रतमेतदुन्नतधियामङ्गीकृतवस्तुनिर्वहणम्॥

इत्यनुस्मृत्य, विहिततदाराधनोचिताचारे समारुह्याभ्रमूनाम करेणुकामाचार्यपुरोहितसखे भैरवीभवनं प्रति गन्तुमुद्यते च तैस्तैरुपालिङ्गैरभावि,

---

किं विज्ञप्ते सति त्रिशूलिनीनिलयमनुजगाम। हे देव हे राजन्, चन्द्रमतिमहादेवी चण्डिकाचरणार्चनार्थमुच्चलिता उज्जगाम। कथंभूता सती उच्चलिता। परिकल्पितनिखिलनमसितोपचारा निष्पादितसमस्तोपयाचितकव्यहव्यव्यवहारा। महादेवी सपरिवारा न केवलं उच्चलिता पुरवीथीमध्यं प्राप्ता उपढौकिता च। यतः कारणात् अयं आकर्ण्यते महान् आतोद्यध्वनिः। तदर्थं चण्डिकाचरणार्चननिमित्तं एषोऽयं नगरे पौराणां उद्यामोद्यमो महोत्सवोत्साहो वर्तते। तत्र चण्डिकाचरणार्चने देवो राजाधिराजः श्रीयशोधरः कालविलम्बनमकृत्वा तैलामलं नीत्वा मज्जनादिषु क्रियासु सज्जीभवतु उद्यतो भवतु। किं कृत्वा त्रिशूलिनीनिलयमनुजगाम। तद्वचनं वैकुण्ठमतिनामवरिष्ठकवचनं तथैव स्नानादिकर्मप्रकारेण सफलीकृत्य सफलं विधाय। पुनश्च किं कृत्वा त्रिशूलिनीनिलयमनुजगाम। इत्यमुना प्रकारेण अनुस्मृत्य चिन्तयित्वा। इतीति किम्। **नेत्यादि**। उन्नतधियां महानुभावानां अस्थिग्रहणं कर्णयोः शङ्खकुण्डलधरणं व्रतं न भवति। वाथ वा शाकपयोमूलभैक्षचर्या शाकं च व्यञ्जनमात्रभक्षणम्, पयश्च क्षीरपानं जलपानं वा, मूलं च कन्दभक्षणम्, भैक्षचर्या च भिक्षासमूहभोजनं व्रतं न भवति। किं तर्हि व्रतं उन्नतधियां पुरुषाणाम्। एतत्। किम्। अङ्गीकृतवस्तुनिर्वहणम्। अङ्गीकृतपदार्थनिर्वाह इत्यर्थः। पुनश्च किं कृत्वा त्रिशूलिनीनिलयमनुजगाम। तैस्तैरुपालिङ्गैर्दुर्निमित्तैरेवं अभावि भूयते स्म, तथापि तदपि नियतिर्भवितव्यता केन पुरुषेण लङ्घ्यते इति वचनं सत्यतां नयन्निव। कस्मिन् सति उपालिङ्गैरभावि। मयि विहिततदाराधनोचिताचारे विहितः कृतः तस्याश्चण्डिकाया आराधने पूजने उचितो योग्य आचारः क्रिया येन स तथा तस्मिन्। किं कृत्वा पूर्वं अनुजगाम। अभ्रमूनाम करेणुकां ऐरावणपत्नीनाम हस्तिनीं समारुह्य चढित्वा। कथंभूते सति मयि। आचार्यपुरोहिता उच्येते सखायौ समीपवर्तिनौ यस्य स तथा तस्मिन्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथापि 'नियतिः केन लङ्घ्यते' इति सत्यतां नयन्निव 'हंहो विवेकबृहस्पते, स्वभावत एव महासत्त्ववसते कण्ठगतेष्वपि प्राणेषु किमनुचितेनाचरितेनात्मनः प्रियं कर्तुं युक्तम्' इति मतिकयेव प्रतिलोमतया बृंहितमिङ्गितं च मतङ्गजगणिकया, 'कथमयं विद्वानप्यहितोपदेशाद्दुःखमकराकरवति भवोदन्वति निमङ्क्तुमुद्युक्तः' इति कृतकृपयेव कम्पितकम्पितमवन्या, 'अये दुर्वासनावश, विशामीश, कथमीदृग्विधेरभिसंधेरेष्यत्कल्मषनिषेकमातङ्कं भवान्सहिष्यते' इति सूचयतेव धूमधूसरतामुपगतमाशावलयेन, 'अयि पञ्चमीकललोकपाल, त्वज्जन्मजनितपुण्यवर्षेण दुरेनसोऽस्माद्दशमीस्थस्य भवतः कथं मया सोढव्या भविष्यन्ति चिताचित्रभानोः

'राजाहःसखिभ्यः' इति वचनाददन्तो निपातः। मयि कथंभूते सति दुर्निमित्तैरभावि । भैरवीभवनं प्रति गन्तुमुद्यते च सति चण्डिकाप्रासादं प्रति चलितुं उद्यमं प्राप्ते सति । एवं दुर्निमित्तैरभावीति एवं कथमिति चेत्—इति मतिकया इव ईदृग्बुद्धिसहितया इव प्रतिलोमतया विपरीततया प्रसिद्धया अभ्रमुनामिकया मतङ्गजगणिकया इभ्या बृंहितं गर्जितम्, न केवलं बृंहितं इङ्गितं चेष्टितं च । इतीति किम् । हंहो अहो विवेकबृहस्पते यशोधरमहाराज, स्वभावत एव प्रकृत्यैव महासत्त्ववसते महाधर्मपरिणामनिवासे प्राणेषु कण्ठगतेष्वपि अनुचितेन आचरितेन आचारेण आत्मनः प्रियं कर्तुं युक्तं किम् । अपि तु न युक्तमित्यर्थः । अवन्या भूम्या कम्पितकम्पितं दुःखेन कम्पितम् । कथंभूतया अवन्या । उत्प्रेक्ष्यते—तस्मात् कारणात् कृतकृपया इव । इतीति किम् । अयं यशोधरो विद्वानपि अहितोपदेशात् पापोपदेशात् भवोदन्वति संसारसमुद्रे निमङ्क्तुं ब्रूडितुं कथमुद्युक्तः । कथंभूते भवोदन्वति । दुःखमकराकरवति दुःखमकरसहिते । आशावलयेन दिग्मण्डलेन धूमधूसरतां धूमेन ईषत्पाण्डुरत्वं उपगतं प्राप्तम् । आशावलयेन किं कुर्वता । उत्प्रेक्षते—इतीदृशमभिप्रायं सूचयता इव कथयता इव । इतीति किम् । अये इति विषादार्थे । उक्तं च—'संभ्रमे स्मरणे चैव अये क्रोधविषादयोः ।' अये दुर्वासनावश दुष्टस्वभावपराधीन, अये विशामीश राजन् यशोधरमहाराज, ईदृग्विधेः अभिसंधेः मनोभिप्रायात् आतङ्कं दुःखसंतापं भवांस्त्वं कथं केन प्रकारेण सहिष्यते क्षमिष्यते । कथंभूतं आतङ्कम् । एष्यत्कल्मषनिषेकं एष्यत्समूहदानागमिष्यत् कल्मषनिषेकः पापबन्धो यत्रातङ्के स तथोक्तस्तम् । अम्बरेण उल्काज्वालाभिराडम्बरितं ओढोपितम् । कथंभूतेन अम्बरेण । उत्प्रेक्ष्यते—इत्यमुना प्रकारेण शोकानलोल्बणेनेव शोकः पश्चात्तापः स एवानलो दाहः संतापकारकत्वात् तेन उल्बणमुद्रिक्तं तत्तथा तेन । इतीति किम् । अयि प्रश्ने अनुनये वा । अहो पञ्चमीकललोकपाल हे मध्यमलोकपाल, अस्माद्दुरेनसः अस्माद्दुष्टपापात् दशमीस्थस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कलुषितानिमिषमुखाः शिखालेखाः' इति शोकानलोल्वणेनेवोल्काज्वालाभिराडम्बरितमम्बरेण, 'अयि प्रतिपन्नोत्पथकथ पृथ्वीनाथ, तेषु तेषूत्सवेषु संपादितानन्ददुन्दुभिनादयामुष्मादनुदर्कशर्मणः कर्मणस्त्वयि कथाशेषे सति कथं नु मया नाम कर्णकटुप्रभावस्त्वद्बान्धवहारावः श्रोत्रव्यो भविता' इति शोचनादिव प्रवृत्तबाष्पस्यन्दया दुर्दिनीभूतं दिवा, 'त्वमेवमवश्यमहो राजन्, जानीहि। न खलु भवत्ययमायतिषु हिताय क्रियोपायः। तदलमत्राग्रहेण। निवृत्य गम्यतां हर्म्यम्' इत्याचरितदाक्षिण्येन सुहृदेव प्रतिवातं पांशु-

---

मृतस्य भवतस्तव चिताचित्रभानोश्चितानलस्य मृतकाग्नेः शिखालेखा ज्वालाग्राणि कथं केन प्रकारेण मया सोढव्याः सहनीया भविष्यन्ति। कथंभूतेन मया। त्वज्जन्मजनितपुष्पवर्षेण त्वज्जन्मनि जनितो निष्पादितः पुष्पवर्षाः पुष्पवृष्टिर्येन मया स तथा तेन। कथंभूताः शिखालेखाः। कलुषितानिमिषमुखाः कलुषितानि मलिनीकृतानि अनिमिषाणां देवानां मुखानि यैस्ते तथोक्ताः। दिवा भूमिसमीपवर्तिना आकाशेन दुर्दिनीभूतं मेघच्छलीभूतम्। जलकणचूर्णेन व्याप्तमित्यर्थः। कथंभूतया दिवा। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण शोचनात् शोककरणात् प्रवृत्तबाष्पस्यन्दया इव प्रवृत्तः संजातः बाष्पस्यन्दः अश्रुपतनं यस्याः सा तथा तया। इतीति किम्। अयि कोमलालापे। अहो प्रतिपन्नोत्पथकथ अङ्गीकृतोन्मार्गवार्त्त पृथ्वीनाथ हे राजन्, अमुष्मात् एतस्मात् अनुदर्कशर्मणः न विद्यते उदर्के उत्तरफले शर्म सुखं यस्मिन् तत् अनुदर्कशर्म तस्मात् ईदृग्विधात् कर्मणः कुर्कुटवधात् पापात् त्वयि भवति कथाशेषे सति मृतिं प्राप्ते सति। नु इति प्रश्ने। कथं केन प्रकारेण। नामेति संभावनायाम्। त्वद्बान्धवहारावः भवतो बन्धुवर्गस्य रोदनध्वनिः कथं श्रोतव्यो भविता श्रवणीयो भविष्यति। न कथमपि श्रोतव्यो भविष्यतीत्यर्थः। कथंभूतो हारावः। कर्णकटुप्रभावः। कर्णशूलप्राय इत्यर्थः। कथंभूतया मया। तेषु तेषु प्रसिद्धेषु राज्याभिषेकपुंत्रजन्मदिग्जयनादिषु उत्सवेषु संपादितानन्ददुन्दुभिनादया संपादित उत्पादित आनन्ददुन्दुभीनां नादो यस्यां सा तथा तया। पांशुलक्षणेन पांशवो रजांसि लक्षणं चिह्नं यस्य स पांशुलक्षणः तेन वायुना प्रतिवातं संमुखमायान्तम्। कथंभूतेन पांशुलक्षणेन। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण आचरितदाक्षिण्येन विहितप्रतिपत्तिना सुहृदा इव अभीष्टमित्रेणेव प्रतिवातम्। इतीति किम्। अहो राजन् हे पृथिवीपते यशोधरमहाराज, त्वं भवान् एवममुना प्रकारेण अवश्यं निश्चयेन जानीहि प्रतीहि। एवं कथमिति चेत्—अयं क्रियोपायः खलु आयतिषु उत्तरकालेषु हिताय सौख्याय न भवति। तत्तस्मात् कारणात् अत्र क्रियोपाये आग्रहेण आक्षेपेण अलं पूर्णम्। निवृत्य व्याघुट्य हर्म्यं गृहं गम्यतां त्वया व्रज्यतामिति। आतपत्रेण भुवि निपतितं निपत्यते स्म।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लक्षणेन, 'खरकिरणकरनिवारण एवाहं प्रभवामि, न पुनरापातचण्डे यमदण्डे' इति धियेव भुवि निपतितमातपत्रेण, 'न भवतीयं सा परागसंततिर्यास्माभिः शक्यते निवारयितुम्। एषा त्वपरैव यन्निवारणे न कुशलः प्रलयकालानिलोऽपि' इति चिन्तयेव विनिकीर्णं विलासिनीकरेभ्यश्चामरनिवहेन, 'महापुरुष, एवमशुभाभिनिवेशेषु युष्मादृशेषु न चिरमस्मादृशैः कल्याणपरम्पराचिह्नविनिवेशैः सह समागमः' इति प्रकटितसाचिव्येनेव कुटिलितं पताकासंतानेन, 'सर्वदा महोत्सवपुरश्चारिणामस्माकं किमेवमसदृशधर्मणि कर्मणि विनियोगो युक्तः' इति स्वदुःखनिवेदनादिव घर्घरितमातोद्यवाद्येन, 'यद्यपि देवः काम-

---

कथम् । उत्प्रेक्ष्यते—इति धियेव । इतीति किम् । अहमातपत्रं खरकिरणकरनिवारणे सूर्यरश्मिनिषेधे एव प्रभवामि समर्थं भवामि । न पुनः आपातचण्डे यमदण्डे । आगमदुर्निवारे मरणकाले इत्यर्थः । पुनश्च केन दुर्निमित्तेनाभावि । विलासिनीकरेभ्यः वारवनिताहस्तकमलेभ्यः सकाशात् चामरनिवहेन विनिकीर्णं विविधं यत्र तत्र निपतितम् । किमिति विनिकीर्णम् । उत्प्रेक्ष्यते—इति ईदृश्या चिन्तया इव । इतीति किम् । इयं सा परागसंतती रेणुमण्डली । सा का । या अस्माभिश्चामरैर्निवारयितुं निषेद्धुं शक्यते क्षम्यते । का तर्हि परागसंततिः । एषा योगिनां प्रत्यक्षीभूता अपरैव अन्यैव । एषा का । यन्निवारणे यस्याः परागसंततेर्निषेधे प्रलयकालानिलोऽपि कल्पान्तकालवातोऽपि न कुशलो न समर्थो भवति । पुनश्च केनोपालिङ्गेनाभावि । पताकासंतानेन कुटिलितं वक्रितम् । कथंभूतेन पताकासंतानेन । उत्प्रेक्ष्यते—इत्यमुना प्रकारेण प्रकटितसाचिव्येनेव स्फुटीकृतमन्त्रित्वेनेव । हे राजन्, एवंविधं पातकं कर्तुं यदि यासि तत्त्वमेव याहि । अस्माभिस्तत्र न गम्यत इत्यर्थः । इतीति किम्। हे महापुरुष, युष्मादृशेषु पुरुषेषु अस्मादृशैः पुरुषैः सह समागमो न चिरं भवति । स्तोकेनैव कालेन अस्मद्विधैः विष्वग्यत(?) इत्यर्थः । कथंभूतेषु युष्मादृशेषु । एवममुना प्रकारेण जीववधे अशुभाभिनिवेशेषु पापकर्माभिप्रायेषु। अस्मादृशैः कथंभूतैः । कल्याणपरम्पराचिह्नविनिवेशैः कल्याणानां श्रेयसां परम्परा श्रेणिः बहूनि कल्याणानि तेषां चिह्नाय लाञ्छनाय विनिवेशो विन्यासो येषां अस्मादृशां ते तथा तैः । पुनश्च केनोपालिङ्गेनाभावि । आतोद्यवाद्येन वादित्रध्वनिना घर्घरितं कुत्सितशब्दितम् । कस्मात् घर्घरितम्। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण स्वदुःखनिवेदनादिव स्वदुःखकथनादिव । इतीति किम् । हे महापुरुष, एवं ईदृग्विधे कर्मणि अशुभाचारे अस्माकं विनियोगोऽधिकारः किं युक्तः । अपि तु न युक्तो भवतीत्यर्थः । कथंभूते कर्मणि । असदृशधर्मणि विपरीतस्वभावे जीववधलक्षणे । कथंभूतानामस्माकम् । सर्वदा सर्वकालं महोत्सवपुरश्चारिणां पुत्रजन्मोत्सवमहामुनिवन्धनादिषु अग्रगामिनाम् । पुनश्च केनोपालिङ्गेनाभावि । तोरणेन पुरोऽग्रतः निपत्य तिर्यग्भूतम् । कस्मात् तिर्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रोधाभ्यामज्ञानेन वाद्यान्यथाभावः संजातः, तथापि न खलु भवत्प्रसादान्निरन्तरश्रीविलासप्रकाशानामस्मादृशानामुपेक्षितुमुचितम्' इति बुद्ध्येव निपत्य पुरस्तिर्यग्भूतं तोरणेन, 'क्षितिप, अद्यापि न किंचिद्विनश्यति। तदावासमनुसृत्यापरमेव किंचिदिहामुत्र च शिवकरप्रतिष्ठानमनुष्ठानमाचरितव्यम्' इत्युपदिशतेव पृष्ठतः शब्दितं दधिमुखेन, 'हे महीपाल, किं कोऽपि परोपरोधादात्मन्यात्मन्यश्रेयांसि कुर्वन्नवलोकितोऽस्ति, येनत्थमकत्थने पथि प्रस्थितोऽसि' इत्युपहसतेवापाचीनतया वासितमादित्यसुतेन, एवमन्यैरपि सद्योदुरन्तफलप्रदायिसङ्गैस्तैस्तैरुपालिङ्गैरभावि, तथापि 'नियतिः केन लङ्घ्यते' इति सत्यतां नयन्निव त्रिशूलिनीनिलयमनुजगाम।

ग्भूतम्। उत्प्रेक्ष्यते—इति बुद्ध्येव ईदृशेनाभिप्रायेण। इतीति किम्। यद्यपि यदपि देवो राजा कामक्रोधाभ्यां रागद्वेषाभ्यां अज्ञानेन व्यामोहेन वा अद्य इदानीं अन्यथाभावः विपरीतपरिणामः संजात उत्पन्नः, तथापि तदपि अस्मादृशानां अस्माकं खलु निश्चयेन उपेक्षितुं भवद्विषये अनादरं कर्तुं नोचितं न युक्तम्। अन्तरेव भवनं वारयामः, गन्तुं न दद्म इति भावः। कथंभूतानां अस्मादृशानाम्। भवत्प्रसादात् त्वत्प्रसादात् निरन्तरश्रीविलासानां निरन्तरमविच्छिन्नं श्रीणां विलासो भोगः तस्य प्रकाशः प्रादुर्भावो येभ्यस्ते तथा तेषाम्। पुनः केनोपालिङ्गेनाभावि। दधिमुखेन गर्दभेन पृष्ठतः शब्दितं शब्दं चक्रे। किं कुर्वता दधिमुखेन। उत्प्रेक्ष्यते—इतीदृशं उपदिशतेव उपदेशं ददतेव। इतीति किम्। क्षितिप, अद्यापि न किंचिद्विनश्यति किमप्यरुचिरं भवति। तत्तस्मात् कारणात् आवासं राजमन्दिरं अनुसृत्य गत्वा अपरमेव इतरदेव किंचित्किमपि अनुष्ठानमाचरणं आचरितव्यं त्वया कर्तव्यम्। कथंभूतमनुष्ठानम्। इहास्मिन्भवे अमुत्र च भविष्यज्जन्मनि शिवकरं श्रेयस्करं प्रतिष्ठानं मूलं यस्यानुष्ठानस्य तच्छिवकरप्रतिष्ठानम्। पुनश्च केनोपालिङ्गेनाभावि। आदित्यसुतेन काकेन अपाचीनतया प्रतिकूलतया वासितं रुतं चक्रे। किं कुर्वता आदित्यसुतेन। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण उपहसतेव उपहासं कुर्वतेव। इतीति किम्। हे महीपाल, परोपरोधात् पराग्रहात् अश्रेयांसि पापानि कुर्वन् विदधन् किं कोऽपि अवलोकितोऽस्ति, येन कारणेन इत्थममुना प्रकारेण अकत्थने पथि अश्लाघनीये मार्गे त्वं प्रस्थितोऽसि गन्तुं प्रवृत्तोऽसि। कथंभूतैरुपालिङ्गैः। एवमीदृशैरन्यैरपि तैस्तैः शकुनशास्त्रप्रसिद्धैरुपालिङ्गैरभावि। पुनः कथंभूतैः। सद्योदुरन्तफलप्रदायिसङ्गैः सद्यस्तत्कालं दुरन्तो दुष्टस्वभावः तस्य फलप्रदायी फलदायकः सङ्गः संगतिर्येषां तानि तथोक्तानि तैः। नियतिः केन लङ्घ्यते इति। तथा चोक्तं समन्तभद्रेण महामुनिना—'अलङ्घ्यशक्तिर्भवितव्यतेयं हेतुद्वयाविष्कृतकार्यलिङ्गा। अनीश्वरो जन्तुरहं क्रियार्तः संहत्य कार्येष्विति साध्ववादी॥'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र च सवित्र्या प्रोक्षितदक्षिणानां च ब्राह्मणानां वचनात्
सर्वेषु सत्त्वेषु हतेषु यन्मे भवेत्फलं देवि तदत्र भूयात् ।
इत्याशयेन स्वयमेव देव्याः पुरः शिरस्तस्य चकर्त शस्त्र्या ॥
विज्ञानिनां शिल्पविशेषभावादेवंविधान्मेऽभिनिवेशतश्च ।
स हन्यमानो हि न कामवस्थां सचेतनादप्यधिकां चकार ॥
पिष्टं च मांसं परिकल्प्य तस्य महानसे प्रेषितवांस्ततश्च ।
अन्येद्युरम्बासहितस्य देवी सा मे व्यधाद्भोजनमादरेण ॥
तया सुतेन स्नुषया च मात्रा सार्धं मुदैकत्र कृताशनस्य ।
सा दुष्टधीर्मे जननीयुतस्य संचारयामास विषामिषाणि ॥
वैद्याय दूताः प्रहिता हि यावद्यावद्गृहेष्वौषधमीक्ष्यते च ।
जातं नृपे दृष्टिविषं जनानामिति स्म तावद्विससर्ज लोकम् ॥

तत्र च त्रिशूलिनीनिलये सवित्र्या मात्रा सह प्रोक्षितदक्षिणानां ब्राह्मणानां वचनात्—**सर्वेष्वित्यादि** । इतीदृशेन आशयेन स्वयमेव आत्मनैव यशोधरो देव्याः पुरस्तस्य कुर्कुटस्य शिरो शस्त्र्या छुरिकया कृत्वा चकर्त संचिच्छेद । इतीति किम् । हे देवि चण्डिके, सर्वेषु सत्त्वेषु हतेषु यत्किमपि फलं भवेत् तत्फलं अत्र मे मम भूयाद्भवतु । अतिशयालंकारः ॥

विज्ञानिनामित्यादि । स कुर्कुटः हन्यमानो हिंस्यमानः सन् सचेतनात् जीवकुर्कुटादपि अधिकां कां अवस्थां न चकार । अपि तु सर्वामप्यवस्थां चकार । कस्मात् । विज्ञानिनां लेपकराणां शिल्पविशेषभावात् विज्ञानिनामतिशयत्वात् । न केवलं तस्मात् । एवंविधात् सर्वजीववधसंकल्पात् मे ममाभिनिवेशतश्च अभिप्रायाच्च । व्यतिरेकालंकारः ॥

पिष्टमित्यादि । तस्य कुर्कुटस्य पिष्टं च मांसं परिकल्प्य महानसे रसवतीगृहे अहं प्रेषितवान् । ततश्च तस्माद्दिवसात् अनन्तरमन्येद्युरन्यस्मिन्नहनि सा देवी अमृतमतिरम्बासहितस्य मातृसहितस्य मे मम आदरेण भोजनं व्यधात् चक्रे । रूपकालंकारः ॥

तयेत्यादि । सा अमृतमतिर्दुष्टधीः पापिष्ठा मे मम विषामिषाणि विषभोजनानि संचारयामास प्रवेशितवती । कथंभूतस्य मे । जननीयुतस्य । मम मदीयजनन्याश्च विषभोजनं दत्तवतीत्यर्थः । कथंभूतस्य मे । मात्रा सार्धं मुदा हर्षेण एकत्र कृताशनस्य एकस्मिन् भाजने उपविष्टस्य । न केवलं मात्रा कृताशनस्य, किं तु तया प्रसिद्धया कुसुमावलीनामधेयया स्नुषया वध्वा सुतेन च यशोमतिनाम्ना पुत्रेण च सार्धं सह कृताशनस्य उपविष्टस्य । यशोमतिकुसुमावल्योरेकं भाजनम्, चन्द्रमतियशोधरयोश्चैकं भाजनमित्यर्थः । सहोक्त्यलंकारः ॥

वैद्यायेत्यादि । यावत् यावत्कालं वैद्याय दूताः प्रहिताः, यावत् यावत्कालं गृहेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकान्तमालोक्य विकीर्य केशान्हा नाथ नाथेति गिरं गिरन्ती ।
निपत्य मे वक्षसि दुःखितेव रुरोध कण्ठं यमपाशिकेव ॥
अन्येऽपि ये स्त्रीष्वनुरक्तचित्ता विश्वासमायान्ति नराः प्रमत्ताः ।
प्रायो दशेयं ननु तेष्ववश्यं नदीतटस्थेष्विव पादपेषु ॥
आकल्पं परिपूर्णकामितफलाः कामं भवन्तु प्रजाः
क्षोणीशाः प्रतिपालयन्तु वसुधां धर्मानुबद्धोत्सवाः ।
सन्तः सन्तु सरस्वतीप्रणयिनः सार्धं श्रियः संगमै-
र्भूयादेष जिनोक्तिमौक्तिकलतारामस्त्रिलोकीमुदे ॥

औषधं चेक्ष्यते, तावत् तावत्कालं इति एतस्मात् कारणात् लोकं विससर्ज स्म । स्म इति किलार्थे । ननु अतीतार्थे परोक्षतयैव अतीतार्थस्य प्रयुक्तत्वात् 'अन्यथा स्मेनातीते' इति वचनात् वर्तमानो प्राप्नोति । इतीति किम् । नृपे राजनि जनानां लोकानां दृष्टिविषं जातं समुत्पन्नम् । जात्यलंकारः ॥

एकान्तमित्यादि । एकान्तं अडक्षीणमालोक्य दृष्ट्वा केशान् विकीर्य । हा इति खेदे । नाथ नाथ इति गिरं वाणीं गिरन्ती कथयन्ती मे मम वक्षसि दुःखितेव निपत्य यमपाशिकेव यमपाशिकासदृशी कण्ठं रुरोध दीनां चम्पितवती । तदन्तैः पीडयित्वा वांदिभवतीति पुष्पदन्तः(?) । उपमालंकारः ॥

अन्येऽपीत्यादि । ये नरा अन्येऽपि न केवलं यशोधरः अपरेऽपि स्त्रीषु विषये अनुरक्तचित्ता अनुरागिताः सन्तः प्रमत्ता असावधाना विश्वासमायान्ति विश्रब्धा भवन्ति, अवश्यं निश्चयेन इयं दशा ईदृशी अवस्था प्रायो बाहुल्येन तेषु पुरुषेषु स्ववसितेषु भवति । कथंभूतेषु । नदीतटस्थेषु तरङ्गिणीतटवर्तिषु पादपेष्विव वृक्षेष्विव । उपमालंकारः ॥

आकल्पमित्यादि । एष प्रत्यक्षीभूतः अमृतमतिमहादेवीदुर्विलसनो जिनोक्तिमौक्तिकलतारामः जिनवचनमुक्ताफलवल्लीवनं त्रिलोकीमुदे त्रिभुवनानन्दाय भूयाद्भवतु । पुनश्च किं भूयात् । प्रजाः लोकाः आकल्पं प्रलयकालपर्यन्तं परिपूर्णकामितफलाः कामं भवन्तु संजायन्ताम् । क्षोणीशाः वसुधां प्रतिपालयन्तु रक्षन्तु । कथंभूताः क्षोणीशाः । धर्मानुबद्धोत्सवा धर्मेषु पूजादानादिषु अनुबद्धो उत्सव आनन्दो यैस्ते तथोक्ताः । सन्तो विद्वांसः सरस्वतीप्रणयिनः जिनवचनस्नेहिनः सन्तु । कथम् । सार्धं सह । कैः । श्रियः संगमैर्लक्ष्म्याः संयोगैः । अतिशयालंकारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मया वागर्थसंभारे भुक्ते सारस्वते रसे ।
कवयोऽन्ये भविष्यन्ति नूनमुच्छिष्टभोजनाः ॥

इति सकलतार्किकलोकचूडामणेः श्रीमन्नेमिदेवभगवतः शिष्येण सद्योनवद्यगद्यपद्यविद्याधरचक्रवर्तिशिखण्डमण्डनीभवच्चरणकमलेन श्रीसोमदेवसूरिणा विरचिते यशोधरमहाराजचरिते यशस्तिलकापरनाम्नि महाकाव्येऽमृतमतिमहादेवीदुर्विलसनो नाम चतुर्थ आश्वासः ॥

मयेत्यादि । मया सोमदेवेन वागर्थसंभारे शब्दसंस्कारे शब्दार्थसंस्कारसहिते सारस्वते रसे शास्त्रामृतरसे भुक्ते आस्वादिते सति येऽन्ये कवयो भविष्यन्ति सदुक्तशब्दार्थेभ्यो येऽन्यत् किंचिदपूर्वंशब्दमर्थं च विद्यन्ते •ते कवयः नूनमिति निश्चयेन उच्छिष्टभोजनाः फेलाभुज इव उच्छिष्टं भोक्ष्यन्ते । रूपकोपमालंकारः ॥

इति सकलतार्किकलोकचूडामणेः श्रीमन्नेमिदेवभगवतः शिष्येण सद्योनवद्यगद्यपद्यविद्याधरचक्रवर्तिशिखण्डमण्डनीभवच्चरणकमलेन श्रीसोमदेवसूरिणा विरचिते यशोधरमहाराजचरिते यशस्तिलकापरनाम्नि महाकाव्ये अमृतमतिमहादेवीदुर्विलसनो नाम चतुर्थ आश्वासः । अयममृतमतिमहादेवीदुर्विलसनो नाम चतुर्थ आश्वासस्तस्यायं परिच्छेदः समाप्त इत्यर्थः । शेषं व्याख्यानं पूर्ववद्वेदितव्यम् ॥

इति श्रीविद्यानन्दिभट्टारकप्रियशिष्येण भट्टारकश्रीमल्लिभूषणगुरुपरमाभीष्टगुरुभ्रात्रा श्रीलक्ष्मीचन्द्रभट्टारकाभिमतेन सिंहनन्दिगुरुमुहुःप्रार्थनया यतिसिद्धान्तसागरव्याख्याकृतिनिमित्तं भट्टश्रीनीलकण्ठविद्वद्ब्रह्मराक्षसनामरुद्रटादिनवनवतिमहावादिलब्धविजयेन तर्कव्याकरणच्छन्दोलंकारसिद्धान्तसाहित्यादिशास्त्रनिपुणमतिना प्राकृतव्याकरणाद्यनेकशास्त्ररचनाचञ्चुना सूरिश्रीश्रुतसागरेण विरचितायां यशस्तिलकचन्द्रिकाभिधानायां यशोधरमहाराजचरितचम्पूमहाकाव्यटीकायाममृतमतिमहादेवीदुर्विलसननाम्नश्चतुर्थस्याश्वासस्य चन्द्रिका परिसमाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चम आश्वासः ।

श्रीमानशेषभुवनाधिपतिर्जिनेन्द्र-
श्चन्द्रप्रभस्तव तनोतु मनीषितानि ।
यद्वीक्षणादपि मनःकुमुदाकरः स्या-
ल्लोकस्य लोचनदलामृतपूरसारः ॥

त्वं सर्वस्य सदागतिर्जिनपते त्वं नाथ कर्मान्तभू-
स्त्वं दाता वरदस्त्वमद्भुतरुची लोकेश ते ज्योतिषी ।
त्वन्नामामृतमत्र योगिविषयं त्वं देव तेजः परं
त्वं चानङ्गन सर्वगोऽपि नियतः पायाः समस्तो जगत् ॥

अथेदानीं श्रीयशोधरमहाराजस्य भवभ्रमणवर्णनो नाम पञ्चम आश्वासः श्रीसोमदेवसूरिणा प्रारभ्यमाणो यस्तस्यादौ अभीष्टदेवनमस्कारार्थं **श्रीमानित्याद्याह**—चन्द्रप्रभो जिनेन्द्रस्तव भवतः मनीषितानि श्रेयांसि तनोतु वर्धयतु । कथंभूतश्चन्द्रप्रभः । श्रीमान् वहिरन्तर्लक्ष्मीविराजमानः । पुनः कथंभूतः । अशेषभुवनाधिपतिः अशेषाणि भूर्भुवःस्वर्लक्षणानि त्रीणि जगन्ति तेषामधिपतिः स्वामी । कोऽसौ चन्द्रप्रभः । यद्वीक्षणादपि आस्तां तावत्स्नपनपूजनस्तवनजपनध्यानादिकम्, यस्य स्वामिनः वीक्षणादपि मनःकुमुदाकरः नित्तकैरववनं लोकस्य भव्यजीवगणस्य लोचनदलामृतपूरसारः लोचनानि तान्येव दलानि तेषाममृतपूरः अमृतधाराप्रवाहस्तेन सारः सुकृतार्थः मोक्षामृतभृत(?) स्यादित्यर्थः । उपमालंकारः ॥

त्वमित्यादि । हे जिनपते, त्वं भवान् सर्वस्य प्राणिगणस्य सदागतिः सर्वकालमेव शरणः । अर्तिमथनसमर्थ इत्यर्थः । हे नाथ त्रिभुवनप्रभो, त्वं भवान् कर्मान्तभूः अष्टकर्मविनाशभूमिः । हे भगवन्, त्वं दाता अभ्युदयनिःश्रेयससुखदायकः । त्वं वरदः वाञ्छितवरदायकः । हे लोकेश हे त्रिभुवनपते, ते तव ज्योतिषी ज्ञानदर्शनलक्षिते चक्षुषी वर्तेते । कथंभूते ज्योतिषी । अद्भुतरुची आश्चर्यकारिणी रुक् दीप्तिः लोकालोकप्रकाशिका ययोर्ज्योतिषोस्ते अद्भुतरुची । हे भगवन्, त्वन्नामामृतं भवतो नामैव अमृतं विद्यमानममृतमरणं(?) यत्र तत्त्वन्नामामृतं परमनिर्वाणसुखकारणत्वात् अत्र अस्मिन् संसारे योगिविषयं योगिनां गौतमादीगणधरादीनां विषयो गम्यता यत्र तद्योगिविषयम् । हे देव परमाराध्य, त्वं भवान् परमुत्कृष्टं तेजोऽग्निरूपः । कर्ममलकलङ्कदाहकत्वात् । हे अनङ्गन, न विद्यमानाङ्गना स्त्री यस्य सोऽनङ्गनस्तस्य संबोधनं हे तथोक्त । त्वं च भवांश्च सर्वगोऽपि ज्ञानेन लोकालोकव्यापकोऽपि सन् नियतो मर्यादीभूतः । चरमशरीरप्रमाणत्वात् । जगत् जगतिस्थितप्राणिगणं समस्तः अज्ञानात् पायाः रक्ष । अयं भावः—क्षितिजलपवनहुताश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदन्वहो सकलदिक्सीमन्तिनीसीमन्तसंतानितप्रतापसिन्दूर दुरितविदूर, तस्माद्दुरन्तव्यसनव्यालव्यासङ्गपाशाद्दुरभिनिवेशात्

हिमालयाद्दक्षिणदिक्कपोलः शैलः सुवेलोऽस्ति लताविलोलः ।
चकार यः कान्ततयामरीणां वीतस्पृहं नाम नगेषु चेतः ॥

नयजमानाकाशसोमसूर्यादीश्च शंभोरष्टमूर्तयस्तस्मै निरासार्थं परमेश्वरस्य चन्द्रप्रभस्य अष्टमूर्तिगमितवृत्तमिदं युक्तम् । सदागतिरिति पदेन पवनमूर्तिः सूचितः । कर्मान्तभूरित्यनेन क्षितिमूर्तित्वं सूचितम् । अस्यायमर्थः—कर्मणामन्तः कर्मक्षयस्तस्य भूः प्रायो गणधरादिव समूहः भव्यगणो वा तं अवति रक्षति इति कर्मान्तभूः । कर्मान्तभू एतस्मात् पदात् 'अव रक्ष पालने' इत्यस्य धातोर्वर्तते तेन कर्मान्तभू अवतीति कर्मान्तभूः । 'क्किप्' इत्यनेन क्किपि प्रत्यये 'सरिश्विव्यस्तिविमविज्वरित्वरामुपधायाः' इत्यनेन अकारेण सह वकारस्य ऊट्त्वादेश उशस्तेन समानलक्षणे संधौ कृते सति कर्मान्तभूरिति शब्दः संजायते । 'वेर्लोपोऽपृक्तस्य' इति वचनात् क्किप्प्रतीयते । पश्चात् सौ सति विसर्गः संजायते । तेन कर्मान्तभूरिति निष्पद्यते । शब्दश्लेषोऽत्र । दाता इत्यनेन यजमानत्वं सूचितम् । ज्योतिषी इत्यनेन सोमसूर्यौ कथितौ । त्वन्नामामृतमूर्त्यत्र जलमूर्तित्वं प्रतिपादितम् । परं तेज इत्यनेन पदेन अग्निमूर्तित्वं भगवतः प्रतिपादितम् । सर्वगोऽपि इत्यनेन पदेन अनङ्गन इति संवोधनपदेन वा आकाशमूर्तित्वमुक्तमिति ज्ञातव्यम् । रूपकालंकारः, श्लेषालंकारश्च कथ्यते ॥

तदनु तत्पश्चात् विषप्रयोगमारणादनन्तरं अहो सकलदिक्सीमन्तिनीसीमन्तसंतानितप्रतापसिन्दूर सकलाश्च ता दिशश्च ता एव सीमन्तिन्यः स्त्रियस्तासां सीमन्तेषु शिरस्थकेशमार्गेषु संतानितो दीर्घीकृतः प्रताप एव सिन्दूरो गर्भनागो यस्य स तथोक्तस्तस्य संवोधनं हे तथोक्त । हे दुरितविदूर पापाद्विप्रकृष्ट । तस्मात् दुरभिनिवेशात् कुर्कुटवधपापाभिप्रायात् । कथंभूतात् दुरभिनिवेशात् । दुरन्तव्यसनव्यालव्यासङ्गपाशात् दुरन्तः दुःखभावं यद्व्यसनं दुःखोपपातस्तदेव व्यालो दुष्टगजः कालसर्पो वा तस्य व्यासङ्गः संगमः स एव पाशो बन्धनं यत्र दुरिदभिनिवेशे स तथोक्तस्तस्मात् । तस्याचलस्य सुवेलपर्वतस्य ऐशान्यां दिशि ईशानकोणे उपत्यकायां पर्वतस्य समीपवर्तिन्यां भूमौ निसर्गात् उदकवत्यां स्वभावेन सजलायां यः पादपोऽस्ति वृक्षो वर्तते, तत्र वृक्षे प्रचाकिनां कुले मयूराणां कुले अहं यशोधरः अवाप्तजन्मा संप्राप्तजन्मा अभूवम् । इति क्रियाकारकसंवन्धः । तस्य पर्वतस्य समीपे या नदी वर्तते, तस्या नद्यास्तटे यो वृक्षो वर्तते, तस्मिन् मयूरकुले अहं मयूरो जात इत्यर्थः ॥

तस्य कस्य अचलस्य । **हिमालयादित्याह**—यः शैलः सुवेलो नाम पर्वतोऽस्ति । कथंभूतः शैलः । हिमालयात् गङ्गाप्रसूतिपर्वतात् दक्षिणदिक्कपोलः दक्षिणस्या दिशः कपोल इव गण्डस्थल इव वर्तते । कथंभूतः शैलः । लताविलोलो लता विलोला मन्दवातकम्पिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नभः परिच्छेत्तुमिवोद्यतस्य द्रष्टुं दिगन्तानिव विस्तृतस्य ।
ऊर्ध्वत्वतिर्यक्त्वमहत्त्वमुच्चैर्न शक्यते यस्य जनेन मातुम् ॥
नमेरुसंतानकपारिजातमाकन्दमन्दारमनोहरासु ।
यस्यामराः केलिकृतः स्थलीषु स्मरन्ति नो नन्दनकाननस्य ॥
फलैस्तरूणाममृतानुकूलैर्मणिप्रकाशैश्च दरीनिवेशैः ।
दिवौकसां सद्मसुखानि यत्र लोकः स्थितः प्रार्थयते न जातु ॥
यत्तुङ्गशृङ्गाग्रविलम्बिबिम्बः पर्यन्तनक्षत्रमणिप्रचुम्बः ।
आभाति राकातुहिनांशुमाली प्रसाधितं छत्रमिवाम्बरस्य ॥

श्चपला यत्र स तथा । यः शैलः कान्ततया मनोहरतया अमरीणां देवाङ्गनानाम् । नामेति संभावनायाम् । नगेषु पर्वतेषु वीतस्पृहं काङ्क्षारहितं चेतो हृदयं चकार कृतवान् । रूपकातिशयालंकारः ॥

नभः परिच्छेत्तुमित्यादि । यस्य सुवेलशैलस्य ऊर्ध्वत्वतिर्यक्त्वस्य च महत्त्वं गुरुत्वं उच्चैरतिशयेन मातुं जनेन न शक्यते न समर्थो भूयते । कथंभूतस्य शैलस्य । तत्कारणगर्भितं विशेषणमाह—नभ आकाशं परिच्छेत्तुमिव वा भङ्क्तुमिव उद्यतस्योर्ध्वंगतस्य । कथंभूतस्य । दिगन्तान् द्रष्टुमिव विस्तृतस्य दीर्घतां प्राप्तस्य । उत्प्रेक्षालंकारः ॥

नमेर्वित्यादि । यस्य सुवेलशैलस्य स्थलीषु उन्नतप्रदेशेषु केलिकृतः क्रीडाकारिणः अमरा देवा नन्दनकाननस्य स्वर्गलोकवनस्य नो स्मरन्ति न अधिपन्ति । 'स्मृत्यर्थे कर्मणि' इति वचनात् कर्मणि षष्ठी । कथंभूतासु स्थलीषु । नमेरुसंतानकपारिजातमाकन्दमन्दारमनोहरासु नमेरवश्च, संतानकाश्च, पारिजाताश्च । एते त्रयोऽपि देववृक्षविशेषा मानवतरुविशेषाश्च कथ्यन्ते । माकन्दाश्च आम्रतरवः, मन्दाराश्च देववृक्षविशेषा पारिभद्राश्च, तैर्मनोहरा हृदयानुरञ्जिकास्तासु । समुच्चयातिशयालंकारः ॥

फलैरित्यादि । यत्र सुवेलपर्वते स्थितो लोको दिवौकसां सद्मसुखानि विमानसौख्यानि जातु कदाचित् न प्रार्थयते । कैः कृत्वा सद्मसुखानि न प्रार्थयते । तरूणां फलैः कृत्वा । कथंभूतैः फलैः । अमृतानुकूलैः अमृतवदनुकूलानि स्वादुवन्ति तानि तैः । पुनः कैः कृत्वा । दरीनिवेशैर्गुहास्थानैः । कथंभूतैः । मणिप्रकाशैः रत्नतेजोवद्भिः । हेतूपमातिशयालंकारः ॥

यत्तुङ्गेत्यादि । यस्य सुवेलपर्वतस्य तुङ्गं यत् शृङ्गं तस्याग्रे उपरितनभागे विलम्बी स्थितिकरः बिम्बो मण्डलं यस्य राकातुहिनांशुमालिनः स यत्तुङ्गशृङ्गाग्रविलम्बिबिम्बः । एवंगुणविशिष्टो राकातुहिनांशुमाली पूर्णिमाचन्द्रः आभाति शोभते । कथंभूतो राकातुहिनांशुमाली । पर्यन्तनक्षत्रमणिप्रचुम्बः पर्यन्तेषु नक्षत्राण्येव मणयस्तान् प्रचुम्बतीति । कथमिव तुहिनांशुमाली । अम्बरस्य प्रसाधितं छत्रमिव । उपमालंकारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यश्चित्रमेघाम्बरमण्डिताङ्गः समन्ततश्चामरचारुसङ्गः ।
पूषातपत्रो द्विजगीतकीर्तिरिन्द्रोत्सवस्येव बिभर्ति लक्ष्मीम् ॥

यश्च क्वचित्कटिकटकदंष्ट्रोत्पाटिताटनिपुटकिनीकन्ददन्तुरदरवदनविन्यासः साट्टहास इव, क्वचिन्निकटतटतटाकोदरदरद्देहदौलेयकपालसंकुलः प्रतिपन्नकपालिकुल इव, क्वचिन्निखिलतरूपनीतानेकनेत्रसंततिः शतधृतिरिव, क्वचित्प्रान्तप्रवृत्तापगाप्रवाहविषमवलनः पवनाशन इव, क्वचित्केसरिकिशोरखरनखरोत्खातकरिकुम्भस्थलोच्छलन्मुक्ताफलजालजटिलवल्लरीप्र-

---

यश्चित्रेत्यादि । यः पर्वतः इन्द्रोत्सवस्य लक्ष्मीं विभर्तीव धरतीव । कथंभूतो यः । चित्रमेघाम्बरमण्डिताङ्गः चित्रा नानावर्णा ये मेघास्त एव अम्बराणि तैर्मण्डितमङ्गं यस्य स तथोक्तः । इन्द्रोत्सवपक्षे चित्रमेघानामावा(?)वस्तुविशेषः । अत एव इन्द्रसवास इति नाम वर्तते । पुनः कथंभूतो यः । समन्ततश्चामरचारुसङ्गः समन्ततः चामराणां चमरीमृगाणां समूहेन चारुसङ्गः । इन्द्रोत्सवपक्षे अमराणां चारुः सङ्गो यस्य इन्द्रोत्सवस्य स तथा । पुनः कथंभूतो यः । पूषातपत्रः पूषा श्रीभास्कर आतपत्रं यस्य । पक्षे पूषावत् सूर्यवत् तेजोविराजितं यस्य इन्द्रोत्सवस्य । पुनः कथंभूतो यः। द्विजगीतकीर्तिः द्विजैः पक्षिभिर्गीता कीर्तिर्यस्य स तथोक्तः । पक्षे द्विजैर्ब्राह्मणैर्गीता कीर्तिर्यस्य सः । श्लेषोपमालंकारः ॥

यश्चेति । यश्च सुवेलशैलः क्वचित् कस्मिंश्चित् स्थाने कटिकटकदंष्ट्रोत्पाटिताटनिपुटकिनीकन्ददन्तुरदरवदनविन्यासः कटिनां शूकराणां कटकं समूहस्तस्य दंष्ट्राभिरुत्पाटिता अटनिपुटकिनीनां तरलपद्मिनीनां ये कन्दा मूलानि तैर्दन्तुर उन्नतदन्तो दराणां गुहानां वदनविन्यासो यस्य पर्वतस्य स तथोक्तः । उत्प्रेक्षते—साट्टहास इव । पुनः कथंभूतः । क्वचित् निकटतटतटाकोदरदरद्देहदौलेयकपालसंकुलः तटस्य निकटे निकटतटे निकटतटवर्तीनि यानि तटाकानि सरोवराणि तेषामुदरेषु मध्येषु दरद्देहा विदार्यमाणशरीरा ये दौलेयाः दुलेः कमठ्या अपत्यानि दौलेयाः कच्छपास्तेषां कपालैः पृष्ठवंशैः संकुलो व्याप्तः स तथोक्तः । उत्प्रेक्षते—प्रतिपन्नकपालिकुल इव प्रतिपन्नमङ्गीकृतं कपालिनां रुद्राणां कुलं येन स तथा अङ्गीकृतरुद्रकुल इव । पुनः कथंभूतः । क्वचित् निखिलतरूपनीतानेकनेत्रसंततिः निखिलानां तरूणां उपनीता अनेकनेत्राणां तरुमूलानां मृगविशेषाणां च संततिः समूहो येन स तथोक्तः । उत्प्रेक्षते—शतधृतिरिव यथा इन्द्रः अनेकलोचनसहितो भवति । पुनः कथंभूतः । क्वचित् प्रान्तप्रवृत्तापगाप्रवाहविषमवलनः प्रान्ते समीपे प्रवृत्ताः प्रवहन्त्यो या आपगा नद्यस्तासां प्रवाहाणां विषमं वक्रं वलनं यत्र स तथोक्तः । उत्प्रेक्षते—पवनाशन इव सर्प इव । पुनः कथंभूतः । क्वचित् केसरिकिशोरखरनखरोत्खातकरिकुम्भस्थलोच्छलन्मुक्ताफलजालजटिलवल्लरीप्रतानः केसरिकिशोराणां तरुणसिंहानां खराः कठिना ये नखरा नखास्तैरुत्खातानि विदारितानि यानि कुम्भस्थलानि शिरःपिण्डस्थलानि तेभ्य उच्छलन्ति यानि मुक्ताफलजालानि तैर्जटिला मिश्रिताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तानः कामिनीकुन्तलसंतान इव, क्वचिद्वनेचरसहचरीचरणनखनक्षत्रपवित्रोपत्यकानिचयः सुरशिलोच्चय इव, क्वचिन्निर्झरजलजर्जरितशिलान्तः कृतकुञ्जरतटाघातः सामन्त इव, नाकलोक इव कुशिकसुतावलोकः, शरदागम इव कृतकमलसमागमः, सरस्वतीसभादेश इव पुण्डरीकावकाशोपदेशः, समीक्षासिद्धान्त इव कपिलकुलकान्तः, शुद्धान्त इव सकञ्चुकिवृत्तान्तः, पवनमार्ग इव सदन्तोत्सर्गः, सरोवकाश इव पारापतनिवेशः,

---

वल्लरीणां वल्लीनां प्रतानाः समूहा यत्र स तथोक्तः । उत्प्रेक्षते—कामिनीनां कुन्तलसंतान इव । पुनः कथंभूतः । क्वचित् वनेचरसहचरीचरणनखनक्षत्रपवित्रोपत्यकानिचयः वनेचराणां भिल्लानां सहचरीणां ये चरणनखास्त एव नक्षत्राणि उडूनि उडवो वा तैः पवित्र उपत्यकानिचयः पर्वताधोभूमिसमूहो यस्य सः । उत्प्रेक्षते—सुरशिलोच्चय इव मेरुगिरिरिव यथा मेरुगिरिर्नक्षत्रैर्मण्डितो भवति । पुनः कथंभूतः । क्वचित् निर्झरजलजर्जरितशिलान्तः निर्झरजलेन क्षरणपयसा जर्जरितः शतखण्डीकृतः शिलानामन्तः प्रान्तो येन स तथोक्तः । उत्प्रेक्षते—सामन्त इव देशपतिरिव । कथंभूतः सामन्तः । कृतकुञ्जरतटाघातः कृतः कुञ्जरतटानां गजपार्श्वानां आघातो निष्ठुरप्रहारो येन स कृतकुञ्जरतटाघातः । पुनः कथंभूतः । कुशिकसुतावलोकः कुशिकसुतानामुलूकानामवलोको लोचनद्युतिर्येन स तथा । उत्प्रेक्षते—नाकलोक इव यथा नाकलोके: कुशिकसुतस्य इन्द्रस्य अवलोकः दर्शनं यत्र स तथोक्तः। पुनः कथंभूतः । कृतकमलसमागमः कृतो विहितः कमलानां[1] मृगाणां समागमः संमुखागमनं येन स तथा । उत्प्रेक्षते—शरदागम इव यथा शरदागमः कृतकमलसमागमः विहिताब्जसमागमो भवति । पुनः कथंभूतः । पुण्डरीकावकाशोपदेशः पुण्डरीकाणां व्याघ्राणां अवकाशस्य उप समीपे देशः प्रदेशो यत्र स तथोक्तः । उत्प्रेक्षते—सरस्वतीसभादेश इव यथा सभादेशः पुण्डरीकस्य श्वेतकमलस्य अवकाशेन(?) अभि यथा वा स्यात् उपदेशो व्याख्यानं यत्र व्यञ्जकापरपर्यायः । पुनः कथंभूतः । कपिलकुलकान्तः कपिलानां मर्कटानां कुलैः समूहैः कान्तः, अथ वा मर्कटकुलानां कान्तोऽभीष्टः । उत्प्रेक्षते—समीक्षासिद्धान्त इव यथा समीक्षासिद्धान्तं सांख्यशास्त्रं कपिलकुलस्य शिष्यवर्गस्य कान्तोऽभीष्टो भवति । पुनः कथंभूतः । सकञ्चुकिवृत्तान्तः सकञ्चुकिनां सर्पाणां वृत्तान्तः कृतकुण्डलीमध्यो यस्य स तथा । उत्प्रेक्षते—शुद्धान्त इव यथा शुद्धान्तो नः (?) परं सकञ्चुकिवृत्तान्तो भवति स्थापत्यवार्तासहितो भवति । पुनः कथंभूतः । सदन्तोत्सर्गः सत्समीचीनः दन्तानां तटानां उत्सर्गः उत्कृष्टसृष्टिर्यस्य स तथा । उत्प्रेक्षते—पवनमार्ग इव यथा पवनमार्ग आकाशः सदन्तोत्सर्गः समीचीनव्याप्तिको भवति । पुनः कथंभूतः । पारापतनिवेशः पारापतानां कलरवाणां निवेशः स्थितिर्यत्र स तथा । उत्प्रेक्षते—सरोवकाश इव

---

१. 'कमलस्तु मृगान्तरे' इति हैमः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कात्यायनीनिलय इव विहितहेरम्बप्रणयः, पिङ्गलेक्षणावास इव शाक्करनिवासः, कल्याणापघन इव समदनः, अनात्मवानपि सचेतकः, अबीभत्सुरपि कपिध्वजचिह्नः, अमेरुशरासनोऽपि सदुर्गः, अमनसिजरसोऽपि संजातभोगिनीसङ्गः, अरेवतीपतिरपि ताललाञ्छनः, अवैवधिकोऽपि विहङ्गिकाध्यासितस्कन्धः, अकुसुमायुधोऽपि सपुष्पबाणः,

---

यथा सरोवकाशः पारापतनिवेशो भवति । पुन कथंभूतः । विहितहेरम्बप्रणयः विहितो हेरम्बैर्महिषैः प्रणयो यत्र स तथा । उत्प्रेक्षते—कात्यायनीनिलय इव यथा कात्यायन्या निलयः विहितहेरम्बप्रणयो कृतविघ्नराजस्नेहो भवति । पुनः कथंभूतः । शाक्करनिवासः शाक्कराणां गवां निवासः शाक्करनिवासः । उत्प्रेक्षते—पिङ्गलेक्षणावास इव यथा पिङ्गलेक्षणावासो रुद्रावासः शाक्करनिवासो वृषभनिवासो भवति । पुनः कथंभूतः । समदनः सह मदनै राजवृक्षैर्वर्तते इति समदनः । उत्प्रेक्षते—कल्याणापघन इव यथा कल्याणापघनः विवाहदिनशरीरं समदनो भवति, समानः सूरो वा । पुनः कथंभूतः । अनात्मवानपि सचेतकः ननु यः अनात्मवान् अजितेन्द्रियः स सचेतकः आत्मज्ञानवान् कथं भवति । विरुद्धमेतत्परिह्रियते—अनात्मवान् अचेतः सचेतको हरीतकीवृक्षसहितः । पुनः कथंभूतः । अबीभत्सुरपि कपिध्वजचिह्नः ननु यो अबीभत्सुः बीभत्सुना पार्थेन रहितः स कपिध्वजचिह्नः वानरसहितध्वजः कथं भवति । विरुद्धमेतत्परिह्रियते—अबीभत्सुः अक्रूरः कपयो मर्कटा ध्वजास्तरवश्चिह्नं यस्य ।पुनः कथंभूतः ।अमेरुशरासनोऽपि सदुर्गः ननु यो अमेरुशरासनो अरुद्रः स सदुर्गः पार्वतीसहितः कथं भवति । विरुद्धमेतत्परिह्रियते—अमेरवो न मेरुवृक्षाः शराश्च बाणतृणानि असनाश्च सर्जकवृक्षाः प्रियालवृक्षाश्च यत्र सः अमेरुशरासनोऽपि निश्चयेन स दुर्गो विषमप्रदेशसहितः । पुनः कथंभूतः । अमनसिजरसोऽपि संजातभोगिनीसङ्गः ननु यो अमनसिजरसः कामरागरहितः स संजातभोगिनीसङ्गः उत्पन्नभोग्यस्त्रीसङ्ग अवरुद्धस्त्रीसंगमः कथं भवति । विरुद्धमेतत्परिह्रियते—पर्वतस्य मनसिजरसो भवति अचेतनत्वात् । संजातभोगिनीसङ्गः उत्पन्नसर्पिणीसङ्गः सुखम् । पुनः कथंभूतः । अरेवतीपतिरपिताललाञ्छनः ननु यः अरेवतीपतिः वलभद्रो न भवति स ताललाञ्छनस्तालवृक्षसहितध्वजः कथं भवति । विरुद्धमेतत्परिह्रियते—अरेवतीपतिर्वलभद्रो न भवति रेवतीक्षेत्ररहितस्तदुपलक्षणं अन्येषामपि क्षेत्राणां अवस्थानत्वात् 'शिलायां सस्यं न भवति' इति वचनात् । ताललाञ्छनस्ताडवृक्षोपलक्षितः । पुनः कथंभूतः । अवैवधिकोऽपि विहङ्गिकाध्यासितस्कन्धः ननु यः अवैवधिको न भवति स विहङ्गिकाध्यासितस्कन्धः कावधाकावेन समाश्रितस्कन्धः(?) कथं भवति । विरुद्धमेतत्परिह्रियते—न विद्यते वैवधिकं तारोद्यसमूहो यस्य । विहङ्गिकाभिः पक्षिणीभिरध्यासितस्कन्धः समाश्रिततटप्रदेशः । पुनः कथंभूतः । अकुसुमायुधोऽपि सपुष्पवाणः ननु यः अकुसुमायुधः कामदेवो न भवति स पुष्पवाणः कुसुमशरः कथं भवति । विरुद्धमेतत्परिह्रियते—अकुरभूमिः सुष्ठु मा शोभा यस्य सुमः आस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किं च।

पाताले पादमूलोपलविलसदहिव्यूहवृत्तान्तकान्त-
स्तिर्यक्प्राग्भारभागाश्रयशबरवधूबन्धुराधित्यकान्तः।
ऊर्ध्वं गन्धर्वरामारतिरभसभरोल्लोलचूलाकराल-
स्त्रैलोक्यालोक्यलक्ष्मीर्जयति गिरिरयं मेरुलीलासरालः॥

तस्य सुरसुन्दरीसमाजसेवितसकलमेखलस्याचलस्यैशान्यां दिशि निसर्गादुदकवत्यामुपत्यकायामस्ति भो भुवनत्रयीव्यवहाराहितागण्यगुणपण्य, पुण्यजनानन्दावापः पादपः। यः खल्वनेकविकिरकुलकामिनीनिशितशिखोल्ले-

---

मन्तात् युधः सिंहगजादीनां युधः संग्रामो यत्र स अकुसुमायुधः सह पुष्पैः वर्तते वाणास्तरुविशेषा यत्र॥

किं चास्ति विशेषः। **पाताले इत्यादि**। अयं गिरिरेष पर्वतो जयति। कथंभूतः। मेरुलीलासरालः मेरुपर्वतशोभासंयुक्तः। कथंभूतोऽयं गिरिस्तत्कारणगर्भितं विशेषणमाह— पाताले पर्वतस्य अधस्तनभागे पादमूलोपलविलसदहिव्यूहवृत्तान्तकान्तः पादमूलस्य ये उपलास्तत्र विलसन्तः क्रीडन्तो ये अहिव्यूहाः सर्पसमूहास्तेषां वृत्तांन्तेन कुण्डलीकृतशरीरपर्वतेन कान्तो मनोहरः जलस्वभावे, मेरुपक्षे नागदेवकथामनोहरः। पुनः कथंभूतः। तिर्यक्प्राग्भारभागाश्रयशबरवधूबन्धुराधित्यकान्तः तिर्यक्प्राग्भारस्य तिरश्चीनविस्तारस्य ये भागाः प्रदेशास्तत्र आश्रयो यासां शबरवधूभिः किरातकामिनीभिर्बन्धुरा या अधित्यकार्धभूमिस्तस्या अन्तो यस्य सः, मेरुपक्षे वरसहिता या वध्वः अमराङ्गनाविद्याधर्यादयस्ताभिर्बन्धुरः अधित्यकाया अन्तः पर्यन्तो यस्य। पुनः कथंभूतः। ऊर्ध्वं उर्ध्वप्रदेशेषु ये गन्धर्वा गायनास्तेषां रामास्तासां रतिरभसभरेण संभोगक्रीडावेगातिशयेन उल्लोला चपला या चूला अग्रं तया कराल उन्नतः, मेरुरपि गन्धर्वरामारतिमान् भवति। पुनः कथंभूतः। त्रैलोक्यालोक्यलक्ष्मीः त्रैलोक्यस्य अधोमध्योर्ध्वलक्षणस्य आलोक्या निरीक्षणीया लक्ष्मीः शोभा यस्य स तथा। हेतूपमालंकारः॥

भो भुवनत्रयीव्यवहाराहितागण्यगुणपण्य भुवनानां त्रयी त्रैलोक्यं तस्या व्यवहारा आहितमाचरितं अगण्यं गणनातीतं गुणपण्यं यस्य स तस्य संबोधनं हे तथोक्त मारदत्तमहाराज, तस्य पूर्वोक्तवर्णनस्य अचलस्य ऐशान्यां दिशि ईशानदिक्कोणे निसर्गात् उदकवत्यां उपत्यकायां पर्वतासन्नभूमौ पादपोऽस्ति। कथंभूतः पादपः। पुण्यजनानन्दावापः पुण्यजनानांयक्षाणां आनन्दस्य आवापः। कथंभूतस्याचलस्य। सुरसुन्दरीसमाजसेवितसकलमेखलस्य। यः पादपः कथंभूतः। खलु अनेकविकिरकुलकामिनीनिशितशिखोल्लेखनखमुखविलिख्यमानशाखाभुजशिखरः.................... शिखानां चूलिकानां उल्लेखा अग्राणि तैरुपलक्षितानि नखमुखानि तैर्विलिख्यमानानि चुण्ड्यमानानि शाखानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खनखमुखविलिख्यमानशाखाभुजशिखरः, शिखरशिखाडम्बरितनिविडनीडक्रीडदण्डजडिम्भतुण्डखण्ड्यमानकुपलपर्यन्तः, कुपलपर्यन्तसंचरच्चारणचमूविमानमणिकिङ्किणीजालविलुण्ठितविटपाग्रपल्लवपुटपटलः, पल्लवपुटपटलान्तरालखेलद्वाचालकीरकुटुम्बिनीकृतकितवालापविस्मापितपथिकसार्थः, पथिकसार्थकथारथायातमिलितानेकदेशिकोचितविचित्रवार्ताकर्णनोदीर्णवचनवनदेवतोत्तरलतरलहस्ताहूयमानसहचरीनिचयः, सहचरीनिचयकरकिशलयसंवाहनसुखसुप्तागन्तुकलोकोपसेव्यमानबहलशीतलच्छायाच्छन्नतलदेशः, छायाच्छन्नतलदेशाश्रयमूर्छदतुच्छवाञ्छागच्छदविच्छिन्नखिन्ना-

---

लतानां भुजशिखराणि यस्य स तथोक्तः । पुनः कथंभूतः । शिखरशिखाडम्बरितनिविडनीडक्रीडदण्डजडिम्भतुण्डखण्ड्यमानकुपलपर्यन्तः शिखरस्य पादपशिखरस्य शिखा अग्राणि तत्र आडम्बरितानि विस्तृतानि निविडानि यानि नीडानि मालकास्तत्र क्रीडन्तो ये अण्डजाः पक्षिणस्तेषां डिम्भास्तेषां तुण्डानि तैः खण्ड्यमानाश्छेद्यमानाः कुपलपर्यन्ता यस्य स तथोक्तः । पुनः कथंभूतः । कुपलपर्यन्तसंचरच्चारणचमूविमानमणिकिङ्किणीजालविलुण्ठितविटपाग्रपल्लवपुटपटलः..
देवविशेषसैन्यव्योमयानानि तेषां मणिकिङ्किणीजालानि रत्नजडितसुवर्णक्षुद्रघण्टिकासमूहास्तैर्विलुण्ठितानि त्रोटितानि विटपाग्राणां शाखाकटप्रूणां पल्लवपुटपटलानि यस्य स तथोक्तः । पुनः कथंभूतः । पल्लवपुटपटलान्तरालखेलद्वाचालकीरकुटुम्बिनीकृतकितवालापविस्मापितपथिकसार्थः पल्लवपुटपटलान्तरालेषु प्रवालयोगसमूहमध्येषु खेलन्त्यः क्रीडन्त्यो वाचाला बहुवचना याः कीरकुटुम्बिन्यः शुककामिन्यस्ताभिः कृता विरचिता ये कितवालापाः धूर्तमिथोभाषणानि तैर्विस्मापिता आश्चर्यं प्रापिताः पथिकसार्था यत्र पादपे स तथोक्तः । पुनः कथंभूतः । पथिकसार्थकथारथायातमिलितानेकदेशिकोचितविचित्रवार्ताकर्णनोदीर्णवचनवनदेवतोत्तरलतरलहस्ताहूयमानसहचरीनिचयः पथि मार्गे चरन्ति पथिकाः सह अर्थेन धनेन वर्तन्ते इति सार्था ये लोकास्तेषां कथा एव रथा जिह्वारथास्तैरायाता आगता..................स्तेषां उचिताः प्रस्तावागता विचित्राश्चमत्कारका या वार्ताः किंवदन्त्यस्तासां आकर्णनेन उदीर्णवचना उल्वणवाचो या वनदेवतास्तासामुत्तरलाश्चपला ये तरलहस्ताः पाणयस्तैराहूयमानाव्याह्रियमानाः सहचरीणां वनदेवभार्याणां निचयः समूहो यत्र स तथोक्तः । पुनः कथंभूतः । सहचरीनिचयकरकिशलयसंवाहनसुखसुप्तागन्तुकलोकोपसेव्यमानबहलशीतलच्छायाच्छन्नतलदेशः सह चरन्ति सार्धं गच्छन्तीति सहचर्यो भार्यास्तासां निचयस्तस्य करकिशलयैर्यत्संवाहनं पादमर्दनं तस्मात् यत्सुखं तेन सुप्ता निद्रां प्राप्ता ये आगन्तुकलोकाः पथिकजनास्तैरुपसेव्यमाना स्वीक्रियमाणा या बहला घना शीतला अनुष्णा छाया तया छन्नः संवृतस्तलदेशो यस्य स तथोक्तः । पुनः कथंभूतः । छायाच्छन्नतलदेशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्वन्यसंबाधकलहाकुलितपुरःप्रयातपान्थसंदर्भः, पान्थसंदर्भपरिश्रमश्रमविश्राम्यदाश्रमार्भकदर्भगर्भितस्कन्धाभोगपरिसरः, स्कन्धाभोगपरिसरोपरचितवनचरनिवासनिषण्णषिङ्गाध्वगमिथुनरतधृष्टताकुलितशकुन्तप्रजः, प्रजापतिरिव प्रदर्शितानेकवर्णप्रसूतिः, निखिलभुवनविनिर्माणप्रदेश इव दलबहुलः, काकुत्स्थकथावतार इव कपिकुलविलुप्यमानपलाशप्रसरः, सत्रमण्डप इव द्विजराजविराजितः, पर्जन्यागम इव श्यामलिताखिलदिग्व-

---

श्रयमूर्छदतुच्छवाञ्छागच्छदविच्छिन्नखिन्नाध्वन्यसंबाधकलहाकुलितपुरःप्रयातपान्थसंदर्भः छायया अनातपेन च्छन्नो योऽसौ तलदेशोऽधःप्रदेशस्तस्याश्रयाय वा मूर्च्छन्तो वर्धमाना या अतुच्छवाञ्छा प्रचुराभिलाषा तया आगच्छन्तो निमिलन्तोऽविच्छिन्ना अविरला खिन्नाः श्रान्ता येऽध्वन्याः पथिकास्तेषां संबाधेन संघट्टेन यः कलहस्तेनाकुलितपुरःप्रयातः प्रथममागतः पान्थसंदर्भः पथिकसमूहो यत्र स तथोक्तः । पुनः कथंभूतः । पान्थसंदर्भपरिश्रमश्रमविश्राम्यदाश्रमार्भकदर्भगर्भितस्कन्धाभोगपरिसरः पान्थानां संदर्भेण समूहेन सह परिभ्रमः पर्यटनं तस्मात् योऽसौ श्रमस्तेन विश्राम्यन्तः विश्रामं कुर्वन्तो ये आश्रमार्भकास्तपस्विबालकास्तेषां दर्भैः कुशैर्गर्भित आच्छादितः स्कन्धाभोगपरिसरः प्रकाण्डविस्तारपर्यन्तभूमिर्यस्य पादपस्य स तथोक्तः । पुनः कथंभूतः । स्कन्धाभोगपरिसरोपरचितवनचरनिवासनिषण्णषिङ्गाध्वगमिथुनरतधृष्टताकुलितशकुन्तप्रजः स्कन्ध उच्यते तस्य आभोगः तस्य परिसरे पुरस्ताद्भूमौ उपरचिता निर्मापिता ये वनचरनिवासाः किरातभवनानि तेषु निषण्णा उपविष्टा ये षिङ्गाध्वगा विटपथिकास्तेषां मिथुनानां स्त्रीपुरुषयुग्मानां रतस्य मैथुनस्य या धृष्टता वैपरीत्यं निर्लज्जता तया आकुलिता शकुन्तप्रजा पक्षिबालका यत्र स तथोक्तः । पुनः कथंभूतः । प्रदर्शितानेकवर्णप्रसूतिः प्रदर्शिता प्रकटीकृता अनेकेषां बहूनां वर्णानां श्वेतपीतहरितारुणकृष्णानां प्रसूतिरुत्पत्तिर्येन पादपेन स तथा । क इव । प्रजापतिरिव यथा प्रजापतिर्ब्रह्मा अनेकवर्णानां ब्राह्मणक्षत्रियवैश्यशूद्राणां प्रसूतिमुत्पत्तिं प्रदर्शयति । पुनः कथंभूतः । दलबहुलः पत्रप्रचुरः । क इव । निखिलभुवनविनिर्माणप्रदेश इव निखिलभुवनस्य विनिर्माणस्य रचनायाः प्रदेश इव स्थानमिव । सोऽपि दलबहुलः कारणबहुलो भवति । पुनः कथंभूतः । कपिकुलविलुप्यमानपलाशप्रसरः कपिकुलैर्वानरसमूहैर्विलुप्यमानस्त्रोट्यमानः पलाशप्रसरो यस्य स तथा । क इव । काकुत्स्थकथावतार इव काकुत्स्थकथाया रामायणस्य अवतार इव प्रवेश इव यथा काकुत्स्थकथायां कपिकुलैः सुग्रीवहनुमन्नलनीलाङ्गदवानरैर्विलुप्यमानो मार्यमाणः पलाशप्रसरः राक्षसव्यापारो यत्र स तथोक्तः । पुनः कथंभूतः । द्विजराजविराजितः द्विजराजैः पक्षिप्रधानैः विराजितः शोभितः । क इव । सत्रमण्डप इव यथा सत्रमण्डपो दानशाला द्विजराजैर्मुख्यब्राह्मणैर्विराजितो भवति । पुनः कथंभूतः । श्यामलिताखिलदिग्वलयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लयः, छन्दःप्रस्तार इव पादप्रबन्धावरुद्धवसुधः, क्षितिपजययात्राकाल इव सुच्छायपत्रः, काननश्रीप्रसाधितातपत्राभोग इव सुवृत्तमण्डलः, पुण्योदयदिवस इव संपादितफलपरम्परः, शरणागतसंभावनादिव दूरतरमभ्युत्थितः, प्राघूर्णकपरिरम्भसंभ्रमादिव प्रसारितशाखाभुजसहस्रः, स्वविभवसमर्पणोपचारादिव बद्धपुटकुड्मलप्रणामाञ्जलिः, सिद्धालय इवानेकशस्त्रिदशदयितोपयाचितपिष्टपञ्चाङ्गुलावरुद्धबुध्नः, कुबेरपुरनिवास इव प्ररोहदोलादक्षयक्षकुलकुमारः, पशुपतिरिव गामधिष्ठितः समीपतरविनायकश्च,

---

श्यामलितं नीलवर्णीकृतं अखिलं दिग्वलयं येन स तथोक्तः। क इव। पर्जन्यागम इव यथा पर्जन्यागमो वर्षाकालः श्यामलिताखिलदिग्वलयो भवति। पुनः कथंभूतः। पादप्रबन्धावरुद्धवसुधः पादप्रबन्धेन मूलसमूहेन अवरुद्धा व्याप्ता वसुधा पातालभूमिर्येन स तथा। क इव। छन्दःप्रस्तार इव यथा छन्दःप्रस्तारः पादप्रबन्धेनाक्षरसंघातसमूहैर्वसुधामवरुध्यते। पिङ्गलः किल पादप्रस्तारान् कुर्वन् भूमिं प्राप्नुवन् समुद्रमध्ये पतितः। उक्तं च—'पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः। यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम्॥ ऊने दद्याद्गुरूनेव यावत्सर्वलघुर्भवेत्। प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः॥' इति। पुनः कथंभूतः। सुच्छायपत्रः सुच्छायानि शोभनानि यानि पत्राणि यस्य स तथा। क इव। क्षितिपजययात्राकाल इव क्षितिपानां जययात्राकालो दिग्विजयगमनावसरो यथा सुच्छायपत्रस्तेजस्विवाहनो भवति। पुनः कथंभूतः। सुवृत्तमण्डलः सुवृत्तं मुनिघं(?) मण्डलं वर्तुलत्वं यस्य स तथा। क इव। काननश्रीप्रसाधितातपत्राभोग इव काननश्रियः प्रसाधितो मण्डित आतपत्राभोग इव। पुनः कथंभूतः। संपादितफलपरम्परः संपादिता उपढौकिता फलपरम्परा येन स तथा। क इव। पुण्योदयदिवस इव यथा पुण्योदयदिवसः सुकृतविपाकफलपरम्परां संपादयति। पुनः कथंभूतः। दूरतरमभ्युत्थितः दूरतरं विप्रकृष्टं अभ्युत्थितः पथिकानां संमुखमागतः। कस्मात्। उत्प्रेक्षते—शरणागतसंभावनादिव शरणागतानां पथिकादीनां संभावनात् अनुकूलनादिव। पुनः कथंभूतः। प्रसारितशाखाभुजसहस्रः प्रसारितं शाखाभुजसहस्रं येन स तथा। कस्मात्। उत्प्रेक्षते—प्राघूर्णकपरिरम्भसंभ्रमादिव प्राघूर्णकानां आगन्तुकानां परिरम्भसंभ्रमात् आलिङ्गनादरादिव। पुनः कथंभूतः। बद्धपुटकुड्मलप्रणामाञ्जलिर्बद्धो पुटकुड्मलैः प्रणामाञ्जलिर्नमस्कारकरपोटकं येन स तथा। कस्मात्। उत्प्रेक्षते—स्वविभवसमर्पणोपचारादिव निजसंपत्प्रदानविनयादिव। पुनः कथंभूतः। अनेकशोऽनेकवारान् त्रिदशदयितानां उपयाचितैर्नमसितैर्हेतकारैः पिष्टपञ्चाङ्गुलै(?)श्चरोकैरवरुद्धं बुध्नं मूलप्रदेशो यस्य स तथा। क इव। सिद्धालयो देवभवनमिव देवाङ्गनोपयाचितपिष्टपञ्चाङ्गुलावरुद्धबुध्नो यथा सिद्धालयो भवति। पुनः कथंभूतः। प्ररोहदोलादक्षयक्षकुलकुमारः प्ररोहदोलासु जटाप्रेङ्खासु दक्षा यक्षकुलकुमारा यत्र सं तथा। क इव। कुबेरपुरनिवास इव अलकानगरीमन्दिरमिव।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारायण इव वनमालाविभूषणः परिकल्पितभुजगशयनश्च, पितामह इव वयःपरिणतः शुचिच्छदपरिच्छदश्च, स्कन्द इव मयूरासनः सुरवाहिनीसंगमश्च, तापस इव विहितवल्कलपरिग्रहः कृतजटाबन्धश्च, समुद्र इव महासत्त्वसंश्रयः प्रवालपाटलितकटनिश्च, सत्पुरुष इव प्रियालोकनः परार्थघटनानिघ्नश्च,

यश्चानवरतमखिलजनोपसेव्यमानसर्वस्वः पवनवशविकाशधरेण पल्लवाधरेणोपहसतीव प्रतिवेशितरूनसिन्दुःसंचारे कान्तारे दैवादवाप्यमानसमा-

---

पुनः कथंभूतः। समीपतरविनायकश्च समीपतरा वीनां पक्षीणां नायका गरुडादयो यस्य स तथा। क इव। पशुपतिरिव यथा पशुपती रुद्रो गां वृषभं अधिष्ठितो भवति समीपतरलम्बोदरश्च भवति। पुनः कथंभूतः। वनमालाविभूषणः वनश्रेणीमण्डनः परिकल्पितभुजगशयनश्च परिकल्पितं रचितं भुजङ्गैः शयनं स्थितिर्यत्र स तथा। क इव। नारायण इव यथा नारायणो वनमालाविभूषणः वृन्दारिकाजालंधरदैत्यभार्यासहितो भवति नागशय्याशयनश्च भवति। पुनः कथंभूतः। वयःपरिणतः वयोभिः पक्षिभिः परि समन्तात् नतो नम्रीभूतश्च शुचिभिः पवित्रैश्छदैः पर्णैः परिच्छदः परिवृत आच्छादितश्च। क इव। पितामह इव यथा पितामहो ब्रह्मा वयःपरिणतो वृद्धो भवति। शुचिच्छदो हंसपक्षी स परिच्छदो वाहनो यस्य स तथा। पुनः कथंभूतः। मयूरासनः मयूराणामासनानि मालिका यत्र स मयूरासनः। सुरवाहिनीसंगमश्च सुरवाहिनी देवसेना तस्यां संगमो मेलापको यत्र स तथा। क इव। स्कन्द इव कार्तिकेय इव यथा स्कन्दः मयूरवाहनो भवति सुरवाहिनीसंगमश्च गङ्गानदीसंगमो भवति। पुनः कथंभूतः। विहितवल्कलपरिग्रहः कृतजटाबन्धश्च। क इव। तापस इव यथा तापसः विहितवल्कलपरिग्रहो भवति विहितकेकिविकारश्च भवति। पुनः कथंभूतः। महासत्त्वसंश्रयो महतः सत्त्वस्य वलस्य संश्रयः प्रवालपाटलितकटनिश्च प्रवालैर्बालपल्लवैः पाटलिता श्वेतरक्तीकृता कटनिस्तटं येन स प्रवालपाटलितकटनिः। क इव। समुद्र इव यथा समुद्रो महासत्त्वानां मकरादीनां संश्रय आश्रयो भवति प्रवालैर्विद्रुमरत्नदक्षैः पाटलितकटनिश्च भवति। पुनः कथंभूतः। प्रियालोकनः प्रियदर्शनः परार्थघटनानिघ्नश्च परेषां लोकांना पक्षादीनां च अर्थः प्रयोजनं तस्य घटना तस्यां निघ्नस्तत्परः। क इव। सत्पुरुष इव यथा सत्पुरुषः प्रियालोकनः परस्त्रीणां अवलोकनो भवति परोपकारतत्परश्च भवति॥

यश्च पादपः पल्लवाधरेण प्रतिवेशितरुन्निकटवृक्षानुपहसतीव उपहास्यं करोतीव। कथंभूतः पादपः। अनवरतमखिलजनोपसेव्यमानसर्वस्वः अखिलजनैरुपसेव्यमानं उपजीव्यमानं सर्वस्वं सर्वसंपद्यस्य स तथोक्तः। कथंभूतेन पल्लवाधरेण। पवनवशविकाशधरेण पवनवशेन कारणेन विकाशं विकसनं धरतीति तथा तेन। किमु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गमनस्यार्थिजनस्याविधाय कमप्युपकारमरे खदिर, किं तवान्तःसारतया। सरल, वृथेदं सरलत्वम् । संपाक, मुधेयं राजवृक्षता । शाल्मले, निष्कारणं कण्टकितं वपुः। अर्जुन, आत्मखेदाय फलभारपरिग्रहः । तृणराज, निजफलविभवगोपनाय नितान्तं वृद्धिः। पूतीक, अर्थिजनाशाभङ्गाय मार्गावस्थितिः,

किं च ।

पान्थैः पल्लवलुण्टनं करटिभिः स्कन्धस्य संघट्टनं
संबाधो हरिभिः शकुन्तनिकरैः क्षोदस्तु किं वर्ण्यते ।
किं चान्यत्तव देवदेहसदृशस्त्रैलोक्यमान्यस्थिते-
रात्मीया इव यस्य याचकजनैः स्वच्छन्दसेव्याः श्रियः ॥

तमहो महाराज, विटपिनमधिवसति, तैस्तैः स्वैरविहारचरितैरनेकरत्नरचिता इव गिरिदरीर्विरचयति, विचित्रोद्गमस्तम्बतुरुम्बाडम्बरा इव शा-

---

पहसतीत्याह—अरे खदिर अरे भो दन्तधावन, अर्थिजनस्य कमप्युपकारं अविधाय तव अन्तःसारतया अन्तःकठिनतया किम् । न किमपि । कथंभूतस्य अर्थिजनस्य । अस्मिन् प्रत्यक्षीभूते दुःसंचारे कान्तारे कमिवीत्मनि वने दैवात् दैवयोगात् अवाप्यमानसमागमनस्य । हे सरल हे देवदारु, इदं तव सरलत्वं वृथा । उपकारमकुर्वत इत्यर्थः । रे संपाक, इयमेषा राजवृक्षता मुधा । रे शाल्मले, तव निष्कारणं कण्टकितं वपुर्वर्तते । अरे अर्जुन, तव फलभारपरिग्रह आत्मखेदाय वर्तते अखाद्यत्वात् । रे तृणराज ताडतरो, निजफलविभवगोपनाय रक्षणाय नितान्तं वृद्धिः उन्नतत्वं वर्तते । अरे पूतीक करञ्जक, अर्थिजनाशाभङ्गाय मार्गावस्थितिस्तव वर्तते ॥

किं च मनागवर्णयामि—**पान्थैरित्यादि**। पान्थैः पल्लवानां लुण्टनं चुण्टनं क्रियते । करटिभिर्गजैः स्कन्धस्य प्रकाण्डस्य संघट्टनं संवसनं क्रियते । हरिभिर्वानरैर्वा संबाधः तव संबाधनं क्रियते। शकुन्तनिकरैः क्षोदः खननं क्रियते, स क्षोदः किं वर्ण्यते कथ्यते । किं च स्तोकमेवान्यत् तव भवतः। कथंभूतस्य। देवदेहसदृशः देवतासमानशरीरस्य । पुनः कथंभूतस्य तव। त्रैलोक्यमान्यस्थितेः त्रिभुवनजनमाननाचारस्य । यस्य तव श्रियः कर्मतापना याचकजनैरर्थिलोकैरात्मीया इव स्वच्छन्दं सेव्या यथेष्टं भोग्या वर्तन्ते। समासोक्त्युपमालंकारः ॥

अहो महाराज मारदत्त नृप, प्रचलाकिनां कुले मयूरकुले अरं अवाप्तजन्मा । किं कुर्वति प्रचलाकिनां कुले। विटपिनं अधिवसति सति ।'उपान्वध्याङ्वसः' इत्यधिकरणे कर्मत्वम् ।पुनश्च किं कुर्वति सति। तैस्तैः प्रसिद्धैः स्वैरविहारचरितैः स्वेच्छापर्यटनचेष्टितैः गिरिदरीः पर्वतगुहाः अनेकरत्नरचिता इव विरचयति सति । पुनश्च किं कुर्वति सति । शाखिशिक्षाः वृक्षाणां चूला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खिशिखाः कुर्वाणे, दुश्च्यवनचापचापलाविला इव दिशो दर्शयति, चारुचित्रोल्लेखा इव मेदिनीर्दधाने, विविधमणिमेचकिता इव सरसीः सज्जयति, वनदेवताचामरचतुरा इव लतागृहावनीर्विनिर्माणे, केशपाशपेशला इवोपवनश्रियः संपादयति, शबरशिबिरशिखण्डमण्डनोचितकलापे, पुलिन्दसुन्दरीवतंसीकृतचन्द्रके, वनेचरवनिताहितबर्हवलयविनोदे, नरेश्वरश्रीलाञ्छनपिच्छमूर्च्छिनि, महामुनिसंयमोपधिनिबन्धनाङ्गरुहसंकुले, प्रचलाकिनां कुलेऽहमवाप्तजन्मा। कदाचित्स्वनिःश्वासावसानसमीरसारितस्वल्पतरङ्गपरम्परम्, अतिजरण्डशिखण्डमण्डलीगतिस्खलितकलुषप्रसरम्, किमपि खे-

---

विचित्रोद्गमस्तम्बतुरुम्बाडम्बरा इव उत्तंसा पेया(?)इव कुर्वाणे विदधति सति। पुनश्च किं कुर्वति सति। दुश्च्यवनचापचापलाविला इव दिशो दर्शयति दुश्च्यवनस्य इन्द्रस्य चापं धनुस्तस्य चापलं तेन आविला युक्ता दिशः ककुभः दर्शयति प्रेक्षयति सति। पुनश्च किं कुर्वति सति। चारुचित्रोल्लेखा इव मेदिनीः दधाने चारूणि यानि चित्राणि आलेख्यानि तैरुल्लेखास्तत्सहिता इव भूमीं धरति सति। पुनश्च किं कुर्वति सति। विविधमणिमेचकिता इव सरसीः सज्जयति नानामाणिक्यकर्बुरिता इव सरसीः महासरोवराणि सज्जयति कुर्वति। पुनश्च किं कुर्वति सति। वनदेवताचामरचतुरा इव लतागृहावनीर्विनिर्माणे वनदेवतानां चामरचतुरा इव प्रकीर्णकशोभिता इव लतामण्डपभूमीं रचयति। पुनश्च किं कुर्वति सति। केशपाशपेशला इव कुन्तलहस्तमनोहरा इव उपवनश्रिय उद्यानशोभाः संपादयति उत्पादयति। कथंभूते प्रचलाकिनां कुले। शबरशिविरशिखण्डमण्डनोचितकलापे शबराणां शिविरः पेटकस्तस्य शिखण्डो मस्तकानि तेषां मण्डनोचिता भूषणयोग्याः कलापाः पिच्छसमूहा यस्य स तथोक्तं तस्मिन्। पुनः कथंभूते। पुलिन्दसुन्दरीवतंसीकृतचन्द्रके पुलिन्दानां सुन्दरीभिर्वतंसीकृतानि मुकुटीकृतानि कर्णपूरीकृतानि वा चन्द्रकानि पिच्छाग्राणि यस्य तत्तथोक्तं तस्मिन्। पुनः कथंभूते। वनेचरवनिताहितवर्हवलयविनोदे वनेचराणां भिल्लानां वनितास्ताभ्यो हितो गुणकारको बर्हवलयविनोदः पिच्छकङ्कणक्रीडा यस्य तत्तथोक्तं तस्मिन्। पुनः कथंभूते। नरेश्वरश्रीलाञ्छनपिच्छमूर्च्छिनि नरेश्वराणां श्रीकारयोग्यानि लाञ्छनानि चिह्नानि यानि पिच्छानि तैर्मूर्च्छति वृद्धिं गच्छति इत्येवंशीलं तत्तथा तस्मिन्। पुनः कथंभूते। महामुनिसंयमोपधिनिवन्धनाङ्गरुहसंकुले महामुनीनां दिगम्बराणां संयमोपधिः संयमोपकरणं पिच्छिका तस्य निवन्धनं कारणं अङ्गरुहा रोमाणि तैः संकुलं व्याप्तं तथोक्तं तस्मिन्। प्रचलाकिनां कुले अहमवाप्तजन्मेति संवन्धः। कदाचित्कस्मिंश्चिद्दिवसरे पतङ्गजवनामकस्य पक्कणपतेः शबरालयस्वामिन आत्मजेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दसमग्रमग्रेसरतरुणतररविकरनिकरनिरुध्यमानमार्गोदयः, वेशन्तोपान्तात्तोयमादायासंजातकलापोच्चयोऽप्यागामितत्संपत्तिवशात्प्रवृत्तप्रतीचीनचरणप्रचारः, सच्चरित्रचिक्कस्य दुराचारचिक्कणस्य **पक्कणपतेः पतङ्गजवस्या**त्मजेन **गजशल्क**नाम्ना तत्रैव शकुन्तवातप्रमीसमूहमुपहन्तुमागतेन, सिन्धुररुधिरारुणहरिकण्ठकेशकान्तिभिर्दृष्टिदीधितिभिर्वीतंसजालानीव दिक्षु प्रतन्वता, मयूरापाङ्गपाण्डुरैर्दशनदीप्तिप्रसरैराशामुखेषु मृगबन्धानिव प्रसारयता,

---

पुत्रेण गजशल्कनाम्ना अहं अवलोकितः । कथंभूतोऽहम् । वेशन्तोपान्तात् अन्यसरोवरसमीपात् तटात् तोयमादाय पीत्वा प्रवृत्तप्रतीचीनचरणप्रचारः प्रवृत्तः संजातः प्रतीचीनो विपरीतः पश्चाद्गमनः चरणप्रचारः पादप्रवर्तनं यस्य मम प्रवृत्तप्रतीचीनचरणप्रचारस्तोयं पीत्वा पश्चात् चरणप्रचारः । कस्मात् कारणात् । संजातपिच्छकलापस्तु वलकत्वान्न वर्तते यदार्द्रितभवन् भयात् पश्चाच्चरणाभ्यां गच्छतीत्याह । तत्कारणमाह—असंजातकलापोच्चयोऽपि अनुत्पन्नपिच्छकलापसमूहोऽपि आगामितत्संपत्तिवशात् आगामिनी भविष्यन्ती तस्य कलापोच्चयस्य या संपत्तिः संपत् तस्या वशात् कारणात् । कथंभूतं तोयम् । स्वनिःश्वासावसानसमीरसारितस्वल्पतरङ्गपरम्परम् स्वस्य निःश्वासस्य अवसानसमीरेन जलाचमनपाश्चात्यवायुना सारिता प्रेरिता स्वल्पतरङ्गपरम्परा अल्पलहरीश्रेणयो यस्य तोयस्य तत्तथोक्तम् । पुनः कथंभूतं तोयम् । अतिजरण्डशिखण्डमण्डलीगतिस्खलितकलुषप्रसरम् अतिजरण्डा अतिवृद्धा या शिखण्डमण्डली चूडामण्डली तस्या गत्या आन्दोलितेन स्खलितः स्फोटितः कलुषप्रसरः कश्मलव्याप्तिर्यस्य तोयस्य तत्तथोक्तम् । कथंभूतोऽहम् । किमप्यपूर्वं अनिर्वचनीयं खेदसमग्रं दुःखपरिपूर्णं यथा भवत्येवं अग्रेसरतरुणतररविकरनिकरनिरुध्यमानमार्गोदयः अग्रेसरा अग्रगामिनो ये तरुणतराः प्रौढयौवना रविकरनिकराः प्रस्तावान्मयूरसमूहास्तैर्निरुध्यमान आद्रियमाणः मार्गोदयो अध्वाग्रं यस्य मम स तथोक्तः । कथंभूतस्य पतङ्गजवस्य आरण्यचाण्डालस्य । सच्चरितचिक्कस्य सदाचारालसस्य । पुनः कथंभूतस्य पतङ्गजवस्य । दुराचारचिक्कणस्य पापाचारेषु आसक्तस्य । कथंभूतेन गजशल्कनाम्ना । तत्रैव वेशन्तोपान्ते शकुन्तवातप्रमीसमूहं शकुन्ताः पक्षिणो वातप्रम्यो वायुदेवतावाहनमृगास्तेषां समूहं यूथं कर्मतापन्नं उपहन्तुं मारयितुं आगतेनोपढौकितेन । किं कुर्वता गजशल्कनाम्ना । दृष्टिदीधितिभिर्लोचनकिरणैः वीतंसजालानि वन्धनसमूहान् दिक्षु दिशासु प्रतन्वता विस्तारयतेव । उक्तं च—'वीतं शस्त्रोपकरणं वन्धने मृगपक्षिणाम् ।' कथंभूतैर्दृष्टिदीधितिभिः । सिन्धुररुधिरारुणहरिकण्ठकेशकान्तिभिः सिन्धुरस्य यूथनाथस्य गजस्य रुधिरेण अरुणा अव्यक्तरागा य हरिकण्ठकेशाः तद्वत्कान्तिः शोभा येषां दृष्टिदीधितीनां ते तथोक्तास्तैः । पुनः किं कुर्वता गजशल्कनाम्ना । दशनदीप्तिप्रसरैः आशामुखेषु मृगबन्धान् मृगबन्धनानि प्रसारयतेव रोपयतेव । कथंभूतैर्दशनदीप्तिप्रसरैः । मयूरापाङ्गपाण्डुरैः .... । पुनः किं कुर्वता गजशल्कनाम्ना । भाविभवान्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाविभवान्धकारपटलैरिव लताप्रतानदलैस्तिरोहिततनुना, शनिनेव मषीमाषाङ्गारकालकायेन पलिशदेशाश्रयिणा तेनान्तकेनेवावलोकितः। पक्षाणामद्यापि पक्षतिप्रदेश एवासादितोदयत्वादतिदीनरयत्वाच्च रोदस्योरन्यतरस्मिन्नपि विषये विहर्तुमसमर्थः, परिगृह्य पञ्जरे कृतकारागारक्रियः, प्ररूढप्रचलाकप्रचयश्च, तज्जनकेन पौराङ्गनापाङ्गपताकितशालायां **विशालायां** पुरि **यशोमति**महाराजायोपायनीकृतः, समवलोक्य च तां संसारसारावनीं तन्निसर्गादेव सुन्दरं मन्दिरं च दैवादाविर्भूतभूतभवसंभालनः,

---

कारपटलैरिव लताप्रतानदलैस्तिरोहिततनुना लतानां वल्लीनां प्रतानः समूहस्तस्य दलैः तिरोहिततनुना आच्छादितशरीरेण। कथंभूतैर्लताप्रता नदलैः। भाविभवान्धकारपटलैरिव भावि भविष्यत् यद्भवान्धकारं जन्मजन्माज्ञानं तस्य पटलैरिव अज्ञानान्धकारसमूहैरिव। पुनः किं कुर्वता गजशल्कनाम्ना। मषीमाषाङ्गारकालकायेन मषी च कज्जलं माषाश्च वृष्यकणा अङ्गाराश्च विध्यताग्निखण्डानि तद्वत् कालः कृष्णवर्णः कायो यस्य स तथा तेन। केनेव। शनिनेव सप्तमग्रहेणेव। पुनः किं कुर्वता गजशल्कनाम्ना। पलिशदेशाश्रयिणा यत्र स्थित्वा मृगा हन्यन्ते स प्रदेशः पलिश उच्यते। तं देशमाश्रयतीत्येवमवश्यं पलिशदेशाश्रयी तेन ईदृग्विधेन तेन गजशल्कनाम्ना पतङ्गजवपुत्रेण अन्तिकेनेव यमरूपेणेव। अहमवलोकित इति संबन्धः। कथंभूतोऽहम्। रोदस्योर्द्यावाभूम्योरन्यतरस्मिन्नपि विषये स्थाने विहर्तुं पर्यटितुमसमर्थः। न आकाशे न भूमौ विहर्तुं समर्थ इत्यर्थः। कस्माद्विहर्तुमसमर्थ इत्याह—पक्षाणां पिच्छानां अद्यापि पक्षतिप्रदेशे एव पक्षतिः पक्षमूलेन यः प्रदेश एव आसादितोदयत्वात् प्राप्ताप्रादुर्भूत्युदयत्वात्। तेन कारणेन आकाशे उदेतुं असमर्थः। तर्हि भूमौ कथं विहर्तुं असमर्थ इत्याह—अतिदीनरयत्वाच्च अतिदीनवेगत्वाच्च। तेन भूमावपि विहर्तुं असमर्थः। परिगृह्य मां गृहीत्वा पञ्जरे पक्षिगृहे कृतकारागारक्रियः। बन्दीकृत इत्यर्थः। पुनः कथंभूतोऽहम्। प्ररूढप्रचलाकप्रचयश्च प्रादुर्भूतपिच्छकलापश्च। पुनः कथंभूतोऽहम्। तज्जनकेन गजशल्कस्य पित्रा पतङ्गजवेन विशालायां पुरि उज्जयिन्यां पत्तने यशोमतये महाराजाय उपायनीकृतः प्राभृतीकृतः। कथंभूतायां विशालायाम्। पौराङ्गनापाङ्गपताकितशालायाम् पौराङ्गनानां अपाङ्गाः कटाक्षप्रान्तास्तैः पताकिता ध्वजसंयुक्तीकृताः शाला गृहाणि यत्र सा तथा तस्याम्। कथंभूतोऽहम्। दैवात् आविर्भूतभवसंभालनः। प्रकटीभूतजातिस्मर इत्यर्थः। किं कृत्वा पूर्वं जातिस्मरो जातः। तां विशालानाम्नीं पुरीं समवलोक्य दृष्ट्वा। कथंभूतां ताम्। संसारसारावनीं संसारे यानि साराणि पुरुषरत्नादीनि तेषां अवनीं भूमिम्। न केवलं तां समवलोक्य। तत्पूर्ववर्णनोपेतं निसर्गादेव सुन्दरं मन्दिरं प्रासादं च समवलोक्य। पुनः कथंभूतोऽहम्। इत्यमुना प्रकारेण क्षणं उपजातान्तर्बाष्पोदन्त उपजात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सैवेयं नगरी, तदेव भवनं, ता एव केलीधराः,
सैवैषा वनभूः, स एव सरसीसारे विलासाचलः, ।
सैवासौ वनिता, स एव तनयस्ते चैव मे बान्धवा-,
श्चित्रं केवलमेक एव हि कथं जातोऽहमन्याकृतिः ॥

इति क्षणमुपजातान्तर्बाष्पोदन्तः, पुनरन्तःपुरकृशोदरीणां निवासतरुस्कन्धावरोहकाशैरिवोत्सङ्गदेशैर्गिरिशिखरैरिव पयोधरैः प्रमदवनवल्लरीगहनैरिव बाहूपगूहनैः सरोजसरःप्राणैरिव मुखाघ्राणैः शयनकुञ्जकेलिचूलैरिव कुन्तलजालैर्विनोद्यमानः, पुत्र इव प्रियोपचारेषु सहचर इव विहारकर्मसु दीपोत्सवादिगृहः पर्वप्रासाद इव मण्डनविधिषु शिष्य इव नर्तनक्रियासु प्रणयस्थानमिवापरास्वपि क्रीडासु वरारोहाणां च स्वयं

उत्पन्नः अन्तर्बाष्पस्य लोचनमध्ये अश्रुपातस्य उदन्तो वृत्तान्तो यस्य स तथा ॥

इतीति किम्—**सैवेयमित्यादि**। सैव नान्या इयं उज्जयिनी नगरी वर्तते। तदेव त्रिभुवनतिलकनामधेयं भवनं राजसदनं वर्तते। ता एव केलीधराः क्रीडाभूमयः वर्तन्ते। सैवैषा वनभूर्वर्तते। स एव पूर्वोक्त एव,सरसीसारे सरोवरसमीपे विलासाचलः क्रीडापर्वतो वर्तते। सैव असौ वनिता जनितात्यन्तरागा अमृतमतिमहादेवी स्त्री वर्तते। स एव यशोमतिनाम तनयो वर्तते। त एव च मे मम बान्धवाः कुटुम्ववर्गाः वर्तन्ते। चित्रं आश्चर्यमेतत्। केवलं एक एव हि कथं अन्याकृतिरन्यादृशोऽहं जात इति। समुच्चयोपमालंकारः॥

पुनः कथंभूतोऽहम्। पुनः पुनरपि अन्तःपुरकृशोदरीणां शुद्धान्तस्त्रीणां वरारोहाणां वा उत्सङ्गदेशैः उपरितनप्रदेशैर्विनोद्यमानः। कथंभूतैरुत्सङ्गदेशैः। निवासतरुस्कन्धावरोहकाशैरिव आवासवृक्षप्रकाण्डावरोहावतारसदृशैरिव। न केवलमुत्सङ्गदेशैः, पयोधरैश्च विनोद्यमानः। कथंभूतैः पयोधरैः। गिरिशिखरैरिव। न केवलं तैः, वाहूपगूहनैश्च विनोद्यमानः। कथंभूतैर्वाहूपगूहनैः। प्रमदवनवल्लरीगहनैरिव निशान्तसारीणां क्रीडोचितोद्यानवल्लीवनैरिव। न केवलं तैः, मुखाघ्राणैः मुखचुम्बनैश्च विनोद्यमानः। कथंभूतैर्मुखाघ्राणैः। सरोजसरःप्राणैरिव कमलमण्डितसरोवरजीवितैरिव। न केवलं तैः, कुन्तलजालैश्च विनोद्यमानः। कथंभूतैः कुन्तलजालैः। शयनकुञ्जकेलिचूलैरिव शय्यातरुक्रीडाशिखण्डैरिव। पुनः कथंभूतोऽहम्। प्रतिनिकायं गृहं गृहं प्रति उपचार्यमानः प्रतिपाल्यमानः। क इव। प्रियोपचारेषु हितकरणेषु पुत्र इव उपचार्यमानः। पुनः क इव। विहारकर्मसु सहचर इव उपचार्यमानः। पुनः क इव। मण्डनविधिषु भूषाविधानेषु पर्वप्रासाद इव दीपोत्सवादौ गृहमिवोपचार्यमानः। पुनः क इव। नर्तनक्रियासु शिष्य इवोपचार्यमानः। पुनः क इव। अपरास्वपि क्रीडासु रमणक्रियासु प्रणयस्थानमिव प्रेमवानिवोपचार्यमानः। वरारोहाणां मत्तकामिनीनां च पुनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नखनिस्तुषितमण्डलैः कलमतन्दुलैः प्रतिनिकायमुपचाय्यमानः, क्षितिपतिना च तेन जेमनावसरेषु स्वहस्तवर्तितकायैः प्रथमकवलैः संभाव्यमानः, तत्र लक्ष्मीविलासाकुले राजकुले सभास्तार इव प्रगल्भप्रचारः सुखेनाहमासांचक्रे।

इतश्चास्ति खलु विन्ध्याद्दक्षिणस्यां दिशि त्रिदशदेशाश्रयश्रीनिकटः **करहाटो** नाम जनपदः। यत्र

सस्यसंपत्तिसंक्षिप्तसीमाभुवः, प्रचुरपथिकप्रियापणितपथिवस्तवः।
सत्रवापीप्रपारामरम्योदयाः, पद्मिनीखण्डताण्डविततोयाशयाः।
श्रीविलासोत्सवस्खलितसुरसमितयः, फुल्लफलपल्लवोल्लासिवनवृत्तयः।

स्वयं आत्मनैव नखनिस्तुषितमण्डलैः नखैर्दूरीकृतनखसमूहैरेवंविधैः कलमतण्डुलैः कुमुदशालिसदकैरुपचाय्यमानः। क्षितिपतिना च राज्ञा च तेन यशोमतिना जेमनावसरेषु भोजनप्रस्तावेषु स्वहस्तवर्तितकायैर्निजकरनिर्मापितकायैः प्रथमकवलैरग्रपिण्डैः संभाव्यमानः संतोष्यमानः सन्। तत्र तस्मिन् लक्ष्मीविलासाकुले श्रीभोगपरिपूर्णे राजकुले राजमन्दिरे सभास्तार इव सभ्य इव प्रगल्भप्रचारः प्रौढप्रवेशः सुखेनानायासेन अहं मयूर आसांचक्रे स्थितवान्॥

इतश्च एकस्मिन् पार्श्वे खलु विन्ध्यात् विन्ध्याचलनामपर्वतात् दक्षिणस्यां दिशि अपाच्यां ककुभि करहाटो नाम जनपदोऽस्ति। कथंभूतः करहाटः। त्रिदशदेशाश्रयश्रीनिकटः त्रिदशदेशाश्रया स्वर्गसंबन्धिनी श्रीः शोभा निकटे श्रियो वा निकटः समीपवर्ती स तथोक्तः। यत्र करहाटे ग्रामविनिवेशिकाः ग्रामविन्यासाः सन्ति। कथंभूताः। सस्यसंपत्तिसंक्षिप्तसीमाभुवः सस्यानां संपत्तयः श्रियो यथा वा ताभिः संक्षिप्ताः व्याप्ताः सीम्नां भुवो भूमयो येषु ग्रामविनिवेशिकेषु ते तथोक्ताः। 'रैश्चतुर्भिर्युता स्रग्विणी संमता'। पुनः कथंभूताः। प्रचुरपथिकप्रियापणितपथिवस्तवः प्रचुराभिः बह्वीभिः पथिकप्रियाभिः अध्वगभार्याभिः पणितानि क्रीतानि पथिवस्तूनि मार्गवस्तूनि येषु ते तथोक्ताः। पुनः कथंभूताः। सत्रवापीप्रपारामरम्योदयाः सत्राणि उपवनानि, वाप्यश्च दीर्घिकाः, प्रपाश्च पानीयशालाः, आरामाश्च उद्यानानि च तानि तै रम्या मनोहरा उदयाः प्रादुर्भावा उन्नतयो वा येषां ते तथोक्ताः। पुनः कथंभूताः। पद्मिनीखण्डताण्डविततोयाशयाः पद्मिनीखण्डैः कमलिनीवनैः ताण्डविता नर्तितास्तोयाशया तडागानि यत्र ते तथोक्ताः। पुनः कथंभूताः। श्रीविलासोत्सवस्खलितसुरसमितयः श्रीविलासोत्सवैः लक्ष्मीभोगमहोत्सवैः स्खलिताः तिरस्कृताः सुराणां समितयः समूहा यैस्ते तथा। पुनः कथंभूताः। फुल्लफलपल्लवोल्लासिवनवृत्तयः फुल्लानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिकवधूरुतमनोहारिसर्वर्तवः, सकलसंसारसुखसेवितागन्तवः ।
समरभरभागिभटभाववादोत्कटाः, खेलदुन्मदवृषोत्खाततटिनीतटाः ।
त्यागभोगप्रभावाद्भुतख्यातयः, शुद्धवर्णाश्रमाचरितविगतेतयः ।
प्रवणशरणागतोद्धरणकुलकीर्तयः, सन्ति धर्मार्थकामेषु समनीतयः ।
सुकृतफलभूमयो ग्रामविनिवेशिकाः, कामितावाप्तिविजितामरोद्देशकाः ॥
अपि च यत्र

सोत्सेधसौधशिखराश्रयशातकुम्भ-
शुम्भत्प्रभाप्रभु नभः प्रविभाव्य भूयः ।

फलानि व्युष्टयः पल्लवाश्च तैरुल्लासिन उल्लसनशीला वनवृत्तयः उद्यानवृत्तयो यत्र ते तथा । पुनः कथंभूताः । पिकवधूरुतमनोहारिसर्वर्तवः पिकवधूनां रुतैर्मनोहारिणः सर्वर्तवः हिमशिशिरवसन्तग्रीष्मवर्षाशरदो यत्र ते तथा । पुनः कथंभूताः । सकलसंसारसुखसेवितागन्तवः सकलैः संसारसुखैरिष्टस्रग्वनिताचन्दनादिभिः सेविता आश्रिता आगन्तवः पथिका यत्र ते तथा । पुनः कथंभूताः । समरभरभागिभटभाववादोत्कटाः समरभरं संग्रामभारं भजन्ते इत्येवंशीलाः समरभरभागिनस्ते च ते भटास्तेषां भावोऽभिप्रायस्तेन वादो युद्धं तेन उत्कटाः उल्वणाः । पुनः कथंभूताः । खेलदुन्मदवृषोत्खाततटिनीतटाः खेलन्त उन्मदा हर्षवन्तो ये वृषाः तैरुत्खातानि पतितानि तटिनीतटानि नदीकूलानि येषु ते तथा । पुनः कथंभूताः । त्यागभोगप्रभावाद्भुतख्यातयः त्यागभोगयोर्लक्ष्मीणां दानानुभवनयोः प्रभावेण महिम्ना अद्भुता आश्चर्यकारिणी ख्यातिः प्रसिद्धिर्येषां ते तथोक्ताः । पुनः कथंभूताः । शुद्धवर्णाश्रमाचरितविगतेतयः शुद्धा असंकीर्णा ये वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः, आश्रमाश्च ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चेति चत्वार आश्रमास्तेषां आचरितैराचरणैर्विगता विनष्टा ईतयो यत्र ते तथा । उक्तं च—'अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः । स्वचक्रं परचक्रं वा सप्तैते ईतयः स्मृताः ॥' पुनः कथंभूताः । प्रवणशरणागतोद्धरणकुलकीर्तयः प्रवणा अकुटिला ये शरणागतास्तेषामुद्धरणे रक्षणे कुलागता कीर्तिर्यत्र ते तथा । पुनः कथंभूताः । धर्मार्थकामेषु समनीतयः धर्मश्च अर्थश्च कामश्च तेषु समनीतयः समानन्यायाः । धर्मं विनाश्य धनं नोपार्जयन्ते, अर्थं विनाश्य भोगान्भुञ्जते, भोगान्विनाश्य धर्मार्थौ न क्रियते इति भावः । पुनः कथंभूताः । सुकृतफलभूमयः सुकृतस्य यानि फलानि तेषां भूमयः स्थानानि । पुनः कथंभूताः । कामितावाप्तिविजितामरोद्देशकाः कामितानां वाञ्छितफलानां अवाप्तिः प्राप्तिस्तया विजिता अमरोद्देशकाः स्वर्गलोका यैस्ते तथा । संकरालंकारः ॥

अपि च यत्र करहाटदेशे । **सोत्सेधेत्यादि** । यत्र कोका दिवापि कान्ताश्चक्रवाकीः सरःसु रहन्ति परित्यजन्ति । कस्मात् । संध्यागमादिव यथा संध्यागमे कोका कोकीस्त्यजन्ति । किं कृत्वा पूर्वम् । भूयो नभः प्रविभाव्य दृष्ट्वा । कथंभूतं नभः । सोत्सेधसौधशिख-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संध्यागमादिव दिवापि रहन्ति कान्ताः
कोकाः सरःसु कृतकूजितकण्ठपीठाः ॥

तत्र भवत इव सकलगोमण्डलाधिपतेर्गोधनाभिधानवसतेरस्ति खलु गोकुलविशालं **श्रीशालं** नाम धनधान्यधामारामनेदिष्ठं गोष्ठम्। यत्क्वचिदुन्निगलमण्डलवालाकुलितवस्तवर्करकम्, क्वचिद्गोपालपोतपारिप्लवोपदूयमानवृद्धवृष्णिकम्, क्वचिद्वत्सेक्षणक्षरत्स्तनधेनुदुग्धधाराधाव्यमानधरापीठम्, क्वचित्कालशेयकलशराशिविश्राणनप्रीयमाणातिथिपेटम्, क्वचित्पवनविनिवृत्तनिचिकीनिटिलनिकटनिक्षिप्यमाणदधिदर्भदूर्वाक्षतप्रसवम्, क्वचिद्दलित-

---

राश्रयशातकुम्भशुम्भत्प्रभाप्रभु सोत्सेधा उन्नता ये सौधास्तेषां शिखराश्रयशातकुम्भं सुवर्णं तस्य शुम्भन्ती शोभमाना या प्रभा तस्याः प्रभु व्यापकं तत्तथोक्तम्। कथंभूताः कान्ताः। कृतकूजितकण्ठपीठाः कृतकूजितं कृतशब्दं कण्ठपीठं यासां तास्तथा। कोकानामपि इदमेव विशेषणम्। तदा कृतकूजितानि कण्ठपीठानि येषां ते। हेतूपमालंकारः, भ्रान्तिमानलंकारश्च ॥

हे राजन् हे मारदत्त महाराज, तत्र करहाटदेशे गोधनाभिधानवसतेः गोविन्दस्य गोधननाम्नः गोष्ठं श्रीशालं नाम गोकुलमस्ति। कथंभूतस्य गोधनाभिधानवसतेः। सकलगोमण्डलाधिपतेः सकलं च तद्गोमण्डलं सुरभीनां समूहस्तस्याधिपतिस्तस्य। कस्येव। भवत इव यथा भवान् सकलगोमण्डलाधिपतिः सर्वभूमण्डलस्य अधिपतिर्वर्तते। कथंभूतं गोष्ठम्। गोकुलविशालं अघ्न्यानां समूहैर्बहुलम्। पुनः कथंभूतम्। धनधान्यधाम धनानां धान्यानां च धाम स्थानं वर्तते। पुनः कथंभूतम्। आरामनेदिष्ठं आरामाणां नेदिष्ठं समीपवर्ति। यद्गोष्ठं क्वचित् कस्मिंश्चित्स्थाने उन्निगलमण्डलवालाकुलितवस्तवर्करकम् उन्निगला बन्धनरहिता ये मण्डलवालाः शुनकशिशवस्तैराकुलिता विह्वलीकृता वस्तानां छागानां वर्करकाः शिशवो यत्र तत्तथोक्तम्। पुनः कथंभूतम्। क्वचित् गोपालपोतपारिप्लवोपदूयमानवृद्धवृष्णिकम् गोपालपोतानां पारिप्लवेन उपदूयमाना वृद्धवृष्णिका यत्र तत्तथोक्तम्। अत्र पारिप्लवं मैथुनक्रिया ज्ञातव्या। पुनः कथंभूतम्। क्वचित् वत्सेक्षणक्षरत्स्तनधेनुदुग्धधाराभिर्धाव्यमानं प्रक्षाल्यमानं धरापीठं यत्र तत्तथोक्तम्। पुनः कथंभूतम्। क्वचित् कालशेयकलशराशिविश्राणनप्रीयमाणातिथिपेटम् कालशेयस्य तक्रस्य कलशराशीनां विश्राणनेन प्रीयमाणो अतिथीनां पेटः समूहो यत्र तत्तथोक्तम्। पुनः कथंभूतम्। क्वचित् पवनविनिवृत्तनिचिकीनिटिलनिकटेषु ललाटपरिभागेषु निक्षिप्यमाणाः दीयमानाः दधिदर्भदूर्वाक्षतप्रसवा यत्र तथोक्तम्। पुनः कथंभूतम्। क्वचित् दलितदामदासेरकार्भकभ्रान्तिशङ्कितशकृत्करिखुरक्षुद्यमानाज्ञनिदेशपल्लवम् दलितदामदासेरकार्भकाणां त्रुटितबन्धनोष्ट्रबालकानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दामदासेरकार्भकभ्रान्तिशङ्कितशक्तकरिखुरक्षुद्यमानाघ्रनिदेशपल्लवम्, क्वचित्तरुणतराभीरोद्घूर्णघनद्रुघणघोरघातघूर्ण्यमानरणरभसक्षोभसंधुक्षितरक्ताक्षकक्षम्, क्वचिदुन्माथनाथहरियूथयुद्धबाध्यमानप्रष्ठौहीपक्षम्, क्वचिद्बष्कयणीक्षीरप्रतीक्ष्यमाणगृहगृहावग्रहणीगृहदेवताकुलम्, क्वचिद्गोमिथुनपरिणयोत्फुल्लपल्लवस्वावासिनीजनोच्चार्यमाणमङ्गलम्, क्वचिद्दधिमन्थमन्थानध्वनिविनिवर्त्यमानभवनवर्हिणम्, क्वचिन्माहेयीदोहव्याहाराहूयमानपयःपानपारपथिकगणम्, क्वचित्संदानदामिनीच्युतचपलतरतर्णकक्षोदरुदितदारकदीयमानजरतीरक्षाविधानम्, सुरसुरभिनिधानमिवैवमपराभिरपि गणतिथि-

---

भ्रान्त्या भ्रमणेन शङ्किता भीता ये शक्तकर···स्वर्णकास्तेषां खुरैः क्षुद्यमाना अघ्रनिदेशपल्लवं तृणभक्षणद्रोणीप्रवालानि यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् तरुणतराभीरोद्घूर्णघनद्रुघणघोरघातघूर्ण्यमानरणरभसक्षोभसंधुक्षितरक्ताक्षकक्षम् तरुणतराः प्रौढयौवना ये आभीरा महाशूद्रास्तैरुद्घूर्णा उद्भ्रामिता ये घनाः प्रचुरा द्रुघणा मुद्गरास्तेषां घोरघातैर्निष्ठुरप्रहारैर्घूर्ण्यमाना मूर्च्छां प्राप्नुवन्तो रणरभसक्षोभेण युद्धवेगसंचलनेन संधुक्षितं क्रोधमितं रक्ताक्षाणां महिषाणां कक्षं समूहो यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् उन्माथनाथहरियूथयुद्धबाध्यमानप्रष्ठौहीपक्षम् उन्माथा बलवत्तरा उन्मृता ये नाथहरयो वृषभास्तेषां यूथः समूहस्तस्य युद्धेन संप्रहारेण बाध्यमानो लोठ्यमानः प्रष्ठौहीनां बालगार्भिणीनां गवां पक्षः परिग्रहो यत्र गोष्ठे तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् बष्कयणीक्षीरप्रतीक्ष्यमाणगृहगृहावग्रहणीगृहदेवताकुलम् बष्कयणीनां प्रौढवत्सानां गवां क्षीरेण प्रतीक्ष्यमाणं पूज्यमानं गृहस्य या गृहावग्रहणी देहली तस्या गृहदेवतानां कुलं यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् गोमिथुनपरिणयोत्फुल्लपल्लवस्वावासिनीजनोच्चार्यमाणमङ्गलम् गोमिथुनस्य धेनुवृषभस्य यः परिणयो विवाहस्तस्मिन् उत्फुल्लपल्लवा विकसितपुष्पपल्लवसहिता याः स्वावासिन्यः अविधवाः स्त्रियस्तासां जनेन समूहेन उच्चार्यमाणं उद्गीयमानं मङ्गलं गीतधवलं यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् दधिमन्थमन्थानध्वनिविनिवर्त्यमानभवनवर्हिणम् दधिमन्थे दध्यवलोडने योऽसौ मन्थानध्वनिर्मथनशब्दस्तेन विनिवर्त्यमानाः नर्तनं कार्यमाणा भवनवर्हिणो यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् माहेयीदोहव्याहाराहूयमानपयःपानपारपथिकगणम् माहेयीनां गवां दोहव्याहारेण दोहनध्वनिना आहूयमानाः पयःपानाय क्षीरपानाय पारपथिकानां परदेशभवाध्वगानां गणाः समूहा यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् संदानदामिनीच्युतचपलतरतर्णकक्षोदरुदितदारकदीयमानजरतीरक्षाविधानम् संदानदामिनीच्युतो बन्धनार्गलनिर्गतश्चपलतरो योऽसौ तर्णको वत्सस्तस्य क्षोदेन चूर्णनेन रुदितो रोदनं प्राप्तो योऽसौ दारकः बालकस्तस्य दीयमानं अर्प्यमाणं जरतीनां रक्षाविधानं रक्षणकरणं यत्र तत्तथोक्तम् । पुनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिर्गृष्टिभिः पूगतिथिभिः परेष्टुकाभिः सङ्घतिथिभिः समांसमीनाभिः बहुतिथिभिः सुव्रताभिः संख्यातीताभिः पलिक्नीभिः विगतवेहद्वसावतोकासंधिनीसृष्टिभिरुस्राभिर्वाजिवेसरवालेयकारेयजातिभिश्च प्रभूतम्, दधिदुग्धघृतोदधीनामिव समवायभूतम् । तत्र तस्य विक्रमासरालस्य व्रजपालस्य सद्मनि मृगदंशवंशे सा मदीया **चन्द्रमति**र्माता जवस्थानरूपातिरेकैरतिशयितसकलशालावृकलोकः कौलेयको बभूव जातयुवभावश्च । योग्यस्वभावः खल्वयं श्वेतपिङ्गलपराक्रमो निसर्गान्मार्गायुकक्रमश्च विश्वकद्रूरवनीन्द्राणां

कथंभूतम् । प्रभूतं प्रचुरम् । काभिः प्रभूतम् । एवं अपराभिरपि अन्याभिरपि गणतिथिभिर्बहुभिर्गृष्टिभिः सकृत्प्रसूताभिर्गोभिः । किमिव । सुरसुरभिनिधानमिव कामधेनूनां स्थानमिव । पुनश्च काभिः प्रभूतम् । पूगतिथिभिः बहुभिः परेष्टुकाभिः प्रचुरप्रसूतिभिर्गोभिः । पुनश्च काभिः प्रभूतम् । सङ्घतिथिभिर्बहुभिः समांसमीनाभिः प्रतिवर्षप्रसूतिभिर्गोभिः । समासमान्यायैव(?)प्रतिवर्षं प्रसूयते । पुनश्च काभिः प्रभूतम् । बहुतिथिभिर्बहुभिः सुव्रताभिः सुखसंदोहाभिर्गोभिः । पुनश्च काभिः प्रभूतम् । संख्यातीताभिः बहुभिः पलिक्नीभिः अल्पदिनगर्भाभिर्गोभिः । कथंभूताभिर्गोभिः । विगतवेहद्वसावतोकासंधिनीसृष्टिभिः वेहच्च गलितगर्भा गौः, वसा च वन्ध्या गौः, अवतोका च विषाणविकला गौः, संधिनी च गर्भिणी सती वृषभेणाक्रान्ता गौः, तासां सृष्टिर्वेहद्वसावतोकासंधिनीसृष्टिः[1] । विगता विनष्टा वेहद्वसावतोकासंधिनीसृष्टिर्यासां गवां तास्तथोक्तास्ताभिः । एताभिर्दोषिणीभिर्गोभी रहितं गोष्ठमित्यर्थः । उस्राभिर्गोभिः प्रभूतम् । पुनः कथंभूतं गोष्ठम् । वाजिवेसरवालेयकारेयजातिभिः प्रभूतम् वाजिनश्च, वेसराश्च द्विशरीराः, वालेयकाश्च गर्दभाः, आरेयाश्च मेषाः, तेषां जातिभिश्च प्रचुरम् । पुनः कथंभूतम् । दधिदुग्धघृतोदधीनामिव समवायभूतं दधिसागरक्षीरसागरघृतसागराणां समुच्चयमिव भूतम् । तत्र तस्मिन् गोष्ठे तस्य पूर्वोक्तस्य गोधननाम्नो गोकुलपतेः सद्मनि मृगदंशवंशे शुनककुले सा पूर्वोक्ता मदीया चन्द्रमतिर्माता कौलेयको बभूव कुर्कुरः संजातः । कथंभूतस्य गोधननाम्नः । विक्रमासरालस्य पराक्रमबहुलस्य । पुनः कथंभूतस्य । व्रजपालस्य गोकुलरक्षकस्य । कथंभूतः कौलेयकः । जवस्थानरूपातिरेकैः वेगबलरूपाधिकत्वैः कृत्वा अतिशयितसकलशालावृकलोकः अतिशयितः अतिशयं प्राप्तः सकलशालावृकलोकानां मध्ये कुर्कुरजनानां मध्ये अतिशयवानित्यर्थः । पुनः कथंभूतः । जातयुवभावश्च संजातयौवनश्च । तेन गोधननाम्ना दम्पतिना गोकुलस्वामिना तस्यामेव उज्जयिन्यां पुर्यां दैवात् सोऽपि कौलेयकोऽपि यशोमतिमहाराजाय प्राभृतं आनायि प्राभृतीकृतः । किं कृत्वा पूर्वम् । इत्यमुना प्रकारेणानुध्याय चिन्तयित्वा । इतीति किम् । अयं विश्वकद्रूः सारमेयः खलु अवनीन्द्राणां मृगयाविनोदस्य अच्छोदनक्रीडायाः योग्यस्वभावो वर्तते । कथंभूतः । श्वेतपिङ्गल-

---

१. 'समांसमीना तु या सा प्रतिवर्षं प्रजायते' इत्यभिधानचिन्तामणिः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृगयाविनोदस्येत्यनुध्याय तेन दम्पतिना तस्यामेव मालवीमुखेन्दुमण्डनरजन्यामुज्जयिन्यां यशोमतिमहाराजाय दैवात्सोऽपि प्राभृतमानायि । राजा तं नित्यजागरूकसुतमवलोक्य स्वगतम्—

'निर्मांसास्यः कपिलनयनः स्वल्पतीक्ष्णाग्रकर्णः
कुक्षिक्षामः पृथुलजघनः पूर्णवक्षःप्रदेशः ।
दुग्धस्निग्धप्रतनुदशनः सारमेयो महीशा-
माखेटाय प्रजवचरणः किंचिदाभुग्नवालः ॥

मन्ये चानेन शरमासुतेनाकुरङ्गमिव हरिणलाञ्छनम्, अरक्ताक्षमिव महिषवाहनम्, अदंष्ट्रायुधमिवादिवराहचरितम्, अहर्यक्षामिव सिंहवाहिनीम्, असत्त्वसंचाराश्च वनावनीधरधराः । मृगयामनोरथाश्चाद्य मे फलिष्यन्ति कामितकथाः ।' प्रकाशम्—'मद्विनोदानन्दनमते पशुपते, इत

पराक्रमः श्वेतपिङ्गलवत् सिंहवत् पराक्रम उद्यमो यस्य स तथा । पुनः कथंभूतः । निसर्गात् मार्गायुकक्रमः मार्गायुकाः मृगयाकुशलाः क्रमाश्चत्वारः पादा यस्य स तथा । कथंभूतायामुज्जयिन्याम् । मालवीमुखेन्दुमण्डनरजन्याम् मालवीनाम देशस्त्रीणां मुखानि तान्येव इन्दवस्तेषां मण्डने कान्तिकरणे रजनी पूर्णिमारात्रिस्तस्याम् । राजा यशोधरमतिस्तं नित्यजागरूकसुतं श्वानं अवलोक्य स्वगतं आत्मगतं विचारयति ॥

निर्मांसास्य इत्यादि । महीशानां आखेटाय पापर्द्धये सारमेय ईदृशो भवति । कथंभूतः । निर्मांसास्यः दुर्बलमुखः । पुनः कथंभूतः । कपिलनयनः पीतरक्तलोचनः । पुनः कथंभूतः । स्वल्पतीक्ष्णाग्रकर्णः स्वल्पं मनाक् तीक्ष्णाग्रौ तीक्ष्णप्रान्तौ कर्णौ यस्य सः । पुनः कथंभूतः । कुक्षिक्षामः············ । पुनः कथंभूतः । पृथुलजघनः············ । पुनः कथंभूतः । पूर्णवक्षःप्रदेशः स्थूलहृदयस्थलः । पुनः कथंभूतः । दुग्धस्निग्धप्रतनुदशनः दुग्धवत् स्निग्धाश्चिक्कणाः प्रतनवः सूक्ष्मा दशना यस्य स तथा । पुनः कथंभूतः । प्रजवचरणः························ । पुनः कथंभूतः । किंचिदाभुग्नवालः किंचिन्मनाक् आभुग्नो वक्रो वालः पुच्छो यस्य स तथा । रूपकजातिसमुच्चयालंकारः ॥

मन्येऽहमेवं जाने । अनेन शरमासुतेन हरिणलाञ्छनं चन्द्रं अकुरङ्गमिव मन्ये । चन्द्रस्य कुरङ्गमयं मारयिष्यतीत्यर्थः । महिषवाहनं यमं अरक्ताक्षमिव मन्ये । यमस्यापि महिषं मारयिष्यतीत्यर्थः । आदिवराहचरितं अदंष्ट्रायुधमिव मन्ये वराहरहितं जाने । सिंहवाहिनीं भवानीं अहर्यक्षामिव मन्ये सिंहरहितां जाने । वनावनीधरधराः वनमटवी, अवनीधरः पर्वतः, धरा पृथ्वी, एता असत्त्वसंचाराश्च मन्ये । सत्त्वानां प्राणिनां मृगव्याघ्रवराहभूगोचरप्राणिनः असंचारान् अप्रवेशान् मन्ये । मृगयामनोरथाश्च पापर्द्धिदोहदाश्च अद्य मे मम कामितकथाः फलिष्यन्ति । प्रकाशं स्फुटमाह—मद्विनोदानन्दनमते मत्क्रीडावर्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतः समानीयतामयं यक्षपुरुषः।' पशुपतिः—'यथाज्ञापयति देवः।' राजा प्राप्तमेनं श्वानं समं हस्ताभ्यां परामृश्य प्रलोभ्य तत्प्रियैस्तैस्तैर्वस्तुभिर्निष्ठीव्य च तदानने 'यत्राहं क्वचिदवतिष्ठे तत्रायं वराहवैरी संयमनीयः' इत्युक्त्वा वान्तादगणिमुख्यायाकाण्डमृत्यवे समर्पयामास ।

एवं स्वाचरितोपचितप्रयोगाद्विधिनियोगाद्द्वयोरप्यावयोस्तत्र पूर्वभवानुभूतभूमिव्यासे नृपनिवासे सह संवसतोरेकदा निशान्तनिवासाशयानामन्तःपुरपुरंध्रिकालंकारविकृतकायानां शम्भलीनाममृतमतिमहादेवीदर्शनायाशुप्रकाशितगतिकेलीनां गमनाभिनिवेशवशरसद्रसनामुक्तमणिकिङ्किणीजा-

---

नवुद्धे पशुपते हे शुनकपाल, इत इत एतस्मात् स्थानात् एतस्मिन् स्थाने अयमेष यक्षपुरुषः समानीयतां उपढौक्यताम् । पशुपतिर्ब्रूते—यथा आज्ञापयति देवस्तदहं करोमि । राजा इत्युक्त्वा इति भणित्वा अकाण्डमृत्यवे नाम्ने वान्तादगणिमुख्याय वान्तादानां शुनां ये गणयः प्रतिपालकास्तेषां मुख्यः तस्मै तथोक्ताय समर्पयामास दत्तवान् । इतीति किम् । भो अकाण्डमृत्यो, यत्र क्वचित् अहं अवतिष्ठे तिष्ठामि तत्र स्थाने अयं वराहवैरी श्वा संयमनीयो बन्धनीयः । किं कृत्वा पूर्वमकाण्डमृत्यवे बभाण । एनमेतं श्वानं प्राप्तं समं हस्ताभ्यां परामृश्य स्पृष्ट्वा । पुनः किं कृत्वा पूर्वम् । तत्प्रियैः तस्य वल्लभैस्तैस्तैर्वस्तुभिः प्रलोभ्य लोभयित्वा । पुनः किं कृत्वा पूर्वम् । तदानने तस्य मुखे निष्ठीव्य च ॥

एवममुना प्रकारेण विधिनियोगात् कर्मवशात् द्वयोरपि मयूरशुनकपर्याययोरावयोर्यशोधरचरमयूरचन्द्रमतिचरशुनकयोस्तत्र तस्मिन् त्रिभुवनतिलकनाम्नि नृपनिवासे सह संवसतोः सह तिष्ठतोः । एकदा एकस्मिन् प्रस्तावे सौधस्य अधिरोहणाध्वना आरोहणमार्गेण सप्तमं तलं अध्यारूढोऽस्मि अहं चढितोऽस्मि । कथंभूताद्विधिनियोगात् । स्वाचरितोपचितप्रयोगात् स्वेनात्मना यदाचरितमुपार्जितं कर्म तेनोपचितः पुष्टिं नीतः प्रयोगो व्यापारो यस्य स तथोक्तस्तस्मात् । कथंभूते नृपनिवासे । पूर्वभवानुभूतभूमिव्यासे पूर्वभवे यशोधरचन्द्रमतिभवान्तरे अनुभूतो भुक्तो भूमिव्यासो भूमिविस्तारो यस्य नृपनिवासस्य स तथा तस्मिन् । अहं कथंभूतः सन् सप्तमं तलमारूढः । शम्भलीनां दासीनां नूपुरनादेन मञ्जीरशब्दितेन विनोद्यमानमानसः विनोद्यमानं रम्यमाणं मानसं यस्य स तथा । कथंभूतानां शम्भलीनाम् । निशान्तनिवासाशयानां अन्तःपुरवसतिचेतसाम् । पुनः कथंभूतानां शम्भलीनाम् । अन्तःपुरपुरंध्रिकालंकारविकृतकायानां अन्तःपुरस्य या पुरंध्रिकास्तासामलंकारैर्विकृतो विकारं प्राप्तः कायो यासां तास्तासाम् । पुनः कथंभूतानां शम्भलीनाम्। अमृतमतिमहादेवीदर्शनाय मेलनाय आशु प्रकाशितगतिकेलीनाम्। कथंभूतेन नूपुरनादेन । गमनाभिनिवेशवशरसद्रसनामुक्तमणिकिङ्किणीजालकलकोलाहलेन गमनस्याभिनिवेशोऽभिप्रायस्तस्य वशेन अधीनतया रसञ्छब्दायमानं रसनायां कटिमेखलायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लकलकोलाहलेन सजलजलधरध्वनिनेव नूपुरनादेन विनोद्यमानमानसः **सुभगकंदर्पा**भिधस्य सौधस्याधिरोहणाध्वना सप्तमं तलमध्यारूढोऽस्मि ।

तत्र च क्षणमात्रमिव स्थित्वा प्रतिनिवृत्तासु प्रतीपदर्शिनीष्वहं भूतभवानुभूतभवनभूमिसंभावनाविर्भूतान्तःकरणतया मनाग्विलम्बमानस्ता**ममृतमति**महादेवीं तेन कुब्जेन सह विहितमोहनामवलोक्य प्रवृद्धानवधिक्रोधविधुरधीलोचनः कोपाटोपत्रुटत्त्रोटिशल्कोल्काजालवर्षविष्यन्दनैस्तुण्डतण्डनैः, निबिडावेशवशविशीर्यमाणबर्हविहिताकालकेतूद्गतिभिः पक्षप्रहतिभिः, कीकसावसानविश्रान्तनखमुखमार्गोद्गलद्रुधिरधाराकाण्डताण्डवित-

---

मुक्तं बद्धं यन्मणिकिङ्किणीजालं अनेकविधमाणिक्यघटितसुवर्णक्षुद्रघण्टिकासमूहस्तस्य कलो मधुरो योऽसौ कोलाहलः प्रचुरशब्दस्तेन। पुनः कथंभूतेन नूपुरनादेन । सजलजलधरध्वनिना सजलो जलेन सह वर्तमानो यो जलधरो मेघस्तस्य ध्वनिरिव शब्दो यस्य तेन इव । कथंभूतस्य सौधस्य। सुभगकंदर्पाभिधस्य सुभगकंदर्प इत्यभिधा नाम यस्य तथा तस्य ॥

तत्र तस्मिन् सुभगकंदर्पनामसौधसप्तमतले मनाग्विलम्बमानः सन् तेन शुनीसूनुना चन्द्रमतिचरकुर्कुरेण समवर्तिवशं यमाधीनां दशां अहं आनिन्ये प्रापितः । कया कृत्वा मनाग्विलम्बमानः । भूतभवानुभूतभवनभूमिसंभावनाविर्भूतान्तःकरणतया भूतोऽतीतो योऽसौ भवो यशोधरभवान्तरं तस्मिन् अनुभूतं भुक्तं यद्भवनं गृहं तस्य भूमेः संभावना संस्मरणं तया आविर्भूतं यदन्तःकरणं मनस्तस्य भावस्तत्ता तया । किं कृत्वा पूर्वम् । तत्र च सौधे क्षणमात्रमिव स्थित्वा ईषत्कालमुत्थो भूत्वा । कासु सतीषु मनाग्विलम्बमानः । तासु प्रतीपदर्शिनीषु स्त्रीषु प्रतिनिवृत्तासु व्याघुटितासु । किं कृत्वा पूर्वम् । तां प्रसिद्धां अजिनमहाराजपुत्रीममृतमतिमहादेवीं तेन कुब्जेन सह विहितमोहनां कृतसुरतक्रीडां अवलोक्य दृष्ट्वा । अहं कथंभूतः संजातः । प्रवृद्धानवधिक्रोधविधुरधीलोचनः प्रवृद्धोऽनवधिरमर्यादीभूतो योऽसौ क्रोधस्तेन विधुरं विकस्तंअन्ध(?) धीलोचनं यस्य मम स तथोक्तः। पुनः कथंभूतोऽहम् । तयोः कुब्जकामृतमत्योराचरितसुरतसुखान्तरायः कृतसंभोगसुखविघ्नः। कैः कृत्वा कृतान्तरायः। तुण्डतण्डनैश्चञ्चुघातैः। कथंभूतैस्तुण्डतण्डनैः। कोपाटोपत्रुटत्त्रोटिशल्कोल्काजालवर्षविष्यन्दनैः कोपस्य योऽसावाटोपस्तेन त्रुटन्ती शतखण्डीसंजायमाना या त्रोटिश्चञ्चुस्तस्याः शल्कानि खण्डानि तान्येव उल्काजालं पतत्सारमण्डलं तस्य वर्षो वर्षणं तेन विष्यन्दनानि शल्कानि येषु तुण्डनेषु तानि तथोक्तानि तैः । पुनः काभिः कृत्वाचरितसुरतसुखान्तरायः । पक्षप्रहतिभिः वामदक्षिणपक्षप्रताडनैः । कथंभूताभिः । निबिडावेशवशविशीर्यमाणबर्हविहिताकालकेतूद्गतिभिः निबिडो गाढो योऽसौ आवेशः क्रोधस्तस्य वशात् विशीर्यमाणानि यानि बर्हाणि पिच्छानि तैर्विहिता अकाले केतूद्गतिः अक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संध्यारागसंततिभिः कृकाहतिभिश्च तयोराचरितसुरतसुखान्तरायः, संबाधविरिध्वावधानसविधशरीरिकया कयाचित्परिवारदारिकया सुप्रतिष्ठेन कयाचिद्वेत्रलतया कयाचित्तालवृन्तेन कयाचित्प्रकीर्णदण्डिकया कयाचिद्वाङ्गुलीजालेन कयाचिदनुपदीनया, तथापराभिरपि समुत्साहितसौविदल्लसदःशरीराभिरवरोधविलासिनोभिश्च तेन तेनोपकरणकलापेनातिनिर्दयहृदयं प्राणप्रयाणपर्यन्तजर्जरितकायः, केकिनमेनमापादितामृतमतिमहादेवीद्रोहं धरत बध्नीताहत मारयतेति परिदेवनमुखरमुखीभिः सोपानमार्गेण निर्लोठितः, शुनीसूनुना च तेन ममायमेतन्मयूरमारणे प्रेरणोप-

---

स्मात्केतुग्रहस्य उद्गतिः उदयो याभिस्तत्पक्षप्रहतिभिः। पुनः काभिः कृत्वाचरितसुरतसुखान्तरायः। कृकाहतिभिः शिरोग्रीवस्य आहतिभिस्ताडनैः। कथंभूताभिः। कीकसावसानविश्रान्तनखमुखमार्गोद्गलद्रुधिरधाराकाण्डताण्डवितसंध्यारागसंततिभिः कीकसानामस्थ्नामवसानेषु विश्रान्तानि तत्र लग्नानि यानि नखानि च मुखं च तेषां मार्गास्तेषु उद्गलन्त्य ऊर्ध्वमुच्छलन्त्यो या रुधिरधाराश्छटास्ताभिरकाण्डे ताण्डविता विस्तारिता संध्यारागसंततयः पटलानि याभिः कृकाहतिभिस्तास्तथोक्तास्ताभिः। पुनः कथंभूतोऽहम्। कयाचित् परिवारदारिकया कुटुम्बदास्या अतिनिर्दयहृदयं यथा भवत्येवं प्राणप्रयाणपर्यन्तजर्जरितकायः सुप्रतिष्ठेन पतद्ग्रहेण ताम्बूलादिभाजनसंपुटकेन। कथंभूतया दारिकया। संबाधविरिध्वावधानसविधशरीरिकया..............................(?)। कयाचिद्दारिकया वेत्रलतया कृत्वा जर्जरितकायः, कयाचिदन्यया तालवृन्तेन व्यजनेन जर्जरितकायः, कयाचिद्दारिकया प्रकीर्णदण्डिकया जर्जरितकायः, कयाचिद्वाङ्गुलीजालेन पूगफलादिप्रसवकेन जर्जरितकायः, कयाचित् अन्यतरया अनुपदीनया उपानहा कृत्वा जर्जरितकायः। तथा दारिकाणां प्रकारेण अपराभिरपि अवरोधविलासिनीभिश्च अन्तःपुरनारीभिश्च तेन तेन प्रसिद्धेन उपकरणकलापेन कर्पूरकरण्डदर्व्यादिकेन जर्जरितकायः। कथंभूताभिरवरोधविलासिनीभिः। समुत्साहितसौविदल्लसदःशरीराभिः समुत्साहिता नि...नं प्रापिताः सौविदल्लानां स्थापत्यानां वृद्धाण्डकानां सदसः समूहस्य शरीराणि याभिस्तास्तथोक्ताभिः। पुनः कथंभूताभिरवरोधविलासिनीभिः। इत्यमुना प्रकारेण परिदेवनमुखरमुखीभिः रोदनविलपनवाचालवक्त्राभिः। इतीति किम्। एनमेतं केकिनं मयूरं आपादितामृतमतिमहादेवीद्रोहं आपादितो निष्पादितोऽमृतमतिमहादेव्या द्रोहो वधो येन स तथा तम्। धरत गृहीत यूयम्, बध्नीत बन्धनं प्रापयत यूयम्, आहत ताडयत यूयम्, मारयत जीवग्राहं गृह्णीत यूयम्। प्राणविनाशं प्रापयत यूयमित्यर्थः। एवं कृत्वा सोपानमार्गेण निर्लोठितः। आरोहणमार्गेण यापित इत्यर्थः। शुनीसूनुना चन्द्रमतिचरकुर्कुरेण तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रम इति मन्यमानेनापदान्तरेऽवसनशरीरतया समागतः समवर्तिवशां दशामहमानिन्ये ।

क्षितिपतिना च तेन समीपसंपादितद्यूतेन मुञ्च मुञ्चेमं चित्रपिङ्गलमतीवत्वरगलं गिरता सारकेलिमपहायाकर्षेण शीर्षदेशे दृढदत्तप्रहारकलः सोऽपि भण्डिलस्तामेव दिवसकरात्मजाश्रयस्थामवस्थामनुससार ।

राजा गलनिर्गतप्राणयोरावयोरकामकृतामुपसंपन्नतामवेत्य शोकातङ्कसंकुलकायः

प्रासादमण्डनमणौ रमणीविनोदे
क्रीडावनीधरशिलातलचित्रलेखे ।

पूर्वोक्तेन इति ईदृशं मन्यमानेन मानता आपदान्तरे निकटे अवसनशरीरतया अहं समागतः सन् समवर्तिवशां यमवशां दशामवस्थां आनिन्ये आनीतः ।इतीति किम् । एतन्मयूरमारणे अयं मम प्रेरणोपक्रमो ज्ञात्वारम्भ उपक्रमः ॥

सोऽपि भण्डिलश्च श्वा तामेव अवस्थां अनुससार आश्रितः । कथंभूतां अवस्थां आनिन्ये । दिवसकरात्मजां दिवसकरात्मजा सा श्रीभास्करान्वयस्य आश्रये तिष्ठतीति या अवस्था सा ताम् । मरणावस्थां प्रापेत्यर्थः । भण्डिलः कथंभूतः । क्षितिपतिना यशोमतिना नृपेण आकर्षेण फलकेन कृत्वा शीर्षदेशे मस्तकोपरि दृढदत्तप्रहारकलः दृढा निष्ठुरा दत्ता विश्राणिता प्रहारस्य कला अवस्था यस्य भण्डिलस्य स तथा । किं कृत्वा पूर्वम् । सारकेलिमपहाय सारिप्रासक्रीडां परित्यस्य । कथंभूतेन क्षितिपतिना । समीपसंपादितद्यूतेन निकटतरनिष्पादितदुरोदरक्रीडेन । किं कुर्वता क्षितिपतिना । इममेतं चित्रपिङ्गलं मयूरं मुञ्च मुञ्च अतीवत्वरगलं अतिशयेन वेगवद्गलाशब्दं यथा भवत्येवं गिरता शब्दायता ॥

राजा यशोमतिकुमार इत्येवमन्वतिष्ठत् चकार । किं कृत्वा पूर्वम् । आवयोर्मयूरशुनकयोरकामकृतामनिच्छोत्पन्नामुपसंपन्नतां मृत्युमवेत्य विज्ञाय । कथंभूतयोरावयोः । गलनिर्गतप्राणयोः गलाभ्यां निर्गता निःसृताः प्राणा ययोस्तौ तयोः । कथंभूतो राजा । शोकातङ्कसंकुलकायः शोक एव आतङ्को रोगस्तेन संकुलो भृतः कायो यस्य स तथा । पुनश्च किं कृत्वा पूर्वम् । इत्यमुना प्रकारेण संशोच्य शोकं कृत्वा । इतीति किम्—

प्रासादेत्यादि । हे मयूर, त्वयि भवति कीर्तिशेषे मृते सति वधूनां स्त्रीणां केलिकरतालविधिं क्रीडाहस्तताडनविधानम् । नामेति संभावनायाम् । कः करिष्यति को विधास्यति । अपि तु न कश्चित् करिष्यतीति भावः । कथंभूतं केलिकरतालविधिम् । नृत्तानुगं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

को नाम केलिकरतालविधिं वधूनां
नृत्तानुगं त्वयि करिष्यति कीर्तिशेषे ॥
सिंहः सुखं निवसतादचलोपकण्ठे
सोत्कण्ठमेणनिचयश्चरतात्स्थलीषु ।
सत्त्वाः परेऽपि विपिने विलसन्त्वशङ्कं
नाकं गतोऽयमधुना ननु विश्वकद्रुः ॥

इति संशोच्य 'हंहो स्वपरजनपरीक्षणमायाकार मायाकार, कार्यन्तामनयोर्भूदेवसंदोहसाक्षिणीः पितृलोकसब्रह्मचारिणीः पावकप्रदानवैहायिकान्वाहार्यपुरःसरसमयाः क्रियाः । प्रदाप्यन्तामनयोर्नाम्ना जननीजनकयोरिव सर्वत्र सत्रसभामण्डपाधिपाः प्रपाः' इत्यन्वतिष्ठत् ।

नर्तनानुसारि । कथंभूते त्वयि । प्रासादमण्डनमणौ प्रासादस्य राजसदनस्य मण्डने भूषणे मणिः शिरोरत्नं तस्मिन् । पुनः कथंभूते त्वयि । रमणीविनोदे·············· । पुनः कथंभूते त्वयि । क्रीडावनीधरशिलातलचित्रलेखे क्रीडावन्यां योऽसौ धरस्तस्य शिलातलं उपरितनभागस्तस्मिन् चित्रलेखायलेखा यस्माद्येन वा स तथा तस्मिन् । रूपकाक्षेपालंकारः ॥

सिंह इत्यादि । अयमेष विश्वकद्रुः श्वा नाकं गतः । ननु निश्चयेन । अधुना अचलोपकण्ठे सिंहः सुखं यथा भवत्येवं निवसतात् । एणनिचयः·········सोत्कण्ठं यथा स्यात् तथा स्थलीषु वनस्थानेषु चरतात् चरतु यथेष्टं विचरतु वा । परेऽपि सत्त्वा विपिने अशङ्कं यथा भवत्येवं विलसन्तु विशेषेण क्रीडन्तु । हेत्वलंकारः ॥

पुनः इतीति किम् । हंहो अहो स्वपरजनपरीक्षणमायाकार स्वश्च परश्च योऽसौ जनस्तस्य परीक्षणे मायाकार मानस्य श्रीनारायणवत्परीक्षक हे मायाकार हे प्रतीहार, कार्यन्तां विधाप्यन्ताम् । काः । अनयोः क्रियाः । कथंभूताः क्रियाः । भूदेवसंदोहसाक्षिणीः ब्राह्मणसमूहप्रत्यक्षाः । पुनः कथंभूताः । पितृलोकसब्रह्मचारिणीः पितृलोकसदृशा । पुनः कथंभूताः । पावकप्रदानवैहायिकान्वाहार्यपुरःसरसमयाः पावकप्रदानं चाग्निसंस्कारः, वैहायिकश्च कारटकः, अन्वाहार्यश्च मृतस्य मासिकक्रिया ते पुरःसराः प्रभृतयः षाण्मासिकसांवत्सरिकादयः समया काला यासु तास्तथा ताः । अनयोर्मयूरशुनकयोर्नाम्ना निमित्तेन । एतावुद्दिश्येत्यर्थः । प्रदाप्यन्तां प्रकर्षेण विश्राणनानि कार्यन्ताम् । काः प्रदाप्यन्ताम् । प्रपाः पानीयशालाः । किंवत् । जननीजनकयोरिव चन्द्रमतियशोधरयोरिव । प्रपाः क्व प्रदाप्यन्ताम् । सर्वत्र मम सर्वस्मिन्नपि देशे । कथंभूताः प्रपाः । सत्रसभामण्डपाधिपाः सत्रं भोजनशाला, सभाश्च गोष्ठिशालाः, मण्डपाश्च छत्रादिनिलयाः, तेषां अधिपाः अधिकारिणो वियोगिनो यासु प्रपासु तास्तथोक्ताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समस्तसत्त्वसदयहृदय, शुभधामोदय, पुनरस्ति खलु खेचरीसंगीतकमुखरचूलिकाचक्रवालात्सुवेलशैलादपरदिग्देवताविनोदायतनं **शिखण्डिताण्डवमण्डनं** नाम वनम् । यदेवं देहिनो वर्णनविषयतां नयन्ति । तथा हि—दुर्जनहृदयमिव दुःष्प्रवेशम्, प्रलयकालमिव भयानकम्, निगद्यागममिव गहनावसानम्, बुद्धाण्डकमिवालब्धमध्यसंचारम्, राजकुलमिव क्षुद्रलोकाधिष्ठितम्, वामेक्षणाचरितमिव स्वभावविषमम्, निःस्वामिकमिवामर्यादव्यवस्थम्, छत्रभङ्गमिव बहुकण्टकोपद्रवम्, खलोपदेशमिव दुरन्तम्, नृपतिचित्तमिव दुःखोपसेव्यम्, समराङ्गणमिव सखङ्ग-

---

हे समस्तसत्त्वसदयहृदय हे सर्वजीवकरुणामानस, हे शुभधामोदय हे पुण्यतेजःप्रादुर्भाव, हे मारदत्त महाराज, पुनः पुनरपि मयूरभवशुनकभवान्तरादनन्तरं द्वितीयं भवान्तरं वर्ण्यते । तथा हि—सुवेलशैलात् अपरदिग्देवताविनोदायतनं अपरदिक् पश्चिमदिक् सैव देवता तस्याः विनोदायतनं क्रीडामन्दिरं शिखण्डिताण्डवमण्डनं नाम खलु वनमस्ति । कथंभूतात् सुवेलशैलात् । खेचरीसंगीतकमुखरचूलिकाचक्रवालात् खेचरीसंगीतकं गीतनृत्यवादित्रत्रयं तेन मुखरं चूलिकाचक्रवालं शिखरमण्डलं यस्य सुवेलशैलस्य स तथा तस्मात् । यद्वनमेवं देहिनो विद्वांसो वर्णनविषयतां नयन्ति वर्णनगोचरत्वं प्रापयन्ति । तथा हि तदेव वर्णनं करोति—कथंभूतं शिखण्डिताण्डवमण्डनं वनम् । दुष्प्रवेशं दुःखेन प्रवेष्टुं शक्यम् । किमिव ।दुर्जनहृदयमिव यथा दुर्जनहृदयं दुष्प्रवेशं भवति । दुर्जनहृदयं प्रवेशं कर्तुं न शक्यते । पुनः कथंभूतम् । भयानकम् । किमिव । प्रलयकालमिव यथा कल्पान्तकालो भयानको भवति । पुनः कथंभूतम् । गहनावसानं अवसाने गहनम् । किमिव । निगद्यागममिव गणितशास्त्रमिव । पुनः कथंभूतम् । अलब्धमध्यसंचारं न लब्धो मध्यसंचारो यस्य तत्तथोक्तम् । किमिव । बुद्धाण्डकमिव आत्मज्ञानमिव । पुनः कथंभूतम् । क्षुद्रलोकाधिष्ठितं व्याघ्रादिसहितम् । किमिव । राजकुलमिव यथा राजकुलं असहिष्णुलोकसहितं भवति ।पुनः कथंभूतम् । स्वभावविषमम् । किमिव । वामेक्षणाचरितमिव यथा स्त्रीणां आचरितं स्वभावेन विषमं वक्रं भवति । पुनः कथंभूतम् । अमर्यादव्यवस्थितं अपर्यन्तस्थितिकम् । किमिव । निःस्वामिकमिव यथा निःस्वामिकं नगरादिकं अमर्यादव्यवस्थं भवति अवधिनियमेन कथंचिचलति । पुनः कथंभूतम् । बहुकण्टकोपद्रवं सूक्ष्मतीक्ष्णकण्टकोपद्रवसहितम् । कमिव । छत्रभङ्गमिव यथा छत्रभङ्गः क्षुद्रशत्रूपद्रवसहितो भवति । पुनः कथंभूतम् । दुरन्तमन्तरहितम् । कमिव । खलोपदेशमिव यथा खलानामुपदेशो वञ्चकानां शास्त्रान्तरं दुष्टं स्वभावं भवति । पुनः कथंभूतम् । दुःखोपसेव्यं दुःखेनाश्रयणीयम् । किमिव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संघट्टम्, वेतालकुलमिव महादेहभीषणम्, कलिङ्गवनमिव दन्तिदुर्गमम्, स्वर्धुनीप्रवाहमिव कृताष्टापदावतारम्, नाटेरमिव सचित्रकम्, वर्षारात्रमिव घनमेघरावम्, रघुवंशमिव मागधीप्रभवम्, चन्द्रमिवामृतास्पदम्, गिरिसुताचरितमिव विजयाविस्तृतम्, जलनिधिमिव जम्बुकाध्युषितम्, रथचरणपाणिमिव सुदर्शनाधारम्, युधिष्ठिरमिव मरुद्भवार्जुननकुलसहदे-

---

नृपतिचित्तमिव यथा नृपतिचित्तमाराधयितुं न शक्यते । पुनः कथंभूतम् । सखड्गसंघट्टं सह खड्गसंघट्टेन गण्डकयुद्धेन वर्तत इति सखड्गसंघट्टम् । किमिव । समराङ्गणमिव…… ………………………………………… । पुनः कथंभूतम् । महादेहभीषणम्……………………… । किमिव । वेतालकुलमिव व्यन्तरादिशेषसमूहमिव । पुनः कथंभूतम् । दन्तिदुर्गमं दन्तिभिः पर्वतैर्दुर्गमम् । किमिव । कलिङ्गवनमिव यथा कलिङ्गवनं दन्तिभिर्दुर्गमं भवति । पुनः कथंभूतम् । कृताष्टापदावतारं कृतः अष्टापदैः शरभैरवतारः प्रवेशो यत्र वने तत् । किमिव । स्वर्धुनीप्रवाहमिव यथा स्वर्धुनीप्रवाहः अष्टापदैः कैलासपर्वतैरवतरति । पुनः कथंभूतम् । सचित्रकं सह चित्रकैर्व्याघ्रविशेषैर्वर्तते इति सचित्रकम् । कमिव । नाटेरमिव यथा नाटेरो नटः सचित्रकः आश्चर्यजनको भवति । पुनः कथंभूतम् । घनमेघरावं घनमेघरावैर्घनैर्बहुलैर्मेघरावैर्मयूरैर्वर्तेत इति घनमेघरावम् । कमिव । वर्षारात्रमिव यथा वर्षारात्रो वर्षाकालो घनमेघरावः प्रचुरमेघशब्दो भवति । पुनः कथंभूतम् । मागधीप्रभवं मागधीनां पिप्पलीनां प्रभवो यत्र तत्तथोक्तम् । कमिव । रघुवंशमिव यथा रघुवंशः मागध्या दिलीपभार्यायाः सुदक्षिणानाम्न्याः प्रभवो वर्णनं अस्तित्वं यत्र स तथा तम् । पुनः कथंभूतम् । अमृतास्पदं अमृताया गुरूच्या आस्पदं स्थानम् । कमिव । चन्द्रमिव यथा चन्द्रोऽमृतस्य सुधाया आस्पदं वर्णयन्ति । पुनः कथंभूतम् । विजयाविस्तृतं विजयाभिर्हरीतकीभिर्विस्तृतम् । किमिव । गिरिसुताचरितमिव यथा गिरिसुताचरितं विजयया गौरीसख्या विस्तृतं भवति । पुनः कथंभूतम् । जम्बुकाध्युषितं शृगालैः सेवितम् । किमिव । जलनिधिमिव यथा जलनिधिः समुद्रः जम्बुकेन वरुणदिक्पालेन अध्युषितो भवति । पुनः कथंभूतम् । सुदर्शनाधारं सुदर्शनानामौषधिविशेषाणामाधारं स्थानम् । कमिव । रथचरणपाणिमिव यथा नारायणः सुदर्शननाम्नश्चक्रस्य आधारो भवति । 'चक्रं सुदर्शने' इति वचनात् । पुनः कथंभूतम् । मरुद्भवार्जुननकुलसहदेवानुगं मरुद्भवो वातोत्पत्तिः, अर्जुनः केकी अर्जुनो वृक्षविशेषः, नकुलः सर्पवैरी, सहदेवा वला, मरुद्भवार्जुननकुलसहदेवास्ताननुगच्छतीति मरुद्भवार्जुननकुलसहदेवानुगम् । कमिव । युधिष्ठिरमिव यथा युधिष्ठिरो मरुद्भवेन भीमसेनेन अर्जुनेन पार्थेन अनुगच्छति अनुगमनं करोति । अथवा मरुद्भवार्जुननकुलसहदेवा

---

१. पाणिनीयतन्त्रानुसारेण 'वर्षारात्रिमिव' इति भवितव्यम्, समासान्तविधायकसूत्रानुपलम्भात्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वानुगम्, सुभटानीकमिवाभीरुप्रतिष्ठितम्, दुग्धोदधिमथनमिव लक्ष्मीसनाथम्, छन्दःशास्त्रमिव जातबृहतीकम्, समर्थस्थानमिव तपस्विनीप्रचुरम्, धूर्जटिजटाजूटमिव चन्द्रलेखाध्यासितम्, युगत्रयावसानमिव कलिपरिगृहीतम्, दिवसमिव सार्कमण्डलम्, अनम्बरिषमप्यरिमेदःस्फारम्, अमाहेश्वरमपि जातशिवप्रियम्, अवेदवचनमपि गायत्रीसारम्,

---

अनुगाः यस्य स तथा तम् । पुनः कथंभूतम् । अभीरुप्रतिष्ठितं अभीरुरिन्दीवरी तया प्रतिष्ठितं सहितम् । उक्तं च—'वातमूली बहुसुता अभीरुरिन्दीवरी स्थिरपत्रा' इति यावत् । किमिव । सुभटानीकमिव यथा सुभटानीकं सुभटसैन्यं अभीरुप्रतिष्ठितमकातरप्रतिष्ठितं भवति । पुनः कथंभूतम् । लक्ष्मीसनाथं लक्ष्म्या मरडश्रृङ्गीसहितं भवति । किमिव । दुग्धोदधिमथनमिव यथा क्षीरसागरमथनं लक्ष्मीसनाथं भवति । पुनः कथंभूतम् । जातबृहतीकं जाता उत्पन्ना बृहत्यः क्षुद्रवार्ताक्यो यत्र तत्तथोक्तम् । किमिव । छन्दःशास्त्रमिव यथा छन्दःशास्त्रं जातबृहतीकं द्यक्षरच्छन्दोजातिसहितं भवति । पुनः कथंभूतम् ।तपस्विनीप्रचुरं तपस्विनीभिः मुण्डीकह्लाराभिः प्रचुरम् । किमिव । समर्थस्थानमिव आश्रमस्थानमिव यथा समर्थस्थानं तपस्विनीभिः प्रव्रजिताभिर्बहुलं भवति । पुनः कथंभूतम् ।चन्द्रलेखाध्यासितं चन्द्रलेखाभिर्वाकुचीभिरध्यासितमाश्रितम् । कमिव । धूर्जटिजटाजूटमिव श्रीमहादेवजटाबन्धमिव यथा धूर्जटिजटाजूटं चन्द्रलेखाध्यासितं शशिकलासहितं भवति । पुनः कथंभूतम् । कलिपरिगृहीतं विभीतकतरुसहितम् । किमिव । युगत्रयावसानमिव युगानां कृतयुगत्रेताद्वापराणां त्रयं तस्यावसानमिव पर्यन्तमिव यथा युगत्रयावसानं कलिपरिगृहीतं भवति दुःखमकालसहितं भवति । पुनः कथंभूतम् । सार्कमण्डलं सह अर्कमण्डलेन विकीरणवनेन वर्तत इति सार्कमण्डलम् । उक्तं च—'अर्काह्ववसुकास्फोटगणरूपविकारणाः । मन्दारश्चार्कपर्णानि शुक्लेऽलर्कप्रतापसौ ॥' किमिव । दिवसमिव यथा दिवसं दिनः सार्कमण्डलं श्रीसूर्यमण्डलसहितं भवति । पुनः कथंभूतम् । अनम्बरिषमप्यरिमेदःस्फारं ननु यत् अनम्बरिषं अयुद्धं तत्कथं अरिमेदःस्फारं अरीणां मेदसा चतुर्थधातुना स्फारं प्रचुरं कथं भवति । विरुद्धमेतत् । परिह्रियते—अनम्बरिषं नृपरहितं अपि निश्चयेन अरिमेदो विट्खदिरस्तेन स्फारं प्रचुरम् । पुनः कथंभूतम् । अमाहेश्वरमपि जातशिवप्रियम् । ननु यत् अमाहेश्वरं रुद्ररहितं भवति तत् जातशिवप्रियं जाता उत्पन्ना शिवा पार्वती प्रिया यस्य तज्जातशिवप्रियं कथं भवति । विरुद्धमेतत् । परिह्रियते—मा च लक्ष्मीर्हि निश्चयेन ईश्वरः स्वामी ताभ्यां रहितं अमाहेश्वरं अपि निश्चयेन जातशिवप्रियं जातमुत्पन्नं शिवप्रियं तरुविशेषस्तत्तथोक्तम् । उक्तं च—'शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ।' शिवप्रियमिति । अथवा महेश्वरो देवता यस्य तत् माहेश्वरम्, न माहेश्वरं अमाहेश्वरम् । ननु यत् अमाहेश्वरं तत् जातशिवप्रियं कथं भवति तस्य शिवः प्रियो न भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अकविलोकगणनमपि सकालिदासम्, अप्रथमाश्रममपि ब्रह्मचारिबहुलम्, अस्याद्वादसमयमपि सवर्धमानम्, अदिग्गजकुलमपि सवामनम्, अराकाननमपि ससोमम्, अराक्षसक्षेत्रमपि सपूतनम्, अमहानवमीदिनमपि

विरुद्धमेतत्। परिह्रियते—न विद्यते मा लक्ष्मीर्हि निश्चयेन ईश्वरश्च यत्र अरण्यस्य। निःस्वामित्वात् प्रायेणेति भावः । अपि निश्चयेन जातशिवप्रियं जाता शिवप्रिया धत्तूरवृक्षा यत्र तत्तथोक्तम्। पुनः कथंभूतम्। अवेदवचनमपि गायत्रीसारम्। ननु यत् वेदवचनं न भवति तत् गायत्रीभिः षष्ठीभिश्छन्दोजातिभिः सारं कथं भवति। विरुद्धमेतत्। परिह्रियते—अवेदानां स्त्रीपुंनपुंसकवेदरहितानां मुनीनां वचनानि यत्र अरण्यवासित्वात् अवेदवचनं निश्चयेन गायत्रीभिः खदिरवृक्षैः सारं मनोहरं कठिनं वा इति । पुनः कथंभूतम्। अकविलोकगणनमपि सकालिदासम्। ननु यत् कविलोकगणनारहितं तत् सकालिदासं कालिदासकविसहितं कथं भवति। विरुद्धमेतत्। परिह्रियते—अकं कष्टं तस्य विलोकनस्य दर्शनस्य गणना यत्र तत्तथोक्तं अपि निश्चयेन सकालिदासं आम्रतरुसहितं भवति । पुनः कथंभूतम्। अप्रथमाश्रममपि ब्रह्मचारिबहुलम्। ननु यत् प्रथमाश्रमरहितं भवति ब्रह्मचार्याश्रमरहितं भवति तत् ब्रह्मचारिबहुलं कथम्। विरुद्धमेतत्। परिह्रियते—अप्रथमानं आसमन्तात् श्रमः कष्टं यत्र तत् अप्रथमाश्रमं ब्रह्मचारिबहुलं पलाशतरुप्रचुरं इति सुस्थम्। पुनः कथंभूतम्। अस्याद्वादसमयमपि सवर्धमानम्। ननु यत् स्याद्वादसमयं न भवति एकान्तसमयं भवति तत् सवर्धमानं चरमतीर्थंकरसहितं कथं भवति। विरुद्धमेतत्। परिह्रियते—अस्याद्वादसमयं शून्यारण्यत्वात् शब्दावसररहितं सवर्धमानं एरण्डतरुसहितम्। पुनः कथंभूतम्। अदिग्गजकुलमपि सवामनम्। ननु यत् अदिग्गजकुलं दिग्गजेन्द्रकुलरहितं भवति तत् सवामनं यमदिग्गजसहितं कथं भवति। विरुद्धमेतत्। परिह्रियते—अविद्यमानदिग्गजकुलं शब्दसमूहो यत्र अपि निश्चयेन सवामनं भुक्तं सत् वमनं कारयति वामनो मदनवृक्षस्तत्सहितम्। उक्तं च—'ऐरावणः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥' 'ऐरावणः पुण्डरीकः पुष्पदन्तोऽथ वामनः। सुप्रतीकाञ्जनौ सार्वभौमः कुमुद इत्यपि ॥' इति पञ्जिकाकारः। 'अभ्रमुश्चैव कपिला ताम्रकर्णी च वामना। अनुपाञ्जनवत्यौ च शुभ्रदन्ती च पिङ्गला: ॥' इति दिग्गजानां भार्याश्चैताः । पुनः कथंभूतम्। अराकाननमपि ससोमम् । ननु यत् राकाया पूर्णिमाया आननं न भवति तत् ससोमं चन्द्रसहितं कथं भवति इत्यपि विरुद्धम्। नैवम् । अविद्यमाना राकानना दृष्टरजःकन्या यत्र तत् अराकाननं अपि निश्चयेन ससोमं हरीतकीवृक्षसहितम्। पुनः कथंभूतम् । अराक्षसक्षेत्रमपि सपूतनम्।
....
....
....। पुन कथंभूतम्। अमहानवमीदिनमपि स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समातृनन्दनम्, असौधतलमपि सनिःश्रेणीकम्, अराजसदनमपि सलेखपत्रम्, अत्र्यम्बकमपि सत्रिनेत्रम्, असंभलीपाटकमपि सलम्बस्तनीकम्, असमनीकरसिकमपि सकवचम्, अक्षयकालदिनमपि नष्टदिग्दिनाधिपेन्दुदर्शनम् ।

मातृनन्दनम् । ननु यत् महानवमीदिनं न भवति नवदुर्गादिवसानां मध्ये प्रान्त्यदिवसं महानवमीदिनं हिंसादिनत्वान्महानवमीत्युच्यते, यत् महानवमीदिनं न भवति तत् समातृनन्दनं समातॄणामानन्दकरं कथं भवति इत्यपि विरुद्धम् । नैवम् । अमेन रोगेण हाहाकारशब्देन उपलक्षितं नवमीदिनं अष्टाङ्गानां नवमो रोगः समातृनन्दनं करञ्जवृक्षसहितं इति सुस्थम् । पुनः कथंभूतम् । असौधतलमपि सनिःश्रेणीकम् । ननु यत् असौधतलं राजसदनोपरिभागं न भवति तत्सनिःश्रेणीकं अधिरोहिणीसहितं कथं भवति इत्यपि विरुद्धम् । परिह्रियते—सुधायाः समूहः सौधं न सौधं असौधतलं भूमितलं यस्य तत् असौधतलं प्रायेण निर्जलप्रदेशं सन्निःश्रेणीकं खर्जूरीवृक्षसहितम् । पुनः कथंभूतम् । अराजसदनमपि सलेखपत्रम् । ननु यत् राजसदनं न भवति सलेखपत्रं दूतादीनां लेखपत्रसहितं कथं भवति इदमपि विरुद्धम् । परिह्रियते—न विद्यते राज्ञां सदनं समीचीनजीवितं यत्र तदराजसदनं अपि निश्चयेन सलेखपत्रं ताडतरुसहितमिति सुस्थम् । पुनः कथंभूतम् । अत्र्यम्वकमपि सत्रिनेत्रम् । ननु यत् अत्र्यम्वकं रुद्ररहितं भवति तत् सत्रिनेत्रं त्रिलोचनसहितं कथं भवति । विरुद्धमेतत् । नैवम् । अत्रिऋष्यादेस्त्रैयम्बकं गमनशीलमातृकं न भवति व्युत्पत्तिसु यथा कथंचन सत्रिनेत्रं नालिकेरतरुसहितम् । पुनः कथंभूतम् । असंभलीपाटकमपि सलम्बस्तनीकम् । ननु यत् संभलीपाटकं न भवति तत् लम्वस्तनीसहितं वृक्षनारीसहितं कथं भवति । इदमपि विरुद्धम् । परिह्रियते—न संभलीं समीचीनफलकां पाटयति निराकरोति असंभलीपाटकं अपि निश्चयेन सलम्वस्तनीकं चिञ्चावृक्षसहितम् । पुनः कथंभूतम् । असमनीकरसिकमपि सकवचम् । ननु यत् असमनीकरसिकं संग्रामानुरागं न भवति तत् सकवचं कर्पाससहितं कथम् । इदमपि विरुद्धम् । नैवम् । असमा अकृतत्वात् वक्रा नीकाः क्षुद्रनद्यो निर्झरोत्पन्ना नद्यस्तासां रसिकं जलं यत्र तत् असमनीकरसिकं अपि निश्चयेन सकवचं पर्पटसहितं इति सुस्थम् । पुनः कथंभूतम् । अक्षयकालदिनमपि नष्टदिग्दिनाधिपतेन्दुदर्शनम् । ननु यत् क्षयकालदिनं न भवति तत् नष्टदिग्दिनाधिपेन्दुदर्शनं कथं भवति दिनाधिपः सूर्य इन्दुश्च दिनाधिपेन्द्वोर्दर्शनं दिनाधिपेन्दुदर्शनं दिशश्च दिनाधिपेन्दुदर्शनं च दिग्दिनाधिपेन्दुदर्शनानि नष्टानि न दृष्टानि दिग्दिनाधिपेन्दुदर्शनानि यत्र तत् तथोक्तम् । इदमपि विरुद्धम् । नैवम् । न ईषत् क्वचित्क्षयकराणां सिंहव्याघ्रादीनां दिनमवसरो यत्र तत्तथोक्तम् । अपि निश्चयेन दिशो न लभन्ते पूर्वादयो दिशो न ज्ञायन्ते सघनत्वात् चन्द्रसूर्यादयोऽपि न दृश्यन्ते इति सुस्थम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपि च ।क्वचिद्रक्ततुण्डकुटुम्बिनीलपनचापलच्युतोच्चिलिङ्गावचयवञ्चन-संरब्धव्याधयुद्धमध्यागतसहचरीप्रणीतफूत्कारकोलाहलकुत्कीलकुञ्जकुहरम्, क्वचिदुपलम्बाप्रलम्बस्तम्बविलम्बमानजानकोशात्रासितहरिणप्रयाणभरभीत-भल्लूकनिकरम्, क्वचिदनेकनाकुनिर्गतनिर्मोकालोकनकुपितकलापिनीपोतखर-रनखरमुखावलिख्यमानमेदिनीवदनम्, क्वचिदनवरतमृगमार्गमार्गणश्रमश्रा-न्तविलातवेल्लिकोच्चुलुञ्चितचुरीवारिवीक्षणातुरतरक्षुचक्षुर्दुर्लक्ष्यनगनिम्नगापु-लिनम्, क्वचिड्डामरिकनिकायसायकविद्धवृद्धवराहविरसविरसितस्रवत्कुरङ्गा-

---

अपि च तथा च । क्वचित् कस्मिंश्चित् स्थाने । कथंभूतं वनम् । रक्ततुण्डकुटम्बिनीलप-नचापलच्युतोच्चिलिङ्गावचयवञ्चनसंरब्धव्याधयुद्धमध्यागतसहचरीप्रणीतफूत्कारकोलाहलकु-त्कीलकुञ्जकुहरम् रक्ततुण्डानां शुकानां कुटुम्बिन्यः प्राणवल्लभास्तासां लपनानि मुखानि तेषां चापलेन च्युतानि अधःपतितानि उच्चिलिङ्गानि दाडिमफलानि तेषां अवचयो रक्षणं तस्य वञ्चने ग्रहणे संरब्धं प्रारब्धं यत् व्याधयुद्धं तस्य मध्ये आगता युद्धनिवारणार्थं प्रविष्टा याः सहचर्यस्ताभिः प्रणीतः कृतो योऽसौ फूत्कारस्तेन कोलाहलमव्यक्तशब्दं कुत्की-लस्य पर्वतस्य कुञ्जकुहरं लतादिपिहितोदरगह्वरमध्यं तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने उपलम्बाप्रलम्बस्तम्बविलम्बमानजानकोशात्रासितहरिणप्रयाणभरभीत-भल्लूकनिकरम् उपलम्बा लतास्तासां प्रलम्बः प्रतानस्तस्य स्तम्बा गुल्मानि तेषु विल-म्बमाना ये जानका अरण्यवृषभा वानरा वा तैरुत्रासिता भयं प्रापिता ये हरिणास्तेषां प्रयाणं पलायनं तस्य भरेण अतिशयेन भीतो भयं प्राप्तो भल्लूकानां शृगालानां निकरः समूहो यत्र वने तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने अनेकना-कुनिर्गतनिर्मोकालोकनकुपितकलापिनीपोतखरनखरमुखावलिख्यमानमेदिनीवदनम् अनेके बहवो ये नाकवो वल्मीकानि तेभ्यो निर्गता निःसृता ये निर्मोकाः सर्पकञ्चुलिकास्तेषामा-लोकनेन कुपिता ये कलापिनीपोता मयूरीबालकास्तेषां खराणि व्रणितानि नखरमुखानि चेत्यन्तविग्रहास्तैरवलिख्यमानं विदार्यमाणं मेदिनीवदनं भूमिमुखं यत्र तत्तथोक्तम् । भ्रान्ति-मानलंकारः । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने अनवरतमृगमार्गमार्गणश्रमश्रा-न्तविलातवेल्लिकोच्चुलुञ्चितचुरीवारिवीक्षणातुरतरक्षुचक्षुर्दुर्लक्ष्यनगनिम्नगापुलिनम् अनवरतं मृगाणां मार्गमार्गणेन पथान्वेषणेन यः श्रमः कष्टं तेन श्रान्ता कष्टं प्राप्ता ये विलातवेल्लिका भिल्लानां बालकास्तैरुच्चुलुञ्चिताश्चुण्टिताश्चुर्यो वालुकावापिकास्तासां वारिवीक्षणेन आतुरा व्याकुला ये तरक्षवोऽरण्यशुनकास्तैर्दुर्लक्ष्यमिव लोकयितुमशक्यं दुष्प्रवेशं नगनिम्नगानां पुलिनं वालुकाद्वीपं 'तोयोत्थितं तत्पुलिनम्' इति वचनात् तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने डामरिकनिकायसायकविद्धवृद्धवराहविरसविरसितस्रवत्कुरङ्गा-ङ्गनागर्भनिर्भरम् डामरिकनिकायस्य चौरसमूहस्य सायका बाणास्तैर्विद्धास्ताडिता ये वृद्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङ्गनागर्भनिर्भरम्, क्वचिदुन्मदमहिषमण्डलारब्धरणविषाणसंघट्टोच्छलत्स्फुलिङ्गसङ्गशीर्यमाणागमाग्रपल्लवभरम्, क्वचिद्विपसंपन्नपादपाटितेभकुम्भस्थलोत्प्रवाहवहल्लोहितविधीयमानवियच्छत्रारुणमणिदण्डडम्बरम्, क्वचिदविच्छिन्नविहारवानरनिकरविकीर्यमाणनीडक्रोडोड्डीनाण्डजच्छदच्छन्नाम्बरम्, क्वचिदभ्रंकषानोकहप्रकाण्डमण्डलीक्रीडोड्डमरडाकिनीकरालितोत्सर्गम्, क्वचिद्घनघूकघोरघूत्कारघूर्ण्यमाणपुराणविटपिकोटरप्रसूतवायसीवर्गम्, क्वचिद्बलवद्बलालोन्मूलितद्रुमलाकुलकलभप्रचारम्, क्वचिच्छिलोच्चयनिकुञ्ज-

---

वराहा जरच्छूकरास्तेषां विरसविरसितैः कर्कशशब्दितैः स्रवन्तः पतन्तः कुरङ्गाङ्गनानां गर्भा उदरसत्त्वास्तैर्निर्भरं व्याप्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने उन्मदमहिषमण्डलारब्धरणविषाणसंघट्टोच्छलत्स्फुलिङ्गसङ्गशीर्यमाणागमाग्रपल्लवभरम् उन्मदा मदोन्मत्ता ये महिषा वाहद्विषस्तेषां मण्डलं समूहस्तेन आरब्धः कृतो योऽसौ रणः संग्रामः । 'अस्त्रियां समरानीकरणम्' इति वचनात् रणशब्दस्य पुंनपुंसकत्वम् । तस्मिन् विषाणसंघट्टेन शृङ्गप्रहारेण उच्छलन्तो ये स्फुलिङ्गास्तेषां सङ्गेन शीर्यमाणो विध्वंस्यमानोऽगमानां वृक्षाणां अग्रपल्लवभरः उपरितनप्रवालसमूहो यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने द्विपसंपन्नपादपाटितेभकुम्भस्थलोत्प्रवाहवहल्लोहितविधीयमानवियच्छत्रारुणमणिदण्डडम्बरम् द्विपसंपन्नपादैः सिंहचरणैः पाटितं विदारितं यत् इभकुम्भस्थलं तस्मात् उत्प्रवाहं ऊर्ध्वप्रवाहं सत् वहत् उच्छलत् यत् लोहितं रुधिरं तेन विधीयमानः वियच्छत्रस्य अरुणमणिदण्डडम्बरो रक्तरत्नदण्डाटोपो यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने अविच्छिन्नविहारवानरनिकरविकीर्यमाणनीडक्रोडोड्डीनाण्डजच्छदच्छन्नाम्बरम् अविच्छिन्नविहारा निरन्तरपर्यटना ये वानरास्तेषां निकरेण समूहेन विकीर्यमाणा निष्कास्यमाना उड्डीयमाना नीडक्रोडेभ्यो मालकोपरिष्टात् उड्डीना विहायसि गता ये अण्डजाः पक्षिणस्तेषां छदाः पत्राणि तैश्छन्नमम्बरमाकाशं यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने अभ्रंकषानोकहप्रकाण्डमण्डलीक्रीडोड्डमरडाकिनीकरालितोत्सर्गम् अभ्रंकषा अत्युन्नता ये अनोकहा वृक्षास्तेषां प्रकाण्डाः समूहास्तेषां मण्डली श्रेणिस्तस्यां क्रीडोड्डमराक्रीडानयाचिकंषी(?) डाकिन्यः शाकिन्यस्ताभिः करालितो रौद्रीकृत उत्सर्गः सृष्टिर्यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने घनघूकघोरघूत्कारघूर्ण्यमानपुराणविटपिकोटरप्रसूतवायसीवर्गम् घना ये घूकास्तेषां घूत्काराः शब्दविशेषास्तैर्घूर्ण्यमाणा(ना) ये पुराणविटपिनो जीर्णवृक्षास्तेषां कोटरेषु विवरेषु प्रसूताः प्रसूतिं प्राप्ता वायसीनां काकीनां वर्गः समूहो यत्र तत्तथोक्तम् । क्वचित् कस्मिंश्चित् स्थाने बलवद्बलालोन्मूलितद्रुमलाकुलकलभप्रचारम् बलवान् प्रचण्डो योऽसौ बलालो वायुस्तेनोन्मूलिता ये द्रुमला द्रुमसमूहास्तैराकुला विह्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुञ्जरभज्यमानकुञ्जराजिकूजितजरत्खञ्जनमनस्कारम्, क्वचिच्चित्रककुलाघ्रातपृषतखरखण्ड्यमानकदलीप्रबालान्तरङ्गम्, क्वचिदनन्यसामान्योदन्यानुद्रुतद्रवद्रङ्कुजिह्वावलिह्यमानमृगतृष्णिकातरङ्गम्, क्वचित्प्रचण्डगण्डकवदनविदार्यमाणरुरुरुधिरदुरीक्षवृक्षानीकम्, क्वचिन्निःशल्यशल्लकशलाकाजालकील्यमानरल्लकलोकलोकम्, एवमपरैरपि सत्त्वैरनायकावकाशदेशमिव वाध्यमानपरस्परजीवितम् ।

यत्र च वल्लयोऽपि मृगादनीप्रायाः, वीरुधोऽपि व्याघ्रीसमदर्शनाः,

---

लीभूता ये कलभा गजबालकास्तेषां प्रचारः पर्यटनं यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने शिलोच्चयनिकुञ्जकुञ्जरभज्यमानकुञ्जराजिकूजितजरत्खञ्जनमनस्कारम् शिलोच्चयानां ये निकुञ्जाः लतादिपिहितोदरास्तत्र कुञ्जरैर्भज्यमाना तोद्यमाना या कुञ्जराजिः वृक्षश्रेणिस्तत्र कूजितेन शब्दितेन उपलक्षितो जरत्खञ्जनानां जराजीर्णखञ्जरीटानां मनस्कारश्चित्ताभोगो यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने चित्रककुलाघ्रातपृषतखरखण्ड्यमानकदलीप्रवालान्तरङ्गम् चित्रककुलैर्व्याघ्रविशेषसमूहैराघ्राता दन्तैर्धृता ये पृषता मृगास्तेषां खरैः खण्ड्यमानं कदलीनां मृगविशेषाणां प्रकृष्टा वाला शिशवस्तेषां अन्तरङ्गं मनोहरं यत्र । अथवा कदलीनां वालद्रुमाणां प्रवालाः पल्लवास्तेषां अन्तरङ्गं मध्यो यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंश्चित् स्थाने अनन्यसामान्योदन्यानुद्रुतद्रवद्रङ्कुजिह्वावलिह्यमानमृगतृष्णिकातरङ्गम् अनन्यसामान्या अतिशयवती या उदन्या तृषा तया अनुद्रुताः पीडिता द्रवन्तो धावन्तो ये रङ्कवो मृगास्तेषां जिह्वाभी रसनाभिरवलिह्यमाना मृगतृष्णिकानामतरङ्गाः कल्लोला यत्र तत्तथोक्तम् । क्वचित् कस्मिंश्चित्स्थाने प्रचण्डगण्डकवदनविदार्यमाणरुरुरुधिरदुरीक्षवृक्षानीकम् प्रचण्डा वलवत्तरा ये गण्डका वार्ध्रीणसः खड्गिनो जीवायकशृङ्गा इति यावत्तेषां वदनैर्विदार्यमाणाश्छिद्यमाना ये रुरवो मृगास्तेषां रुधिरैर्दुरीक्षं दुष्प्रेक्ष्यं वृक्षानीकं वृक्षसमूहो यत्र तत्तथोक्तम् । पुनः कथंभूतम् । क्वचित् कस्मिंचित्स्थाने निःशल्यशल्लकशलाकाजालकील्यमानरल्लकलोकलोकम् निःशल्या निर्भया ये शल्लकाः शललिनो जन्तुविशेषाः सर्वाङ्गशलकाः कण्टकाः सिद्धा इति देशात् सेधा इति अनन्तनाथलाञ्छनविशेषजन्तवस्तेषां शलाका लोहतन्तुसदृशास्तासां जालानि समूहास्तैः कील्यमाना विध्यमाना रल्लकाः मृगविशेषास्तेषां लोकलोका विश्वलोका यत्र तत्तथोक्तम् । एवमपरैरपि सत्त्वैः वाध्यमानपरस्परजीवितं वाध्यमानं मार्यमाणं परस्पराणां जीवितं यस्य तत्तथोक्तम् । पुनः कथंभूतम् । अनायकावकाशदेशमिव नृपरहितदेशमिव ॥

यत्र च वने वल्लयोऽपि वल्ल्योऽपि मृगादनीप्राया मृगादनी लताविशेषः, पक्षे मृगानदन्ति भक्षयन्ति मृगादन्यो लुब्धकभार्याः प्रायेण । यत्र च वीरुधोऽपि मिल्लु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तरवोऽपि निस्त्रिंशपत्रसमालोकाः, तृणान्यपि विषाणीव घ्राणादेव मनोमोहनकराणि । किं च ।

यदग्रिमोद्गमस्थूलस्तबकाभोगसंगमम् ।
सिंहशावकुलाकीर्णं महानीलनगोपमम् ॥
धत्ते यद्विकिराकीर्णकुड्मलाविलभूचयम् ।
करिवैरिप्रभिन्नेभकुम्भमुक्ताफलश्रियम् ॥

अपि च ।

ब्रह्माजिह्मितमण्डला हरिकुलव्यालोलशैलस्थली
स्थाणुस्थानविसंस्थुलापि समभूच्चित्रं तथापीदृशी ।

न्योऽपि वल्लयोऽपि व्याघ्रीसमदर्शना व्याघ्री वृहती करण्डकारिका तत्समं दर्शनं यत्र वीरुत्सु, पक्षे व्याघ्री द्वीपिनी तत्समं दर्शनं यासु ताः । यत्र च तरवोऽपि निस्त्रिंशपत्रसमालोकाः निस्त्रिंशपत्राणां सेहुण्डवृक्षाणां समालोको दर्शनं यत्र तरुषु, पक्षे निस्त्रिंशपत्राणां निर्दयवाहनजीवानां समालोको यत्र । यत्र च तृणान्यपि खटा अपि विषाणीव विषसदृशानि घ्राणादेव गन्धोपादानादेव मनोमोहनकराणि चित्तस्य अचेतनजनकानि । मारकाणीत्यर्थः ॥

किंच । विशेषव्यावर्णनं करोति—**यदित्यादि** । तद्वनं कथंभूतं वर्तते । अग्रिमोद्गमस्थूलस्तवकाभोगसंगमम् अग्रिमाः प्रथमा ये उद्गमानां पुष्पाणां स्थूलस्तवका वृहद्गुच्छकास्तेषामाभोगः परिपूर्णता तस्य संगमो यत्र वने । पुनः कथंभूतम् । सिंहशावकुलाकीर्णं सिंहबालकसमूहव्याप्तम् । पुनः कथंभूतम् । महानीलनगोपमं .... भवति । उपमा ॥

धत्ते इत्यादि । यद्वनं विकिराकीर्णकुड्मलाविलभूचयं धत्ते विकिरैः पक्षिभिराकीर्णानि पतितानि यानि कुड्मलानि कोरकाणि कलिकास्तैराविलो व्याप्तो भूचयो भूमिभागस्तथा तं धरति । कथंभूतं धत्ते । करिवैरिप्रभिन्नेभकुम्भमुक्ताफलश्रियम् करिवैरिणः सिंहास्तैः प्रभिन्ना विदारिता ये इभकुम्भा गजकुम्भस्थलानि तेषां मुक्ताफलश्रीर्मौक्तिकशोभा यस्मिन् ॥

अपि च । **ब्रह्मेत्यादि** । या अटवी ब्रह्माजिह्मितमण्डला ब्रह्मणा पलाशवृक्षेण आ समन्तात् जिह्मितं विषमीकृतं मण्डलं भूमिभागो यत्र सा तथोक्ता । ननु या अटवी ब्रह्माजिह्मितमण्डला ब्रह्मणा अवक्रप्रदेशा सा सव्याधा कथं भवति । विरुद्धमेतत् । परिह्रियते—ब्रह्मभिः पलाशवृक्षैरा समन्ताज्जिह्मितमण्डला विषमप्रदेशा । पुनः कथंभूता । हरिकुलव्यालोलशैलस्थली हरिकुलेन यादववंशेन व्यालोला मनोहरा शैलस्थली रैवतपर्वतस्थली सा समधूत्सवा मधुदैत्योत्सवसहिता कथं भवति । इत्यपि विरुद्धम् । नैवम् । हरिकुलैः सिंहसमूहैः व्यालोलशैल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सव्याधा समधूत्सवा समदनोत्सर्गा च सर्वाटवी
को नामैवमिहाखलः सह खलैर्वासो यदेषामपि ॥

तत्र चिल्लचिकिताणकैकलोचनायां बाढमवगाढमध्यमावस्थानायामेणान्वेषणधिषणनिषादपरिषत्संबाधप्रधावत्स्खलनखरखेदखञ्जाखिलखुरायामनेकमृगशृङ्गसंघट्टोन्मृष्टलोमतया निस्त्रिंशनिशातशाणाकारायामिव परुषतरुतनुपृ-

---

स्थली लोकानां(?)तयोत्पादकत्वात् चपलपर्वतस्थला अत एव समधूत्सवा सह मधुभिः क्षौद्रैरुत्सवो यस्यां सा समधूत्सवा। मधुर्वसन्तोऽपि तत्र वर्तत एव इति सुस्थम्। पुनः कथंभूता। स्थाणुस्थानविसंस्थुला स्थाणुस्थानेन श्रीमहादेवस्थानेन विसंस्थुला शिथिला भवति सा समदनोत्सर्गा कंदर्पसृष्टिसहिता कथं भवति। कंदर्पस्तु स्थाणुना भस्मीकृतः तस्योत्कृष्टः सर्गस्तस्य कथं इति विरुद्धम्। नैवम्। स्थाणूनां छिन्नाग्रभागानां तरूणां स्थानेन विशेषसंस्थुला व्याप्ता अपि निश्चयेन समदनोत्सर्गा मदनोत्सर्गैराटवृक्षसृष्टिसहिता इति सुस्थम्। उक्तं च—'चित्तस्थमप्यनवलभ्य हरेण जाड्या क्रुद्धा बहिः किमपि दग्धमनङ्गबुद्ध्या। घोरामवापसहितेन कृतामवस्थां क्रोधोदयाद्भवति कस्य न कार्यहानिः ॥' तथापि ईदृशी अभूत्। ईदृशी कीदृशी। सव्याधा समधूत्सवा समदनोत्सर्गा सर्वाटवी अभूत्। [[1]अमुमेवार्थं अर्थान्तरन्यासेन द्रढयति—**को नामेत्यादि**। इह अस्मिन् संसारेऽखलः खललोकरहितः एवं कः पुमान्। न कश्चिदित्यर्थः। नामेति संभावनायाम्। यद्यस्मात् कारणात् एषामपि ब्रह्मविष्णुमहेश्वराणामपि खलैर्दुर्जनैः सह सार्धं वासो वसतिर्वर्तते। यथासंख्यार्थान्तरन्यासालंकारः ॥]

हे राजन्, तत्र वने परुषतरुतनुपृषत्यां सेहुल्यां तथाविधेनैव परुषतरुतनुना पृषतेनैव सेहुलेन गर्भावासविषयतां नीतः। कथंभूतायां पृषत्याम्। चिल्लचिकिताणकैकलोचनायां चिल्लं दूषिकोपहतं चिकितं अणकं कुत्सितं एकं एकमेव लोचनं नेत्रं यस्याः सा तथोक्ता तस्याम्। पुनः कथंभूतायां पृषत्याम्। बाढमतिशयेन अवगाढमध्यमावस्थानायां अवगाढं प्राप्तं मध्यमावस्थानं संकीर्णोदरस्थानं यया सा तस्याम्। पुनः कथंभूतायाम्। एणान्वेषणधिषणनिषादपरिषत्संबाधप्रधावत्स्खलनखरखेदखञ्जाखिलखुरायाम् एणानां मृगाणां अन्वेषणधिषणया अवलोकनबुद्ध्या निषादानां व्याधानां परिषदः समूहस्य योऽसौ संबाधप्रधावो निकटप्रधावनं तत्स्खलनं गमनभङ्गस्तस्मात् खरोऽतिशयवान् योऽसौ खेदः कष्टं तेन खञ्जाः खोडा अखिलाश्चत्वारोऽपि खुराः शफा यस्याः सा तथोक्ता तस्याम्। पुनः कथंभूतायाम्। अनेकमृगशृङ्गसंघट्टोन्मृष्टलोमतया निस्त्रिंशनिशातशाणाकारायामिव अनेके बहवो ये मृगास्तेषां शृङ्गाणि निशातशाणानि तेषां संघट्टेन भटभेटकेन उन्मृष्टानि घृष्टानि यानि लोमानि शरीरकण्ठकास्तेषां भावस्तत्ता तया तत्कारणेन निस्त्रिंशानां निशातैस्तीक्ष्णकरणेन

---

१. एतत्कोष्टान्तर्गतपाठः केनचित्प्रक्षिप्तः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षत्यां तथाविधेनैव पृषतेन गर्भावासविषयतां नीतः, पुनरकाण्डचण्डतडिद्दण्डसंघट्टभयप्रभावादपरिपूर्णविषय एव प्रसवसमये लब्धात्मलाभमात्रः, सवित्र्याः शून्यस्तन्यस्तनतयानुपशान्ताशनाशयः, शष्पाङ्कुरेषु च तृप्तिमलभमानः, पवनाशनाशनाश्रयाशयतया शक्रशिरःप्रदेशान्विषाणमण्डलेनोच्चिखनिषुः,

अन्यत्र कुरुते जन्तुर्यत्सुखं दुःखमेव वा ।
तदुप्तबीजवत्क्षेत्रे भूयः फलवदात्मनि ॥

इति न्यायाद्यथाहं पुरा जन्मनि शिखावलपर्यायस्तेनाग्निजन्मना स्व-

---

यच्छाणं शस्त्रोत्तेजनयन्त्रं तस्या आकारो मूर्तिर्यस्याः सा तथोक्ता तस्याम्। कर्कशशरीरायामित्यर्थः। तथाविधेनैव कारणेन खोडेन धृष्टरोम्लापृषतेन सेहुलेन गर्भावासविषयतां नीत इति संबन्धः। हे राजन्, पुनः पुनरपि मयूरमरणादनन्तरं अहं पृषतः परासुरभवं मृतो बभूव। कथंभूतोऽहम्। प्रसवसमये लब्धात्मलाभमात्रो दिवसमात्र एवाहं मृतः। कथंभूते प्रसवसमये। अपरिपूर्णविषये एव अल्पमासैरेव जनित इत्यर्थः। कस्मादपरिपूर्णविषये जनितः। अकाण्डचण्डतडिद्दण्डसंघट्टभयप्रभावात् अकाण्डे अप्रस्तावे वर्षाकालं विनापि चण्डो बलवत्तरो योऽसौ तडिद्दण्डास्तसंघट्टेम परं विद्युता सह भटभेटकेन यदुत्पन्नं भयं तस्य प्रभावात्। न्यूनमासैरित्यर्थः। पुनः कथंभूतोऽहं परासुरभवम्। सवित्र्याः सेहुल्याः शून्यस्तन्यस्तनतया क्षीररहितस्तनत्वेन अनुपशान्ताशनाशयः अविनष्टभुक्ताशः। बुभुक्षित इत्यर्थः। पुनः कथंभूतोऽहम्। शष्पाङ्कुरेषु तृप्तिमलभमानः बालतृणेषु भक्षितेषु तृप्तिमनाप्नुवन्। पुनः कथंभूतोऽहम्। विषाणमण्डलेन दन्तसमूहेन शक्रशिरःप्रदेशान् वल्मीकशिखरप्रदेशान् उच्चिखनिषुरुत्खातुमिच्छुः पवनाशनाशनाश्रयाशयतया पवनाशनानां सर्पाणां अशनं भक्षणं तस्याश्रयस्तत्संबन्धी आशयश्चित्तं यस्य स पवनाशनाशनाश्रयाशयस्तस्य भावोऽभिप्रायः पवनाशनाशनाश्रयाशयता तया तथोक्तया। पुनः कथंभूतोऽहम्। इति न्यायात् यथा येन प्रकारेण पुरा जन्मनि मयूरभवान्तरे अहं शिखावलपर्यायः मयूरपर्यायस्तेन चन्द्रमतिवरेण अग्निजन्मना शुना स्वकीयदंष्ट्राक्रकचकदर्थ्यमानतां नीतस्तथा तेनैव प्रकारेण एनमपि चन्द्रमतिचरसर्पमपि स्वकीयदंष्ट्राक्रकचकदर्थ्यमानतां नीतवान्। 'अर्थवशाद्विभक्तिपरिणामः' इति न्यायात् नीञो धातोः कर्तरि परिणामः। इति न्यायादिति किमित्याह—

अन्यत्रेत्यादि। जन्तुर्जीवोऽन्यत्रान्यस्मिन् प्राणिनि यत् किमपि सुखं दुःखमेव वा कुरुते तत् सुखं दुःखं च आत्मनि निजजीवे भूयः पुनः फलवद्भवति प्रचुरफलदायकं भवति। किंवत्। क्षेत्रे उप्तबीजवत् यथा क्षेत्रे सस्याधिकरणे उप्तमारोपितं बीजं प्रचुरफलदायकं भवति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कीयदंष्ट्राक्रकचकदर्थ्यमानतां नीतस्तथैनमपि कृष्णत्वं शनेरिव, कुटिलतां स्त्रीभ्यः, क्रौर्यं कृतान्तात्, वृषविध्वंसबुद्धिमसुरेभ्यः, विषाश्रयत्वं जलधेः, पिशितप्रियत्वं यातुधानेभ्यः, परोपद्रवं च दुर्जनेभ्यः समादायासादितसरीसृपाकारं वामलूरविवरप्रविष्टार्धशरीरं बलादाकृष्य पुरीतत्प्रतानमिव मेदिनीकुरङ्गिकायाः, लाङ्गूलमिव महीसिंहिकायाः, मूलमिवानन्तालतायाः, मृणालमिव भूमिकमलिन्याः, वेणिदण्डमिव क्षमाराक्षस्याः, पौनःपुन्यप्रवृत्तोत्फणप्रहारजर्जरितवदनमुत्कृत्यमानमिवासृग्वरायाम्, उच्छलन्तमिव क्षतजेषु, स्फुरन्तमिव तरसेषु, त्रुट्यन्तमिव सिरासु, स्फुटन्तमिवास्थिषु,

---

कथंभूतं एनम्। आसादितसरीसृपाकारं प्राप्तसर्पाकारम्। किं कृत्वा पूर्वम्। शनेः रविपुत्रात् कृष्णत्वं कालत्वं समादाय। पुनश्च किं कृत्वा। स्त्रीभ्यो नारीजनेभ्यः कुटिलतां वक्रत्वं समादाय। पुनश्च किं कृत्वा। कृतान्तात् यमात् क्रौर्यं क्रूरत्वं समादाय। पुनश्च किं कृत्वा। असुरेभ्यः वृषविध्वंसबुद्धिं मूषिकविनाशमतिं समादाय। यथा असुरा वेदोत्पादकत्वेन वृषस्य धर्मस्य विध्वंसबुद्धिं समाददति। पुनश्च किं कृत्वा। जलधेः समुद्रात् विषाश्रयत्वं हालाहलरक्षणमुखत्वं समादाय। यथा जलधिः समुद्रो विषस्य ब्रह्मपुत्रस्य वासमाश्रयो भवति। पुनश्च किं कृत्वा। यातुधानेभ्यो राक्षसेभ्यः पिशितप्रियत्वं समादाय। यथा यातुधानाः पिशितप्रिया भवन्ति। पुनश्च किं कृत्वा। दुर्जनेभ्यः परोपद्रवं परेषां दुःखजननं समादाय कदर्थ्यमानतां अहं नीतवान्। बलादाकृष्य हठादुत्पाट्य। पुनः कथंभूतं एनम्। वामलूरविवरप्रविष्टार्धशरीरं वामलूरस्य वल्मीकस्य विवरे प्रविष्टं मध्ये गतं अर्धशरीरं यस्य स तथोक्तस्तम्। पुनः कथंभूतम्। मेदिनीकुरङ्गिकायाः भूमिमृग्याः पुरीतत्प्रतानमिव अन्त्रोच्चयमिव। पुनः कथंभूतम्। महीसिंहिकायाः लोकभक्षिकत्वात् लाङ्गूलमिव पुच्छमिव। पुनः कथंभूतम्। अनन्तालतायाः अनन्ता पृथ्वी सा एव लता वल्ली ब्रह्माकाशव्यापिकत्वात् तस्या मूलमिव जटामिव। पुनः कथंभूतम्। भूमिकमलिन्या भूमिरेव कमलिनी लक्ष्मीनिवासस्थानत्वात् तस्या मृणालमिव पद्मिनीकन्दमिव। पुनः कथंभूतम्। क्षमाराक्षस्याः क्षमा पृथ्वी सा राक्षसी सर्वजनभक्षिकत्वात् तस्या वेणिदण्डमिव ग्रन्थितकेशयष्टिमिव बलादाकृष्य कदर्थ्यमानतां अहं नीतवान्। पुनः कथंभूतं एनम्। पौनःपुन्यप्रवृत्तोत्फणप्रहारजर्जरितवदनम् पुनः पुनर्भवः पौनःपुन्यम्। 'अव्ययानां स्वरादिलोपः' इति वचनात् अलोपः। पौनःपुन्येन प्रवृत्ताः संजाता ये उत्फणप्रहारा उन्नतफणाघातास्तैर्जर्जरितं क्षीणं वदनं यस्य सरीसृपस्य स तथोक्तस्तम्। किं कुर्वन्तमेनम्। उत्कृत्यमानमिवासृग्वरायां असृग्वरायां त्वचि विषये उत्पाट्यमानमिव। पुनः किं कुर्वन्तम्। क्षतजेषु रुधिरेषु उच्छलन्तमिवोर्ध्वं गच्छन्तमिव। पुनः किं कुर्वन्तम्। तरसेषु मांसेषु स्फुरन्तमिव चमत्कुर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विवर्तमानमिवान्त्रेषु, समीपतरकदम्बस्तम्बशायिना प्रबलजाङ्गलकवलाविलगलगुहाघोरघुरुघुरारवप्रतिबोधितेन गतमेव श्लोकं तत्रैव जन्मनि सफलयता तरक्षुणा भक्ष्यमाणस्तेन पृषदाकुना समकालमेवाहं परासुरभवम् ।

पुनरहो कविलोकपङ्कजविकासभास्कर, सौजन्यरत्नाकर, अस्ति खलु तेष्वेव त्रिदिवनिवासोचितकिंवदन्तीषु अवन्तीषु इन्दुमणिमेखलेव पद्मावतीविलासिन्याः, जलकेलिदीर्घिकेव मालवावनीपालविलासिनीनाम्, नित्योत्सवपताकेव भुजङ्गमलोकस्य, वरणमालेव मार्गमहीधराणाम्, मुक्ताव-

---

न्तमिव । पुनः किं कुर्वन्तम् । सिरासु ख(?)सासु त्रुट्यन्तमिव बुध्यन्तमिव । पुनः किं कुर्वन्तम् । अस्थिषु स्फुटन्तमिव कटकटायमानमिव । पुनः किं कुर्वन्तम् । अन्त्रेषु पुरीतत्सु विवर्तमानमिव अन्तः शरीरं वहिः कुर्वन्तमिव । कथंभूतोऽहम् । तरक्षुणा अरण्यशुना भक्ष्यमाणः । किं कुर्वता तरक्षुणा । गतमेव श्लोकं पूर्वोक्तमेवानुष्टुपं तत्रैव जन्मनि तद्भवे एव सफलयता सत्यार्थतां नयता । कोऽसौ गतश्लोक इत्याह । अहं कथं परासुरभवम् । तेन पूर्वोक्तेन चन्द्रमतिचरेण पृषदाकुना दीर्घपृष्ठेन सह समकालमेव युगपदेव । आवां द्वावपि मृतावित्यर्थः । सर्पो मया भक्षितोऽहं तरक्षुणा भक्षित इत्यर्थः । कथंभूतेन तरक्षुणा । समीपतरकदम्वस्तम्वशायिना वल्मीकस्य समीपतरो योऽसौ कदम्वो धूलीकदम्वो धाराकदम्वो वा तस्य स्तम्बः प्रकाण्डस्तत्र शेते तिष्ठतीत्येवंशीलस्तथा तेन । पुनः कथंभूतेन । प्रवलजाङ्गलकवलाविलगलगुहाघोरघुरुघुरारवप्रतिवोधितेन प्रवलं वरिष्ठं यज्जाङ्गलं सर्पमांसं तस्य कवलो ग्रासस्तेन आविला भृता गलगुहा स्यहुलस्य(?) कण्टकन्दरा तस्या घोरो भयानको योऽसौ घुरुघुरारवोऽव्यक्तशब्दस्तेन प्रतिवोधितो जागरितस्तेन ॥

पुनः पुनरपि पृषतसर्पभववर्णनादनन्तरम् । अहो कविलोकपङ्कजविकासभास्कर कविनां लोकाः समूहास्त एव पङ्कजानि कमलानि वैदुष्यसौगन्धगुणयुक्तत्वात् तेषां विकासे आनन्दो त्पादने भास्करः श्रीसूर्यः स तथा तस्य संवोधनं हे तथोक्त । हे सौजन्यरत्नाकर सौजन्यं परोपकारस्तदेव रत्नमनर्घ्यमाणिक्यं तस्य आकरः तस्य संवोधनं हे तथोक्त । हे श्रीमारदत्तमहाराज, तेष्वेवावन्तीषु विषये । खलु वाक्यालंकारे । सिप्रा नाम नदी अस्ति वर्तते इति क्रियाकारकसंवन्धः । कथंभूतेषु अवन्तीषु । तेष्वेव पूर्वोक्तेष्वेव । पुनः कथंभूतेषु । त्रिदिवनिवासोचितकिंवदन्तीषु त्रिदिवनिवासानां देवानां उचिता योग्या किंवदन्ती वार्ता येषामवन्तीनां ते तथोक्तास्तेषु तथोक्तेषु । कथंभूता सिप्रा नाम नदी । पद्मावतीविलासिन्याः उज्जयिनीपुरीकमनीयकामिन्याः इन्द्रमणिमेखलेव चन्द्रकान्तरत्नमेखलेव । पुनः कथंभूता । मालवावनीपालविलासिनीनां मालवस्य ये अवनिपालास्तेषां विलासिनीनां जलकेलिदीर्घिकेव जलक्रीडावापिकेव । पुनः कथंभूता । भुजङ्गमलोकस्य पाताललोकस्य नित्योत्सवपताकेव नित्यमहोत्सववैजयन्तीव । पुनः कथंभूता । मार्गमहीधराणां मार्गपर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लीव मेदिनीदेवतायाः, कीर्तिवैजयन्तीव प्रभवभूधरस्य, सेकसारणिरिव सिन्धुरत्नाङ्कुराणाम्, शरसृष्टिरिव च जगत्प्रसाधनमतीनां प्रजापतीनाम्, भोगवतीव पद्माधिष्ठिता भुजङ्गलोकोचिता च, राज्यलक्ष्मीरिव कुवलयोपगता द्विजभोगभूता च, काननश्रीरिव संवरप्रचुरा मुनिजनगोचरा च, सीतेव लक्ष्मणानुगता रामानन्दिता च, भारतकथेव धृतराष्ट्रावसाना जातव्यासाधिष्ठाना च, आस्फूर्जितमूर्तिरिव कान्तावलोकना प्रसाधितबलिसं-

---

तानां वरणमालेव। पुनः कथंभूता। मेदिनीदेवताया मुक्तावलीव मुक्ताफलमालेव। पुनः कथंभूता। प्रभवभूधरस्य एतदुत्पत्तिपर्वतस्य कीर्तिवैजयन्तीव कीर्तिपताकेव। पुनः कथंभूता। सिन्धुरत्नाङ्कुराणां समुद्ररत्नाङ्कुराणां सेकसारणिरिव सेचनकृत्रिमनदीव। पुनः कथंभूता। प्रजापतीनां नरेन्द्राणां शरसृष्टिरिव वाणसृष्टिरिव। कथंभूतानां प्रजापतीनाम्। जगत्प्रसाधनमतीनां पृथ्वीमण्डलवुद्धीनाम्। पुनः कथंभूता सिप्रा। पद्माधिष्ठिता कमलमण्डिता भुजङ्गलोकोचिता च कामुकलोकयोग्या च। केव। भोगवतीव अहिपुरीव। यथा भोगवती पद्माधिष्ठिता पद्मनामनागदेवतासहिता, भुजङ्गलोकोचिता सर्पसमूहयोग्या च भवति। पुनः कथंभूता। कुवलयोपगता उत्पलैरुपमण्डिता द्विजभोगभूता च। केव। राज्यलक्ष्मीरिव। यथा राज्यलक्ष्मीः कुवलयोपगता पृथ्वीमण्डलमण्डिता, द्विजानां ब्राह्मणानां भोगभूता च भवति। पुनः कथंभूता। संवरप्रचुरा जलवहुला मुनिजनगोचरा च तापसपक्षिसहिता च। केव। काननश्रीरिव वनलक्ष्मीरिव। यथा काननश्रीः संवरप्रचुरा शृङ्गतरुसहितचतुष्पदजीववहुला आश्रवनिरोधसहिता, मुनिजनानां दिगम्बराणां गोचरा च भवति। पुनः कथंभूता। लक्ष्मणानुगता सारसपङ्क्तिसहिता रामानन्दिता च रामाणां स्त्रीणां आनन्दकारिणी च। केव। सीतेव जनकतनयेव। यथा सीता लक्ष्मणेन सौमित्रिणा अनुगता, रामानन्दिता रामेण दशरथनन्दनेन आह्लादिता च भवति। पुनः कथंभूता। धृतराष्ट्रावसाना धृतराष्ट्रा हंसा अवसानयोरुभयतटयोर्यस्याः सा जातव्यासाधिष्ठाना च जातमुत्पन्नं व्यासस्य विस्तारस्य अधिष्ठानं मूलं यस्याः सा तथा च। केव। भारतकथेव भरतो नाम कौरवपाण्डवानां पूर्वजः कश्चित् तस्यापत्यानि भारताः कौरवपाण्डवास्तेषां कथेव पुराणसदृशी। यथा भारतकथा धृतराष्ट्रावसाना धृतराष्ट्रो नाम दुर्योधनपिता तस्य अवसानं मरणं यस्यां कथायां सा धृतराष्ट्रावसाना जातमुत्पन्नं व्यासेन सत्यवतीपुत्रेण अधिष्ठानं पीठवन्धो यस्याः सा जातव्यासाधिष्ठाना च भवति। पुनः कथंभूता। कान्तावलोकना कान्तं मनोहरं अवलोकनं यस्याः सा प्रसाधितबलिसंताना च प्रसाधितो बलिसंतानः पूजासमूहो यस्यां सा तथा च। केव। आस्फूर्जितमूर्तिरिव इन्दुमूर्तिरिव। यथा आस्फूर्जितमूर्तिः कान्तानां सुन्दरीणां अवलोकनसहिता, प्रसाधितबलिसंताना च प्रसाधितो वशीकृतो बलेर्दानवविशेषस्य संतानो यया सा तथा च भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताना च, सुधासृष्टिरिव कुमुदावहा विहितदेवमहा च, विपणिवीथिरिव सौगन्धिकावसथा ग्राहकमठपत्रिसनाथा च, सकमलकल्लोलकलशाभिषेकतोषितोपान्ताश्रमाश्रयविप्रा **सिप्रा** नाम नदी ।

यत्र मदोन्मुखमरालकुलकामिनीचरणचारचलद्विकचकञ्जकिञ्जल्कपुञ्जपिञ्जरतरङ्गम्, अखर्वगर्वदार्वाघाटपेटकपर्यटनलुण्ठ्यमानपुटकिनीपुटपटलान्त-

---

पुनः कथंभूता । कुमदावहा कुमुदानि श्वेतोत्पलानि आवहति धत्ते सा विहितदेवमहा च विभ्यः पक्षिभ्यो हिता विहिता, देवानां नृपाणां मह उत्सवोयस्यां सा देवमहा, विहिता चासौ देवमहा च विहितदेवमहा च । 'कर्मधारे च संज्ञे तु पुंवद्भावो विधीयते' इति विहिताशब्दस्य पुंवद्भावः । केव । सुधासृष्टिरिव । यथा सुधासृष्टिरमृतसृष्टिः कुमुदावहा कौ पृथिव्यां मुदमावहति मुदं करोति तथा, विहितदेवमहा च विहित उत्पादितो देवानां महः पूजा यस्यां सा तथा च भवति । देवपूजायामादौ जलं विलोक्यते तद्धेतुत्वात् । पुनः कथंभूता । सौगन्धिकावसथा सौगन्धिकानां रक्तकमलानां कह्लाराणां च आवसथः निवासो यस्यां सा तथा ग्राहकमठपत्रिसनाथा च ग्राहा मकरादयः कमठाः कच्छपाः पत्रिणः पक्षिणस्तैः सनाथा सहिता च। केव। विपणिवीथिरिव हट्टावलीव । यथा विपणिवीथिः सौगन्धिकानां सुगन्धिवस्तुपण्यानां आवसथः स्थानं यस्यां विपणिवीथौ सा तथा, ग्राहका सुगन्धतैलादिक्रयका मठपतयो गृहस्थाः तैः सनाथा सहिता च भवति । पुनः कथंभूता । सकमलकल्लोलकलशाभिषेकतोषितोपान्ताश्रमाश्रयविप्रा सकमलकल्लोला पुष्पसंयुततरङ्गास्त एव कलशा घटास्तेषामभिषेकेण सेचनेन तोषिता हर्षं प्रापिता उपान्ताश्रमाश्रयाः नदीसमीपगृहे आश्रिता विप्रा ब्राह्मणा यया सा तथोक्ता सिप्रा नाम नदी ॥

यत्र यस्यां सिप्रायां नगराङ्गनानिवहैर्नगरस्त्रीसमूहैः जलक्रीडावसरेषु पयः पानीयं उत्कलिकाविलोदयं उत्कलिकाभिस्तरङ्गैः कृत्वा आविलोदयं अनच्छोदयं क्रियते विधीयते । कथंभूतं पयः । मुक्ताफलद्रुतिचयः मौक्तिकचूर्णसदृशमिव आविलोदयं अनच्छं क्रियते । किमिव । विरहिणीहृदयमिव विप्रलब्धपुरंध्रीचित्तमिव । यथा विरहिणीहृदयमुत्कलिकाभिरुत्कण्ठाभिराविलोदयमनच्छं भवति । पुनः कथंभूतम् । मदोन्मुखमरालकुलकामिनीचरणचारचलद्विकचकञ्जकिञ्जल्कपुञ्जपिञ्जरतरङ्गम् मदोन्मुखा मदमागता या मरालकुलकामिन्यो हंसभार्यास्तासां चरणचारैः पादचेष्टितैः चलन्ति प्रचलन्ति यानि विकचानि विकसितानि कञ्जानि कमलानि तेषां किञ्जल्कपुञ्जः केसरसमूहस्तेन पिञ्जराः पीतरक्तास्तरङ्गाः कल्लोला यस्य पयसस्त्वत्तथोक्तम् । पुनः कथंभूतम् । अखर्वगर्वदार्वाघाटपेटकपर्यटनलुण्ठ्यमानपुटकिनीपुटपटलान्तरङ्गम् अखर्वो दीर्घतरो गर्वो येषां ते अखर्वगर्वास्ते च ते दार्वाघाटाः सारसास्तेषां पेटकः समूहस्तस्य पर्यटनेन संचरणेन लुण्ठ्यमानानां पुटकिनीनां कमलिनीनां पुटपटलानां पुटसमूहानामन्तरङ्गं मध्यो यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रङ्गम्, उत्तरलतरतरत्कारण्डोच्चण्डतुण्डकाण्डखण्ड्यमानखरदण्डदलोल्ल-सत्कल्लोलम्, अनेकमल्लिकाक्षकुटुम्बिनीकदम्बचुम्ब्यमानजम्बालजालजटि-लजलदेवतादोलम्, अनवरतरतिकलहमोदमेदुरमिथुनचरपतङ्गपक्षचापलो-च्छलच्छीकरासारसिच्यमानतीरतरुनिकरम्, अन्योन्यापघनघनाघट्टकुपित-कुम्भीरभयभ्राम्यत्ककुभकुहूत्कारमुखरम्, आवाचाटबकोटचेष्टितचकित-कमलमूलनिलीयमानपोताधानम्, अम्बुरुहकुहरविहरदवहारविघ्नितवैखान-सकुसुमोञ्छनविधानम्, उदीर्णदर्पदीवितुमुलकलिकोलाहलावलोकमूकमू-

---

तत्तथोक्तम् । पुनः कथंभूतम् । उत्तरलतरतरत्कारण्डोच्चण्डतुण्डकाण्डखण्ड्यमानखरदण्ड-दलोल्लसत्कल्लोलम् उत्तरलतराश्चपलतरा तरन्त उन्मृजन्तो ये कारण्डाः चक्रवाकास्तेषामुच्च-ण्डानि मुखानि तान्येव काण्डा बाणास्तैः खण्ड्यमानानि कर्तमानानि यानि खरदण्डदलानि कमलपत्राणि तैः सह उल्लसन्त उच्छलन्तः कल्लोला यत्र तत्तथोक्तम् । पुनः कथंभूतम् । अनेकमल्लिकाक्षकुटुम्बिनीकदम्बचुम्ब्यमानजम्बालजालजटिलजलदेवतादोलम् अनेके ब-ह्वो ये मल्लिकाक्षाः हंसविशेषास्तेषां कुटुम्बिन्यो हंसीविशेषास्तासां कदम्बानि समूहास्तै-श्चुम्ब्यमानानि मुखैः स्पृश्यमानानि यानि जम्बालजालानि सैवलसमूहाः तैर्जटिलाः कर्बुरा जलदेवतानां दोलाः प्रेङ्खा यत्र तत्तथोक्तम् । उक्तं च—'रक्तैर्वक्रैः सचरणै राजहंसा विभावयेत् । श्यामलैर्मल्लिकाक्षास्तु धार्तराष्ट्राः सितेतरैः ॥' पुनः कथंभूतम् । अनवरतरति-कलहमोदमेदुरमिथुनचरपतङ्गपक्षचापलोच्छलच्छीकरासारसिच्यमानतीरतरुनिकरम् अन-वरतं निरन्तरं योऽसौ रतिकलहः रतियुद्धं तेन मोदो हर्षस्तेन मेदुराः सस्नेहा ये मिथुन-चरपतङ्गाः चक्रवाकपक्षिणस्तेषां पक्षचापलेन पत्रचपलत्वेनोच्छलन्त उत्पतन्तो ये शी-कराः जलकणसमूहास्तैः सिच्यमाना आर्द्रीक्रियमाणास्तीरतरुनिकरास्तटवृक्षसमूहा यत्र तत्तथोक्तम् । पुनः कथंभूतम् । अन्योन्यापघनघनाघट्टकुपितकुम्भीरभयभ्राम्यत्ककुभकुहू-त्कारमुखरम् अन्योन्यानां परस्पराणां ये अपघनाः शरीराणि तेषां घनाघट्टो निबिडभ-टभेटकस्तेन कुपिता ये कुम्भीरा नक्रास्तेषां भयात् भ्राम्यन्त उड्डीयमाना ये ककुभा वा-लकुर्कुटास्तेषां कुहूत्कारैरव्यक्तशब्दैर्मुखरं वाचालम् । पुनः कथंभूतम् । अवाचाटबकोटचेष्टि-तचकितकमलमूलनिलीयमानपोताधानम् अवाचाटा मौनिनः ये बकोटा बकास्तेषां चे-ष्टितैः व्यापारैः चकितानि भीतानि कमलमूले निलीयमानानि पद्ममूलेषु प्रविशन्ति पोताधानानि क्षुद्रमत्स्यसमूहा यत्र तत्तथोक्तम् । पुनः कथंभूतम् । अम्बुरुहकुहरविहरदवहा-रविघ्नितवैखानसकुसुमोञ्छनविधानम् अम्बुरुहाणां कुहरेषु विहरन्तः पर्यटन्तो ये अवहारा जलव्यालाः । ग्राहा इत्यर्थः । तैर्विघ्नितमन्तरायं प्राप्तं वैखानसानां तापसानां कुसुमोञ्छनवि-धानं कमलादिचुण्टनविधानं यत्र तत्तथोक्तम् । पुनः कथंभूतम् । उदीर्णदर्पदीवितुमुलकलिको-लाहलावलोकमूकमूककलोकम् उदीर्णदर्पा उत्कटमदा ये दीवयः जलसर्पास्तेषां तुमुलो रौद्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ककलोकम्, उन्मत्तमकरकरास्फालनोत्काललहरिकोत्तालितारविन्दकन्दरद्रवन्मकरन्दबिन्दुचन्द्रकावचयचटुलचञ्चरीकमेचकवीचिकानीकम्, उद्दामोदकद्विपदशनदश्यमानमृणालिनीसकलसारप्रसरम्, अतुच्छकच्छपाच्छोटमूर्छत्पाठीनपृष्ठपीठीलुठदुद्दण्डडिण्डीरपिण्डशिखण्डिततटिनीनिकटकर्करम्, उपान्तसैकतोल्लोलवालीविहारवाचालवारलम्, अदूरजकुजकुञ्जकुलायक्रीडत्कुररकूजितबहलम्, अमृतस्रोत इव सुखस्पर्शावदातम्, आमलकशिलातलमिव स्वच्छकलम्, इन्दुमणिनिःस्यन्दनमिव सुभगावलोकनम्,

---

योऽसौ कलिर्युद्धं तस्य कोलाहलस्य कलकलशब्दस्य अवलोकेन दर्शनेन मूकादाग्रहिता मूककलोका मण्डूकसमूहा यत्र तत्तथोक्तम् । पुनः कथंभूतम् । उन्मत्तमकरकरास्फालनोत्काललहरिकोत्तालितारविन्दकन्दरद्रवन्मकरन्दविन्दुचन्द्रकावचयचटुलचञ्चरीकमेचकवीचिकानीकम् उन्मत्ता उत्कर्षेण मदं प्राप्ता ये मकरा जलहस्तिनस्तेषां कराणां शुण्डादण्डानां आस्फालनेन उत्ताला उत्सुका वेगवत्यो या लहरिका वीचयस्ताभिरुत्तालितानि कम्पितानि यानि अरविन्दानि तेषां कन्दरेभ्यः कोशेभ्यो द्रवन्तो निर्गलन्तो ये मकरन्दविन्दवस्तेषां चन्द्रकानि···
लहरीसमूहा यत्र तत्तथोक्तम् । पुनः कथंभूतम् । उद्दामोदकद्विपदशनदश्यमानमृणालिनीसकलसारप्रसरम् उद्दामा उल्वणा ये उदकद्विपा जलहस्तिनस्तेषां दशनैर्दश्यमानाश्चर्व्यमाणा मृणालिनीनां पद्मिनीनां सकला समग्रा अभ्यग्रा सारप्रसराः कन्दविस्तारा यत्र तत्तथोक्तम् । पुनः कथंभूतम् । अतुच्छकच्छपाच्छोटमूर्छत्पाठीनपृष्ठपीठीलुठदुद्दण्डडिण्डीरपिण्डशिखण्डिततटिनीनिकटकर्करम् अतुच्छा बृहतो महान्तो गण्डशैलसदृशा ये कच्छपास्तेषां आच्छोटेन आस्फालनेन मूर्छन्तः संदीप्यमानाः क्रुध्यन्तो ये पाठीनाः सहस्रदंष्ट्रा मत्स्यास्तेषां प्रशस्तं पृष्ठं पृष्ठपीठी तत्र लुठन्तो ये उद्दण्डाः प्रचण्डा डिण्डीरपिण्डाः फेनराशयस्तैः शिखण्डिता मुकुटवन्तः कृता तटिनीनां नदीनां निकटेषु उभयकूलसमीपेषु कर्कराः पर्वतदन्ता येन पयसा तत्तथोक्तम् । पुनः कथंभूतम् । उपान्तसैकतोल्लोलवालीविहारवाचालवारलम् उपान्तेषु समीपेषु यानि सैकतानि सिकतामयानि द्वीपानि पुलिनानि तेषु उल्लोला लोला वाल्यो लहर्यस्तासु विहारेण पर्यटनेन वाचालाः शब्दवत्यो वारला हंसभार्या यत्र तत्तथोक्तम् । पुनः कथंभूतम् । अदूरजकुजकुञ्जकुलायक्रीडत्कुररकूजितबहलम् अदूरे जाता अदूरजा निकटवर्तिनो ये कुजा वृक्षास्तेषां कुञ्जेषु ये कुलायाः पक्षिगृहा मालकास्तेषु क्रीडन्तो ये कुररा उत्क्रोशपक्षिणस्तेषां कूजितैरव्यक्तशब्दितैर्बहलं प्रचुरम् । पुनः कथंभूतम् । सुखस्पर्शावदातम् सुखस्पर्शेन सौख्योत्पादकस्पर्शेन अवदातमुज्ज्वलम् । किमिव । अमृतस्रोत इव पीयूषप्रवाह इव । पुनः कथंभूतम् । स्वच्छकलम् स्वच्छा कला कायो यस्य तत्तथोक्तम् । किमिव । आमलकशिलातलमिव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अव्ययं ज्योतिरिव जनितजगत्प्रणयम्, अलकवल्लरीतरङ्गभङ्गिभिर्वदनारविन्दामोददुर्दिनैर्भुजलतावानीरसंततिभिः कुचकोकमिथुनमनोहरैर्वलिवञ्जुलवल्लीविलासिभिर्नाभिमण्डलावर्तोदात्तैर्नितम्बपुलिनस्थलश्लाघिभिरूरुकरिमकरकराभोगहृदयंगमैः पादनखमयूखफेनस्फीतैः प्रतिनदीप्रवाहैरिव नगराङ्गनानिवहैर्जलक्रीडावसरेषु विरहिणीहृदयमिवोत्कलिकाविलोदयं क्रियते मुक्ताफलद्युतिचयः पयः । अपि च ।

करिमकरमुखोद्गीर्णं यस्यामर्णः पुनः पतद्भाति ।
सुरमिथुनकलहविगलितमुक्ताफलभूषणभ्रान्ति ॥

पुनः कथंभूतम् । सुभगावलोकनम् सुभगं प्रीतिजनकं अवलोकनं यस्य पयसस्तत्तथोक्तम् । किमिव । इन्दुमणिनिःस्यन्दनमिव चन्द्रकान्तमणिद्रव इव । पुनः कथंभूतम् । जनितजगत्प्रणयम् उत्पादितसकललोकप्रीतिकम् । किमिव । अव्ययं ज्योतिरिव केवलज्ञानमिव । कथंभूतैर्नगराङ्गनानिवहैः । प्रतिनदीप्रवाहैरिव अपरनदीपूरैरिव । पुनः कथंभूतैः । नदीधर्मविशिष्टानि विशेषणान्याह—अलकवल्लरीतरङ्गभङ्गिभिः अलकवल्लर्यस्तरङ्गभङ्गः कल्लोलरचना येषु नगराङ्गनानिवहेषु ते तथा तैः । पुनः कथंभूतैः । वदनारविन्दामोददुर्दिनैः वदनान्येवारविन्दानि तेषामामोदेन परिमलेन दुर्दिनाश्छन्नास्ते तथा तैः । पुनः कथंभूतैः । भुजलतावानीरसंततिभिः भुजलता वाहुवल्ल्यस्ता एव वानीरसंततयो वेतससमूहा येषु ते तथा तैः । पुनः कथंभूतैः । कुचकोकमिथुनमनोहरैः कुचा एव कोकमिथुनानि चक्रवाकयुगलानि तैर्मनोहरा मनोरञ्जनचतुरास्ते तथा तैः । पुनः कथंभूतैः । वलिवञ्जुलवल्लीविलासिभिः वलयः उदररेखास्ता एव वञ्जुलवल्ल्यो लताविशेषास्ताभिर्विलसन्त्युल्लसन्तीत्येवंशीला वलिवञ्जुलवल्लीविलासिनस्तैः । पुनः कथंभूतैः । नाभिमण्डलावर्तोदात्तैः नाभिमण्डलान्येव आवर्ता भूपास्तैरुदात्ता मनोहरास्ते तथा तैः । पुनः कथंभूतैः । नितम्बपुलिनस्थलश्लाघिभिः नितम्बाः स्त्रीकटीपश्चाद्भागास्त एव पुलिनस्थलानि जले क्रमेणोत्थितं द्वीपं पुलिनं प्रशस्तानि पुलिनानि पुलिनस्थलानि तेषां श्लाघा प्रशंसा विद्यते येषां ते तथा तैः । पुनः कथंभूतैः । ऊरुकरिमकरकराभोगहृदयंगमैः ऊरवः सक्थीनि त एव करिमकरकराभोगा जलहस्तिजलग्राहशुण्डादण्डविस्तारास्तैर्हृदयंगमा मनोहरास्ते तथा तैः । पुनः कथंभूतैः । पादनखमयूखफेनस्फीतैः पादनखमयूखा एव फेना डिण्डीरपिण्डास्तैः स्फीता प्रचुरास्ते तथा तैः ॥

अपि च तथा च । **करीत्यादि** । यस्यां सिप्रायां नद्यामर्णो जलं करिमकरमुखोद्गीर्णं जलहस्तिनक्रमुखैरुद्गीर्णं उद्गापितम् । पुनः पुनरपि आकाशात् अधः पतत् भाति शोभते । कीदृशं भाति । सुरमिथुनकलहविगलितमुक्ताफलभूषणभ्रान्ति सुराणां मिथुनानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जलदेवीकरयन्त्रैरुपरिष्टाद्यत्र वारि विक्षिप्तम् ।
दुर्वर्णदण्डदीप्तिं दधाति विपदातपत्रस्य ॥
षट्चरणचलितजलरुहमकरन्दस्यन्दबिन्दुकन्दलितम् ।
यस्याः पाथः श्लथयति घुसृणमतिं पौरलोकस्य ॥
चपलकलहंसबालकपरिप्लुतः षट्पदोऽम्बुजे भाति ।
यस्यां धर्मभयादिव पलायमानोऽघसंघातः ॥
मध्यमधुलुब्धमधुकरकुलभाण्डं पुण्डरीकमुद्दण्डम् ।
हरति हरिन्मणिकलशां सितातपत्रश्रियं यत्र ॥
उद्गतमकरन्दरजः सिताम्बुजं यत्र मोदमन्थरितम् ।
उपरिचलधूलिधूसरधवलच्छत्रच्छविं छुपति ॥

स्त्रीपुरुषयुग्मानि तेषां कलहो मैथुन(?)कटस्तेन विगलितान्यधःपतितानि यानि मुक्ताफलभूषणानि तेषां भ्रान्तिः सादृश्यं यत्र तत्तथोक्तम् । उपमालंकारः ॥

जलदेवीत्यादि । यत्र यस्यां जलदेवीकरयन्त्रैः कृत्वा उपरिष्टात् आकाशे विक्षिप्तं विकीर्णं वारि जलं विपदातपत्रस्य दुर्वर्णदण्डदीप्तिं दधाति रूप्यमयदण्डशोभां धरति । रूपकोपमालंकारः ॥

षट्चरणेत्यादि । यस्याः सिप्रायाः पाथो जलं पौरलोकस्य घुसृणमतिं कुङ्कुमद्रवस्वीकाराभिलाषं श्लथयति शिथिलयति । तत्कारणगर्भितं विशेषणमाह—कथंभूतं पाथः । षट्चरणचलितजलरुहमकरन्दस्यन्दबिन्दुकन्दलितं षट्चरणा भ्रमराः तैः चलितानि कम्पितानि यानि जलरुहानि कमलानि तेषां मकरन्दस्यन्दबिन्दवः पुष्परसक्षरणविषस्तैः कन्दलितं निश्चितम् । हेत्वलंकारः ॥

चपलेत्यादि । यस्यां सिप्रायां अम्बुजे कमले षट्पदो भ्रमरो भाति शोभते । कथंभूतो भाति । अघसंघात इव पापसमूह इव । किं कुर्वाणः अघसंघात इव भाति । धर्मभयात् पलायमानो नश्यत् । षट्पदः कथंभूतः । चपलकलहंसबालकपरिप्लुतः चपलो योऽसौ कलहंसबालकः कलहंसशिशुस्तस्य मुखेन परिप्लुत उपद्रुतः । प्रतिवस्तूपमालंकारः ॥

मध्येत्यादि । यत्र यस्यां पुण्डरीकं श्वेतकमलं कर्तृभूतं सितातपत्रश्रियं हरति तिरस्करोति । कथंभूतां सितातपत्रश्रियम् । हरिन्मणिकलशां हरिन्मणेरश्मगर्भरत्नस्य कलशः कुम्भो यस्यां सा तथा ताम् । कृष्णरत्नकलशामित्यर्थः । कथंभूतं पुण्डरीकम् । मध्यमधुलुब्धमधुकरकुलभाण्डं मध्यमधुलुब्धो मकरन्दलम्पटो योऽसौ मधुकरो भ्रमरस्तस्य कुलं जातिस्तस्य भाण्डमाधारः । पुनः कथंभूतम् । उद्दण्डं जलान्निर्गतम् ॥

उद्गतेत्यादि । यत्र यस्यां सिप्रायां नद्यां सिताम्बुजं श्वेतकमलं उपरिचलधूलिधूसर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संपन्नपुरच्छायं तलदेशे यत्र राजते वारि ।
उन्मीलितभुजगजगत्सुरलोकालोकदर्पणद्युति च ॥

ईशानशीर्षोचितविभ्रमाणि वैखानसावासनिरन्तराणि ।
नीराणि यस्याः सुरशेखराणि सरिद्वरावारिमनोहराणि ॥

देवार्चनासङ्गविधौ जनानां यस्यां प्रसूनाञ्जलिगन्धलुब्धः ।
विनिर्गलत्पूर्वभवाघसङ्घः समन्ततो भाति मधुव्रतौघः ॥

यस्याः प्रवाहः सरितः प्रकामं बलिप्रसूनप्रकराभिरामः ।
रत्नोत्करापूरितसत्रवृत्तेर्महाध्वजस्येव तनोति कान्तिम् ॥

धवलच्छत्रच्छविं छुपति उपरितनभागे चला चपला या धूली रजः तया धूसरं ईषत्पाण्डुरं धवलमुज्ज्वलं यच्छत्रं तस्य छविः शोभा तां छुपति स्पृशति । 'छुपतिस्पृशसंस्थः शत्तुदादौ वर्तते ।' कथंभूतं सिताम्वुजम् । उद्गतमकरन्दरजः उद्गतमुज्ज्वलितमुपरिगतं वा मकरन्देन पुष्परसेनोपलक्षितं रजः परागो यत्र सिताम्वुजे तत्तथोक्तम् । पुनः कथंभूतम् । मोदमन्थरितं मोदेन परिमलभारेण मन्थरितं नम्रीभूतम् । हेतूपमालंकारः ॥

संपन्नेत्यादि । यत्र यस्यां तलदेशे अधःप्रदेशे नगरस्याधोभागे वारि राजते । कथंभूतं वारि । संपन्नपुरच्छायं प्रतिविम्वितोज्जयिनीनगरप्रतिविम्वम् । पुनः कथंभूतम् । उन्मीलितभुजगजगत् उन्मीलन्नागलोको यत्र वारिणि तत्तथोक्तम् । पुनः कथंभूतम् । सुरलोकालोकदर्पणद्युति सुरलोकस्य स्वर्गलोकस्य मध्यगता आलोकभूतास्य आलोकाय विलोकनाय दर्पणस्य आदर्शस्य द्युतिः शोभा यस्य वारिणस्तत्तथोक्तम् । स्वर्गनगरदर्शनदर्पणसदृशमित्यर्थः । हेतूपमालंकारः ॥

ईशानेत्यादि । यस्याः सिप्रायाः नीराणि । कथंभूतानि । सरिद्वरावारिमनोहराणि गङ्गानदीजलसदृशानि । पुनः कथंभूतानि । ईशानशीर्षोचितविभ्रमाणि ईशानो महादेवस्तस्य शीर्षस्तस्मिन् उचितविभ्रमाणि योग्यशोभानि । पुनः कथंभूतानि । वैखानसावासनिरन्तराणि वैखानसानां तापसानामावासैर्गृहैः निरन्तराणि अविच्छिन्नानि । पुनः कथंभूतानि । सुरशेखराणि सुराणां शेखराणि मुकुटानि । मस्तकेषु धारणीयानीत्यर्थः ॥

देवार्चनेत्यादि । यस्यां नद्यां मधुव्रतौघो भाति । कथम् । समन्ततः सर्वत्र । कथंभूतो मधुव्रतौघः । देवार्चनासङ्गविधौ देवपूजावसरविधाने जनानां प्रसूनाञ्जलिगन्धलुब्धः पुष्पाञ्जलिगन्धलम्पटः । पुनः कथंभूतः । विनिर्गलत्पूर्वभवाघसङ्घः विनिर्गलन् विनिर्गच्छन् पूर्वभवानां जन्मान्तराणां अघसङ्घः पापसमूह इव । उपमालंकारः ॥

यस्या इत्यादि । यस्याः सरितः प्रवाहः प्रकामं महाध्वजस्य इन्द्रध्वजस्य यज्ञविशे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिलीचिमनिरीक्षणा सितसरोजहासोल्बणा
कलक्कणितवारलाविलसदावलीमेखला ।
उपान्तपुलिनाननोच्छलितवीचिनादानुगा
मनः पुरजनस्य या हरति कामिनीवापगा ॥

तस्याः प्रमादमालवीजलकेलिसरस्याः सरितो जलक्रीडोत्तालजलदेवता-

षस्य कान्तिं शोभां तनोति । कथंभूतः प्रवाहः । वलिप्रसूनप्रकराभिरामः वल्यर्थं पूजार्थं यानि प्रसूनानि तेषां प्रकरैः अभिरामो मनोहरः । कथंभूतस्य महाध्वजस्य । रत्नोत्करापूरितसत्रवृत्तेः रत्नोत्करैरापूरिता सत्रस्य गृहस्य वृत्तिर्येन स तथा तस्य । उक्तं च— 'जिनपूजाया भेदाः पञ्च भवन्ति । तत्र नित्यमहः, चतुर्मुखम्, कल्पवृक्षः, आष्टाह्निकम्, ऐन्द्रध्वज इति । तत्र नित्यमहः निजगृहात् गन्धपुष्पाक्षतादीनि जिनगृहाय निवेदनं चैत्यचैत्यालयं च कृत्वा ग्रामक्षेत्रादीनां शासनदानं मुनिजनपूजनं च नित्यमहः, मुकुटवद्धैः क्रियमाणा पूजा महामहः । सर्वतोभद्रश्चतुर्मुखमिति कथ्यते । कल्पवृक्षः अर्थिनः प्रार्थितानर्थैः संतर्प्य चक्रवर्तिभिः क्रियमाणो महः कल्पवृक्ष उच्यते । आष्टाह्निकं आषाढकार्तिकफाल्गुनमासेषु शुक्लपक्षेषु अष्टम्या पूर्णिमापर्यन्तं स्नपनपूजादिकं क्रियमाणं आष्टाह्निकमुच्यते । ऐन्द्रध्वजः इन्द्रादिभिः क्रियमाणो महः समवसरणादौ ऐन्द्रध्वज उच्यते ।' दृष्टान्तालंकारः ॥

चिलीचिमेत्यादि । या आपगा सिप्रा नदी पुरजनस्य मनो हरति चोरयति । केव । कामिनीव वश्येव । कथंभूता आपगा । चिलीचिमनिरीक्षणा······················
······। पुनः कथंभूता । सितसरोजहासोल्बणा·····························
··············। पुनः कथंभूता । कलक्कणितवारलाविलसदावलीमेखला कलं मधुरं क्कणितं शब्दितं यासां ताः कलक्कणितास्ताश्च ता वारला हंसभार्यास्तासां विलसन्ती उल्लसन्ती या आवली श्रेणिः सैव मेखला कटिमेखला यस्याः सा तथोक्ता । वेश्यापि कटिमेखलासहिता भवति । पुनः कथंभूता । उपान्तपुलिनाननोच्छलितवीचिनादानुगा उपान्तेषु समीपेषु यत्पुलिनं तोयमध्ये वालुकाद्वीपं तदेवाननं तत्रोच्छलिता उत्पतिता या वीचयो लहर्यस्तासां नादेन शब्देन अनुगच्छति चलति या सा तथोक्ता । वेश्यापि उल्लसन्ती गीतादिकं करोति । स्रग्विणीछन्दः । उपमालंकारः ॥

अहो मारदत्त महाराज, तस्याः सरितः सिप्रायाः नद्याः संबन्धिनि महाह्रदे अगाधजलाशये पुनरहं यशोधरः पृथुरोमा मत्स्यः समभूवं संजातोऽस्मि । कथंभूतायास्तस्याः । प्रमादमालवीजलकेलिसरस्याः प्रमादेन अलसतया मालवीनां मालवदेशोद्भवस्त्रीणां जलकेल्यर्थं जलक्रीडार्थं सरसी महासरोवरं तस्याः । कथंभूते महाह्रदे । जलक्रीडोत्तालजलदेवता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हस्तोदस्तसलिलासारधारासहस्रसंपादितानेकगगनतलशतह्रदे महाह्रदे व्यतिक्रम्य तं पृषतपर्यायोदन्तमसरालशयालुप्रमाणदेहः पुनरहमहो महाराज, रोक्षिताक्षनामा पृथुरोमा समभूवम् । यस्मिञ्जलक्रीडारते

कूलंकषा मग्नतनौ मयि स्यादुन्मग्नकाये प्रतनुप्रवाहा ।
स्थिते तिरश्चीनतया च सिन्धुः सा सेतुबन्धश्रियमादधाति ॥

सापि मदीयाम्बा कृतकृष्णपन्नगतनुत्यागात्तत्रैव शिशुमारतया जन्मासादयामास ।

एकदा नु तस्यामेव सीकरासारतारकितसकलहरिति सरिति निदाघदाहदारुणरसेषु शुचिसमाशाखादिवसेषु

हस्तोदस्तसलिलासारधारासहस्रसंपादितानेकगगनतलशतह्रदे जलक्रीडायामुत्ताला या जलदेवतास्तासां हस्तोदस्त ऊर्ध्वं क्षिप्तो योऽसौ सलिलासारो जलसमूहस्तस्य धाराभिः संपादिता उत्पादिता अनेका च गगनतले शतह्रदा विद्युतो यस्मिन् महाह्रदे स तथा तस्मिन् । किं कृत्वा अहं पृथुरोमा समभूवम् । तं पूर्वोक्तं पृषतपर्यायोदन्तं सहेलकपर्यायवार्तां व्यतिक्रम्य । अहं सहेलको मृत्वा पृथुरोमा संजात इत्यर्थः । कथंभूतः पृथुरोमा । असरालशयालुप्रमाणदेहः असरालो महान् योऽसौ शयालुरजगरस्तेन प्रमाणस्तत्सदृशो देहो यस्य स तथोक्तः । पुनः कथंभूतः पृथुरोमा । रोहिताक्षनामा रोहिताक्ष इति नाम यस्य स तथा । मुचुकुन्दपुष्पसदृशरक्तश्वेतशरीर इत्यर्थः । यस्मिन् रोहिताक्षे जलक्रीडारते सति ।

कूलंकषेत्यादि । सा सिन्धुः सिप्रा नदी मयि रोहिताक्षे पृथुरोम्नि मग्नतनौ सति कूलंकषा तटमुद्रुजा स्याद्भवेत् । मयि उन्मग्नकाये सति वहिरुच्छलिते सति प्रतनुप्रवाहा अल्पपूरा स्यात् । मयि तिरश्चीनतया तिर्यक्त्वेन स्थिते सति सेतुबन्धश्रियं सेतुबन्धशोभां आदधात्याचरति । दीपकालंकारः, अतिशयश्च ॥

सापि पूर्वोक्ता मदीयाम्बा चन्द्रमतिः कृतकृष्णपन्नगतनुत्यागात् कालसपर्यायं परिहृत्य तत्रैव सिप्रायां महारुद्रे शिशुमारतया शिशुमारत्वेन रौद्रजलचरजन्मा जन्म भवान्तरं आसादयामास प्राप्तवती ।

एकदा एकस्मिन्नवसरे नु पुनः शुचिसमाशाखादिवसेषु ज्येष्ठमासदिनेषु तस्यामेव सरिति सिप्रायां नद्यां पुराङ्गना नगरस्त्रियः क्रीडन्ति स्म क्रीडां चक्रुः । कथंभूतायां तस्यां सरिति । सीकरासारतारकितसकलहरिति सीकरासारैरुच्छलितजलकणसमूहैस्तारकिताः संजाततारकाः सकला अपि हरितो दिशो यया सा तथा तस्याः । कथंभूतेषु शुचिमासदिवसेषु । निदाघदाहदारुणरसेषु निदाघदाहेन घर्मसंतापेन दारुणो रसः सप्तमो रसो येषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्रश्यत्कर्णवतंसकाः सरलितप्रान्तप्रलम्बालकाः
शीर्यत्कज्जललोचनाः परिगलद्गण्डस्थलीचन्दनाः ।
उत्कम्पस्तनमण्डलाः प्रविलसल्लीलाब्जबाहाकुलाः
क्रीडन्ति स्म पुराङ्गनाः प्रियतमैरासेव्यमाना इव ॥

तत्रैवावसरेऽषडक्षीणाक्षोभक्षामनिद्रोद्रेकेणातुच्छपुच्छाच्छोटनोच्छलदविच्छिन्नच्छटस्वच्छसलिलकल्लोलकल्पितजलदेवतानिकेतकेतुमालेन निजनिरवधिप्रधावप्रारम्भैर्मथ्यमानपयस्यां कलशीमिव फेनाविलावर्तमण्डलां

ते तथोक्तास्तेषु । 'ज्येष्ठे शुक्रशुचिस्त्वयम् । आषाढे' इत्यमरकोषे वर्तते । पञ्जिकाकारेण जिनदेवनाम्नाचार्येण शुचिशब्देन ज्येष्ठे एव व्याख्यातः । तदभिप्रायेण अस्माभिरपि शुचिशब्देन ज्येष्ठ एवोक्तः । एवंविधं निदाघरौद्रत्वं ज्येष्ठ एव वर्तते, न त्वाषाढे । वृषसंक्रान्तिमासत्वात् । उक्तं च ब्राह्मणशास्त्रे—'गोमासे गोगवाक्रान्ते गोरसे गगनं गते । गोपदं गोरसं दत्वा गोसहस्रफलं भजेत् ॥' इति ।

कथंभूताः पुराङ्गनाः । **भ्रश्यदिति ।** भ्रश्यत्कर्णवतंसकाः भ्रश्यन्ति जलवेगेन अधः पतन्ति कर्णानां अवतंसकानि कर्णपूरा यासां तास्तथोक्ताः । पुनः कथंभूताः । सरलितप्रान्तप्रलम्बालकाः सरलिता अवक्रीभूताः प्रान्तेषु प्रलम्बा दीर्घा अलकाः केशा यासां तास्तथोक्ताः । पुनः कथंभूताः । शीर्यत्कज्जललोचनाः शीर्यत् गलत् कज्जलं मस्यञ्जनं येषां तानि शीर्यत्कज्जलानि तत्सदृशानि लोचनानि यासां तास्तथोक्ताः । पुनः कथंभूताः । परिगलद्गण्डस्थलीचन्दनाः परि समन्तात् गलन्ति गण्डस्थलीनां प्रशस्तकपोलानां चन्दनानि विलेपनरचना यासां तास्तथोक्ताः । पुनः कथंभूताः । उत्कम्पस्तनमण्डलाः उत्कम्पानि उल्लसितानि सोल्लासानि स्तनमण्डलानि कुचभरा यासां तास्तथोक्ताः । पुनः कथंभूताः । प्रविलसल्लीलाब्जबाहाकुलाः प्रविलसन्ती शोभमाना लीला यासां ताः प्रविलसल्लीला अब्जबाहा कमलवत् भुजास्ताभिराकुला अनवस्थिताः । पुनः कथंभूताः । प्रियतमैर्निजवल्लभैरासेव्यमाना इव सुखक्रीडायां भुज्यमाना इव । यथा प्रियतमैरासेव्यमाना अङ्गना भ्रश्यदवतंसा सरलकेशा विसरत्कज्जललोचनाः चन्दनपत्रवल्लीरहिता चपलस्तनमण्डना नृत्यद्बाहुश्च भवन्ति । उपमालंकारः ॥

तत्रैवावसरे पुराङ्गनानां क्रीडासमये तेन चुलुकीसूनुना शिंशुमारीसुतेन तासु नगराङ्गनासु मध्ये यशोमतिमहाराजमहादेव्याः कुसुमावल्याः संबन्धित्वेन कुब्जलिका दासी मदनमञ्जरिका नामा अग्राहि जगृहे । गृहीता इत्यर्थः । कथंभूतेन चुलुकीसूनुना । अषडक्षीणाक्षोभक्षामनिद्रोद्रेकेण अषडक्षीणानां मत्स्यानां क्षोभेन भेषजचलनेन क्षाम क्षीणः । उड्डीन इत्यर्थः । निद्रायाः प्रमीलायाः स्वप्नस्य उद्रेक आधिक्यं यस्य स तथा तेन । पुनः कथंभूतेन । अतुच्छपुच्छाच्छोटनोच्छलदविच्छिन्नच्छटस्वच्छसलिलकल्लोलकल्पितजलदेवतानिकेतकेतु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कूलवन्तीं कुर्वता प्रतिक्षणसंधुक्ष्यमाणक्षुदाशुशुक्षणिक्षपितकुक्षिकक्षेण नीरेचरत्यक्षपक्षभक्षणाक्षिप्तक्षणेनेव **शूलाक्षपतिना** तेन चुल्लकीसूनुना मां ग्रहीतुं प्रत्यावृत्तेन तासु जलकेलीसक्तखान्तासु मध्ये **यशोमतिमहाराजमहादेव्याः** कुब्जलिका **मदनमञ्जरिका** नामाग्राहि।

ततस्तद्वृत्तान्ताकर्णनकुपितमतिः स महीपतिराहूयादिदेश सकलजलव्यालविलोपनाय वैवस्वतसैन्यसंनिभं सत्वरं संचरद्धीवरनिकरम्। ते च कैवर्तास्तदादेशादुत्तरलतरोत्तानकराचरितक्ष्वेलिताः सत्वरं लगुडगलजाल-

---

मालेन अतुच्छं प्रचुरं यत् पुच्छाच्छोटनं पुच्छस्य आस्फालनं तेनोच्छलत् ऊर्ध्वं गच्छत् अविच्छिन्नच्छटं अखण्डधारं स्वच्छं निर्मलं यत् सलिलं जलं तस्य कल्लोलैः कल्पिता रचिता जलदेवतानां जलाधिष्ठातॄणां देवतानां निकेते गृहे केतुमाला सेतूज्ज्वला पङ्क्तिर्येन चुल्लकीसूनुना स तथोक्तस्तेन। चुल्लकीसूनुना किं कुर्वता सता कुब्जलिका अग्राहि। कूलवन्तीं नदीं फेनाविलावर्तमण्डलां फेनैः डिण्डीरपिण्डैराविलं व्याप्तं आवर्तमण्डलं भ्रमणसमूहं यस्याः कूलिन्याः सा तथा तां कुर्वता विदधता। कूलवन्तीं कामिव। कलशीमिव दधिमन्थिनीव। कथंभूतां कलशीम्। निजनिरवधिप्रधावप्रारम्भैः निजो योऽसौ निरवधिप्रधाव आमर्यादभूतवेगवद्गतिस्तस्य प्रारम्भैः राभस्यैः मथ्यमानपयस्यां मथ्यमानं विलोड्यमानं पयस्यं दधि यस्याः सा मथ्यमानपयस्या ताम्। पुनः कथंभूतेन चुल्लकीसूनुना। प्रतिक्षणसंधुक्ष्यमाणक्षुदाशुशुक्षणिक्षपितकुक्षिकक्षेण क्षणं क्षणं प्रति प्रतिक्षणं संधुक्ष्यमाणः संदीप्यमानो योऽसौ क्षुदाशुशुक्षणिर्बुभुक्षाग्निस्तेन क्षपितं पीडितं कुक्षिकक्षं उदरवनं यस्य स तथा तेन। पुनः कथंभूतेन। नीरेचरत्यक्षपक्षभक्षणाक्षिप्तक्षणेन नीरेचरा मत्स्यास्तेषां(?)त्यक्षः समस्तोऽपि योऽसौ पक्षः पितृमातृपुत्रादिपरिग्रहस्तस्य भक्षणे आक्षिप्तः प्रारब्धः क्षणोऽवसरो येन स तथा तेन। केनेव। शूलाक्षपतिनेव यमेनेव। कथंभूतेन। मां रोहिताक्षं मत्स्यं यशोधरं चरं ग्रहीतुं गृहीत्वा भक्षितुं प्रत्यावृत्तेन व्याघुटितेन। कथंभूतासु तासु पुराङ्गनासु। जलकेलीसक्तखान्तासु.............................विचितानि यासां तास्तथोक्तास्तासु॥

ततस्तदनन्तरं तद्वृत्तान्ताकर्णनकुपितमतिः मदनमञ्जरिकाग्रहणश्रवणक्रुद्धबुद्धिः स महीपतिः यशोमतिमहाराजः सत्वरं संचरद्धीवरनिकरं संमुखमागच्छन्मत्स्यवेधिसमूहं आहूय आकार्य सकलजलव्यालविलोपनाय सर्वजलदुष्टग्रहविनाशाय आदिदेश आदेशं दत्तवान् आदिष्टवान्। कथंभूतं संचरद्धीवरनिकरम्। वैवस्वतसैन्यसंनिभं यमकटकसदृशम्। ते च कैवर्ताः संचरद्धीवरा तदादेशात् यशोमतिमहाराजस्यादेशात् तां प्रसिद्धां तरङ्गिणीं सिप्रानदीं सत्वरं अवतेरुः अवतरन्ति स्म। कथंभूताः कैवर्ताः। उत्तरलतरोत्तानकराचरितक्ष्वेलिताः उत्तरलतरा वेगवत्तरा उत्ताना अनधोमुखा ये करा हस्ततलास्तैराचरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यग्रपाणयस्तरीतर्पतुवरतरङ्गतरण्डवेडिकोडुपसंपन्नपरिकरास्तां तरङ्गिणीमवतेरुः ।

उड्डीनाण्डजडिम्भमाकुलभवन्नालीकिनीकाननं
कूलोत्तालबिलान्तरालचलनग्लानालगर्दार्भकम् ।
प्रायःपङ्किलगर्तगर्वरमिलद्दौलेयबालं मुहु-
स्तत्स्रोतः कलुषीबभूव विवशग्राहं विगाहत्ततः ॥

पुनरहमहमिकया तत्सरित्स्रोतसि तेषु विहितसकलजलचरग्रहणोपायेषु तस्य चौलूकेयस्य यमदंष्ट्राकोटिकुटिलः पपात गलनाले गलः । तत्संगमान्मम

तानि कृतानि क्ष्वेलितानि आस्फोटितानि वर्करिका यैस्ते तथोक्ताः । पुनः कथंभूताः । लगुडगलजालव्यग्रपाणयः लगुडं लकुटदण्डः, गलश्च मत्स्यवेधनलोहकण्टकः, जालं च आनायः लगुडगलजालानि तेषु व्यग्रा व्यापृताः पाणयो येषां ते तथोक्ताः । पुनः कथंभूताः । तरीतर्पतुवरतरङ्गतरण्डवेडिकोडुपसंपन्नपरिकराः तरीश्च नौका, तर्पश्च तृणमयघोटकः, तुवरतरङ्गश्च दौधिकफलतरणोपायः, तरण्डश्च फलकम्, वेडिका च क्षुद्रनौका, उडुपश्च परिहारनौका चर्मावनघातैः संपन्नः परिपूर्णः परिकरः परिवारो येषां ते तथोक्ताः ॥

उड्डीनाण्डजेत्यादि । ततस्तदनन्तरं स्रोतः सिप्रानदीजलपूरः कलुषीबभूव अनच्छं संजातम् । कथंभूतं स्रोतः । उड्डीनाण्डजडिम्भम् उड्डीय गगने स्थिता अण्डजानां पक्षीणां डिम्भाः बालका यस्मिन् तत्तथोक्तम् । पुनः कथंभूतम् । आकुलभवन्नालीकिनीकाननम् आकुलं भवत् कम्पमानं भवत् नालीकिनीनां पद्मिनीनां काननं यत्र तत्तथोक्तम् । पुनः कथंभूतम् । कूलोत्तालविलान्तरालचलनग्लानालगर्दार्भकं कूलयोरुभयोस्तटयोरुत्ताला उत्सुका विलान्तरालेषु बिलमध्येषु चलनेन ग्लाना निर्भग्नोद्यमा अलगर्दानां जलसर्पाणां अर्भका वालका यत्र तत्तथोक्तम् । पुनः कथंभूतम् । प्रायःपङ्किलगर्तगर्वरमिलद्दौलेयवालं प्रायो वाहुल्येन पङ्किलाः सकर्दमा ये गर्तास्तेषां मध्ये ये गर्वरा महिषास्तैः मिलन्तः एकत्रीभवन्तो दौलेयवालाः कच्छपशिशवो यत्र तत्तथोक्तम् । कथं कलुषीबभूव । मुहुर्वारंवारम् । पुनः कथंभूतं स्रोतः । विवशग्राहं विवशाः परवशाः ग्राहा मकरादयो यत्र तत्तथोक्तम् । स्रोतः किं कुर्वत् । विगाहत् विलोडत् । अतिशयालंकारः ॥

पुनः पुनरपि नदीप्रवाहे अवगाहनानन्तरं अहमहमिकया परस्पराहंकारेण तत्सरित्स्रोतसि तन्नदीप्रवाहे तेषु कैवर्तेषु विहितो रचितः सकलानां जलचराणां मकरादीनां ग्रहणस्य उपायो यैस्ते तथोक्तास्तेषु सत्सु तस्य चौलूकेयस्य चुलूकीपुत्रस्य शिशुमारस्य गलनाले गलः लोहकण्टकः पपात पतितः । कथंभूतो गलः । यमदंष्ट्राकोटिकुटिलः यमस्य दंष्ट्रा दाढा तस्याः कोटिरग्रं तद्वत् कुटिलो वक्रः । तत्संगमात् शिशुमार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चोपरि भ्रमदकालचक्रकरालं जालम् । पुनरसद्ग्रहणानन्दितमनोभिस्तैर्मत्स्यवेधिभिरानीतं मां तं च स महीपतिरवलोक्य पितृसंतर्पणार्थं द्विजसमाजसत्त्ररसवतीकाराय समर्पयामास । तत्र च तदुपयोगमात्रतया प्रत्यहमुत्कृत्यमानकायैकदेशः

अहं पिता पूर्वभवेऽस्य राज्ञः पितामही चाम्बुचरोऽयमासीत् ।
इयं व्यवस्था ननु नाविदानीमस्मत्सुखार्थं च विधिः किलैषः ॥

इति विचिन्तयन्स चाहं च कथंकथमपि जीवितमत्यजाव ।

पुनरहो धर्मधनंजय, तामेव समस्ताद्भुतजननीमुज्जयिनीं निकषा तमताजिनजेणाजीवनोटजाकुले बम्बूलबदरीकरीरप्रायक्षुपाक्षिप्तपर्यन्तस्थले कङ्काहिनामके ग्रामधामके स जलव्यालो महत्युरभ्रसंदर्भे छगली बभूव । अहं

संगमात् ममोपरि च जालं पपातेत्येवम् । कथंभूतं जालम् । भ्रमदकालचक्रकरालं भ्रमत् भ्रमणं कुर्वत् यत् अकालचक्रं अप्रस्तावे यमचक्रं तद्वत् करालं रौद्रम् । पुनः पुनरपि अस्सद्ग्रहणानन्दितमनोभिरस्माकं स्वीकरणेन हृष्टचित्तैस्तैः प्रसिद्धैर्मत्स्यवेधिभिः कैवर्तैरानीतं मां यशोधरवरं रोहिताक्षं मत्स्यं च तं चन्द्रमतिचरं शिशुमारं अवलोक्य सः यशोमतिमहाराजनामा महीपतिः पितृसंतर्पणार्थं द्विजसमाजसत्त्ररसवतीकाराय समर्पयामास दापितवान् । द्विजसमाज इति ब्राह्मणसमूहस्य सत्त्ररसवतीकारस्य । ब्राह्मणरूपकारायेत्यर्थः(?)। समर्पयामास ॥

हे राजन् मारदत्त महाराज, स च शिशुमारोऽहं च रोहिताक्षमत्स्यः कथंकथमपि महता कष्टेन जीवितं अत्यजाव त्यक्तवन्तौ । अहं च किं कुर्वन् । इतीदृशं विचिन्तयन् पर्यालोचयन् । कथंभूतोऽहम् । तत्र ब्राह्मणसत्त्रशालायां तदुपयोगमात्रतया ब्राह्मणभोजनमात्रतया प्रत्यहं दिनं दिनं प्रति उत्कृत्यमानः उत्पाट्यमानश्छेद्यमानः कायैकदेशः सन् । नित्यं प्रतिछेद्यमानः कायैकदेशः मृतेति संबन्धः इति केचित् ॥

अहमित्यादि । अस्य राज्ञः यशोमतिमहाराजस्य पूर्वभवे अहं पिता वर्ते । अयमम्बुचरः शिशुमारश्च पितामही पितृमाता आसीत् । इदानीं ननु निश्चयेन इयं ईदृशी व्यवस्था नौ आवयोरिदानीं वर्तते । किलेत्यरुचौ । एष विधिः कर्तव्यता ब्राह्मणभोजनेन अस्मत्सुखार्थमस्मत्प्रीणनार्थं च वर्तते । जात्यलंकारः ॥

पुनः पुनरपि अहो धर्मधनंजय धर्मेण धनुश्च धनंजय अर्जुन । महाराजपक्षे धर्म एव धनं धर्मधनं तेन जयति तज्जयति वा स्वीकरोतीति धर्मधनंजयस्तस्य संबोधनं क्रियते— हे धर्मधनंजय धर्मधनोपार्जक, तां पूर्वोक्तामेव उज्जयिनीं निकषा । उज्जयिनीनगर्याः समीप इत्यर्थः । कङ्काहिनामके कङ्काहिरिति नाम यस्य एवंविधे ग्रामधामके ग्रामस्थाने स पूर्वोक्तो जलव्यालश्चन्द्रमतिचरः शिशुमारः महती वृहती छगली अजा बभूव । कथंभूतां उज्जयिनीम् । समस्ताद्भुतजननीं अनेकाश्चर्योत्पत्तिस्थानम् । कथंभूते कङ्काहिनामके । तमताजिनजेणाजी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च तत्रैव छगलः । पुनरावयोर्व्यतिक्रान्ते वर्करभाववृत्तान्ते जातस्मरस्मयस्तामेवाहमजामतिक्रामन्नखिलोरणक्षोभक्षुभितचित्तेनाविकटाधिपतिनातीव - तीक्ष्णविषाणविनिर्मितमर्मप्रहारः सौम्यधातुपातानन्तरमेव प्रेतभावमनुसरन्स्वयंभूरिवात्मनात्मानमुत्पादयामास । अभूवं चातिक्रान्तेषु कतिचिद्विपक्षेषु प्राप्तप्रसवावसरः ।

अत्रान्तरे स **यशोमति**कुमारः पापर्द्धिप्रवृद्धमनस्कारस्तत्फलमिहैव जन्मनि दर्शयन्निव विदूरितनिखिलराजलक्ष्मीचिह्नः कूटशाल्मलितरू-

---

वनोटजाकुले तमतं ऊर्णामयमास्तरणम्, अजिनजेणं चर्मपल्याणम्, तद्द्वयमाजीवनं उदरपूरणव्यवसायो येषां ते तमताजिनजेणाजीवनास्तेषां उटजानि गृहाणि तैराकुलं व्याप्तं तमताजिनजेणाजीवनोटजाकुलं तस्मिन् । पुनः कथंभूते कङ्काहिनामके । वम्वूलवदरीकरीरप्रायक्षुपाक्षिप्तपर्यन्तस्थले वम्वूलाश्च किङ्किनीतरवः, वदर्यश्च गोटावृक्षाः, करीरा गूढपत्रवृक्षाः । उक्तं च—'करीरं वज्रपत्रं च शाकपुष्पं मृदूफलम् ।ग्रन्थिली तीक्ष्णसारं तु चक्रकं क्षीणकण्टकम् ॥' ते प्रायेण क्षुपाश्च लघुवृक्षाणामग्राणि तैराक्षिप्तं वेष्टितं पर्यन्तस्थलं यस्य तत्तथोक्तं तस्मिन् । छगली कस्मिन् वभूव । उरभ्रसंदर्भे मेषसमूहे । अहं च यशोधरः रोहिताक्षमत्स्यस्तत्रैव कङ्काहिनामके उरभ्रसंदर्भे छगलोऽभूवम् । अर्थवशाद्विभक्तिपरिणाम उत्तमैकवचनं प्रथमोत्तमसमानक्रियापदत्वात् । पुनः पुनरपि आवयोश्छगलीछगलपर्याययोः वर्करभाववृत्तान्ते शिशुमारच्छगलं प्रपद्य वृके व्यतिक्रान्ते सति जातस्मरस्मयोऽहं उत्पन्नकन्दर्पदर्पस्तरुणः सन् तामेव चन्द्रमतिचरीमजां छगलीं अहं अतिक्रामन् अभिगच्छन् उड्डीयमानः सन् अखिलोरणक्षोभक्षुभितचित्तेन अखिलाश्च ते उरणाश्च मेषास्तेषां क्षोभेण चलनेन क्षुभितं क्रोधं प्राप्तं चित्तं यस्य स तथा तेन ईदृग्विधेन अविकटाधिपतिना अविनां मेषाणां कटः कटकः समूहस्तस्य अधिपतिः स्वामी तेन मेषसमूहस्वामिना कर्तृभूतेन अतीवतीक्ष्णविषाणविनिर्मितमर्मप्रहारः अतीव अतिशयेन तीक्ष्णे सूक्ष्माग्रे विषाणे शृङ्गे ताभ्यां विनिर्मितः मर्मप्रहारो जीवस्थाननिष्ठुरघात एवंगुणविशिष्टोऽहं सौम्यधातुपातानन्तरमेव शुक्रक्षरणादनन्तरमेव प्रेतभावं मरणं अनुसरन् प्राप्नुवन् स्वयंभूरिव ब्रह्मेव आत्मना आत्मानमुत्पादयामास । तस्यामेव अहं यशोधरच्छागः पुनरपि द्वितीयं वारं छागो भूत्वा गर्भे स्थित इत्यर्थः । न केवलं गर्भे स्थितः कतिचिद्विपक्षेषु कतिचिन्मासेषु अतिक्रान्तेषु सत्सु प्राप्तप्रसवावसरः लब्धजन्मसमयश्च अहं अभूवं अभवम् ॥

अत्रान्तरे अस्मिन्नवसरे मम जन्मप्राप्तिसमये स यशोमतिकुमारः कुसुमावलीमहादेवीकान्तः मृगयार्थं आखेटकार्थं निश्चक्राम निर्गतः । कथंभूतो यशोमतिकुमारः । पापर्द्धिप्रवृद्धमनस्कारः पापर्द्धौ आखेटकक्रियायां प्रवृद्धो मनस्कारश्चित्ताभोगो यस्य स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्लम्बनबन्धनैरिव लताप्रतानैर्गाढोद्ग्रन्थितमौलिर्नरकान्धकारकालकार्दमिकांशुकाधिकृतकायकपरिकरः श्वभ्राटवीप्रवेशदण्डकसकाण्डकोदण्डोच्चण्डदोर्दण्डमण्डलः कीनाशपाशाकारवागुरोत्तंसितांसः प्रादुर्भवद्दुरन्तपातकपातपिशुनैरिव श्वगणिभिः समाचरितपुरःप्रचारः कृतान्तानीकभीकरैरनणुकोणोत्कूणितपाणिभिः किरातैः परिवृतः पतिरिव सकलसत्त्वसंबाधसाधितमतिः

तथोक्तः । पुनः कथंभूतः । विदूरितनिखिलराजलक्ष्मीचिह्नः विदूरितानि निखिलानि राजलक्ष्मीचिह्नानि छत्रचामरध्वजादीनि येन स तथोक्तः । यशोमतिकुमारः किं कुर्वन् । इहैव जन्मनि अस्मिन्नेव भवे तत्फलं आखेटफलं दर्शयन्निव लोकानां निशामयन्निव । आखेटकक्रियाकारकः पुमान् भविष्यद्भवे राजलक्ष्मीचिह्नच्युतो भवतीति अस्मिन्नेव भवे दर्शयन्निव । पुनः कथंभूतः । लताप्रतानैः वल्लीसमूहैर्गाढमतिशयेनोद्ग्रन्थितः ऊर्ध्वं बद्धो मौलिर्मस्तकं येन स तथोक्तः । कथंभूतैर्लताप्रतानैः । कूटशाल्मलितरूल्लम्बनबन्धनैरिव । पुनः कथंभूतः । नरकान्धकारकालकार्दमिकांशुकाधिकृतकायकपरिकरः नरकान्धकारवत् कालं कार्दमिकं कर्दमेण रक्तम् । कृष्णवर्णमित्यर्थः । अंशुकं वस्त्रं तेन अधिकृतो नियुक्तः कायकपरिकरः शरीरवेषो यस्य स तथोक्तः । पुनः कथंभूतः । श्वभ्राटवीप्रवेशदण्डकसकाण्डकोदण्डोच्चण्डदोर्दण्डमण्डलः श्वभ्रो नरकः सः अटवी वेडम्बरं तस्य प्रवेशाय तत्संवरणाय दण्डकः क्षुद्रमार्गस्तत्सदृशं सकाण्डं बाणसहितं कोदण्डं धनुस्तत्रोच्चण्डं प्रकर्षेण प्रचण्डं दोर्दण्डमण्डलं यस्य स तथोक्तः । पुनः कथंभूत । कीनाशपाशाकारवागुरोत्तंसितांसः कीनाशस्य यमस्य पाशो बन्धनं तस्याकारस्तदुपमा यस्याः सा कीनाशपाशाकारा सा चासौ वागुरा मृगबन्धनी तया उत्तंसितौ मुकुटितौ अंसौ भुजशिखरे यस्य स तथोक्तः । पुनः कथंभूतः । श्वगणिभिः कुर्कुराणां स्वामिभिः समाचरितः सम्यगनुष्ठितः पुरःप्रचारो अग्रेसरत्वं येन स समाचरितपुरःप्रचारः । कथंभूतैः श्वगणिभिः । प्रादुर्भव[द्दु]रन्तपातकपातपिशुनैः प्रादुर्भवत् प्रकटीभवत् यत् दुरन्तं दुष्टस्वभावं पातकं तस्य पात आगमनं तस्य पिशुनैरिव । पुनः कथंभूतः । किरातैः परिवृतः । कथंभूतैः । कृतान्तानीकभीकरैः कृतान्तानीकवत् यमसैन्यवद्भयानकैः । पुनः कथंभूतैः । अनणुकोणोत्कूणितपाणिभिः अनणुर्महती कोणा दण्डं तेन उत्कूणिताः संकुचिताः पाणयो येषां ते तथा तैः । पुनः कथंभूतः । सकलसत्त्वसंबाधसाधितमतिः सकलसत्त्वानां सर्वजीवानां संबाधे सम्यग्लोटने साधिता स्वीकृता मतिर्येन स तथोक्तः । क इव । पतिरिव भृतक इव । किं कृत्वा पूर्वं मृगयार्थं निश्चक्राम । इतीदृशं नीतिं नीतिशास्त्रमधीतामपि अवमत्य अनादृत्य । इतीति किम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'स्तेनद्विषद्विषव्यालश्वापदप्रभवं भयम् ।
शर्मधर्मविरामश्च मृगयायां महीपतेः ॥'

इति नीतिमधीतामप्यवमत्य मृगयार्थं निश्चक्राम । प्रविवेश च वनदेवताविनिवेदिततदागमनमिव प्रशान्तसमस्तसत्त्वसंचारं कान्तारम् । स्थलविलजलान्तरालविहारिणां प्राणिनामद्यापि चित्रगुप्तेनापरिमृष्टमानत्वादनासादितहिंसः कोपारुणान्तरैरपाङ्गप्रसरैः स्वामर्षदेवतायाः शोणितोपहारमिव विकिरंस्तस्य छगलाविकैलकसनाथस्य यूथस्य मध्येन प्रत्यावर्तमानस्तिर्यग्गति-

---

स्तेनेति । महीपतेर्नरेन्द्रस्य मृगयायां भयमुत्पद्यते । कथंभूतं भयम् । स्तेनद्विषद्विषव्यालश्वापदप्रभवं स्तेनाश्चौराः, द्विषन्तश्च शत्रवः विषं च हालाहलम्, व्यालाश्च सर्पाः, श्वापदाश्च सिंहव्याघ्रादयः, तेभ्यः प्रभवमुत्पन्नम् । न केवलं महीपतेर्मृगयायां भयं भवति, किं तु शर्मधर्मविरामश्च भवति। शर्म च सुखम्, धर्मश्च पूजादानोपवासादिलक्षणः, शर्मधर्मौ तयोर्विरामो विनाशः शर्मधर्मविरामः । चकार उक्तसमुचयार्थः । तेन शीलभङ्गः प्रजाविलोपादिकं च लभ्यते ॥

न केवलं मृगयार्थं निश्चक्राम, किं तु कान्तारं दुर्गमं वर्त्म प्रविवेश च प्रविष्टवांश्च । कथंभूतं कान्तारम् । प्रशान्तसमस्तसत्त्वसंचारं प्रशान्त उपशान्तः समस्तसत्त्वानां मृगादिजीवानां संचारं प्रवेशो यत्र कान्तारे तत्तथोक्तम् । तदागमे सति सर्वे मृगादयो जीवाः पलायांचक्रिरे इत्यर्थः । पुनः कथंभूतम् । उत्प्रेक्ष्यते—वनदेवताविनिवेदिततदागमनमिव वनदेवताभिर्विनिवेदितं कथितं तदागमनं यत्र कान्तारे तद्वनदेवताविनिवेदिततदागमनम् । कान्तारप्रवेशानन्तरं किं कृतवानित्याह—तां मदीयां मातरं मन्मातृचरीमजामारूढं चत्रनाथं (?) निर्बिभेद विदारितवान्। केवलं मदीयां मातरं च छगलीं च निर्बिभेद । कथंभूतः सन् निर्बिभेद । अनासादितहिंसः अप्राप्तहिंसाकर्मकः। अलब्धमृगादिक इत्यर्थः । कस्मादनासादितहिंसः । स्थलविलजलान्तरालविहारिणां स्थलविहारिणः, बिलविहारिणः, जलविहारिणो मत्स्यादयः, अन्तरालविहारिणः पारापतलावचटकादयः, स्थलविलजलान्तरालविहारिणस्तेषां तथोक्तानां प्राणिनां जीवानां अद्यापि वर्तमानकालेऽपि चित्रगुप्तेन यमकायस्थेन अपरिमृष्टमानत्वात् गतायुष्कतारहितत्वात् । अलब्धहिंस इत्यर्थः । चित्रगुप्तादयोऽमी यमस्य आक्षपटलिकाः । यशोमतिकुमारः किं कुर्वन् । कोपारुणान्तरैः क्रोधेन रक्तमध्यैः अपाङ्गप्रसरैर्लोचनप्रान्तविस्तरैः कटाक्षरक्ततेजोभिः स्वामर्षदेवतायाः निजक्रोधदेवतायाः शोणितोपहारं रुधिरपूजां विकिरन्निव विक्षिपन्निव । किं कुर्वाणः । तस्य पूर्वोक्तस्य यूथस्य छगलसमूहस्य मध्येन कृत्वा अन्तरेण विधाय प्रत्यावर्तमानः पश्चाद्व्याघुटन् । कथंभूतस्य यूथस्य । छगलाविकैलकसनाथस्य छगल्यश्च छगलाः, अविनां मेषाणां समूह आविकम्, ऐलकानां गारडकानां बृहच्छागानां समूहमैलकं छगलाविकैलकानि तैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मार्गोल्लेखेन कपोलस्थलीचुम्बनोन्मुखपुङ्खेनायोमुखेन शरव्यीकृतत्रस्तवृन्दारकस्तां मदीयां मातरं च निर्बिभेद। तावता चापर्याप्तपरितोषः स्वयमेव तदुदरमवदारयत्। ददर्श च मामनलावलग्नशकलिनमिव विवर्तमानवपुषम्। आयुषः शेषत्वादविहितप्रमीतभावमवाप्तसमस्तसूपशास्त्राधिगमपाटवाय पौरोगवाय पोषणार्थमर्पयत्। तदन्वहं गेह एव पोष्यमाणतनूनां छागलधेनूनां शून्यस्तनावलेहलालोपदिग्धदेहस्तस्मिन्नेव रसवतीगृहे सकलरसप्रसाधनविधिव्यतिकराधिकविवेकेषु पाचकलोकेषु पिशितपाकोपदेशदानदुर्ललितहृदयामात्मदुष्कर्मो-

---

सनाथः सहितस्तस्य तथोक्तस्य। पुनः कथंभूतः। अयोमुखेन शरव्यीकृतवस्तवृन्दारकः... ....। कथंभूतेन अयोमुखेन। तिर्यग्गतिमार्गोल्लेखेन...स तथा तेन। पुनः कथंभूतेन। कपोलस्थलीचुम्बनोन्मुखपुङ्खेन प्रशस्ता कपोलस्थली तस्याश्चुम्बनं मुखस्पर्शनं तस्मिन् उन्मुखः संमुखीभूतः पुङ्खः पत्राग्रं यस्य स तथा तेन। स यशोमतिस्तावता छगलछगलीद्विखण्डीकरणेन निर्भेदनेन अपर्याप्तपरितोषः परिपूर्णसंतोषकरणार्थं स्वयमेव तदुदरं अजाकुक्षिं अवदारयत् विदारयामास। न केवलमवदारयत्, विवर्तमानवपुषं कम्पमानशरीरं मां यशोधरमजं ददर्श च दृष्टवांश्च। कथंभूतं माम्। अनलावलग्नशकलिनमिव अङ्गारपुञ्जोपरिधृतमांसमिव। न केवलं मां ददर्श, पौरोगवाय अजपालाय पोषणार्थं प्रतिपालनार्थं अर्पयच्च दत्तवांश्च। उक्ता च पौरोगवस्य व्युत्पत्तिः—पुरोऽग्रे गोमांसं जलं वा यस्याः सा पुरागुस्तस्या अयं पौरोगवः। सूपकार इत्यर्थः। कथंभूताय पौरोगवाय। अवाप्तसमस्तसूपशास्त्राधिगमपाटवाय अवाप्तं प्राप्तं समस्तसूपशास्त्रस्य सर्वपाकसिद्धान्तस्य अधिगमपाटवं परिज्ञानपटुत्वं येन स तथोक्तस्तस्मै। कथंभूतं माम्। अविहितप्रमीतभावं अविरचितमृत्युम्। मां न मारितवानित्यर्थः। कस्मान्न मारितवान्। आयुषः शेषत्वात् कियत् कालं आयुरद्यापि वर्तते यस्मात्। तदनु तत्पश्चात् पौरोगवसमर्पणादनन्तरमहं यशोधरच्छागो गेह एव राजमन्दिरे एव तस्मिन्नेव रसवतीगृहे महानसमन्दिरे कतिचिर्त्रिशद्रात्रान् कतिचिन्मासान् अतिवाहयामास निर्गमितवान्। कथंभूतोऽहम्। पोष्यमाणतनूनां वर्धमानशरीरिकाणां छागलधेनूनां छगलीनां शून्यस्तनावलेहलालोपदिग्धदेहः शून्यस्तनावलेहेन दुग्धरहितस्तनास्वादनेन लालया सृणिकया सिंहिन्या उपदिग्धो लिप्तो देहो येन स तथोक्तः। किं कुर्वन् कतिचिन्मासान् अतिक्रान्तवान्। इति ईदृशं विचिन्तयन्। किं कृत्वा पूर्वं विचिन्तयन्। अमृतमतिमहादेवीं कथमपि केनचित्प्रकारेणापि विदित्वा ज्ञात्वा। कथंभूताममृतमतिम्। पाचकलोकेषु रसायनपाचकसमूहेषु मध्ये पिशितपाकोपदेशदानदुर्ललितहृदयां पिशितस्य मांसस्य पाकस्तस्योपदेशदाने शिक्षादाने दुर्ललितमासक्तं हृदयं यस्याः सा तथोक्ता ताम्। कथंभूतेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दयात्तत्रैव भवे संपन्नसितश्वित्रगात्रीमनवरतदरद्देहद्रवास्वादासीदन्मन्दमक्षिकाक्षेपक्षोभपात्रीमतिपूतिपूयपिहितनासिकसविधसंचरत्परिवारां स्वकीयेन दारिकाजनेन 'इयं खलु हले, पापकर्मा सकलदुराचारागारा **अमृतमति**महादेवी तं निखिलभुवनमाननीयमनङ्गावतारं **यशोधर**महाराजं गरलप्रयोगाद्दृष्टान्तकीर्तिं विधाय तत्फलेन संप्रति संजाता सकलकुष्ठाधिष्ठानम्' इति द्वन्द्वमितस्ततो मन्त्रयमाणेन राजपरिजनलञ्जिकासमाजेन च कृतधिक्कारपरम्परां कथमपि विदित्वा, कथं नाम

अलिकुलमिदं लूतातन्तुप्रतानविधूसरं
मनसिजधनुर्जातं जीर्यत्तनुस्थिति पिञ्जनम् ।

पाचकलोकेषु । सकलरसप्रसाधनविधिव्यतिकराधिकविवेकेषु सकलाश्च ते रसा मधुराम्लकटुतिक्तकषायलवणलक्षणा आस्वादास्तेषां प्रसाधनविधिस्तस्य व्यतिकरे प्रघट्टके अधिकोऽतिरिक्तो विवेकश्चातुर्यं येषां पाचकलोकानां ते तथोक्तास्तेषु । पुनः कथंभूताममृतमतिम् । आत्मदुष्कर्मोदयात्तत्रैव भवे संपन्नसितश्वित्रगात्रीं आत्मनः पापकर्मोदयात्तत्रैव भवे संपन्नं सितं श्वेतं श्वित्रं कुष्ठं गात्रे शरीरे यस्याः सा तथा ताम् । पुनः कथंभूताम् । अनवरतदरद्देहद्रवास्वादासीदन्मन्दमक्षिकाक्षेपक्षोभपात्रीम् अनवरतं दरन् विदार्यमाणो योऽसौ देहस्तस्य द्रवः पूयादिकं तस्य आस्वादाय आसीदन्त्य आगच्छन्त्यो मन्दाः प्रचुरा या मक्षिकास्तासां क्षेपे क्षोदे योऽसौ क्षोभः गात्रमोटनं तस्य पात्री भाजनं तां तथोक्ताम् । पुनः कथंभूताम् । अतिपूतिपूयपिहितनासिकसविधसंचरत्परिवारां अतिशयेन पूतिर्दुर्गन्धं यत् पूयं नष्टरुधिरं तेन पिहिता नासिका येन सोऽतिपूतिपिहितनासिक ईदृग्विधः सविधे समीपे संचरन् प्रविशन् परिवारो यस्याः सा ताम् । पुनः कथंभूताम् । राजपरिजनलञ्जिकासमाजेन नृपपरिवारदासीसमूहेन च चकारात् अन्येन च लोकेन इत्यमुना प्रकारेण कृतधिक्कारपरम्परां विहिततिरस्कारश्रेणिम् । कथंभूतेन राजपरिजनलञ्जिकासमाजेन । इतस्ततो यत्र तत्र द्वन्द्वं स्त्रीपुरुषयुग्मं मन्त्रयमाणेन आहूयता । इतीति किम् । हले सखि । खल्विति वाक्यालंकारे । इयमेषा अमृतमतिमहादेवी संप्रति सकलकुष्ठाधिष्ठानं अष्टादशकुष्ठकोष्ठागारं संजाता संबभूव । केन । तत्फलेन पापफलेन । कथंभूतेयम् । पापकर्मा पापिष्ठा । पुनः कथंभूता । सकलदुराचारागारा सर्वदुर्विलसितमन्दिरप्राया । किं कृत्वा पूर्वं कुष्ठाधिष्ठानं जाता । तं यशोधरमहाराजं गरलप्रयोगात् दृष्टान्तकीर्तिं विधाय मृतं कृत्वा । कथंभूतं तम् । निखिलभुवनमाननीयं सर्वजगद्वन्दनीयम् । पुनः कथभूतम् । अनङ्गावतारं कामस्वरूपम् । न केवलं राजपरिजनलञ्जिकासमूहेन कृतधिक्कारपरम्परां च । अन्यत् स्वकीयेन दारिकाजनेन च अमृतमतिमहादेवीदासीसमूहेन च । इति विचिन्तयन् कतिचित्त्रिंशद्रात्रानतिवाहयामास इत्यत्र इतीति किम् । कथं केन प्रकारेण । नामेति संभावनायाम् ।

अलिकुलमिति । इदमेतत् अलिकुलं केशकलापः लूतातन्तुप्रतानविधूसरम् । कथम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुवलयवनं धत्ते दैन्यं दवाग्निसमाश्रयं
घुणदरभरभ्रस्यत्स्तम्भप्रभावमभूद्वपुः ॥

अथवा न चैतदाश्चर्यम् । यतः ।

स्वामिद्रोहः, स्त्रीवधो, बालहिंसा, विश्वस्तानां घातनं, लिङ्गभेदः, ।
प्रायेणैतत्पञ्चकं पातकानां कुर्यात्सद्यः प्राणिनः प्राप्तदुःखान् ॥

इति विचिन्तयन्कतिचित्रिंशद्रात्रानतिवाहयामास ।

इतश्च कलिङ्गविषयेषु महति महिषीसमुदये अहो स्वकीययशःकुसुमसौरभोन्मादितबुधमधुपसमाज महाराज,

रक्तप्रान्तविलोललोचनयुगः प्रोथप्रतिष्ठाननः
प्रोत्कूणाग्रविषाणभीषणवपुर्नीलाञ्जनाद्रिप्रभः ।

भूदिति संबन्धः । लूतानां ऊर्णलतानां मर्कटीनां ये तन्तवो लालासूत्राणि तेषां प्रतानः समूहस्तद्वद्विधूसरं विरूपकमीषत्पाण्डुरम् । कथं जातमित्यर्थः । मनसिजधनुर्भ्रूयुगलं पिञ्जनं कर्पासविकारविखण्डनं कथं जातमभूत् । कथंभूतं पिञ्जनम् । जीर्यत्तनुस्थिति जीर्यन्ती शतखण्डीभवन्ती तनोः कायस्य स्थितिः स्वरूपं यस्य तत्तथोक्तम् । इदं कुवलयवनं नेत्रयुगलं दैन्यं दीनत्वं शोभारहितत्वं धत्ते धरति । कथंभूतं दैन्यम् । दवाग्निसमाश्रयं दावानलदग्धमिव । दृश्यत इत्यर्थः । इदमेतद्वपुः शरीरं कथमभूत् । घुणदरभरभ्रस्यत्स्तम्भप्रभावं घुणाः कीटकास्तेषां दराश्छिद्राणि तेषां भरः समूहस्तेन भ्रस्यन् अधः पतन् योऽसौ स्तम्भः स्थूणास्तस्येव प्रभावः शोभा यस्य वपुषस्तथोक्तम् ।

अथवा युक्तोऽयमर्थः । एतदाश्चर्यं न भवति । कुतः कारणात् । यतः ।

स्वामीति । एतदिदं पातकानां पञ्चकं प्राणिनो जीवान् सद्यस्तत्कालं तस्मिन्नेव भवे प्राप्तदुःखान् लब्धानेतान् कुर्यात् विदध्यात् । एतत् किम् । यतः स्वामिद्रोहो राजहत्या, स्त्रीवधः, बालहिंसा, विश्वस्तानां घातनं दत्ताभयदानानां हननम्, लिङ्गभेदः शेफश्छेदनम् । कथम् । प्रायेण बहुलतया इति क्रियाकारकसंबन्धः ॥

अहो स्वकीययशःकुसुमसौरभोन्मादितबुधमधुपसमाज अहो मारदत्त महाराज, स्वकीययशांस्येव कुसुमानि तेषां सौरभेण सौगन्ध्येन उन्मादित उन्मत्तीकृतो हर्षं प्रापितो बुधमधुपानां विद्वज्जनभ्रमराणां समाजः समूहो येन स तथोक्तस्तस्य संबोधनं क्रियते हे तथोक्त हे महाराजाधिराज । इतश्च एतस्मिन् प्रस्तावे कलिङ्गविषयेषु दन्तपुरोपलक्षितकोटिशिलादेशेषु केचिदाहुः । महति महिषीसमुदये गर्वरीणां यूथमध्ये ।

रक्तेति । सा छागी चन्द्रमतिचरी अजा क्षुरप्रवाणेन खण्डिता सती मृत्वा पुनः पुनरपि कासरो महिषः अभूद्बभूव । कथंभूतः कासरः । रक्तप्रान्तविलोललोचनयुगः रक्तप्रान्तं लोहितपर्यन्तं विलोलं चपलं लोचनयुगं यस्य स तथोक्तः । पुनः कथंभूतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्कर्णः पृथुकन्धरो गुरुखुरः स्थूलत्रिकोरःस्थलः
सा मृत्वा कमनीयवालधिरभूच्छागी पुनः कासरः ॥

पुनरसावशेषमहिषपरिषदतिशायशरीरसंनिवेशः सार्थपार्थिवस्वीकारवशात्

सुखदुःखानुभवार्थं निजकर्मगलग्रहात्सुदूरोऽपि ।
जालावलग्नतिमिवज्जन्तुर्यमसमयमायाति ॥
यत्र सुखं वा दुःखं लिखितं निटिले यथास्य दैवेन ।
तत्रायाति प्राणी पाशाकृष्टः पतत्रीव ॥

प्रोथप्रतिष्ठाननः प्रोथप्रतिष्ठं नासिकासमीपं आननं यस्य स तथा । पुनः कथंभूतः । प्रोत्कूणाग्रविषाणभीषणवपुः प्रोत्कूणाग्रे विषाणे शृङ्गे ताभ्यां भीषणं भयानकं वपुः शरीरं यस्य स तथा । पुनः कथंभूतः । नीलाञ्जनाद्रिप्रभः नीलाद्रिर्नीलपर्वतः, अञ्जनाद्रिरस्ताचलः, तद्वत् प्रभा कान्तिर्यस्य स तथोक्तः । कृष्णवर्ण इत्यर्थः । पुनः कथंभूतः । उत्कर्ण ऊर्ध्वश्रवाः । पुनः कथंभूतः । पृथुकन्धरो विस्तीर्णग्रीवः । पुनः कथंभूतः । गुरुखुरः अलघुशफः । पुनः कथंभूतः । स्थूलत्रिकोरःस्थलः त्रिकं च पृष्टवंशाधरप्रवेशः, उरःस्थलं च अग्रतोभागः, स्थूले मांसले त्रिकोरःस्थले यस्य स तथा । पुनः कथंभूतः । कमनीयवालधिः कमनीयो वालधिः पुच्छो यस्य स तथा । जात्युपमालंकारः ॥

पुनः पुनरपि असौ कासरः पूर्वोक्तचन्द्रमतिचरीमहिषः सार्थपार्थिवस्वीकारवशात् सार्थपार्थिवः सार्थाधीशो नायकस्तस्य स्वीकारवशात् क्रयणाधीनत्वात् । केनचिद्विक्रीतः सार्थपार्थिवेन क्रीत इत्यर्थः । तद्वशात् । तां एकानसीमुज्जयिनीं पुरीं अनुप्राप्य गत्वा तस्यामेव यस्यां नद्यां शिशुमारः पूर्वमभूत्तस्यामेवापगायां कथाशेषतामवाप·················· कथंभूतः कासरः । अशेषमहिषपरिषदतिशायशरीरसंनिवेशः······················ ·······। इति ईदृशं सुभाषितद्वयं सत्यतां नयन्निव सत्यार्थतां प्रापयन्निव । इतीति किम् ।

सुखदुःखेत्यादि । जन्तुर्जीवो यमसमयं मृत्युशासनं आयाति आगच्छति । किमर्थम् । सुखदुःखानुभवार्थं सुखं वा दुःखं वा तयोरनुभवार्थं भोगार्थम् । कथंभूतो जन्तुः । सुदूरोऽपि अतिविप्रकृष्टोऽपि । कस्माद्यमशासनमायाति । निजकर्मगलग्रहात् निजकर्मणा गले स्वीकारात् । जन्तुः किंवत् । यथा जालावलग्नः आनाये पतितः तिमिर्मत्स्यो यमसमयं आयाति । उपमैव ॥

यत्रेत्यादि । प्राणी जीवस्तत्र तस्मिन् स्थाने आयात्यागच्छति । तत्र कुत्र । यत्र यस्मिन् स्थाने सुखं वा दुःखं वा अस्य प्राणिनो निटिले ललाटे दैवेन विधात्रा यथा येन प्रकारेण लिखितं लिपिविषयीकृतम् । प्राणी क इव । पाशाकृष्टः पाशेनातानितः पतत्रीव पक्षीव । उपमालंकारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति सत्यतां नयन्निव तां विलासिनीविलासहंसावतारसरसी**मेकानसी**-मनुप्राप्य तस्यामेवोभयतीरावतीर्णतमालतरुपतितप्रसूनपरागपरवशवेगाया-मापगायां प्रतिपन्नपयोवगाहविहरणः, अहिनकुलवज्जातिजनितामर्षोत्कर्षा-न्धान्तःकरणः, **यशोमति**महाराजवाजिसंजनितदौर्जन्यप्रकरणः, तन्नृपति-निर्दिष्टनैकटिकानीककरकीलितचतुश्चरणः, प्रस्फोटनस्फारमारुतस्फुरत्ख-दिराङ्गारनिकरपूरितकरणः, समन्तादभीक्ष्णाशुशुक्षणिक्षतक्षिप्यमाणक्षारवा-रिवर्षणः, कर्णकटुघोरारवरसनशल्यितपुरदेवताधिषणः, त्र्यूषणकषायोल्बणा-

---

कथंभूतामेकानसीम्। विलासिनीविलासहंसावतारसरसीं विलासिनीनां विलासहंसा भोग-हंसास्तेषामवताराय अवतरणाय सरसीं महासरोवरसदृशीम्। कथंभूतायां आपगायाम्। उभयतीरावतीर्णतमालतरुपतितप्रसूनपरागपरवशवेगायां उभयतीरयोरर्वाक्तटे च अवती-र्णा उत्तीर्णाः। स्थिता इत्यर्थः। ये तमालतरवः कालस्कन्धवृक्षास्तेभ्यः पतितः क्षरितो यः प्रसूनपरागः पुष्परजस्तस्य परवशः पराधीनो वेगो रयो यस्याः सा तथोक्ता तस्यां तथो-क्तायाम्। कथंभूतः कासारः। प्रतिपन्नपयोवगाहस्य जलविलोडनस्य विहरणं पर्यटनं येन स तथोक्तः। पुनः कथंभूतः। अहिनकुलवत् सर्पबभ्रुवत् जातिजनितामर्षोत्कर्षा-न्धान्तःकरणः जातिस्वभावेन जनित उत्पादितो योऽसावमर्षोत्कर्षः क्रोधोत्कृष्टता तेन अन्धं अपश्यत् अन्तःकरणं मनो यस्य स तथोक्तः। पुनः कथंभूतः। यशोमतिमहाराज-वाजिसंजनितदौर्जन्यप्रकरणः यशोमतिमहाराजस्य वाजिनः पट्टवाहस्य संजनितं सम्यगु-त्पादितं दौर्जन्यप्रकरणं मृत्युप्रस्तावो येन स तथोक्तः। पुनः कथंभूतः। तन्नृपतिनिर्दिष्टनै-कटिकानीककरकीलितचतुश्चरणः तन्नृपतिना यशोमतिमहाराजेन निर्दिष्ट आदिष्टो यो-ऽसौ नैकटिकानीकः किंकरसमूहस्तस्य करैः कीलिताः कीलकशृङ्खलादिना निश्चलीकृता-श्चतुश्चरणाः पादा यस्य स तथोक्तः। पुनः कथंभूतः। प्रस्फोटनस्फारमारुतस्फुरत्खदिरा-ङ्गारनिकरपूरितकरणः प्रस्फोटनानां सूर्याणां ये स्फारमारुताः प्रचुरवायवस्तैः स्फुरन्तो जाज्वल्यमाना ये खदिराङ्गारा वालपत्रकाष्ठाग्निखण्डानि तेषां निकरैः पूरितानि आच्छा-दितानि करणानि शरीरावयवा यस्य स तथोक्तः। पुनः कथंभूतः। समन्तादभीक्ष्णाशुशु-क्षणिक्षतक्षिप्यमाणक्षारवारिवर्षणः समन्तात् सर्वतः अभीक्ष्णं निरन्तरं आशुशुक्षणेरग्नेः क्षतेषु स्फुटितप्रहारेषु क्षिप्यमाणं प्रेर्यमाणं क्षारवारिवर्षणं लवणजलवर्षणं यस्मिन् स तथोक्तः। पुनः कथंभूतः। कर्णकटुघोरारवरसनशल्यितपुरदेवताधिषणः कर्णानां कटवः स्फोटका घोरा रौद्रा ये आरवाः शब्दास्तेषां रसनेन आरटनेन शल्यिता दुःखीकृता पुरदेवतानां धिषणा बुद्धिर्येन स तथोक्तः। पुनः कथंभूतः। त्र्यूषणकषायोल्ब-णालन्दकोदकादानविनिरूढनिखिलगोर्वरगणः त्र्यूषणस्य शुण्ठीमरिचपिप्पलचूर्णस्य कषायः क्वथितजलं तेनोल्बणमुत्कटं यत् अलन्दकोदकं अलन्दकः मृत्तिकाकुण्डं तत्र धृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लन्दकोदकादानविनिरूढनिखिलगोर्वरगणः, नरकदुःखवेदनादप्यसह्यव्यथावेगमातङ्कसङ्गमनुभवन्निरंमददाहदूषितविटपः पादप इव कथाशेषतामवाप, तथाहमपि तया जाङ्गलभक्षणाक्षिप्तचित्त**यामृतमति**महादेव्याः प्रत्यहधगद्धगितीद्धोद्धानमध्यभटित्रीकृतैकचरणश्चरमाधिकरणां दशामशिश्रियम् ।

पुनरहो धर्मधौरेय, अस्ति खल्विहैव रत्नाकरमेखलिन्यमरलोकोत्तम्भनस्तम्भेनेव मेरुणालंकृतनाभिमण्डले **जम्बूलक्ष्मणि** द्वीपे **विजयार्धो** नाम पर्वतः । यः

यदुदकं जलं तस्यादानं तृषाक्रान्तत्वात् ग्रहणं तेन विनिरूढो निर्गतः पश्चिमद्वारेण निष्क्रान्तो निखिलो गोर्वरगणो गोमयराशिर्यस्य कासारस्य स तथोक्तः । कासारः किं कुर्वन् । आतङ्कसङ्गं दुःखसंगतिमनुभवन्भुञ्जानः । कथंभूतमातङ्कसङ्गम् । नरकदुःखवेदनादपि निरयासातपीडनादपि असह्यव्यथावेगं असह्योऽसहनीयो व्यथावेगो दुःखवेगो यस्य आतङ्कसङ्गस्य स तथा तं अनुभवन् । कासरः क इव आतङ्कसङ्गमनुभवन् । पादप इव वृक्ष इव । कथंभूतः पादपः । इरंमददाहदूषितविटपः इरंमदो मेघस्तस्य दाहो ज्योतिः। वज्राग्निरित्यर्थः। तस्य दाहेन भस्मीकरणेन दूषितो भस्मीकृतो विटपः कटप्रुः शाखाटोपो यस्य स तथोक्तः । हे राजन्, तथा तेनैव प्रकारेण अहमपि यशोधरः चरायोनिसंभवः छागोऽपि चरमाधिकरणां दशां मरणावस्थां अशिश्रियं आश्रितवानहम् । कथंभूतोऽहम् । तया अमृतमतिमहादेव्या प्रत्यहधगद्धगितीद्धोद्धानमध्यभटित्रीकृतैकचरणः प्रत्यहं निरन्तरं धगद्धगिति जाज्वल्यमानं इद्धं दीप्तं यदुद्धानं अस्मत्तं अधिश्रयणी चुल्ली । अन्तिका इति यावत् । तन्मध्ये भटित्रीकृतः पाचित एकचरणः पश्चिमपादः श·········सहितोऽङ्घ्रिः यस्य स तथोक्तः । कथंभूतया अमृतमतिमहादेव्या । जाङ्गलभक्षणाक्षिप्तचित्तया जाङ्गलस्य मासस्य भक्षणे आक्षिप्तं आसक्तं चित्तं मनो यस्याः सा तथा ।

पुनः पुनरपि महिषच्छागभववर्णनादनन्तरं अहो धर्मधौरेय धर्ममहाप्रवर्तक, इहैव अस्मिन्नेव जम्बूलक्ष्मणि द्वीपे जम्बूवृक्षोपलक्षिते द्वीपे विजयार्धो नाम । खलु वाक्यालंकारे। पर्वतोऽस्ति । कथंभूते जम्बूद्वीपे । रत्नाकरमेखलिनि रत्नाकरो लवणसमुद्रो मेखला कटिमेखला विद्यते यस्य स तथा तस्मिन् । पुनः कथंभूते जम्बूद्वीपे । मेरुणा सुराचलेन अलंकृतनाभिमण्डले अलंकृतं शोभितं नाभिमण्डलं पृथुप्रदेशो यस्य स तथा तस्मिन् । कथंभूतेन मेरुणा । अमरलोकोत्तम्भनस्तम्भेनेव अमरलोकस्य स्वर्गस्योत्तम्भनं अवष्टम्भं तेन स्तम्भेनेव । यो विजयार्धावनीध्रः यो विजयार्धपर्वतश्चकास्ति शोभते । कथंभूतो विजयार्धावनीध्रः । नट इव नर्तको यथा चकास्ति । तत्कारणगर्भितानि विशेषणानि आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गन्धर्वाखर्वपर्वानकनिनदनदत्कंदराभोगरम्यः
स्वर्गस्त्रीगीतकान्ताटनिरमरतरुश्लाघ्यशाखाक्षिपस्तिः ।
गङ्गातुङ्गोत्तरङ्गोच्छलदनणुकणासारहाराभिरामः
प्रोत्तालानर्तनीतिर्नट इव विजयार्धावनीध्रश्चकास्ति ॥

किं च ।

पादान्तलक्ष्मीरपरः पयोधिः पूर्वोऽम्बुधिर्यस्य शिरस्यदश्रीः ।
शय्यावकाशा च वसुंधरेयं जातामरस्त्रीजनसेवितस्य ॥
उल्लोलकल्लोलकरप्रचारात्पूर्वापरौ स्वप्तुमिव स्थितस्य ।
सीमन्तसंवाहनयोरिवाब्धी जातोद्यमौ यस्य गिरेश्चकास्तः ॥

गन्धर्वेति । गन्धर्वाखर्वपर्वानकनिनदनदत्कंदराभोगरम्यः गन्धर्वाणां देवगायकानां अखर्वा अह्रस्वा ये पर्वानकाः उत्सवपटहास्तेषां निनदा ध्वनयस्तैर्नदन्तः प्रतिशब्दं कुर्वन्तो ये कंदराभोगा गुहानां परिपूर्णविस्तारास्तै रम्यो मनोहरः । यत्र नटो नृत्यति तत्रानकाः शब्दं कुर्वन्ति । पुनः कथंभूतः । स्वर्गस्त्रीगीतकान्ताटनिः स्वर्गस्त्रीणां गीतैः कान्ता मनोहरा अटनिः कटिनीतटं यस्य स तथोक्तः । यत्र नटो नृत्यति तत्र स्त्रियो गायनानि गायन्ति । पुनः कथंभूतः । अमरुतरुश्लाघ्यशाखाक्षिपस्तिः अमरतरुणा श्लाघ्याः प्रशंसनीयाः शाखा लतास्ता एव क्षिपस्तयो भुजा यस्य स तथोक्तः । नटोऽपि भुजाभ्यां नृत्यति । पुनः कथंभूतः । गङ्गातुङ्गोत्तरङ्गोच्छलदनणुकणासारहाराभिरामः गङ्गायाः स्वर्गनद्यास्तुङ्गा उन्नता उत्तरङ्गा उत्कृष्टकल्लोलास्तेभ्य उच्छलन्त आकाशे उत्पतन्तो ये अनणुकणाः स्थूलजलविन्दवस्तेषामासारः समूहः स एव हारो मुक्ताफलमाला तेनाभिरामो मनोहरः । नटोऽपि हारशोभितो भवति । पुनः कथंभूतः । प्रोत्तालानर्तनीतिः प्रोत्ताला उत्सुका आनर्तस्य भ्रामर्या नीतिर्नयो यस्य स तथोक्तः । नटोऽप्युत्तालनर्तनो भवति । युग्मं श्लेषोपमा ॥

किं च विशेषोऽस्ति ।

पादान्तेत्यादि । यस्य विजयार्धावनीध्रस्य अपरः पयोधिः पश्चिमसमुद्रः पादान्तलक्ष्मीः पादपङ्क्तिशोभा वर्तते पदिकाविशेषो वर्तते । यस्य च पूर्वोऽम्बुधिः शिरस्यदश्रीः मस्तकोच्छीर्षं वर्तते । यस्य च इयं वसुंधरा शय्यावकाशा शयनीयं जाता । तनुपल्यङ्कस्योपरि स्त्रीजनो विलोकते सोऽस्य को वर्तते इति । तत्कारणगर्भितं विशेषणमाह—कथंभूतस्य यस्य । अमरस्त्रीजनसेवितस्य अमरस्त्रीजनेन सेवितो भुक्तस्तस्य । रूपकहेत्वलंकारः ॥

उल्लोलेत्यादि । यस्य विजयार्धस्य गिरेः पर्वतस्य पूर्वापरौ अब्धी समुद्रौ सीमन्तसंवाहनयोः मस्तकसंमार्जने पादमर्दने च जातोद्यमाविव चकास्तः शोभेते । कस्मात् । उल्लोलकल्लोलकरप्रचारात् उल्लोलाश्चपलाः कल्लोला महान्तस्तरङ्गास्त एव करास्तेषां प्रचारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDE

यत्राम्बुधिः पुष्करवत्स्थिताङ्गे तरङ्गहस्ताहतकंदरास्यः।
शक्रप्रचेतःपुरकामिनीनां नृत्ताय वृत्तः कुतपीव भाति ॥

तत्र विद्याधरसुन्दरीविलासमणिदर्पणदृषदि वारणाङ्कितमेखले सततस्यन्ददुर्दिनदरीसरत्समीरसीकरासारिणि सुरतश्रमखिन्नखचरसहचरीसेव्यमानसंतानकच्छाये सुरानोकहकुहरविहरमाणमधुकरीकुलकलहगलत्प्रसू-

---

व्यापारणं तस्मात्। यस्य कथंभूतस्य। स्वप्तुं स्थितस्येव निद्राकर्तृव्याप्टतस्येव। यथासंख्योत्प्रेक्षालंकारः ॥

यत्रेत्यादि। यत्र यस्मिन् विजयार्धावनीध्रे अम्बुधिः कुतपीव मार्दङ्गिक इव भाति। यत्र गिरौ कथंभूते। पुष्करवत् मृदङ्गमुखवत् स्थिताङ्गे व्याप्टतकाये। अम्बुधिः कथंभूतः। तरङ्गहस्ताहतकंदरास्यः तरङ्गावेव हस्तौ ताभ्यामाहते ताडिते कंदरास्ये गुहामुखे येनाम्बुधिना स तथोक्तः। ननु वादनं नर्तननिमित्तं भवति, तत्किं नर्तनमित्याह। तत्कारणगर्भितमम्बुधेर्विशेषणमाह—अम्बुधिः कथंभूतः। शक्रप्रचेतःपुरकामिनीनां नृत्ताय वृत्तः शक्रश्च पूर्वदिक्पाल इन्द्रः, प्रचेताश्च पश्चिमदिक्पालो वरुणः, तयोः पुरे द्वे नगरे तयोः कामिन्यः तासां तथोक्तानां नृत्ताय नर्तनाय वृत्तो व्यावृत्तः। रूपकोपमालंकारः ॥

तत्र तस्मिन् विजयार्धावनीध्रे मन्मथमथनाभिधानावसरश्चारणमहर्षिः मन्मथमथन इति अभिधानस्य नाम्नः अवसरो योग्यता यस्य स तथा चारणमहर्षिराकाशगामी मुनिः सूर्यप्रतिमागतो बभूव कायोत्सर्गेण स्थितः। किं कृत्वा पूर्वम्। निर्दरैकदेशं निर्भयप्रदेशं अध्यास्य आश्रित्य स्थितः। कथंभूते विजयार्धावनीध्रे। विद्याधरसुन्दरीविलासमणिदर्पणदृषदि विद्याधराणां गगनचराणां याः सुन्दर्यः कमनीयकामिन्यस्तासां विलासो नेत्रविभ्रमस्तस्यावलोकनाय मणिदर्पणसदृशा दृषदः पाषाणशिलातला यस्मिन्स तथोक्तस्तस्मिन्। पुनः कथंभूते। वारणाङ्कितमेखले.................................. । पुनः कथंभूते। सततस्यन्ददुर्दिनदरीसरत्समीरसीकरासारिणि सततस्यन्देन जलस्रवणेन दुर्दिना मेघच्छिन्ना या दर्यो गुहास्तासु सरत्समीरेण प्रवर्तमानवायुना ये सीकरासारा जलकणसमूहास्ते विद्यन्ते यत्र स तथा तस्मिन्। पुनः कथंभूते। सुरतश्रमखिन्नखचरसहचरीसेव्यमानसंतानकच्छाये सुरतश्रमेण मैथुनखेदेन खिन्नाः श्रान्ता ये खचरसहचर्यो विद्याधराणां स्त्रियस्ताभिः सेव्यमाना आश्रियमाणा संतानकच्छाया देववृक्षच्छाया यत्र स तथा तस्मिन्। पुनः कथंभूते। सुरानोकहकुहरविहरमाणमधुकरीकुलकलहगलत्प्रसूनमकरन्दामोदिनि सुरानोकहानां कल्पवृक्षाणां कुहरेषु विहरमाणानि मधुकरीकुलानि तेषां कलहेन युद्धेन गलत्प्रसूनानां पतत्पुष्पाणां यो मकरन्दः पुष्परसस्तस्यामोदः परिमलो विद्यते यत्र स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमकरन्दामोदिन्यभ्रंलिहशिखरोत्सङ्गसंगतगगनगणिकोपवीणनमनोहरे मयुमिथुनसंगीतकानन्दिनि निर्दरैकदेशमध्यास्य किल चरमदेहधारी भगवान्सरस्वतीसरिज्जलकेलिकुञ्जरो मन्मथमथनाभिधानावसरश्चारणमहर्षिः

मन्दस्पन्दीभवति हृदये बाह्यचिन्ताविदूर-
व्यापारेऽस्मिन्करणनगरे योगमग्ने च पुंसि ।
यत्रावृत्तिं भजति कुलिशं वज्रिणापि प्रयुक्तं
पुष्पास्त्राणां कुसुमधनुषस्तत्र का नाम वृत्तिः ॥

इति विचिन्त्य निष्पन्नयोगिलोकोदाहरणतपश्चर्यः सूर्यप्रतिमागतो बभूव ।

तथा तस्मिन् । पुनः कथंभूते । अभ्रंलिहशिखरोत्सङ्गसंगतगगनगणिकोपवीणनमनोहरे अभ्रंलिहानि उन्नतानि यानि शिखराणि तेषामुत्सङ्गेषु उपरितनभागेषु अङ्केषु संगता मिलिता या गगनगणिकाः गगनाङ्गना विद्याधराणां संबन्धित्वेन या गणिका वेश्यास्तासामुपवीणनेन वीणावादनेन मनोहरो मनोज्ञः स तथा तस्मिन् । पुनः कथंभूते । मयुमिथुनसंगीतकानन्दिनि मयुमिथुनानां किंनरयुगलानां यत्संगीतकं नृत्यवादित्रत्रयं तेन आनन्दो हर्षो विद्यते यत्र स तथा तस्मिन् । कथंभूतो मन्मथमथनचारणर्षिः । किल निश्चयेन चरमदेहधारी इव मुक्तिगामी भगवान् इन्द्रादीनामाराध्यः । पुनः कथंभूतः । सरस्वतीसरिज्जलकेलिकुञ्जरः सरस्वती द्वादशाङ्गशास्त्रं सैव सरित् पापमलप्रक्षालनत्वात् तस्या जलं शब्दलक्षणं वारि तस्य या केलिरनुभवनक्रीडा तस्याः कुञ्जरो गजेन्द्रः स तथोक्तः । किं कृत्वा पूर्वम् । इतीदृशं विचिन्त्य पर्यालोच्य । इतीति किम् ।

मन्दस्पदीत्यादि । यत्र यस्मिन् सूर्यप्रतिमागमने वज्रिणापीन्द्रेणापि प्रयुक्तं प्रेरितं कुलिशं वज्रं आवृत्तिं अभिवृत्तिं न भजति न प्रवर्तते तत्र तस्मिन् प्रतिमागमने कुसुमधनुषः कंदर्पपुष्पास्त्राणाम् । नामेति संभावनायाम् । का वृत्तिः का प्रवृत्तिर्भवति । अपि तु न कापीत्यर्थः । कंदर्पबाणा न प्रवर्तन्त इत्यर्थः । कस्मिन् सति । हृदये मनसि मन्दस्पन्दीभवति सति न किंचिदपि चलति सति । स्थिरीभूते सतीत्यर्थः । पुनश्च कस्मिन् सति कामबाणा न प्रवर्तन्ते । अस्मिन् करणनगरे इन्द्रियलक्षणपत्तने बाह्यचिन्ताविदूरव्यापारे सति बाह्यस्पर्शरहिते सति गन्धवर्णलक्षणाः पञ्च विषयास्तेषां चिन्ताया अभिलापस्य विदूरो विप्रकृष्टो व्यापारः प्रवृत्तिर्यस्य करणनगरस्य तत्तथा तस्मिन् । पुनश्च कस्मिन् सति । पुंसि आत्मनि च योगमग्ने धर्मशुक्लध्यानद्वये एकलोलीभावं संजाते सति । आक्षेपालंकारोऽतिशयालंकारश्च । मन्दाक्रान्ता छन्दः ॥

कथंभूतो मन्मथमथनः । निष्पन्नयोगिलोकोदाहरणतपश्चर्यः निष्पन्ना समभ्यस्तध्यानद्वया योगिलोका ध्यानिनां समूहास्तेषामुदाहरणं दृष्टान्तवचनं तपश्चर्या तपश्चरणं यस्य स तथोक्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्यैवं स्थितस्य महर्षेरलोकाकाशवत्स्वभावादेव सकलैरपि जन्तुभिरनुलङ्घनीयमाहात्म्यस्य हिमवन्महीधरस्य स्कन्धाधानानि काननानि विलोकितुमुच्चलितः **कन्दलविलासो** नाम विद्याधरः **कंदर्पदर्पणायाः** प्रियतमायाः समक्षं **मदनविनोदं** नाम विमानं स्खलितगमनमवेक्ष्य जातवैलक्ष्यस्तत्साधुसमाधिविध्वंसनधिया बहुरूपिणीं विद्यामनुध्याय विधाय च तडिद्दण्डसंघट्टस्फुटद्ब्रह्माण्डखण्डैरिव घोरघोषप्रचण्डैः, प्रलयकालप्रसूतिदिवसैरिव जनितसमस्तसत्त्वसाध्वसैः, क्षयक्षपान्धकारैरिव भीषणाकारैः, उत्क्षिप्तकृतान्तदृष्टिपातैरिवोल्काजालकरालद्योतैः, यमायुधविद्धैरिव मुशल-

---

तस्य महर्षेर्मन्मथमथनस्य एवममुना प्रकारेण सूर्यप्रतिमागमने प्रतिमागतप्रकारेण स्थितस्य कन्दलविलासो नाम विद्याधरः । कन्दलं युद्धं विलासो विस्तारो यस्य स कन्दलविलास इति व्युत्पत्तिः । महति मानयुक्तो विद्याधरो वियच्चरः चण्डकर्म आचरन् उपसर्गं कुर्वन् रत्नशिखण्डिनाम्ना विद्याधरचक्रवर्तिना व्यलोकि दृष्टः । कथंभूतस्य मन्मथमथनस्य महर्षेः । स्वभावादेव सकलैरपि जन्तुभिः अनुलङ्घनीयमाहात्म्यस्य अनुल्लङ्घ्यः महिमा यस्य तस्य । किंवत् । अलोकाकाशवत् यथा अलोकाकाशस्य माहात्म्यं सकलैरपि जन्तुभिरनुल्लङ्घनीयं भवति । कन्दलविलासो नाम विद्याधरः कथंभूतः । हिमवन्महीधरस्य क्षुद्रहिमवत्पर्वतस्य षट्कुलपर्वतानां मध्ये प्रथमकुलपर्वतस्य स्कन्धाधानानि उपरिस्थितानि काननानि विलोकितुं उच्चलितो विमानोत्पतितः । कथं चण्डकर्म आचरन् कथमुपसर्गं कुर्वन् । कंदर्पदर्पणानाम्न्याः प्रियतमायाः समक्षं प्रत्यक्षं यथा भवत्येवं चण्डकर्माचरन् । किं कृत्वा पूर्वम् । मदनविनोदं नाम विमानं व्योमयानं स्खलितगमनं अवेक्ष्य दृष्ट्वा । कथंभूतः कन्दलविलासः । जातवैलक्ष्यः समुत्पन्ननिष्प्रतिपत्तिकः । किं कृत्वा पूर्वम् । तत्साधुसमाधिविध्वंसनधिया मन्मथमथनमुनिध्यानविघ्नकरणबुद्ध्या बहुरूपिणीं विद्यां अनुध्याय चिन्तयित्वा । पुनश्च किं कृत्वा पूर्वम् । घनाघनैर्मेघैरावृतमाच्छादितं गगनं विधाय च कृत्वा । कथंभूतैर्घनाघनैः । घोरघोषप्रचण्डैः भयानकशब्दबलवत्तरैः । कैरिव । तडिद्दण्डसंघट्टस्फुटद्ब्रह्माण्डखण्डैरिव तडिद्दण्डानां संघट्टेन भटभेटकेन स्फुटन्ति शतखण्डीभवन्ति ब्रह्माण्डखण्डानि त्रैलोक्यशकलानि येषु घोरघोषप्रचण्डेषु ते तथोक्तैः । पुनः कथंभूतैः । जनितसमस्तसत्त्वसाध्वसैः उत्पादितसर्वजीवभीतिभिः । कैरिव । प्रलयकालप्रसूतिदिवसैरिव संहारसमयोत्पत्तिदिनैरिव । पुनः कथंभूतैः । भीषणाकारैः भयानकमूर्तिभिः । कैरिव । क्षयक्षपान्धकारैरिव । पुनः कथंभूतैः । उल्काजालकरालद्योतैः उल्काजालानां तारापतनसमूहानां करालोऽतिरौद्रो द्योतो येषां ते तथा तैः । कैरिव । उत्क्षिप्तकृतान्तदृष्टिपातैरिव उत्क्षिप्ता उत्पतिताः कृतान्तस्य दृष्टिपाताश्चक्षुरवलोकितानि ते तथा तैरिव । पुनः कथंभूतैः । मुशलप्रमाणवारिधारावर्षिभिः मुशलप्रमाणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमाणवारिधारावर्षिभिः, स्फुटितामरलोकशैलशिखरैरिवापतत्पृथीयपाषाणैः, असितशिलाधिष्ठानबन्धैरिव ज्योतिर्वसतीनाम्, असमयतमिस्रासमागमैरिव भुवनवलयस्य, अकाण्डकपाटघटनैरिव दक्षकन्यानाम्, अनवसरसंहारवासरैरिव नेत्रवृत्तानाम्, अकालकालायसचूर्णोपहारैरिव क्षितेः, घनाघनैरावृतं गगनमाभरणभुजंगमाभीलैर्वेतालैराकम्पिताखिलभूगोलैर्बलालैश्च दुर्दशा दिशः प्रसाध्य स्वयं च समाचरितमातङ्गवेषश्चण्डकर्माचरन्नेनं योगिनमुपासितुमागतेन रत्नशिखण्डिनाम्ना विद्याधरचक्रवर्तिना व्यलोकि चुकुपे च।

पुनः 'अरे कदाचाराचार पराकदुरात्मन् खलपुरोभागिन् विद्याधराधम

अतिस्थूला वारिधारा जलच्छटाः वर्षन्तीत्येवंशीलास्ते तथा तैः। कैरिव। उत्प्रेक्ष्यते—यमायुधविद्धैरिव यमदण्डेन कृतच्छिद्रैरिव। पुनः कथंभूतैः। आपतत्पृथीयपाषाणैः आपतन्तः आगच्छन्तः पृथीयसो विस्तीर्णाः पाषाणा येभ्यस्ते तथा तैः। कैरिव। उत्प्रेक्ष्यते—स्फुटितामरलोकशैलशिखरैरिव स्फुटिता भेदं प्राप्ता ये अमरलोकशैलाः स्वर्गपर्वतास्तेषां शिखरैरिव कूटैरिव। पुनः कथंभूतैः। ज्योतिर्वसतीनां चन्द्रसूर्यग्रहनक्षत्रताराग्रहाणां असितशिलाधिष्ठानबन्धैरिव असिता कृष्णवर्णा याः शिलास्तासामधिष्ठानबन्धैरिव गर्भापूरसमूहैरिव। पुनः कथंभूतैः। भुवनवलयस्य पृथ्वीमण्डलस्य असमयतमिस्रासमागमैरिव अकालकालरात्रिसमागमैरिव। पुनः कथंभूतैः। दक्षकन्यानां तारकानां अकाण्डकपाटघटनैरिव अकालकवाटरचनैरिव। पुनः कथंभूतैः। नेत्रवृत्तानां लोचनव्यापाराणां अनवसरसंहारवासरैरिव अकाण्डप्रलयकालदिवसैरिव। पुनः कथंभूतैः। क्षितेः पृथिव्याः अकालकालायसचूर्णोपहारैरिव अकालेऽप्रस्तावे कालायसस्य लोहस्य चूर्णोपहारैरिव क्षोदप्रकारैरिव। पुनश्च किं कृत्वा चण्डकर्म समाचरन्। दिशो हरितो दुर्दशा दुरवस्थाः प्रसाध्य कृत्वा। कैः कृत्वा दिशो दुर्दशाः प्रसाध्य। वेतालैः कृत्वा। कथंभूतैर्वेतालैः। आभरणभुजंगमाभीलैः आभरणस्य संबन्धिनो ये भुजंगमाः सर्पास्तैराभीलैर्भीषणैः। पुनश्च किं कृत्वा दिशो दुर्दशाः प्रसाध्य। बलालैः प्रचण्डवातैः। कथंभूतैर्बलालैः। आकम्पिताखिलभूगोलैः आकम्पितश्चालितोऽखिलः समग्रो भूगोलो पृथ्विमण्डलं यैस्ते तथा तैः। पुनः कथंभूतः कन्दलविलासो विद्याधरः। स्वयं चात्मना समाचरितमातङ्गवेषः सम्यगाचरितो गृहीतः मातङ्गस्य चाण्डालस्य वेष आकल्पो येन स तथोक्तः। कथंभूतेन विद्याधरचक्रवर्तिना रत्नशिखण्डिनाम्ना। एनं मन्मथमथननामानं योगिनं ध्यानिनं उपासितुमागतेन सेवितुमुपढौकितेन। न केवलं कन्दलविलासो विद्याधरश्चण्डकर्म समाचरन् व्यलोकि दृष्टः। किं तु चुकुपे च तस्योपरि कोपश्चक्रे च।

नभश्चरचक्रवर्ती इति वदन् तस्य कन्दलविलासस्य समस्ता अपि समग्रा अपि विद्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खेचरखेट विहायोगमयाप्य वियच्चरखेल हेठ नरकनिवास पापाचार बहुकुमतिभृतचित्त गुणमटह निहीन गन्धर्वलोकापसद मातरिपुरुष सकलसत्त्वानन्दनीयतपसि त्रिभुवनमान्ययशसि भगवति परंब्रह्मासनमुपगतवति किमेवमाचरितुमुचितम् । न चेह महामुनिसंनिधाने शास्त्राणामिवास्त्राणां व्यापारस्यावसरः । तदन्यथापि ते व्यपनयामि समुन्नद्धभावम्' इति वदन्दुर्जनाविनयसमवर्ती स नभश्चरचक्रवर्ती तस्य समस्ता अपि विद्याधरलोकलक्ष्मीलाञ्छनाश्चिच्छेद विद्याः । शशाप च 'भविष्यस्यनेन दुश्चेष्टितेनावन्तिषु

श्चिच्छेद छेदितवान् । इतीति किं वदन् । पुनः पुनरपि इति वदन् । इतीति किम् । अरे कदाचाराचार अरे कुत्सिताचार । अरे पराकदुरात्मन् पराकेन वधेन दुरात्मा तस्य संबोधनं क्रियते अरे पराकदुरात्मन् । उक्तं च—'परं पराकं शशनं पोषणं तत्र यो वधः ।' अरे खलपुरोभागिन् खलानां दुर्जनानां पुरोभागी अग्रेसरः खलपुरोभागी तस्य संबोधनं क्रियते अरे खलपुरोभागिन् । अरे विद्याधराधम विद्याधराणां मध्ये अधमो निकृष्टः विद्याधराधमस्तस्य तिरस्कारः क्रियते अरे विद्याधराधम । अरे खेचरखेट खेचराणां मध्ये खेटः कुत्सितः खेचरखेटस्तस्य संबोधनं निर्घाटनं हे तथोक्त । उक्तं च— 'कुपूज्यकुत्सितोऽवद्यखेटगर्हणक्वाः समाः ।' अथवा 'खिट उत्रासने' इति धातोः प्रयोगात् खेट उत्त्रासक इत्यर्थः । अरे विहायोगमयाप्य विहायोगमानां विद्याधराणां याप्यो निन्द्यः विहायोगमयाप्यस्तस्य संबोधनं हे तथोक्त । अरे वियचरखेल वियच्चराणां मध्ये खेलो नयस्तस्य संबोधनं हे तथोक्त । अरे हेठ अरे बाधाकर । अरे नरकनिवास नरके निवासो यस्य स तथा तस्य संबोधनम् । अथवा नरकस्य गूथस्य निवासस्तस्य संबोधनम् । अशुलित(?) इत्यर्थः । अरे पापाचार पापमेवाचारो यस्य स तथा तस्य संबोधनं हे तथोक्त । अरे बहुकुमतिभृतचित्त बह्वी कुमतिर्माया तया भृतं परिपूर्णं चित्तं यस्य स तथा । अरे गुणमटह गुणैर्मटहो लघुस्तस्य संबोधनम् । अरे निहीन अरे नीच । अरे गन्धर्वलोकापसद गन्धर्वलोके विद्याधरलोके अपसद । अपाङ्क्तेयपतित इत्यर्थः । अरे मातरिपुरुष मातृमैथुन । भगवति गुणैः इन्द्रादीनामाराधनीये एवमाचरितुमुपसर्गं कर्तुं किं उचितं युक्तमेतत् । अपि तु नोचितम् । कथंभूते भगवति । सकलसत्त्वानन्दनीयतपसि सर्वजीवाह्लादकचरित्रे । पुनः कथंभूते । त्रिभुवनमान्ययशसि त्रैलोक्यपूज्यपुण्यगुणकीर्तने । पुनः कथंभूते । परं ब्रह्मासनं ध्यानं उपगतवति प्राप्ते । इह अस्मिन् महामुनिसंनिधाने समीपे शास्त्राणामिव अस्त्राणां शस्त्राणां व्यापारस्य प्रवृत्तेः अवसरो न च नैव वर्तते । तत्तस्मात् कारणात् अन्यथापि शस्त्रैर्विनापि ते तव समुन्नद्धभावं दृप्तत्वं व्यपनयामि इति वदन् । कथंभूतः नभश्चरश्चक्रवर्ती । दुर्जनाविनयसमवर्ती दुर्जनानामविनयस्य समवर्ती कृतान्तः स तथा । कथंभूता विद्याः । विद्याधरलोकलक्ष्मीलाञ्छनाः विद्याधरलोकसंपच्चिह्नानि । न केवलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महेन्द्रमहीधरस्याधिपतिः संजातमेदिनीरतचित्तोऽपि द्विजातिस्तूयमानवृत्तः अकारणरोषप्रमत्तोऽपि निःशेषशिष्टाचारप्रवृत्तः **सुदत्तो** नाम राजा ।

यस्य विभवाभिवृद्धिस्तर्कुकलोकसंतर्पणाय, विद्यावैशारद्यं विद्वज्जनोपचरणाय, शौर्यपर्यायः शरणागतरक्षणाय, राज्यावर्जनपरिग्रहः प्रजापरित्राणाय, प्रभुत्वावलम्बनं समाश्रितभरणाय, क्षात्रचरित्रवृत्तिः परार्थकरणाय, देवताप्रसादनं सत्पुरुषवरवितरणाय, साहसोत्साहानुष्ठानं महामुनिप्रत्यूहनिबर्हणाय, वीरविक्रमः साधकसाध्वसापहरणाय, सात्त्विकत्वमादिक्षत्रियधृतधर्मनिर्वहणाय ।

धुकरालीनीलमणिमेखलाङ्कितनितम्बवसुंधरस्य द्विरदानां योऽसौ मदो दानं तस्यामोदस्तेन मन्दाः स्यन्दा या कन्दरास्तासामुदरेषु मध्येषु परिसरन् समन्तात् पर्यटन् योऽसौ पवनस्तस्य पानपरा आस्वादनलम्पटा या मधुकराली सैव नीलमणिमेखला कटिनी तया अङ्किता नितम्बवसुंधरा तदभूमिर्यस्य स तथा तस्य । पुनः कथंभूतः सुदत्तो नाम राजा । संजातमेदिनीरतचित्तः म्लेच्छस्त्रीसंभोगमना अपि द्विजातिस्तूयमानवृत्तः । ननु यो म्लेच्छभार्यारतचित्तः स द्विजातिस्तूयमानवृत्तः ब्राह्मणस्तूयमानाचारः कथं भवति । विरुद्धमेतत् । परिह्रियते—मेदिनी आसमुद्रान्तपृथ्वी तस्यां रतचित्तः पालनमना अपि निश्चयेन द्विजातिभिः श्रवणब्राह्मणैः श्लाघ्यमानः सद्वृत्त इति शुद्धम् । पुनः कथंभूतः । अकारणरोषप्रमत्तोऽपि अकारणरोषि अपि निःशेषशिष्टाचारप्रवृत्तः निर्हेतुककोपेन प्रवृत्तः कथमिति विरुद्धम् । नैवम् । अको अकुत्सितः आसमन्तात् योऽसौ रणरोषः संग्रामकोपस्तेन प्रकर्षेण मत्तो हर्षं प्राप्तः अत एव निःशेषेषु शिष्टाचारेषु प्रवृत्त इति स्वस्थम् ।

यस्य सुदत्तस्य विभवाभिवृद्धिः धनवृद्धिः तर्कुकलोकसंतर्पणाय याचकजनसम्यक्प्रीणनाय वर्तते । यस्य विद्यावैशारद्यं शास्त्रचतुरता विद्वज्जनोपचरणाय विद्वज्जनानां पण्डितानां उपचरणाय पूजनाय वर्तते । यस्य शौर्यपर्यायः सुभटत्वानुक्रमः शरणागतरक्षणाय शरणागतानां प्रतिपालनाय वर्तते । यस्य राज्यावर्जनपरिग्रहः राज्योपार्जनस्वीकारः प्रजापरित्राणाय प्रजालोकरक्षणार्थं वर्तते । यस्य प्रभुत्वावलम्बनं सामर्थ्याश्रयणं समाश्रितभरणाय सेवकलोकपोषणाय वर्तते । यस्य क्षात्रचरित्रवृत्तिः क्षत्रियाणामिदं क्षात्रं क्षतत्राणलक्षणं तच्च तच्चरित्रं च आचारस्तस्य वृत्तिः प्रवृत्तिः परार्थकरणाय परप्रयोजनपोषणार्थं वर्तते । यस्य देवताप्रसादनं देवानां प्रसन्नीकरणं सत्पुरुषवरवितरणाय सत्पुरुषाणां वरदानार्थं वर्तते । यस्य साहसोत्साहानुष्ठानं साहसस्याद्भुतकर्मणः उत्साहानुष्ठानमुद्यतमनिधानं महामुनिप्रत्यूहनिबर्हणाय मुनीनां उपसर्गनिवारणार्थं वर्तते । यस्य वीरविक्रमः जयकुमारवत्पराक्रमः साधकसाध्वसापहरणाय साधकानां विद्यादेवतावशकराणां साध्वसस्य भयस्य अपहरणाय निर्नाशनार्थम् । यस्य सात्त्विकत्वं प्रसादलक्षणत्वं आदिक्षत्रियधृतधर्मनिर्वहणाय निर्वाहनिमित्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य च जनन्यः परकलत्राण्येव, बन्धुवर्गः समाश्रितलोक एव, कुटुम्बकं सप्तसमुद्रावधि वसुधैव, जीवितं सत्यप्रतिपालनमेव, महाव्यसनं परोपकारनिघ्नतैव, व्रताचरणं क्षितिरक्षणमेव, योग्योद्योगः प्रजाकार्यानुशासनमेव, दक्षिणादक्षत्वं जगद्व्यवहारव्यवस्थापनमेव, अवभृथस्नानं परत्रेह च हितवृत्तिप्रवृत्तिषु स्वातन्त्र्यमेव, वीरत्वमरिषड्वर्गविजय एव, असिधाराव्रतमन्यायखण्डनमेव, ऐश्वर्यमाज्ञानुल्लङ्घनमेव।

यस्य वासंतोषः श्रुतेषु, तर्षः सत्पुरुषसंग्रहेषु, मूकभावः स्वकीयगुणस्तवनेषु, बधिरत्वं दुर्जनोपदेशेषु, दर्शनपरावृत्तिरनर्थसंगमेषु, कामः पुण्यार्जनेषु, अक्षमा परोपतापेषु, विद्वेषो व्यसनेषु, असंतृप्तिः सुभाषितश्रवणेषु, आसक्तिः पुनः सद्गोष्ठीषु।

यस्य च परिमितत्वं वाचि, कालहरणं कलासु, आशादर्शनं दिग्विज-

यस्य च जनन्यो मातरः परकलत्राण्येव परदारा एव। यस्य बन्धुवर्गः सर्गसमूहो भ्रातृवर्गः समाश्रितलोक एव। यस्य कुटुम्बकं परिवारवर्गः सप्तसमुद्रावधि वसुधैव आसमुद्रान्ता भूमिरेव भूमिस्थितलोक एव। यस्य जीवितं········सत्यप्रतिपालनमेव······ ······················। यस्य महाव्यसनं······················परोपकारनिघ्नतैव ·····················। यस्य व्रताचरणं··············क्षितिरक्षणमेव········ ···························। यस्य योग्योद्योग उचितोद्यमः प्रजाकार्यानुशासनमेव प्रजानां कार्यं कर्तव्यं तस्य अनुशासनं शिक्षापणमेव। यस्य दक्षिणादक्षत्वं दानचातुर्यं जगद्व्यवहारव्यवस्थापनमेव पृथ्वीमण्डलस्थितलोकत्रयविक्रियादिनिश्चलीकरणमेव। यस्य अवभृथस्नानं यज्ञान्तस्नानं परत्रेह च परलोके इहलोके च हितवृत्तिप्रवृत्तिषु पुण्यप्रवर्तनेषु स्वातन्त्र्यमेव स्वाधीनतैव। यस्य वीरत्वं सुभटत्वं अरिषड्वर्गविजय एव कामक्रोधलोभमानमदहर्षनिषेध एव। यस्य असिधाराव्रतं तीक्ष्णत्वनियमः अन्यायखण्डनमेव। यस्यैश्वर्यं प्रभुत्वं आज्ञानुल्लङ्घनमेव आदेशप्रतिपालनमेव।

यस्य सुदत्तस्य। वा अनुक्तसमुच्चये। असंतोषस्तृष्णालुता श्रुतेषु वर्तते। तर्षो लोभः सत्पुरुषसंग्रहेषु महापुरुषस्वीकारेषु। मूकभावो मौनित्वं स्वकीयगुणस्तवनेषु निजगुणश्लाघासु। बधिरत्वं दुर्जनोपदेशेषु सूचकवचनाकर्णनेषु। दर्शनपरावृत्तिर्लोचनाचरणं अनर्थसंगमेषु अलाभसंगतिषु। कामोऽभिलाषः पुण्यार्जनेषु। अक्षमा क्रोधः परोपतापेषु। परैः [illegible]। यदा संतापः क्रियते तदा क्षमां न करोतीत्यर्थः। विद्वेषो अक्षीगतत्वं अप्रीतिर्वा व्यसनेषु द्यूतादिसप्तव्यसनेषु। असंतृप्तिरप्राणलं सुभाषितश्रवणेषु। आसक्तिः अनुबन्धः पुनः संतत्यावृत्तिः सद्गोष्ठीषु विद्वदुपन्यासेषु।

यस्य सुदत्तस्य परिमितत्वं अल्पदायित्वं वाचि वचने वर्तते। न तु दाने। कालहरणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ययात्रायाम्, श्रवणगतत्वं पूर्वपुरुषचरितेषु, अवधीरणमात्मसुखानाम्, अनवसरः कलिकालविजृम्भितस्य, महासात्त्विकं सकलजगदभ्युद्धरणेषु, ऐश्वर्यं विश्वंभरतायाम्, न पुनरमीषां द्वन्द्वानि तस्य वदान्यतायां प्रत्युपकृतिषु मान्यजनसंभावनायां स्वच्छन्दवृत्तिषु च विषयभावमाजग्मुः।

यस्य चात्मसंधानविनीतवृत्तयः परविग्रहप्रशमनकुशलाः स्वभावगुणप्रण-

---

दिनगमनं कलासु लिखितपठितादिषु वर्तते। न तु रिरकालेन(?)दानम्। आशादर्शनं दिशामवलोकनं दिग्विजययात्रायां याने वर्तते। न त्वाकाङ्क्षायापनं तत्कालेन दानं इत्यर्थः। श्रवणगतत्वं श्रुतिदानं पूर्वपुरुषचरितेषु पुराणपुरुषकथाकर्णनेषु। न तु विज्ञप्तिकाया अनाकर्णनम्। अवधीरणमनादरः आत्मसुखानाम्। आननं अर्थिजनानां अवधीकरणम्। अनवसरोऽप्रस्तावः कलिकालविजृम्भितस्य दुष्टकालप्रसरस्य। न तु अर्थिजनानां अवसरो वर्तते दानस्य सदा अवसरोऽस्तीत्यर्थः। महासात्त्विकं प्रसन्नतायुक्तत्वं सकलजगदभ्युद्धरणेषु सकललोकोपजीवनेषु वर्तते। ऐश्वर्यं भूमिपत्वं विश्वंभरतायां सर्वलोकपोषणतायाम्। न पुनरमीषां द्वन्द्वानि युगलानि तस्य सुदत्तस्य वदान्यतायां प्रीयपूर्वकन्यागतायाम्। अमीषां केषाम्। परिमितत्वं कालहरणं प्रथमं द्वन्द्वं स्वल्पनं ददाति तत्कालं ददाति च। आशादर्शनं अवगतत्वं च द्वितीयं द्वन्द्वं तत्कालं ददाति। प्रथमं श्टणोतीत्यर्थः। अवधारणमनवरतश्च तृतीयं द्वन्द्वं दानमेव अनादरो नास्ति। अस्माकं वन्धुवर्गो मृतोऽस्ति। इदानीं दानस्यावसरो नास्ति। इत्यनवसरकथनं तद्द्वयं नास्ति। महासात्त्विकं ऐश्वर्यं चतुर्थं द्वंद्वं सहधर्मित्वे पुमान् दाने सावद्यं मन्यते तेन दानं न ददाति ऐश्वर्यं प्रभुत्वे अर्थिजनं चेतसि नानयति मदामनं(?)-ददाति तद्द्वयमत्र नास्ति। उक्तं च—'प्रियो वा दानशीलश्च वदान्यः परिकीर्तितः।' एतदुक्तं भवति—परिमितत्वं कालहरणं च दानतायां नास्ति महासात्त्विकत्वे ऐश्वर्यं च स्वच्छन्दवृत्तिषु स्वेच्छाचारेषु नास्तीति एतानि चत्वारि द्वन्द्वानि। तदेषु चतुर्मुखस्थानेषु विषयभावं गोचरत्वं यस्य नाजग्मुरित्यर्थः। यथासंख्यालंकारः॥

यस्य च सुदत्तमहाराजस्य वाणा एव शरा एव सचिवा मन्त्रिणो वर्तन्ते। परे तु सचिवाः केवलं सभाशोभार्थं संसद्विराजनार्थम् अस्थावराणि जङ्गमानि अलंकरणानि आभरणानि वर्तन्ते। ननु सचिवाः संधिविग्रहादिकार्यं कुर्वन्ति किं वर्तते किं एव तत्कार्यगर्भितानि विशेषणान्याह—कथंभूता वाणाः। आत्मसंधानविनीतवृत्तयः आत्मनः स्वस्य संधाने योजने विनीता प्रश्रिता वृत्तिर्येषां वाणानां ते तथोक्ताः। पुनः कथंभूताः। परविग्रहप्रशमनकुशलाः परेषां शत्रूणां विग्रहस्य संग्रामस्य प्रशमने कुशला दक्षाः। सचिवा अपि विग्रहं प्रशमयन्ति। पुनः कथंभूताः। स्वभावगुणप्रणयिनः स्वभावेन प्रकृत्या गुणप्रणयिनः स्वप्रत्यञ्चास्थायिनो भवन्ति। सचिवा अपि षड्गुणस्नेहिनो भवन्ति। पुनः कथंभूताः। परिप्राप्तश्रवणाः परिप्राप्तं श्रवणं कर्णे येषां कर्षणवेलायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यिनः परिप्राप्तश्रवणा बाणा एवासाध्यसाधनोत्सवाः सचिवाः, परे तु केवलं सभाशोभार्थमस्थावराण्यलंकरणानि । स्वपरप्रजानां संपत्त्यापत्तिकरमसहायं साहसमेव पुरोहितः, परस्तु सर्वदिवसेषु वसुवितरणस्थानम् । अशेषशात्रवलयस्खलनहेतुरव्याजवर्यं शौर्यमेव सेनापतिः, परस्तु भृत्यभरणीयसमयसूचनं चेतनम् । उपकरणमखिलसमुद्रावधिवसुधातले दुर्वारप्रसरपर्यमैश्वर्यमेव द्विषद्दण्डधरः प्रतीहारः, परस्तु सेवकानामुपासनावसरनिवेदनस्तीर्थपुरुषः । समराङ्गणेषु परहृदयंगमप्रवणानि शस्त्रसंप्रेषणान्येव दूतप्रणिधयः, परे तु राजनीतिप्रपञ्चाः । त्रिदशैरप्यप्रतिहता दोषाप्रपाता एव दुर्गभूमयः, परास्तु विभव-

---

ते तथोक्ताः । सचिवा अपि कर्णे शयित्वा······चिद्वहन्ति । पुनः कथंभूताः । असाध्यसाधनोत्सवाः असाध्यस्य शत्रोः साधने पञ्चत्वप्रापणे उत्सवो उद्यमो येषां ते तथोक्ताः । सचिवा अपि असाध्यं साधयन्ति । यस्य सुदत्तमहाराजस्य साहसमेव अद्भुतं कर्मैव पुरोहितो राजगुरुर्वर्तते । परस्त्वपरः पुरोहितः सर्वदिवसेषु अमावास्यादिषु दिनेषु वसुवितरणस्थानं धनप्रदानपदं वर्तते । कथंभूतं साहसम् । स्वपरप्रजानां संपत्त्यापत्तिकरं स्वपरप्रजानामापत्तिकरमापद्विधायकम् । पुरोहितः मन्त्रादिना स्वप्रजानां संपत्तिं करोति । परप्रजानां विपदं विदधाति । पुनः कथंभूतम् । असहायं अमणं(?) । पुरोहितोऽपि एक एव भवति । यस्य च सुदत्तमहाराजस्य शौर्यमेव सुभटत्वमेव सेनापतिश्चमूनायको वर्तते । परस्तु सेनापतिः भृत्यभरणीयसमयसूचनं किंकरपोषणकालकथकः चेतनं सजीवमरणं वर्तते । साधनं प्रियमस्ति । कथंभूतं शौर्यम् । अशेषशात्रवलयस्खलनहेतुः अशेषाणां विश्वेषां शात्रवाणां वैरीणां लयस्खलनस्य सेवावष्टम्भनस्य हेतुः कारणम् । पुनः कथंभूतम् । अव्याजवर्यं निसर्गेण मुख्यम् । यस्य च सुदत्तमहाराजस्य ऐश्वर्यमेव प्रभुत्वमेव प्रतीहारो वर्तते । परस्तु प्रतीहारः सेवकानामुपासनावसरनिवेदनः सेवावसरकथकस्तीर्थपुरुषो यात्राभूतो पुरुषो वर्तते । कथंभूतः प्रतीहारः । द्विषद्दण्डधरः द्विषत्सु शत्रुषु दण्डो दण्डनिपातनं दण्डकारणं धरति करोतीति द्विषद्दण्डधरः । कथंभूतमैश्वर्यम् । अखिलसमुद्रावधिवसुधातले चतुःसमुद्रमर्यादभूमण्डले दुर्वारप्रसरपर्यं दुर्वारो दुर्निवारः प्रसरपर्यः प्रवृत्तिः पर्यायो यस्य दुर्वारप्रसरपर्यम् । यस्य च सुदत्तमहाराजस्य शस्त्रसंप्रेषणान्येव खड्गादिमोचनान्येव दूतप्रणिधयः दूताश्च संदेशशासनहराः । संधिविग्रहासंधिविग्रहिणः प्रणिधयश्च हैरिका दूतप्रणिधयो वर्तन्ते । परे उद्भूतप्रणिधयो राजनीतिप्रपञ्चा अर्थशास्त्रविस्ताराः । कथंभूतानि शस्त्रसंप्रेषणानि । समराङ्गणेषु परहृदयंगमप्रवणानि शत्रुहृदयविदारणचतुराणि । दूतप्रणिधयोऽपि परचित्तोपलक्षका भवन्ति । यस्य सुदत्तमहाराजस्य दोषाप्रपाता एव दोषाणामप्रपात एव अनागता एव दुर्गभूमयो जलदुर्गवनदुर्गगिरिदुर्गलक्षणा वर्तन्ते । परास्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनियोगद्वाराणि। वेधसाप्यतुलितं वाहुवलविजृम्भितमेव वप्रः, परस्तु विनोदरदनिनामपाश्रयभूमिः। वनमृगैरप्यनुल्लङ्घनीयप्रभावाज्ञैव प्राकारः, परस्तु पुरस्य पांशुस्पर्शविनिवारणपरिच्छेदः। सकलसपत्नव्याप्तिकदर्थनसमर्थनावतारः सव्येतरः कर एव परिघा, परे तु दौवारिकाणां विश्रामविष्टराणि। दुर्वृत्तारातिकुलनिमज्जनजलाधारा खड्गधारैव परिखा, परा तु नगराङ्गनानां जलक्रीडाधिकरणानि। समस्तक्षितिरक्षणक्षमः पराक्रम एव परिवारः, परस्तु श्रीविलासाडम्बरः। निजकीर्तिसुधाधवलितापघनं त्रिभुवनमेव विहारहर्म्याणि, पराणि तु राज्यलक्ष्मीचिह्नानि। चतुरुदधिमेखलावनमनोहरा वसुंधरैव प्रियकलत्राणि, पराणि तु वंशाभिवृद्धिनिबन्धनानि धर्मक्षेत्राणि।

दुर्गभूमयो विभवविनियोगद्वाराणि विभवानां लक्ष्मीणां विशेषेण नियोगद्वाराणि अधिकारद्वाराणि वर्तन्ते। कथंभूता दोषाप्रपाताः। त्रिदशैरपि अप्रतिहता अविध्वस्ताः। यस्य च सुदत्तमहाराजस्य वाहुवलविजृम्भितमेव भुजसामर्थ्यप्रसर एव वप्रो वर्तते। वप्रो दुर्गाधारोच्चयः। परस्तु वप्रो विनोदरदनिनां क्रीडागजानां अपाश्रयभूमिराश्रयस्थानम्। कथंभूतं वाहुवलविजृम्भितम्। वेधसापि अतुलितमकलितम्। यस्य आज्ञैव शिष्टिरेव प्राकारो दुर्गो वर्तते। परस्तु प्राकारः पुरस्य पांशुस्पर्शविनिवारणपरिच्छेदः पांशूनां रजसां स्पर्शस्य छुपनस्य विनिवारणाय परिच्छेदो निषेधोपकरणं वर्तते। कथंभूता आज्ञा। वनमृगैरपि अनुल्लङ्घनीयप्रभावा अनुल्लङ्घनीयो अलोपनीयः प्रभावो माहात्म्यं यस्याः सा तथा। यस्य च सुदत्तमहाराजस्य सव्येतरो दक्षिणः कर एव हस्तश्च परिघा अर्गला वर्तते। परे तु परिघा दौवारिकाणां विश्रामविष्टराणि खेदापनोदासानि। कथंभूतः करः। सकलसपत्नव्याप्तिकदर्थनसमर्थनावतारः सकलसपत्नानां शत्रूणां व्याप्तेः प्रसरस्य कदर्थने भञ्जने समर्थनः अवसरः अवतारो यस्य करस्य स तथोक्तः। यस्य च सुदत्तमहाराजस्य खड्गधारैव परिखा वर्तते। परा तु परिखा नगराङ्गनानां जलक्रीडाधिकरणानि स्थानानि वर्तते। कथंभूता खड्गधारा। दुर्वृत्तारातिकुलनिमज्जनजलाधारा दुर्वृत्तानां दुराचाराणामरातीनां कुलानामन्वयानां निमज्जने ब्रुडने जलाधारा दुर्वृत्तजलस्याधिष्ठानम्। यस्य च सुदत्तमहाराजस्य पराक्रम एव बलमेव परिवारः परिच्छेदो वर्तते। परस्तु परिवारः श्रीविलासाडम्बरो लक्ष्मीविभ्रमाटोपः। कथंभूतः पराक्रमः। समस्तक्षितिरक्षणक्षमः सर्वपृथ्वीपरिपालनसमर्थः। यस्य च सुदत्तमहाराजस्य त्रिभुवनमेव विहारहर्म्याणि क्रीडागृहाणि वर्तन्ते। पराणि तु विहारगृहाणि राज्यलक्ष्मीचिह्नानि राज्यलक्ष्म्याश्चिह्नानि वर्तन्ते। कथंभूतं त्रिभुवनम्। निजकीर्तिसुधाधवलितापघनं निजकीर्तिरेव सुधा श्वेतद्रव्यद्रवस्तया धवलितानि उज्ज्वलीकृतानि अपघनानि शरीराणि यस्य तत्तथोक्तम्। यस्य च सुदत्तमहाराजस्य वसुंधरैव प्रियकलत्राणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य चाहवाङ्गणरङ्गेष्वनवरतमुक्तशरासारवर्षविकर्तरितमुखमण्डलानामहितकबन्धानां नर्तनक्रियासु परमेकान्तरसिकता, न पुनरितरास्वर्थदूषणपरासु । असमसमरावसरेष्वाश्चर्यशौर्यपरितोषितानाममरवृन्दारकाणामानन्दातोद्यवादनेषु प्रकर्षतृष्णालुता, न पुनरितरेषु शरीरायासकरेषु । त्रिविष्टपकुटीकोटरविहारिणा नरनिलिम्पाम्बरचरलोकेन निजविजयनामाङ्कसुभगस्य गीतस्य गायने नितरां स्पृहयालुता, न पुनरितरस्य हृदयहरिणहरस्य । कदनमेदिनीषु दुर्वारवैरिशिरोविदारणेषु महती मृगयाव्यसन-

---

वर्तन्ते । पराणि तु प्रियकलत्राणि धर्मक्षेत्राणि दानादिकर्मस्थानानि । कथंभूतानि धर्मक्षेत्राणि । वंशाभिवृद्धिनिबन्धनानि वंशस्य अन्वयस्य या अभिवृद्धिः समन्तात् वर्धनं तस्य निबन्धनानि कारणानि । क्षेत्रे हि वंशानां त्वचिसारवृक्षाणां अभिवृद्धिर्भवति । कथंभूता वसुंधरा । चतुरुदधिमेखलावनमनोहरा चत्वार उदधयः तेषां मेखलावनानि तैर्मनोहरा ।

यस्य च सुदत्तमहाराजस्य अहितकबन्धानां अहितानां शत्रूणां कबन्धानि शिरोरहितकायास्तेषां नर्तनक्रियासु नृत्यचेष्टासु परं केवलं एकान्तरसिकता एकान्तेन अतिशयेन रसिकता रागहृदयता वर्तते । न पुनरितरासु कामिनीनां नर्तनक्रियासु रसिकता वर्तते । कथंभूतासु इतरासु । अर्थदूषणपरासु धनदोषतत्परासु । कथंभूतानामहितकबन्धानाम् । आहवाङ्गणरङ्गेषु संग्रामाङ्गणनृत्यभूमिषु अनवरतमुक्ताः प्रहिता ये शरा बाणास्तेषां आसारास्तेषु वर्षो वेगवद्वर्षणं तेन विकर्तरितानि विशेषेण खण्डितानि मुखमण्डलानि तेषां तथोक्तानाम् । यस्य च सुदत्तमहाराजस्य असमसमरावसरेषु विषमसंग्रामकालेषु अमरवृन्दारकाणां देवेषु प्रधानदेवानां संबन्धिषु आनन्दातोद्यवादनेषु वादित्रशब्दितेषु प्रकर्षतृष्णालुता प्रकर्षेणातिशयेन तृष्णालुता तृष्णत्वं वर्तते । न पुनरितरेषु ततवितघनसुषिरेष्वातोद्यवादनेषु तृष्णालुता वर्तते । कथंभूतेषु इतरेषु । शरीरायासकरेषु कायक्लेशकरेषु । कथंभूतानाममरवृन्दारकाणाम् । आश्चर्यशौर्यपरितोषितानां आश्चर्यं आश्चर्योत्पादकं यत् शौर्यं सौभट्यं तेन परितोषिता आनन्दं प्रापिता ये अमरवृन्दारकास्तेतथोक्तास्तेषाम् । यस्य च सुदत्तमहाराजस्य नरनिलिम्पाम्बरचरलोकेन नराश्च भूमिगोचराः, निलिम्पाश्च देवाः, अम्बरचराश्च विद्याधरास्तेषां लोकः समूहस्तेन निजविजयनामाङ्कसुभगस्य स्वकीयविजयजितनृपानामाङ्कणं तेन सुभगस्य प्रीतिजनस्य गीतस्य गायने गानकरणे नितरामतिशयेन स्पृहयालुता आकाङ्क्षिता वर्तते । न पुनरितरस्य गीतस्य शृङ्गारादेः स्पृहयालुता वर्तते । कथंभूतस्य इतरस्य । हृदयहरिणहरस्य मनोमृगमोहकस्य । कथंभूतेन नरनिलिम्पाम्बरचरलोकेन । त्रिविष्टपकुटीकोटरविहारिणा त्रिविष्टपं त्रैलोक्यम् । त्रयाणां विष्टपानां समाहारः त्रिविष्टपमिति वचनात् । तदेव कुटीकोटरं गृहमध्यं तत्र विहरति इत्येवंशीलः त्रिविष्टपकुटीकोटरविहारी तेन तथोक्तेन । यस्य च सुदत्तमहाराजस्य कदनमेदिनीषु दुर्वारवैरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परवशता, न पुनरितरेषु निरपराधेषु वनमृगेषु। नृपयज्ञाजिराष्टापदभूमिकायां चरगमगतिबन्धैररातिचतुरङ्गेषु प्रकामं द्यूतदुर्ललितता, न पुनरितरेषु नरपालकुलकलङ्कधरेषु। सकलरत्नाकरमणिमेखलायां वसुमतीयोषायां नितान्तं सक्तता, न पुनरितरेषु वपुर्धर्मधनविध्वंसनेषु विलासिनीजनेषु। अनन्यसामान्यजन्योपार्जितजयानिलविजृम्भितेन सुभटकुटजाटवीविलुण्ठनपटुनावलेपानलेन दुर्धर्षाणां विद्विषामशेषयशःपानेष्वतीवशौण्डता, न

शिरोविदारणेषु निवारशत्रुकुम्भस्थलच्छेदनेषु महती गुर्वी मृगयाव्यसनपरवशता आखेटकनिर्बन्धनपराधीनता वर्तते। न पुनरितरेषु निरपराधेषु वनमृगेषु मृगयाव्यसनपरवशता वर्तते। यस्य च सुदत्तमहाराजस्य नृपयज्ञाजिराष्टापदभूमिकायां नृपयज्ञस्याजिरं संग्रामाङ्गणं तदेव अष्टापदभूमिका तुरङ्गफलभूमिका तस्यां चरगमगतिबन्धैः चरगमो हैरिकप्रेषणम्, गतिबन्धाः शत्रुसैन्यप्रदेशस्य अप्रदामानि, चरगमगतिबन्धास्तैः कृत्वा अरातिचतुरङ्गेषु अरातीनां हस्त्यश्वरथपदातिषु प्रकाममतिशयेन द्यूतदुर्ललितता विजिगीषया अविचारिता वर्तते। न पुनरितरेषु चतुरङ्गेषु सारिपासक्रीडासु द्यूतदुर्ललितता दुरोदरस्य क्रीडाया अनिवारिता वर्तते। कैः। चरगमगतिबन्धैः चरः परगृहे सारिप्रवेशः। परसारिहननमित्यर्थः। गमः परगृहग्रहणम्। परगृहे यानमित्यर्थः। गतिबन्धो परसारावन्धनं चरगमगतिबन्धास्तैः। कथंभूतेषु इतरेषु। नरपालकुलकलङ्कधरेषु नरपालानां नृपतीनां कुले अन्वये कलङ्कधरेषु लाञ्छनकरेषु। यस्य च सुदत्तमहाराजस्य वसुमतीयोषायां पृथ्वीवनितायां नितान्तं सक्तता निर्बन्धता प्रवर्तते। न पुनरितरेषु विलासिनीजनेषु सक्तता वर्तते। कथंभूतायां वसुमतीयोषायाम्। सकलरत्नाकरमणिमेखलायां······························
···रत्नकटिमेखला यस्या रत्नवतीयोषायाः सा तथा तस्याम्। कथंभूतेष्वितरेषु। वपुर्धर्मधनविध्वंसनेषु वपुर्विध्वंसनं राजयक्ष्मादिरोगोत्पत्तिः, धर्मविध्वंसनं मैथुनक्रिया ग्रामसंख्य[illegible] जीवहिंसनम्, धनविध्वंसनं राज्यदूषितापत्तिवत् तेषु। यस्य च सुदत्तमहाराजस्य विद्वि[illegible] शत्रूणां अशेषयशःपानेषु सर्वपुण्यगुणकीर्तनास्वादनेषु अतीवशौण्डता मद्यपता वर्तते न पुनरितरेषु आसवेषु मद्यपानेषु शौण्डता वर्तते। कथंभूतेषु आसवेषु। ऐहिकामुत्रिकफलविलोपनोद्भवेषु इहलोकपरलोकसुखफलविलोपने गर्विष्ठेषु। कथंभूतानां विद्विषाम्। अवलेपानलेन दुर्धर्षाणां अवलेपो गर्वः स एवानलस्तेन दुर्धर्षाणां अनाकलनीयानाम्। कथंभूतेन अवलेपानलेन। अनन्यसामान्यजन्योपार्जितजयानिलविजृम्भितेन अनन्यसामान्यं अनुपमं जन्यं संग्रामस्तस्मिन् उपार्जितः स्वीकृतो योऽसौ जयः शत्रुपक्षपराभवः स एवानिलो वातस्तेन विजृम्भितं स तथा तेन। पुनः कथंभूतेन अवलेपानलेन। सुभटकुटजाटवीविलुण्ठनपटुना सुभटा एव कुटजाः शक्रतरवस्तेषामटवी वनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनरितरेष्वैहिकामुत्रिकफलविलोपनोद्धवेष्वासवेषु। अकाण्डजगदुपद्रवदानवेषु मानवेषु दण्डपारुष्ये बाढं मनोमनीषितानि, न पुनर्भ्रूलतोल्लासवशवर्तनेषु परिजनेषु। रणकेलिकुतूलानामरीणामायोधनवसुधायामभिमुखीभावकरणेषु वचःकर्कशव्यवहारे परमं नैपुण्यम्, न पुनरवलोकनमात्रविनयपरिष्वजासु प्रजासु। अखण्डब्रह्माण्डडिम्बडमरकरालैः प्रतिपक्षव्यालैः संचितस्य कीर्तिकुलधनस्यापहारे गाढं गृध्नुता, न पुनरात्माभ्युदयप्रणयिभिरुपार्जितस्य द्रविणोर्जितस्य। संपरायधरावारिषु शत्रुशल्लकीनगभङ्गप्रलोभनेन गजग्रहणेषु महान्ति कुतूहलानि, न पुनरितरेण चौरचारपाशादिनोपायव्यतिकरेण। आसंसारमवनैश्वर्यसुरभिषु यशश्चन्दनवन्दनेषु साभिलाषं मनः, न पुनरितरेषु क्षणमात्रपरिमलमनोहरानुबन्धेषु गन्धेषु। अपरजनासाधारणेषु गुणमणिविभूषणेषु महानाग्रहः, न पुनरितरेषु देहखेदावहेषूपलशकलनिवहेषु। नि-

---

तस्या विलुण्ठनं भस्मीकरणं तत्र पटुना दक्षेण। यस्य च सुदत्तमहाराजस्य अकाण्डजगदुपद्रवदानवेषु अकाण्डे जगत उपद्रवकरणे दानवेषु दैत्यप्रायेषु मानवेषु दण्डपारुष्ये कर्कशदण्डे बाढं मनोमनीषितानि चित्तमनोरथा वर्तन्ते। न पुनः परिजनेषु दण्डपारुष्ये मनोमनीषितानि वर्तन्ते। कथंभूतेषु परिजनेषु। भ्रूलतोल्लासवशवर्तनेषु भ्रूक्षेपमात्रेण स्वाधीनेषु। दण्डपारुष्यं न वर्तत इत्यर्थः। यस्य च सुदत्तमहाराजस्य रणकेलिकुतूलानां संग्रामक्रीडाबद्धोत्कण्ठानामरीणां आयोधनवसुधायां संग्रामभूमौ अभिमुखीभावकरणेषु संग्रामार्थमायतेषु वचःकर्कशव्यवहारे अतिकठिनभाषणे परमं नैपुण्यं वर्तते। न पुनः प्रजासु वाक्पारुष्यं वर्तते। कथंभूतासु प्रजासु। अवलोकनमात्रविनयपरिष्वजासु संमुखावलोकनमात्रेण विनयवतीषु। यस्य च सुदत्तमहाराजस्य अखण्डब्रह्माण्डडिम्बडमरकरालैः अखण्डं परिपूर्णं ब्रह्माण्डं पृथ्वीमण्डलं तस्य डिम्बो विप्लवो विनाशस्तस्मात् डमरो भयं तेन करालास्ते तथा तैः। एवंविधैः प्रतिपक्षव्यालैः शत्रुकालसर्पैः कर्तृभूतैः संचितस्य रक्षितस्य कीर्तिकुलधनस्य कीर्तिरेव कुलधनं तस्य अपहारे उद्दालने गाढं गृध्नुता लोभिष्ठता वर्तते। न पुनरात्माभ्युदयप्रणयिभिः आत्मनः स्वकीये अभ्युदये उन्नत्यां प्रणयिनस्तैरुपार्जितस्य द्रविणोर्जितस्य प्रशस्तधनस्यापहारे गृध्नुता न पुनर्वर्तते। यस्य च सुदत्तमहाराजस्य संपरायधरावारिषु संगरभूमिगजधरणभूमिगजधरणखातासु शत्रुशल्लकीनगभङ्गप्रलोभेन शत्रव एव शल्लकीनगा वृक्षास्तेषां भङ्गस्य प्रलोभनेन लोभदर्शनेन कृत्वा गजग्रहणेषु हस्तिनां स्वीकरणेषु महान्ति गुरूणि कुतूहलानि विनोदा वर्तन्ते, न पुनरितरेण चौरचारपाशादिना उपायव्यतिकरेण चौराश्च भिल्लादयः, चाराश्च हैरिकाः, पाशाश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खिलजगन्मङ्गलविधानामन्त्रेषु सच्चरित्रेष्वभीक्ष्णं रक्षणप्रयत्नः, न पुनः सर्वजनसाधारणाधिकरणेषु प्राणेषु।

यस्य च सप्तसमुद्रमेखलावनिविलोकनजातकौतुकस्याभूदभिमुखीभावः शत्रूणां प्राभृतेषु, न शस्त्राणाम्। विग्रहः प्रणतिषु, नापकारमनीषायाम्। द्विधाभावः सेवाकर्षकेषु, नोपचारकार्याणाम्। पतनं भृत्यभावेषु, न चामराणाम्। प्रसारणं सर्वस्वार्थणेषु, नातपत्राणाम्। प्रबन्धः कण्ठकुठारेषु, न मदविजृम्भितानाम्। प्रतापावलम्बनमसहायसाहसादेशविधिषु, नैश्वर्यसंभावनायाम्। आरोपणं शिरसि प्रणामाञ्जलिषु, न धनुषि मौर्वीणाम्।

यस्य च निजप्रतापसंपादितोत्सवभरायां विश्वंभरायामनन्यसामान्यमात्मैश्वर्यमवलोकमानस्य रथचमूचक्रचर्याचूर्णितनिःशेषशैलचूलेषु हयानीकोद्रेकखरखुरोद्धूतधूलीपटलपूरितसकलपातालमूलेषु करटिघटाकराटोपविलुण्ठितसमस्तमहाटवीगहनेषु सुभटसैन्यदोर्दण्डदलितनिखिलसालवलनेषु द्विषद्विषयेषु परं कात्यायनीप्रतिमास्वेव दुग्रत्वमवतस्थे।

एवं तस्य कलिङ्गाधिपतेः सप्तधापयोराशिरत्नालंकारपात्रं कुलकलत्रमिवावनिवलयं निहालयतः स्वभावादेव दयार्द्रहृदयस्य धर्मामृतरसास्वाददोहदविदूरितसंसारसुखोदयस्य 'शमलकलश इवायं कायो बहिष्कृतयत्ननिर्ने(र्णे)जनोऽपि न जहाति निजां प्रकृतिम्, अत्याधानकाष्ठमिव देहिनां भवदुःखपरशुपाताय विषयोपसेवनमाधुर्यमिति विदन्तोऽपि कथमनया बहिःप्रदर्शितापातसुन्दराडम्बरयावसानविरसया पांसुलयेव श्रिया प्रतार्यन्ते मुग्धबुद्धयः क्षोणीश्वराः' इति परामर्शश्लथसाम्राज्यसहाभिनिवेशस्य पूतिपुष्पमिव केवलं त्वग्मनोहरं वर्णिनीजनं वितर्कयतः 'को नु खलु विश्वंभरेश्वरेषु विशांपतिर्यो

पाशमण्डनानि ते आदिर्यस्य उपायव्यतिकरस्य तथा तेन ईदृग्विधेन उपायव्यतिकरेण उपायप्रघट्टकेन गजग्रहणेषु महान्ति कुतूहलानि वर्तन्ते'[1]।

---

१. अनेकदेशीयेषु बहुषु पुस्तकेषु दृष्टेष्वपीतः परं टीकापाठो नोपलभ्यते. न जाने टीकाकर्त्रास्थान एव पूर्तिर्विहिता, उत टीकासमाप्तितः पूर्वमेव नामशेषतामङ्गीचकारेति महान्संदेहः. इत उत्तरं टिप्पण्याद्यलंकृतो मूलग्रन्थो मुद्रणीयो भविष्यति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न विवेश कीनाशनगरम्, यं चेयं निसर्गचपला न तत्याज लक्ष्मीः, येन समं जगामेयं भूमिः, यस्मै न दुद्रोह प्रयत्नपरिपालितोऽपि स्त्रीलोकः, यस्मादवरुहे जन्मजरामरणवर्गेण, यस्य न बभूवुराधिराक्षस्यः, यस्मिन्न लेभिरे गोचरतां संसारारणिसमुत्थानोल्लोलाः प्रायेण दुःखानलज्वालाः' इत्यनादीनवोपदेशविशीर्यमाणमोहपाशस्य विततमप्यात्मनो विभवं परलोकावलोकनप्रतिसरमिवाकलयतः 'हंहो सरसापराधगोचरखचर, एकदा प्रणामोन्मुखलेखवैखानसीमुखमण्डनघनघुसृणरसलोहितकरे विकचनिचुलमञ्जरीजालशेखरितशैलशिरोदृषदि सिन्दूरपरागपिञ्जरितसुरवारणकुम्भस्थले हरिरोहिणारुणितगगनगमनाङ्गनाकपोलशालिनि प्रवालाङ्कुरोत्करनिकीर्णदिक्चक्रवाले रविकान्तशिलासंचारितदहनवर्तिनि तमिस्त्ररजस्वलतया पुरस्तादपसरन्तीषु नक्षत्रपङ्क्तिषु रक्ताम्बरशोभामिव बिभ्राणे अनवरतखचरसहचरीकरविकीर्यमाणरक्तचन्दनद्रवद्विगुणशोणिम्नि सवितृबिम्बे, नृपजनोदाहरणकथास्विव विशालतां गतासु दिक्षु, निर्मुक्तनीलनिचोलेष्विव प्रकटाकृतिषु प्रासादशिखरेषु, क्षितीश्वरेष्विव राजहंसोपसेव्यमानकोशेषु पौष्करेयकाननेषु, प्रफुल्लकमलकाननमधुपानमत्त इव मन्दमन्दसंचारिणि प्रवाति वैभातिके मरुति, प्रत्यावृत्तेषु च दत्तदक्षिणेषु द्विजेष्विव राजकुलानां सेवावसरेषु कृतास्थानस्य प्रविश्य तलवरः परिमुषितनगरनापितप्राणद्रविणसर्वस्वमेकमैकागारिकमानीया·······दर्शय वस········। राजा तमवलोक्य धर्मस्थीयानां मुख्यानि विलोकिष्ठ धर्मस्थीया देवानेन मलिनात्मना मलिम्लुचेन द्वितयसाहसमनुष्ठितमेकां तावद्रात्रिर्मुखितान्यच्च सुषुप्तमनुष्यहिंसा कृता। तदस्य पाटच्चरस्य चक्रीवदारोहणोच्छिष्टशालाजिरराजबन्धविडम्बनपूर्वकश्चित्रो बन्धः कर्तव्यो यथायं नक्षत्रवाणिजो दशभिर्द्वादशभिर्वा दिवसैरसून्विसृजति' ।

राजा स्वगतम् 'अहो कष्टं खलु प्राणिनां क्षत्रगोत्रेष्वयमाविर्भावः, यतो यदि न्यायनिष्ठुरतया क्षोणीश्वराः क्षितिरक्षासु दक्षन्ते तदावश्यं पापोपनिपातः परलोकक्षतिसंपातश्च । तदुक्तम्—'नरकान्तं राज्यं बन्धनान्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियोगः' इति। अथ न दक्षन्ते वर्णाश्रमव्यवस्थाविलोपः कापुरुषतोल्लापश्च। तथा हि।

क्षीयेतायं क्षणाल्लोकः क्षतरक्षः क्षितीश्वरैः।
लक्ष्मीक्षयः क्षये तस्य किं राजत्वं च जायते॥

तदसाध्यव्याधिपरिग्रहीतदेहवदस्य राज्यस्य परित्याग एव स्वास्थ्यं नान्यथा' इत्यवधार्य।

एषोऽहं मम कर्मशर्म हरते तद्बन्धनान्यास्त वै
ते क्रोधादिवशाः प्रमादजनिताः क्रोधादयस्त्वव्रतात्।
मिथ्यात्वोपचितस्ततोऽस्मि सततं सम्यक्त्ववान्संयमी
दक्षः क्षीणकषाययोगतपसां कर्तेति मुक्तो यतिः॥

इति च सुभाषितमास्वनिते निधाय, तेषु कतिपयेषु गणरात्रेष्वनुजस्य राज्यश्रियं समर्प्य, प्रतिपन्नजिनरूपोचिताचरणश्चतुर्थमाश्रममशिश्रियत्।

अस्तीदानीं तस्यामेवैकानस्याममरमिथुनमान्यमानमणिमयूरकूटं सहस्रकूटं नाम निजमहिमावधीरितामरावतीर्वसतिः या नयनीतिरिव नवभूमिका, योगास्थितिरिव विहितवृषभेश्वरावतारा, सांख्यजनतेव कपिलतालयशालिनी, अमरगुरुभारतीव निवारितपरलोकदर्शना, मीमांसेव निरूप्यमाणनियोगभावनादिप्रपञ्चा, पिटकत्रयपद्धतिरिव योगाचारगोचरा, महापुरुषमैत्रीव स्थिराधिष्ठाना, सत्सचिवप्रयुक्तिरिव सुघटितसंधिः, अभिनवविलासिनीव सुकुतूहलविलोकना, कुचभारविद्येव बहुविस्मयावहा, विजयसेनेव बाहुबलविदिता, रूपगुणनिकेव सुपार्श्वागता, कुबेरपुरीव यक्षमिथुनसनाथा, नन्दनवनलक्ष्मीरिवाशोकरोहिणीपेशला, शंभुसमाधिविध्वंसवेलेव प्रकटरा·····रतिजीवितेशा, सुकविकृतिरिव चित्रबहुला, मुनिमतगतिरिव चरणकरणानन्दिनी, भरतपदवीव विधिलयनाट्याडम्बरा, पुरंदरपुरीव संनिहितैरावता, हरपरिषदिवासीनसौरभेया, शिशिरगिरिदरीव निलीनोपकण्ठकण्ठीरवा, मन्थानाचलतटीव रमोपशोभिता, स्वक्पण्यसंस्थेव प्रलम्बितकुसुमशरा, सुरशैलाटनिरिव सविधवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धुन्नक्षमण्डला, पाण्ड्यमुद्रेव शकुलियुगलाङ्किता, सच्छकुनसंपत्तिरिव पूर्णकुम्भाभिरामा, कैटभारातितनुरिव कमलाकरसेविता, समवसरणसभेव प्रसाधितसिंहासना, अजडाशयानुगतापि जडनिधिमती, उन्मीलिताहिलोकापि सकलजनोपभोग्या, अहोमशालापि प्रत्यक्षहुताशना, निस्पृहोपभोग्यापि समणिनिचया, विहितमर्त्यावतारापि प्रदर्शितदेवालया ।

यत्र चाभिषेकसलिलेषु कलुषता, मलयजेषु जडघर्षणम्, अक्षतेषु मुशलाभिघातः, स्रक्पुष्पे गुणविमुखता, चरुषु रससंकरः, प्रदीपेषु मलिनोद्गारः, धूपधूमेष्ववसानवैरस्यम्, फलस्तकेषु पलाशोपरोधः, कुसुमाञ्जलिषु विनिपातः, स्तुतिषु परलोकप्रार्थनम्, जपेषु गूढमन्त्रप्रयोगः, प्रसंख्यानेषु देहसन्नता, अगुरुदहनशालाजिरेषु मलीमसमुखत्वम्, मुनिषु धर्मगुणविजृम्भणम्, प्रसूनोपहारेषु शिलीमुखसंपातः, पटहेषु कराहतिः, नमसितेषु पदबन्धः, रङ्गवलिषु परभागकल्पनम्, यतिचरित्रेषु विग्रहदण्डश्रुतिः, सोपानेषु विषमता, देहिनीषु लङ्घनापराधः, सृपाटीषु करग्रहणम्, अररेषु द्विधाभावः, शास्त्रेषु परदूषणश्रवणम्, उपन्यासयोग्यासु विगृह्यवादः, पर्वक्रियासु वर्णसंकीर्णता, विनेयविनयेषु भ्रुकुटिकरणम्, वातायनेषु बहुमार्गता, केतुकाण्डेषु स्वभावस्तब्धत्वम्, वैजयन्तीषु परप्रणेयता, मणिवितानेषु गुणनिगूहनम्, रजनिमुखेषु गलग्रहोपदेशः, शकुनावासेषु विलयविलसितम्, लिपिकरेषु चाञ्जनोपार्जनम् ।

यस्याश्च प्रतिदिवसं दिविजसभाजनैः पौरजनैरुपहितानि भगवतः स्वकीयपादमुद्रितकुगत्रयपतेर्जिनपतेर्मज्जनमङ्गलानि विदं(?)मानायाः सकृत्प्रकान्ताभिषेकमहोत्सवलज्जित इव जातखर्वतरभावः पुरो निवसति मन्दरः । अपि च ।

यामेवं प्रादुष्यदनल्पसंकल्पनो विनेयजनः ।
........विदूरभावादुत्प्रेक्षापक्षतां नयति ॥

श्रीरेषा स्वर्गसिन्धोः किमु पवनबलोल्लोलकल्लोलवारः
स्वर्णच्छायाप्रतानस्तदनु विसरति व्योम्नि कोऽयं प्रकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुग्धद्योतावदाता दिशि दिशि च ततः कान्तयो भान्ति मन्ये
स्थानेऽस्मिञ्जैनसौधावलिरुपरि लसत्केतुसौवर्णकुम्भाः ॥

किं च।

मेरुस्पर्धविवृद्ध्यवन्ध्यशिखरोल्लेखस्खलज्ज्योतिषो
यस्या व्यस्यदुपान्तभित्तिविलसद्रत्नासरालत्विषः।
तुङ्गोत्सङ्गतमङ्गसङ्गविवशव्यापारसारादराः
स्वर्गावासनिवास⋯⋯सरसाः संजज्ञिरे नामराः ॥

या च

किं पुण्यपुञ्जनिकरस्त्रिजगज्जनानां
लोकेष्वमात्किमु यशः प्रथितं जिनानाम्।
इत्थं वितर्कवसति⋯⋯विभाति
विश्वंभराम्बरदिशां प्रविभक्तभावा ॥

ततो महामुनिजनाराधनविनीतवनदेवताविकीर्णप्रसूनोपहारपरिसरत्परिमलोद्याने यदा तेन त्रिजगतीः स्तूयमानवृत्तेन भगवता **सुदत्तेन** सह तव वादाविरोधस्य धर्मावबोधो भविष्यति, तदा भवतो भविष्यन्ति प्रेषणानवद्याः पुनरपीमा विद्याः, भविष्यन्ति च भवान्नभश्चरप्रभुप्रभावः' इत्युक्त्वा तदनुचानचरणार्चनोपचितागण्यपुण्यतया समस्तमहाभागभुवनचक्रवर्ती स **विद्याधरचक्रवर्ती** जगामाभिलषितं विषयम्। अम्बरचरोऽप्याजगामोज्जयिनीम्।

इतश्च तस्यामेवोरगपुरीस्पर्धिन्यामुज्जयिन्यामदूरदेशवर्तिनि भाविभवदुरितकन्दैरिवास्थिवृन्दैरुत्पाण्डुरितवाहिरिके, मूर्तिमद्भिः कर्मभिरिव चर्मभिः कर्मीरगोपानसीपर्यन्ते, पुरोजन्मदुःखानलज्वालाभिरिव वल्लूरमालाभिः पाटलोटजच्छदिषि, तमस्काण्डखण्डापसदैरिव कङ्कच्छदैर्धूसराङ्गणे, कृष्णलेश्यापटलैरिव करटकुलैरुत्कलुषितगेहाग्रभागभुवि, निरयनिवासिभिरिव कुणपकलेवरेषु युद्धोद्धवान्ध(?)दूद्भिः मृगव्यद्भि(?)रुद्वेजनीयनिवेशे, जनंगमावासोद्देशे, तस्मादमृतमतिमहादेवीकृतापराया प्रयोगाद्यशोमति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाराजवाजिविनाशोद्योगाच्च व्यतीत्य तं वस्तकातराक्षभावमहं सा च मदीयाम्बिका चरणायुधान्वये सहैव जन्म प्रत्यपद्यावहि । तदनन्तरमेव च वृषदंशदंष्ट्राक्रकचगोचरतयावयोर्लोकान्तरगिरि मातरि पुनः काकतालीयन्यायेन कृतकोणिकोत्कलिकामालवालिकातीव जरत्कुटीरनिकटे कुरटकुलायकोटरे चिरादवहिता सती कर्णाभ्यर्णवर्णनिर्णयेनावां निगृह्य परिगृह्य च तनूद्वहनिर्विशेषं पोषयामास ।

व्यतीतस्वभावे च कदाचिदसावासन्नविद्याधरीजनकेलिनर्मा **चण्डकर्मा** समाचरितस्वैरविहारस्तत्र स्वपचपाटकोपकण्ठभूमिकायामावामेकस्यां तावसायिसुतस्य हस्तगतौ समालोक्यास्मद्रूपसंपदालोकविस्मितमनस्कारस्तुष्टिप्रदानोत्पादितदिवाकीर्तिनन्दनानन्दः समादायानीय च **यशोमति**महाराजायादीदृशत् । राजाप्यावामवेक्ष्य जाताश्चर्यः 'अहो, अपर एव कोऽप्यनयोः शकुनयोः सकलताम्रचूडकुलातिशायी शरीरसंनिवेशः' इति विमृश्य '**चण्डकर्मन्**, तिष्ठतु तावदेतत्तवैव हस्ते पत्त्ररथमिथुनम् । अहमिदानीमेवेमं पुष्परथं सनाथीकृत्यैतत्कर्णीरथारूढविलासिनीजनपरिवृतः सहान्तःपुरेण पीठमर्दविटविदूषकनायकसामाजिकलोकानुगतः सहस्रकूटचैत्यालयोपवने मकरध्वजपूजार्थं व्रजिष्यामि । तत्र पुनर्युद्धविनोदायेदं प्रदर्शयितव्यम्' । **चण्डकर्मा** 'यथाज्ञापयति देवः' इत्यभिधाय निश्चक्राम । आजगाम च गैरिकरसारुणितपटकुटीप्रभाजालविराजमानकुजराजीकमनेकोपकार्यापर्यायपरिगतपर्यन्तावनीकं तदुद्यानम् । तत्र च शकुनसर्वज्ञेनासुरिणा भागवतेन नक्षत्रपाठकेन **धूमध्वजेन** द्विजातिना खन्यवादविदा **हरप्रबोधेन** जटिना खरपटौषधबुधेन **सुगतकीर्तिना** शाक्येन सह मुधा संबन्धसार्धुकस्कन्धावलम्बितपतगपञ्जरः स **चण्डकर्मा**

मदनशरचित्रकान्तैर्वनदेवीपाणिपेशलप्रान्तैः ।
अधरदलरागपटलश्लाघ्यैरिव काननश्रीणाम् ॥

तरुणीचरणास्फालनसंक्रान्तालक्तकैर्द्रवोद्रेकम् ।
विकिरद्भिरिव पलाशैरशोकमालोकयत कान्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्मूलनिवासवन्तं सुदत्तभगवन्तं च। स्वगतम्—'अहो कथमनेन भगवता परलोकलाञ्छनकरावकाशः कथनीयतां नीतः शरीरसंभवाभिनिवेशः क्लेशः। यतः।

कार्श्यं क्षुत्प्रभवं कदन्नमशनं शीतोष्णयोः पात्रता
पारुष्यं च शिरोरुहेषु शयनं मह्यास्तले केवले।
एतान्येव गृहे वहन्त्यवनतिं यान्त्युन्नतिं कानने
दोषा एव गुणीभवन्ति मुनिभिर्योग्ये पदे योजिताः॥

तदलमत्र विकल्पपरम्परया। संभाषामहे तावदेनं संयमिनम्। न खलु रत्नाकरकल्लोला इव प्रायेण भवन्ति मुनयः शून्यशीलाः।' ततः समुपसद्य निषद्य च तत्र च विवादाध्येषणोत्कर्षकलुषधिषणः किलैवमाह सूरिः—

'अहो विवेकशून्यानामात्मानर्थाश्रयाः क्रियाः।
न ह्यङ्गोद्वेगतो मुक्तिर्नृणां मरुकुरङ्गवत्॥

यस्मादेष खलु

अकर्ता निर्गुणः शुद्धो नित्यः सर्वगतक्रियः।
अमूर्तश्चेतनो भोक्ता पुमान्कपिलशासने॥

स यदा दुःखत्रयोपतप्तचेतास्तद्विघातकहेतुजिज्ञासोत्सेकितविवेकश्रोताः स्फाटिकाश्मानमिवानन्दात्मानमप्यात्मानं सुखदुःखमोहावपरिवर्तैर्महदहंकारादिविवर्तैः कलुषयन्त्याः सत्त्वरजस्तमःसाम्यावस्थापरनामवत्याः सनातनव्यापिगुणाधिकृतेः प्रकृतेः स्वरूपमवगच्छति, तदायोमयगोलकानलतुल्यवर्गस्य बोधवद्बहुधानकसंसर्गस्य सति विसर्गे सकलज्ञानज्ञेयसंबन्धवैकल्यं कैवल्यमवलम्बते तदा द्रष्टुः स्वरूपेऽवस्थानमिति वचनात्। ततश्च

अनुभवत पिबत खादत विलसत मानयत कामितं लोकाः।
आत्मव्यक्तिविवेकान्मुक्तिर्ननु किं वृथा तपत॥'

धूमध्वजः—

'घृष्यमाणो यथाङ्गारः शुक्लतां नैति जातुचित्।
विशुद्ध्यति कुतश्चित्तं निसर्गमलिनं तथा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चापरमिषस्ताविः समर्थोऽस्ति यदर्थोऽयं तपःप्रायशः सफलायासः स्यात्। यतः ।

द्वादशवर्षा योषा षोडशवर्षोचितस्थितिः पुरुषः ।
प्रीतिः परा परस्परमनयोः स्वर्गः स्मृतः सद्भिः ॥

ततश्च—

विहाय देशस्य सुखानि येषां दुःखेन सौख्येषु मनीषितानि ।
ते कोरकैः कर्षणकारशीलाः शालीन्पुनर्नूनमुपाहरन्ति ॥'

हरप्रबोधः—

'अन्यथा लोकपाण्डित्यं वेदपाण्डित्यमन्यथा ।
अन्यथा तत्पदं शान्तं लोकः क्लिश्नाति चान्यथा ॥

भगवतो हि गर्भस्य सकलजगदनुग्रहसर्गौ दक्षिणो वामश्च । तत्र लोकसंचारणार्थं दक्षिणो मार्गः । तदाह—

प्रपञ्चरहितं शास्त्रं प्रपञ्चरहितो गुरुः ।
प्रपञ्चरहितं ज्ञानं प्रपञ्चरहितः शिवः ॥
शिवं शक्तिविनाशेन ये वाञ्छन्ति नराधमाः ।
ते भूमिरहिताद्बीजात्सन्तु नूनं फलोत्तमाः ॥

भुक्तिमुक्तिप्रदस्तु वाममार्गः परमार्थतः । तदाह—

अग्निवत्सर्वभक्षोऽपि भवभक्तिपरायणः ।
भुक्तिं जीवन्नवाप्नोति मुक्तिं तु लभते मृतः ॥

इममेव च मार्गमाश्रित्याभाषि **भासेन** महाकविना—

पेया सुरा प्रियतमामुखमीक्षणीयं
ग्राह्यः स्वभावललितोऽविकृतश्च वेषः ।
येनेदमीदृशमदृश्यत मोक्षवर्त्म
दीर्घायुरस्तु भगवान्स पिनाकपाणिः ॥'

सुगतकीर्तिः—'आत्मग्रह एव प्राणिनां तावन्महामोहावन्ध्यान्ध्यम् । यतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संपश्यत्यात्मानं तस्यात्मनि शाश्वतः स्नेहः ।
स्नेहात्सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते ॥
आत्मनि सति परसंज्ञा स्वपरविभागात्परिग्रहद्वेषौ ।
अनयोः संप्रतिबद्धाः सर्वे दोषाः प्रजायन्ते ॥

विगलिताग्रहे चात्मग्रहे निराश्रवचितोत्पत्तिलक्षणो निरोधापरनामपक्षो मोक्षः स्वलक्षणेऽक्षिणामक्षूणः । तदाह—

यथा स्नेहक्षयाद्दीपः प्रशाम्यति निरन्वयः ।
तथा क्लेशक्षयाज्जन्तुः प्रशाम्यति निरन्वयः ॥

एवं च सति केशोल्लुञ्चनतप्तशिलारोहणकेशदर्शनाशब्रह्मचर्यादयः केवलमात्मोपघातायैव । तदुक्तम्—

वेदप्रामाण्यं कस्यचित्कर्तृवादः स्नाने धर्मेच्छा जातिवादावलेपः ।
संतापारम्भः क्लेशनाशाय चेति ध्वस्तप्रज्ञानां पञ्चलिङ्गानि जाड्ये ॥

इदमेव च तत्त्वमुपलभ्यालापि **नीलपटेन**—

पयोधरभरालसाः स्मरविघूर्णितार्धेक्षणाः
क्वचित्सलयपञ्चमोच्चरितगीतडङ्कारिणः ।
विहाय रमणीरमूरपरमोक्षसौख्यार्थिना-
महो जडिमडिण्डिमो विफलभण्डिपाखण्डिनाम् ॥

'स्त्रीमुद्रां झषकेतनस्य महतीं सर्वार्थसंपत्करीं
ये मोहादवधीरयन्ति कुधियो मिथ्याफलान्वेषिणः ।
ते तेनैव निहत्य निर्दयतरं मुण्डीकृता लुञ्चिताः
केचित्पञ्चशिखीकृताश्च जटिनः कापालिकाश्चापरे ॥'

चण्डकर्मा—साध्वाह खलु **सुगतकीर्तिः** । यतः ।

पश्यन्ति ये जन्म मृतस्य जन्तोः पश्यन्ति ये धर्ममदृष्टसाध्यम् ।
पश्यन्ति येऽन्यं पुरुषं शरीरात्पश्यन्ति ते नीलकपीतकानि ॥

ततश्च प्राणापानसमानोदानव्यानव्यतिकीर्णेभ्यः कायाकारपरिणतिसंकीर्णेभ्यो वनपवनावनिपवनसख्येभ्यः पिष्टोदकगुडधातकीप्रमुखेभ्य इव मदश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तिः पर्णचूर्णक्रमुकेभ्य इव रागसंपत्तिस्तदात्मकार्यगुणस्वभावतया चैतन्यमुपजायते । तच्च गर्भादिमरणपर्यन्तपर्यायमतीतं सत्पादपात्पतितं पत्रमिव न पुनः प्ररोहति । तथा च परलोकभावे जलबुद्बुदस्वभावेषु जीवेषु मदशक्तिप्रतिज्ञाने किमर्थोऽयं लोकस्यात्मसपत्नः प्रयत्नः । तदपहायामीषां जीवन्मृतमनीषाणां मनीषितमेतत्कुलाश्रयैराश्रेयम् ।

यावज्जीवेत्सुखं जीवेन्नास्ति मृत्योरगोचरः ।
भस्मीभूतस्य शान्तस्य पुनरागमनं कुतः ॥

भगवन्,

रिक्तस्य जन्तोर्जातस्य गुणदोषावपश्यतः ।
विलब्धा बत केनामी सिद्धान्तविषयग्रहाः ॥

किं च ।

असमाधिकरो वादस्तत्त्वाख्यानं विरुद्धबोधानाम् ।
भवति हि कोपाय परं शिक्षा व्यालेष्विव गजेषु ॥

अपि च ।

व्याक्रोशी व्यापहासी वा विपर्यस्तैः सदोदिते ।
स्वस्य मौर्ख्यमुपेक्षायामहो कष्टाविशिष्टता ॥
स्तौतु निन्दतु वा लोको विचित्ररुचिनायकः ।
तथापि सज्जनैर्भाव्यं यथा तत्त्वोपदेशनैः ॥

इत्यनुध्याय

दशनोस्रैर्दिशः कुर्वन्सपुण्याङ्कुरिता इव ।
सूरिः सूनृतवागेवं बभाषे स्वरितस्वरः ॥
बन्धमोक्षौ सुखं दुःखं प्रवर्तननिवर्तने ।
यद्येष प्रकृतेर्धर्मः किं स्यात्पुंसः प्रकल्पनम् ॥
अकर्तापि पुमान्भोक्ता क्रियाशून्योऽप्युदासिता ।
नित्योऽपि जातसंसर्गः सवर्गोऽपि वियोगभाक् ॥
शुद्धोऽपि देहसंबद्धो निर्गुणोऽपि शमुच्यते ।
इत्यन्योन्यविरुद्धोक्तं न युक्तं कापिलं वचः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किं च ।

विष्वग्व्यापी भवेदात्मा यदि व्योमवदञ्जसा ।
सुखदुःखादिसद्भावः प्रीतयेताङ्गवद्बहिः ॥
नित्ये मूर्ते सदा पुंसि कर्मभिः स्वफलेरिभिः ।
कुतो घटेत संबन्धो यथाकाशस्य रज्जुभिः ॥

घृष्यमाणाङ्गारवदन्तरङ्गस्य विशुद्ध्यभावे कथमिदमुदहारि **कुमारिलेन**—

विशुद्धज्ञानदेहाय त्रिवेदी दिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥

कथं चेदं वचनमजर्यम्—

समस्तेषु वस्तुष्वनुस्यूतमेकं समस्तानि वस्तूनि यन्न स्पृशन्ति ।
वियद्वत्सदा शुद्धिमद्यत्स्वरूपं ससिद्धौपलब्धिः स नित्योऽहमाप्ता ॥

कथं चेयं श्रुतिः समगंस्त—

न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति ।
अशरीरं वा वसन्तं प्रिया प्रिये न स्पृशते ॥

इति । ततश्च ।

मलकलुषतायातं रत्नं विशुद्ध्यति यत्नतो
भवति कनकं तत्पाषाणो यथा च कृतक्रियः ।
कुशलमतिभिः कैश्चिद्धन्यैस्तथाप्तनयाश्रितै-
रयमपि गलत्क्लेशाभोगः क्रियेत परः पुमान् ॥
रागाद्युपहतः शंभुरशरीरः सदाशिवः ।
अप्रामाण्यादनुत्पत्तेः कथं तत्रागमोत्सवः ॥

तदुक्तम्—

वक्ता नैव सदाशिवो विकरणस्तस्मात्परो रागवा-
न्द्वैविध्यादपरं तृतीयमिति चेत्तत्कस्य हेतोरभूत् ।
शक्त्या चेत्परकीयया कथमसौ तद्दानसंबन्धतः
संबन्धोऽपि न जाघटीति भवतां शास्त्रं निरालम्बनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDR

किंचिद्दुष्कृतमकार्षीत् । कथं वा तदन्वभूत् ।' 'भगवन्, समाकर्णय । अस्यामेवोज्जयिन्यामस्यैव **यशोमति** महाराजस्य वंशे

आसीच्चन्द्रमतिर्यशोधरनृपस्तस्यास्तनूजोऽभव-
तौ चण्ड्याः कृतपिष्टकुक्कुटबलीक्ष्वेडप्रयोगान्मृतौ ।
श्वा केकी पवनाशनश्च पृषतो ग्राहस्तिमिश्छागिका
भर्तास्यास्तनयश्च गर्वरपतिर्जातौ पुनः कुक्कुटौ ॥

ततः प्रशान्ताशयाशेषमलजालास्ते पञ्चापि लोकपाला इव तं **सुदत्त**भगवन्तं प्रणम्य जगृहुः पाण्डुतनया इव सद्दर्शनपूर्वकाणि त्रिदशैरपि दुरापाणि श्रावकव्रतानि। प्रयुक्तलोकायतमतधर्मा अचिरसमाजं नभश्चरपदावाप्तिशर्मा **चण्डकर्मा**पि धर्मावबोधात्परिपूर्णशापावधिः पूर्वविद्यासंदोहासादसंपादिताम्बरविहारः समाचरितसहचराश्चर्यव्यवहारः प्रविचचार खेचरनिवेशं देशम् ।

तदनु चावामप्यहो **मारदत्त**महाराज, **सुदत्त**भगवद्भाषितपुरावृत्तवृत्तान्तश्रवणेनातीवजातनिर्वेदौ तद्व्रतपरिग्रहाच्चेदानीं खल्वावयोरग्निस्पृष्टबीजवन्नाविर्भावः कर्मणामित्यानन्दनादोदीर्णनिगरणावदूष्यवपुषावपि दूष्याभ्यन्तरस्थितः स **यशोमति**महाराजः शय्योत्सङ्गमागतायाः कुसुमावलीमहादेव्याः शब्दवेधित्वकौशलं दर्शयितुं शयनासन्नशरकुरलीमध्यादकर्मीणकायमेकं सायकमादाय विव्याध। ततश्च विधातुः कल्मषशेषमनुविभावयिषोर्वसात्परित्यक्तकुक्कुटपर्याययोरशुचौ लालाहारे कृमिजालसमाकुले बभूव । तद्देव्यारपर इव निरयनिलये गर्भे पुनरावयोर्जन्म । आवाभ्यामवाप्ताधाना च सा किल **यशोमति**महीपालप्रणयपादपप्रथमकन्दली कुसुमावली महादेवी रहसि

नेत्रे विलासविरले शरपाकपाण्डु
गण्डद्वयं हरितरत्नरुची कुचाग्रे ।
मध्यो वलित्रयखिलस्तनुजावलीय-
मुत्तम्भितेव विकटा वनिता सुगर्भे ॥

जातस्वागताय तस्मै महीशाय निजदोहदान्येवमाशशंस—'देव, विधीयतां विष्वग्घुष्टेन सर्वेषामपि सत्त्वानामभयप्रदानम्। देव, निवार्यतां कल्पपालापणेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मैरेयव्यवहारः। देव, प्रतिषिध्यतां महानसेषु क्रव्यागमः। देव, प्रस्तूयन्तामेवमपरा अपि तास्ताः क्रिया यत्र नोपयोगो मकारादिपत्रयस्य। देव, श्रवणकुतूहलानि महान्ति मे जीवदयागमेषु। देव, खरमवलोकनाभिलाषः संयतोपास्तिषु। देव, परं मनोरथाः संयमपरायणीनां तापसीनां चरणाराधनेषु।' राजा 'नूनमेवंविधप्रसादाद्देवीदोहदादस्मिन्गर्भेऽवतीर्णस्य कस्यचित्सुकृतिनो भविष्यति महती खल्वार्हती वासना। भवतु नामैवम्। तथाप्येतदभिलाषः पूरयितव्य एव। अन्यथा

गर्भिणीनां मनः खेदात्स्यादपत्येष्वकल्पता।
लतानां फलसंपत्तिः कुतो मूलव्यथागमे॥'

इति वितर्क्य, आहूय च यथायथाप्रसिद्धिप्रवृत्ताख्यान्नरान्मुखात्तथैवान्वतिष्ठत्। सापि देवी व्यतिक्रम्य किल चिक्कसाकीर्णोरुपयोधरव्यवस्थामवस्थामवाप्य चावीसमयमसूतावाममृतमथनवेलेव लक्ष्मीचन्द्रमसौ पुनरावयोः कृते **यशस्तिलक** इति **मदनमति**रिति च वंशोचिते मातृदोहदाश्रिते **चाभयरुचि**रित्य**भयमति**रिति च नामनि। व्यतिक्रान्तवति च शैशवे, जातवति च सकलकलाकमलिनीकुलावतारसरसि कुमारवयसि, तव सपत्नाननेष्विव समधिकमधिरूढवति कुन्तलेषु कृष्णत्वे, तव गुणेष्विव विशीलतां प्रतिपन्नेषु लोचनेषु, तव यशसीव परिपूर्णवति वदनमण्डले, तव वैरिवर्ग इव क्षामतामाश्रितवति मध्यभागे, तव पराक्रमेष्विव प्रकटतां गतेषु समस्तेष्वपि निम्नोन्नतदेशेषु प्रदेशेषु, अस्य खल्व**भयरुचि**कुमारस्य राजा करिष्यति भविष्यन्त्या पक्षतौ युवराजकण्ठिकाबन्धमिमाश्च**अभयमतिं** भर्तृदारिकां दास्यत्यहिच्छत्राधिपतये क्षत्रियायेत्यमात्यपरिवारवनितास्वाविर्भवन्तीषु जनश्रुतिषु, स **यशोमति**महीपालः स्वयं करार्पितदंशैरशृङ्खलामालः सह श्वगणिभिर्जोषधिषणपुरुषालापोल्लास्यमतिरेकदा पापर्द्धिबुद्ध्या विधीतविषयमनुसरँस्तत्सहस्रकूटोद्यानप्रसूनपरिमलाघ्राणवलितलोचनालियुगलस्तं **सुदत्त**भगवन्तमवलुलोके। नर्मसचिवकुमारोऽ**जमारः** 'क्षितिपते, दुष्करमस्य मुनेरमस्य मुनेरवलोकनादद्य भविष्यति पापर्द्धिः सफलर्द्धिः। राजा मनागाविग्नमनाश्चुक्षोभ। अत्रावसरे **सुदत्त**भगवद्वन्दनार्थमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDr

गतेन प्रणयप्रश्रयाश्रयेण **कल्याणमित्र**नाम्ना **वैदेहकेश्वरेण** स विशांपतिरेवमूचे—'राजन्, किमकाण्डे मन्युमलिनमाननम् ।' **अजमारः**—'राजश्रेष्ठिन्, एतस्यामङ्गलीभूतस्य नग्नस्यावलोकनात् ।' **कल्याणमित्रः**—'राजन्, मैवमभिनिवेशं कृथाः । एष खलु भगवान्पुरा **कलिङ्गा**धिपतिस्तव पितुरन्वयसंबन्धादेव नितरां माननीयः सकलदिक्चक्रविक्रमाक्रान्तविनतसामन्तमुखमुकुरुन्दीकृतचरणनखमण्डलोऽभिसारिकामिव स्वयमागतां श्रियं चपलाङ्गनामिवावमत्य निखिललोकमहनीये तपसि वर्तमानः परमेष्ठी कथं नामावैशिकलोकलोचनानन्देन त्वया मनसाप्यवमन्तव्यः । किं च ।

सुखानुभवने नग्नो नग्नो जन्मसमागमे ।
बाल्ये नग्नः शिवो नग्नो नग्नश्छिन्नशिखो यतिः ॥
नग्नत्वं सहजं लोके विकारो वस्त्रवेष्टनम् ।
नग्ना चेयं कथं वन्द्या सौरभेयी दिने दिने ॥
पापिष्टं पापहेतुर्वा यश्चानिष्टविचेष्टिनम् ।
अमङ्गलकरं वस्तु प्रार्थितार्थविघाति च ॥
ज्ञानध्यानतपःपूताः सर्वसत्त्वहिते रताः ।
किमन्यन्मङ्गलं लोके मुनयो यद्यमङ्गलम् ॥
भावः क्वापि भवेद्राज्ञां सर्वातिथ्यक्रमः समः ।
किं व्योमापाश्रयः पूषा पक्षपातात्प्रकाशते ॥
लोलेन्द्रिया दुराम्नायाः परेच्छावशवृत्तयः ।
अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रचक्रिरे ॥
धर्मकर्मोद्यतोऽप्येष मुनिलोकस्त्वया यदा ।
नीयेत वमतिं देव तदा कास्य तपःक्रिया ॥
वने वा नगरे वापि वपुःशेषा मुनीश्वराः ।
निर्विघ्नं यत्तपस्यन्ति तन्माहात्म्यं तव प्रभोः ॥
अलं दुराग्रहैर्नाथ मान्यमेतन्मुनिं प्रति ।
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥

तत्पर्याप्तमनया दुर्वासनया । गच्छ । वन्दामहे तपःप्रभावप्रणतनिखिलदि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्पालमौलिमणिवेदिकाधिदेवतायमानचरणमेनं परमेष्ठिनम्। अतस्तौ द्वावपि मेरुमिव सूर्याचन्द्रमसौ तं भगवन्तं प्रदक्षिणीकृत्य कृतप्रणामौ च पुरः प्रत्यक्षोदयौ नयविनयाविवोपविविशतुः। भगवान्नरेश्वरमुररीकृत्योद्धृत्य च भविष्यल्लक्ष्मीलतोल्लासप्रथमपल्लवोल्लेखमिव पञ्चशाखम्

> कामधेनुरखिलोत्सवसङ्गे श्रीसमागमनसूचनदूती।
> देवमानवमनोरथसिद्धिर्धर्मवृद्धिरियमस्तु सदा वः॥

अपि च।

> त्वं वीरवैरिवनितानयनेन्दुकान्त
> निष्पन्दसंपदि मतोऽसि नरेश राजा।
> आदित्य एव च भवान्नहिताङ्गनाङ्ग-
> निस्तोकशोकतपनोपलदीपनेषु॥'

राजा 'क्वास्माकमेवंविधानि मनोदुर्विलसितानि। क्व चेयं भगवतामस्तुङ्का-रकल्याणपरम्पराशंसनपरायणता। तदत्रास्य दुश्चरितस्य निजशिरःकमलेन भगवच्चरणार्चनमेव प्रायश्चेतनं नान्यत्।' इति परमपराक्रमतया निःसीमसा-हसतया च कृताभिनिवेशो मुनीशेन महीशः किलैवमादिदिशे—'विशांपते, मैवं मंस्थाः। चित्तानि हि देहिनां स्वभावचञ्चलतयाकूपारकल्लोलजलानी-वोच्चावचविषयवृत्तान्तानि भवन्ति। तदलं दुरभिनिवेशेन।' **यशोमति**महा-राजः सशिरःकम्पम्—'अहो, भगवतामतीन्द्रियेष्वपि पदार्थहृदयेषु साति-शया शेमुषी' इति क्षणमात्रं विस्मृत्य भगवन्तमापपृच्छे—'भगवन्, किं नाम मे मनो दुरभिनिवेशमध्यशेत। भगवान्क्वेत्याद्याश्रयं तदाशयमुपादिशत्। **कल्याणमित्रः**—'काश्यपीपते, नैतदाश्चर्यम्। अयं हि भगवान्महर्द्धिसंप-न्नतयाष्टाङ्गमहानिमित्तनिलयः सर्वावधिसमक्षसाक्षात्कृतसकलवस्तुविषयः करतलामलकमिव कालत्रयत्रिलोकोदरविवरवर्तिसमर्थमपि पदार्थसार्थं कलय-ति। तदन्यदेव किंचिदेतत्सभासभाजनकरं नष्टमुष्टिचिन्तालाभालाभसुखदुःख-जीवितमरणजन्मान्तरगोचरमापृष्टव्यः। क्षितिपतिः (सानुनयम्)—भगवन्, मम पितामहो **यशोर्घ**महाराजस्तादृशं लोकोत्तरं चरित्रमाचर्यैदानीं किं नु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खलु लोकमध्यास्ते पितामही **चन्द्रमतिः** पिता **यशोधर**महाराजोऽमृतमतिश्च माता ।' भगवान्—'समाकर्णय ।

राजन्यशोर्घनृपतिः पलितं विलोक्य
निर्विद्य संसृतिसुखेषु मुनिर्बभूव ।
राज्ये **यशोधर**नृपं तनयं निवेश्य
तत्याज निस्पृहतया तृणवद्विभूतिम् ॥
जैनागमोचितमुपास्य तपश्चिराय
प्रायोपवेशनविधानविमुक्तकायः ।
ब्रह्मोत्तरं त्रिदशवेशमवाप्य जात-
स्तत्कल्पलेखयतिरद्भुतमासमेतः ॥
ब्रह्मपुत्रविधिना सह मात्रा तं **यशोधर**नृपं विनिपात्य ।
जातकुब्जरतिरङ्गविरामात्पञ्चमं निरयमाप तवाम्बा ॥

या च **चन्द्रमति**स्तव पितामही यश्च **यशोधर**महाराजस्तव पिता तौ द्वावपि द्विजातिभिराश्राविस्रकलसत्त्वोपहारफलस्य पिष्टताम्रचूलस्यालम्भनवल्लनाभ्याम**मृतमति**प्रयुक्तसौल्किकेयवशात्प्रेत्य निरवधीनि दुःखानि बहुषु भवान्तरेष्वनुभूय सांप्रतं तवैव यमलतयापत्यमाजग्मतुः ।' **राजा** (स्वगतम्)—पिष्टकुक्कुटपापोपयागाभ्यामपि पितामही चैतावतीमवस्थामवापत् । नाकलेयमधुना ममाजन्म स्वयंनिहितजलस्थलाकाशचरप्राणिपिशितरसपुष्टवपुः सरसः पुरुदंशस इव सदैव हिंसाध्यवसायसक्तचेतसः के भविष्यन्ति लोकाः । तत्पर्याप्तं मम सांसारिकसुखाभिलाषेण । (प्रकाशम्)भगवन्, अयं जन्तुरमोघमघसंघातघनतया पातालतलमुपनिपतन्नुद्ध्रियतां दीक्षाप्रदानहस्तावलम्बनेन' इत्यभिधाय पपात भगवत्पादयोरुपरि । कृतपादपतनः परामममर्श चैवम् ।

महदपि पापं विलयति पुण्याप्तिमनोरथः सुतुच्छोऽपि ।
किं नाल्पो रविरेष त्रिभुवनमात्रं तमो हन्ति ॥
अत ऊर्ध्वं वा प्राणी स्वयं कृतैरेष कर्मभिर्याति ।
कूपस्य यथा खनिता यथा च कर्ता निकेतस्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऊर्ध्वाधोगतिहेतुर्लघुगुरुकर्मप्रयोगतः स्वस्य ।
स्वयमेव भवति जन्तुस्तुलां तु तव किं विषादेन ॥'

भट्टारकः—अहो धर्मधौरेय, प्रधानगुणगन्धननिधान, उत्तिष्ठ । श्रूयतां तावदिदमुभयलोकव्यवहारसर्वस्वम् । इयं हि बहिःप्रदर्शितमनोरमागमारमासृग्धारेव विमुच्यमाना भवति जीवितव्यसंदेहाय देहिनाम् । चिरपरिचितालोकः प्रणयिलोकः काय इव परित्यज्यमानः करोति दूरे शरीरिणां प्राणान् । समभ्यस्तधर्मणि कर्मणि विनियुज्यमानः पुमान्वारीगतः करीवातीवान्तर्मनायते सत्क्रियासु । तादात्विकापवापस्तनुभृतां स्वैरालाप इव सुलभः खल्वभिनिवेशो न निर्वाहेषु । दिव्यचक्षुःस्खलितावाकर्षकमिव सहसा कृते कर्मणि शपन्ति लोकाः । पुरश्चारकं प्रतिश्रुत्य व्रताद्रणादिवापद्रवत्सु भवति च लोकद्वयविघातिनी कौलीनता । अपि च ।

चित्तं स्वभावमृदु कोमलमेतदङ्ग-
माजन्मभोगसुभगानि तवेन्द्रियाणि ।
एतत्तु चित्तवपुरिन्द्रियवृत्तिरोधा-
द्दुःखं तपस्तदलमत्र नृपाग्रहेण ॥

कल्याणमित्रः—क्षितिपते, साध्वाह भगवान् ।

राजा—कल्याणमित्र, सत्यमेवैतत् । किं तु ।

मार्दवाधिकतरं कलधौतं तापताडनसहं च निसर्गात् ।
एवमेव वपुरुत्तमपुंसां संपदां च विपदां च सहिष्णुः ॥

ततस्तपश्चरणकरणपरिणतान्तःकरणः पुनरहो **मारदत्त**, समाहूय सपरिवारावावां पूर्वभववृत्तान्तमकथयत् । तदाकर्णनाच्च संजातजातिस्मरणौ बन्धुबाष्पाम्बुभिः सह मूर्छावशाद्भुवि निपतितकरणावनवरतजलजडांशुकव्यजनसीकरासारशीतलानलोपलालनशीलिभिः, मन्दचन्दनस्पन्दोपदेहसदयहृदयैः, आर्द्रार्द्रकमलदलमृणालनिचयसंचारणपरपाणिभिः, अविरलजम्बालमञ्जरीजालपरिचर्यापादनपेशलाशयैः, सरसरम्भागर्भपरिरम्भसंभावनप्रणयिभिः, अपरिमितोसीरपरिषत्परिमलनकारणपरायणैः, घनघनसारपारीस्फारपानीयसेचनचतुरचेतोभिः । एवमन्यासु च तासु तासु प्रत्युज्जीवनकरप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रियासु क्रियासु महादरोदारैः परिवारैः कृतादाश्वासनादानन्दमङ्गलैः सार्द्धमनतिचिरादेव कालादुत्थितावनवधिवेलं पुनश्चिरजीवनजनोचिताशीर्वादैर्विहितसंबोधनैः 'तात, तावदत्र भवतामसत्कृतकर्मणो जन्मान्तरातङ्कमर्मणश्च समाकर्णनादिदं मुहुर्लक्ष्मीपराङ्मुखं मनोऽभूत् । आवां पुनरद्यापि तदातङ्कपावकचुम्बितचित्ताविव भवन्तौ कथं नामास्यामासंजावः' इति विहिताग्रहावपि सकलकुलवृद्धसमक्षतया संताने विनिवेश्योचितमाचरत् ।

मायारामसमा रमा सुखमिदं दुःखावलेखोन्मुखं
स्वप्नालोकनयः सुहृत्परिचयः कान्ता कृतान्ते हिता ।
उत्साहोऽपि च देहगेहविषयो यः सोऽप्यनित्योदय-
स्तत्त्वालोकविलुप्तचित्ततमसां पुंसां भवेदुत्सवः ॥

इति चिन्तयतोर्गतेषु कतिपयेषु च दिवसेषु पुनर्नावयोर्मुनिजनमान्यप्रवृत्तेरन्यत्रासनाद्यभिनिवेश इति विहितसमग्रावभिषिच्य राज्ये यशोधनाभिधानरत्नं सापत्नमनुजन्मानमङ्गस्य चाष्टवर्षदेशीयतयार्हद्रूपायोग्यत्वादिमां देशयतिश्लाघनीयाशां दशामाश्रित्य तेन भगवता सह विहरमाणावत्रागतौ भवद्धटानयनभरादेतत्सभान्तराम् । धर्मावधानयत्नरत्नदीपदीप्तिविदूरितमतिमिथ्यात्वमहान्धकारवृत्तो मारदत्तः प्रतिक्षणं शुभाशयामृतप्रवाहप्रविगलन्निखिलाञ्जनः सपौरपुरदेवतापरिजनः पुरा स्वयं दुर्वासनया च कृतेषु निरवधिषु दुश्चरित्रेष्वतीवबीभत्सयान्तःशाल्यित इव कृतशरीरविधूननस्तन्मुनिकुमारमिथुनकथाकर्णनादिमं समस्तमपि संसारसुखसंगमं स्वप्नेन्द्रजालसमं समाकर्णयन्करकमलमुकुलावचूलमौलिः सबहुमानमनःकेलिस्तं मुनिकुमारमेवमभाषत—'अहो विदग्धनाथ, निःसामान्यसुकृतसुलभदर्शनसनाथ, दुरन्तपातालपतज्जन्तुहस्तावलम्ब, निखिलभुवनमानसोल्लासनशर्मधर्मामृतवर्ष, प्रतिबिम्बहिताहितविवेकदिग्धमूढविधुरबान्धवलोकप्रीणनाचाराश्रय, श्रीमाधवखलीकृतसकलजगज्जायाशरमारमुनिकुमार, निःशेषलोकाभ्युद्धरणजन्मना परमाप्तसमवर्त्मना दैवादवाप्तालोकनेन तत्रभवतानुग्रहणीयः खल्वयं जनः स्वकीयाचारणसमानभाजनतया मुनिकुमारः । निसर्गतुङ्गिमानन्दमन्दर, करुणारसस्पन्दकन्दर, समाकर्णय । स्वभावसव्यस्य विदितवेदितव्यस्य हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भगवतः सर्वमुपपन्नमेतत् । किं त्वहमेवंविधे कर्मण्यद्यापि गुरुणाभ्यनुज्ञातसमावर्तनो न भवामि । तदेहि । गच्छावः शरणागतजनमनोरथानुकूलं तत्पादमूलम् ।

राजा—(स्वगतम् ।) अहो आश्चर्यम् । यतः ।

अहं प्रजानां मम देवतेयमेतत्त्रयस्यैष तथास्य चान्यः ।
गुरुस्तदर्थान्तरगा महत्ता वेश्येव दूरं समुपागतेयम् ॥

(प्रकाशम् ।) मुनिकुमार, अलं विलम्बितेन । एतर्हि प्रतिष्ठावहे तं भगवन्तं भदन्तमुपासितुम् ।

यः स्याद्वाद्यपि सर्वयौक्तिकनयक्षोदक्षमैतिह्यधी-
नैंष्किचन्यभराशयोऽपि जगतः सर्वार्थसिद्ध्याश्रयः ।
दृष्टादृष्टफलप्रसूतिचरितोऽप्याप्तश्च मध्यस्थता-
मात्मस्थोऽपि समस्तगः स भवतः श्रेयस्कृते स्ताज्जिनः ॥

अरालकालव्यालेन ये लीढाः सांप्रतं तु ते ।
शब्दाः श्रीसोमदेवेन प्रोत्थाप्यन्ते किमद्भुतम् ॥

उद्धृत्य शास्त्रजलधेर्नितले निमग्नैः
पर्यागतैरिव चिरादभिधानरत्नैः ।
या सोमदेवविदुषा विहिता विभूषा
वाग्देवता वहतु संप्रति तामनर्घाम् ॥

इयता ग्रन्थेन मया प्रोक्तं चरितं यशोधरनृपस्य ।
इत उत्तरं तु वक्ष्ये श्रुतपठितमुपासकाध्ययनम् ॥

इति सकलतार्किकलोकचूडामणेः श्रीमन्नेमिदेवभगवतः शिष्येण सद्योनवद्यगद्यपद्यविद्याधरचक्रचक्रवर्तिशिखण्डमण्डनीभवच्चरणकमलेन श्रीसोमदेवसूरिणा विरचिते यशोधरमहाराजचरिते यशस्तिलकापरनाम्नि महाकाव्ये भवभ्रमणवर्णनो नाम पञ्चम आश्वासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षष्ठ आश्वासः ।

श्रीमानत्रान्तरे सूरिः सुदत्तोऽवधिबोधतः ।
बुद्ध्वा तदागमं तत्र ययौ संयमधीः स्वयम् ॥
तत्रागमान्मुनेर्मान्यात्सभा चुक्षोभ भूभुजः ।
रत्नाकरस्य वेलेव पार्वणेन्दुसमागमात् ॥
विधाय विधिवत्सूरेः सपर्यां तत्र भूपतौ ।
आसीने सत्युवाचेदमसौ मुनिकुमारकः ॥

भगवन्, अस्ति खलु केन्दरान्तरालखेलल्लेलिहानेशानकपर्दचन्दनद्रुमालवालायमानमन्दाकिनीजलकेलिकलहंसेन सुरसुन्दरीलोचनचकोरकुलसंतर्पणार्पितामृतासारसृष्टिना सरस्वतीस्रवणतीर्थोपासनतापसेन मनोजविजयार्जनावर्जितजन्मना रजनिवल्लरीकुसुमस्तबकसुन्दरेण त्रिदिवदीर्घिकार्जुनार्म्बुजकुञ्जविजयमूर्तिना कौस्तुभैरावतपारिजातामृतेन्दिरासोदरेण मृगमदकर्दमालिखितललामलिपिविलोपिना विदलच्छदातुच्छतापिच्छगुलुञ्छाविच्छिन्नच्छायाछुपा लाञ्छनेनालंकृतिमतक्षीरोदनन्दनेन चन्द्रमसा मुद्रितः प्रतिपर्वसंपन्नफलपरम्परोऽभ्युदितोदितविभूतिरहितकीर्तिस्तम्भनिर्भेदभिदूनां यदूनां वंशः। तत्राभवन्निखिललोकचिन्तामणीयमानचरणो रणोत्सवतारसिकसपत्नाङ्गनालोचनचन्द्रकान्तमणिप्रणालजलप्रवाहिनीहारकिरणोदयो दयोचिताचरणानन्दितविनीतावनीपालदारको दारकोग्रतरकरवालविनिभिन्नारीभकुम्भस्थलोच्छलन्मुक्ताफलनिकरतारकितगगनतलो नतलोकपालचूडामणिमरीचिवलयालवालविलसत्क्रमाशोकपल्लवश्रीः श्रीविरामसीमाश्रितश-

१. तेषां मारदत्तादीनामागमने प्राणिवधो माभूदिति धीः. २. मुण्डमालामध्ये क्रीडत्सर्पः ईदृश ईशानरुद्रः. ३. जटाजूट एव चन्दनवृक्षस्तस्य आलवालायमानं यन्मन्दाकिनीजलं तत्र या क्रीडा तत्र राजहंसेन चन्द्रेण मुद्रितो लक्षितो यदुवंशः. ४. संतर्पणार्थम्. ५. नद्याः स्रवणं क्षरणमेव तीर्थं तत्र प्रतिबिम्बितत्वाचन्द्र एव तापसस्तेन. ६. दिग्विजयनिमित्तं सज्जितं जन्म येन स तेन. ७. गङ्गानदीश्वेताब्जवन. ८. विकसत्यत्र बहुलतमालपत्रकस्तूरिकायास्तिलक सरस्वतीललाटे घटते. ९. कौस्तुभादीनां भ्राता. १०. यदूनां वंशश्चन्द्रमसा मुद्रित आचन्द्रमुपलक्षित उच्चैस्तरत्वात् वंशश्चन्द्रे लग्न इव दृश्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रुसंतानतरूत्पाटनपटुदोर्दण्डमण्डलप्रचण्डश्चण्डमहासेनो नाम नरपतिः। तस्यायं समस्तसाम्राज्यधुरोद्धारधौरेयः प्रजोपद्रवद्रुतक्षुद्रकार्दवेयवैनतेयः साक्षात्कुसुमधनुःसूनुरावयोश्च सवित्र्याः सकलजगद्व्यवहारप्रवृत्तिदत्तस्कन्धात्संसारसंबन्धादनुजपर्यः सोदर्यः। स एष संप्रति स्वभावतो मृदुमानसरसप्रसरोऽपि दुरुपदेशावसरस्ताम्रपर्णीपयःप्रवाह इव संजातशुक्तिसंपुटकोटरावगाहः कठिनतानीतमतिरस्तसमागतिशलाकासादितसूत्रसूत्रप्रवेशमार्गो निकामं संपद्यमानधर्मसंसर्गो भवितुमिच्छतीति।

तदनु **राजा** सबहुमानं धर्मद्रुमप्रथमोत्पन्नपल्लवायमानेन सकलसंसारव्यसनदावानलप्रभापटलकान्तिना नखमयूखप्रसरोत्सर्पितश्रवणसमीपसरस्वतीप्रवाहेण सीमन्तप्रान्तसरःसंजातजलेजकुड्मलविडम्बिना करयुगलेनोत्तंसितशिखण्डः प्रणम्यानाकुलमनाः प्रत्याक्षिप्तव्यापैनाः परलोकोपायपरामर्शपवित्रप्रकृतिः शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिवेशपेशलमतिः **सुदत्तभगवन्तमभयरुचिविरचितावसरोदन्तमेवं** किलाभाषत—'भगवन्,

धर्मात्किलैष जन्तुर्भवति सुखी जगति स च पुनर्धर्मः।
किंरूपः किंभेदः किमुपायः किंफलश्च जायेत॥'

भगवानाह—'राजन्, समाकर्णय।

यस्मादभ्युदयः पुंसां निःश्रेयसफलाश्रयः।
वदन्ति विदिताम्नायास्तं धर्मं धर्मसूरयः॥

स प्रवृत्तिनिवृत्त्यात्मा गृहस्थेतरगोचरः।
प्रवृत्तिर्मुक्तिहेतौ स्यान्निवृत्तिर्भवकारणात्॥

राजाह—'किं पुनर्भगवन्मुक्तेः कारणम्, किं च संसारस्य, को वा गृहाश्रमिणां धर्मः, कश्च संयमिलोकस्य।'

भगवान्—

'सम्यक्त्वज्ञानचारित्रत्रयं मोक्षस्य कारणम्।
संसारस्य च मीमांस्यं मिथ्यात्वादिचतुष्टयम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्यक्त्वभावनामाहुर्युक्तियुक्तेषु वस्तुषु ।
मोहसंदेहविभ्रान्तिवर्जितं ज्ञानमुच्यते ॥
कर्मादाननिमित्तायाः क्रियायाः परमं शमम् ।
चारित्रोचितचातुर्याश्चारुचारित्रमूचिरे ॥
सम्यक्त्वज्ञानचारित्रविपर्ययपरं मनः ।
मिथ्यात्वं नृषु भाषन्ते सूरयः सर्वदेहिनः ॥

अत्र दुरागमवासनाविलानीवासितचेतसां प्रवर्तितप्राकृतलोकानोकहोन्मूलनसमयस्रोतसां सदाचाराचरणचातुरीविदूरवर्तिनां परवादिनां मुक्तेरुपाये काये च बहुवृत्तयः खलु प्रवृत्तयः । तथा हि—'सकलनिष्कलाप्तप्रासमन्त्रतन्त्रापेक्षदीक्षालक्षणाच्छ्रद्धामात्रानुसरणान्मोक्षः' इति **सैद्धान्तवैशेषिकाः**, 'द्रव्यगुणकर्मसामान्यसमवायान्त्यविशेषाभावाभिधानानां पदार्थानां साधर्म्यवैधर्म्यावबोधतन्त्राज्ज्ञानमात्रात्' इति **तार्किकवैशेषिकाः**, 'त्रिकालभस्मोद्धूलनेज्यागड्डुकप्रदानाप्रदक्षिणीकारणात्मविडम्बनादिक्रियाकाण्डमात्राधिष्ठानादनुष्ठानात्' इति **पाशुपताः**, 'सर्वेषु पेयापेयभक्ष्याभक्ष्यादिषु निःशङ्कचित्ताद्वृत्तात्' इबि **कुलाचार्यकाः** । तथा च त्रिकमतोक्तिः—'मदिरामोदमेदुरवदनस्तरसरसप्रसन्नहृदयः सव्यपार्श्वविनिवेशितशक्तिः शक्तिमुद्रासनधरः स्वयमुमामहेश्वरायमाणः कृष्णया सर्वाणीश्वरमाराधयेदिति प्रकृतिपुरुषो विवेकमतेः ख्यातेः' इति **सांख्याः**, 'नैरात्म्यादिनिवेदितसंभावनातो भावनातः' इति **दशबलशिष्याः**, 'अङ्गाराञ्जनादिवत्स्वभावादेव कालुष्योत्कर्षप्रवृत्तस्य चित्तस्य न कुतश्चिद्विशुद्धचित्तवृत्तिः' इति **जैमिनीयाः**, 'सति धर्मिणि धर्माश्चिन्त्यन्ते ततः परलोकिनो भावात्परलोकाभावे कस्यासौ मोक्षः' इति समवाप्तसमस्तनास्तिकाधिपत्या **बार्हस्पत्याः**, 'परमब्रह्मदर्शनवशादशेषभेदसंवेदनाविद्याविनाशात्' इति **वेदान्तवादिनः**,

'नैवान्तस्तत्त्वमस्तीह न बहिस्तत्त्वमञ्जसा ।
विचारगोचरातीतेः शून्यता श्रेयसी ततः ॥'

इति पश्यतोहराः प्रकाशितशून्यतैकान्ततिमिराः **शाक्यविशेषाः**,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

तथा 'ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां नव संख्यावसराणामात्मगुणानामत्यन्तोन्मुक्तिर्मुक्तिः' इति **काणादाः**। तदुक्तम्—

बहिः शरीराद्यद्रूपमात्मनः संप्रतीयते।
उक्तं तदेव मुक्तस्य मुनिना कणभोजिना॥

'निराश्रयचित्तोत्पत्तिलक्षणो मोक्षः' इति मोक्षावसरास्**ताथागताः**। तदुक्तम्—

दिशं न कांचिद्विदिशं न कांचिन्नैवावनिं गच्छति नान्तरिक्षम्।
दीपो यथा निर्वृतिमभ्युपेतः स्नेहक्षयात्केवलमेति शान्तिम्॥
दिशं न कांचिद्विदिशं न कांचिन्नैवावनिं गच्छति नान्तरिक्षम्।
जीवस्तथा निर्वृतिमभ्युपेतः क्लेशक्षयात्केवलमेति शान्तिम्॥

'बुद्धिमनोऽहंकारविरहादखिलेन्द्रियोपशमावहात्तदा द्रष्टुः स्वरूपेऽवस्थानं मुक्तिः' इति **कापिलाः**, 'यथा घटविघटने घटाकाशमाकाशीभवति तथा देहोच्छेदात्सर्वः प्राणी परे ब्रह्मणि लीयते' इति **ब्रह्माद्वैतवादिनः**।

अज्ञातपरमार्थानामेवमन्येऽपि दुर्णयाः।
मिथ्यादृशां न गण्यन्ते जात्यन्धानामिव द्विपैः॥

(स्वगतम्।)

प्रायः संप्रति कोपाय सन्मार्गस्योपदेशनम्।
निर्लूननाशिकस्येव विशुद्धादर्शदर्शनम्॥
दृष्टान्ताः सन्त्यसंख्येया मतिस्तद्वशवर्तिनी।
किं न कुर्युर्महीं धूर्ता विवेकरहितामिमाम्॥
दुराग्रहग्रहग्रस्ते विद्वान्पुंसि करोतु किम्।
कृष्णपाषाणखण्डेषु मार्दवाय न तोयदः॥
ईर्ते युक्तिं यदेवात्र तदेव परमार्थसत्।
यद्भानुदीप्तिवत्तस्याः पक्षपातोऽस्ति न क्वचित्॥

(प्रकाशम्।)

श्रद्धां श्रेयोर्थिनां श्रेयः संश्रयाय न केवला।
बुभुक्षितवशात्पाको जायेत किमुदम्बरे॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुत्वेत्यदर्शनं यातो वेतालः शिंशिपातरौ ।
अधोमुखो निरुच्छ्वासस्तथैवालम्बितः स्थितः ॥ ३३८ ॥
इति चतुर्थो वेतालः ॥ ६ ॥

ततस्तमादाय नृपः प्रययौ विपुलाशयः ।
स च स्कन्धस्थितः प्राह शृणु चित्रं महीपते ॥ ३३९ ॥
द्विजोऽभूदङ्गविषये विष्णुस्वामी महाधनः ।
बभूवुस्तस्य तनयास्तरुणाः सुखशालिनः ॥ ३४० ॥
कदाचिद्याजिना तेन ते विसृष्टा महोदधिम् ।
यज्ञाय कूर्ममाहर्तुं ययुरादेशकारिणः ॥ ३४१ ॥
ते समुद्रं समासाद्य प्राप्य कूर्मं महाकृतिम् ।
दुरामोदं न जगृहुः पिच्छिलाङ्गं जुगुप्सया ॥ ३४२ ॥
संप्राप्तेऽप्यगृहीतेऽस्मिन्कच्छपे वेशधारणात् ।
ध्रुवं नो याति जनको दीक्षाभङ्गादधोगतिम् ॥ ३४३ ॥
गृहाण त्वं न शक्तोऽहं क्षमस्त्वं न त्वहं विभो ।
इति तेषामभूत्तत्र जल्पश्चिरमनल्पकः ॥ ३४४ ॥
नारीचङ्गोऽहमुचितो वीभत्सेऽस्मिन्नकर्मणि ।
भ्रातर्भोजनचङ्गोऽहं शय्याचङ्गोऽधिकोऽप्यहम् ॥ ३४५ ॥
इति ते जातकलहा विटङ्कनगरेश्वरम् ।
प्रसेनजितमभ्येत्य पप्रच्छुर्निजगौरवम् ॥ ३४६ ॥
इति विश्रम्यतामद्य प्रातर्दातास्मि चोत्तरम् ।
इति राज्ञा समादिष्टास्तस्थुस्तत्रैव ते द्विजाः ॥ ३४७ ॥
अथैकः प्रस्तुतो भोक्तुं नवकर्पूरसौरभम् ।
शालिभोजनमम्लानं नाभ्यनन्दद्विकूणितः ॥ ३४८ ॥
ततस्तन्दुलमज्ञासीद्दुष्टमन्विष्य भूपतिः ।
श्मशाननिकटक्षेत्रजातधान्यसमुद्भवम् ॥ ३४९ ॥

---

१. 'रक्षणात्' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्यं भोजनचङ्गोऽयमित्युक्त्वा विस्मितो नृपः ।
दिदेश नारीचङ्गाय दासीं कुवलयेक्षणाम् ॥ ३५० ॥
समाल्यसौरभाहूतभृङ्गव्याकुलमालिनीम्[1] ।
तस्य शय्यान्तिकं प्राप्य तस्थौ हासविलासिनी ॥ ३५१ ॥
नारीचङ्गोऽप्यथोत्थाय करस्थगितनासिकः ।
ष्ठीवनव्याकुलस्तत्र निर्ययौ सहसा बहिः ॥ ३५२ ॥
हतश्छागलगन्धेन बताहं दुष्टयोषिता ।
इति क्रन्दन्तमाकर्ण्य तं ददर्श महीपतिः ॥ ३५३ ॥
अजादुग्धैरियं बाला मात्रा हीना विवर्धिता ।
इति पृष्टा नृपेणाहं दासी लज्जानतानना ॥ ३५४ ॥
स्त्रीचङ्गोऽयं भवत्येव निगद्येति नरेश्वरः ।
सप्ततूलीकृतां शय्यां शय्याचङ्गाय दत्तवान् ॥ ३५५ ॥
सप्ततूलीजुषस्तस्य पर्यङ्कतलवर्तिना ।
बालेन वलयाकारं गात्रेऽभूल्लक्ष्म लोहितम् ॥ ३५६ ॥
सव्यथं निःश्वसन्तं तं दृष्ट्वा बालं च भूपतिः ।
सत्यं शयनचङ्गोऽयमित्युवाच सविस्मयः ॥ ३५७ ॥
ततस्तेषां नृपतिना दत्तैर्द्रविणसंचयैः ।
संभोगसक्तास्तत्रैव तस्थुस्ते द्विजपुत्रकाः ॥ ३५८ ॥
तत्पिता क्रतुभङ्गाच्च विधायानशनव्रतम् ।
सभार्यः प्रययौ स्वर्गं जपयज्ञपवित्रितः ॥ ३५९ ॥
इत्यभ्युदीर्य वेतालो मोहयन्निव मायया ।
मातापित्रोस्तेषु हत्या पतिता कस्य भूपते ॥ ३६० ॥
एतेभ्यः कोऽधिकश्चङ्ग इत्यपृच्छन्महीपतिम् ।
पृष्टो नरेश्वरः प्राह द्वावप्रत्ययवीक्षकौ ॥ ३६१ ॥
शय्याचङ्गोऽधिकस्तेभ्यो यो बालेनाङ्कितस्तनौ ।
तन्न्यूनयोः पातकं तत्पितृप्रलयसंभवम् ॥ ३६२ ॥

---

१. 'गामिनी' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति मौनपरित्यागात्स राज्ञः सहसा गतः ।
पुनः पुनर्दृष्टनष्टस्तथैवोल्लम्बितः स्थितः ॥ ३६३ ॥

इति पञ्चमो वेतालः ॥ ७ ॥

(¹पुनस्तमादाय ययावखिन्नो वसुधाधिपः ।
स च स्कन्धस्थितः प्राह शृणु राजन्कथामिमाम् ॥ ३६४ ॥
अस्ति धर्मस्य वसुधा लक्ष्म्याः क्षेत्रं स्थितिः स्थितेः ।
संपदां सदनं स्वर्गं जयत्युज्जयिनी पुरी ॥ ३६५ ॥
पुण्यसेनाभिधानस्य तस्यामासीन्महीपतेः ।
ब्राह्मणः सेवको धीमान्हरिस्वामीति विश्रुतः ॥ ३६६ ॥
देवस्वामी सुतस्तस्य बभूव श्रुतिपारगः ।
सोमप्रभा च तनया मूर्तेव श्रीर्मनोभुवः ॥ ३६७ ॥
विज्ञानिने ज्ञानिने वा देया शूराय वा त्वया ।
अहमित्याप्तनियमा पितरं सा व्यजिज्ञपत् ॥ ३६८ ॥
अत्रान्तरे दाक्षिणात्ये नृपे जेतुं समागते ।
पुण्यसेनो नरपतिः सहामात्यैरचिन्तयत् ॥ ३६९ ॥
सर्वथा सामसाध्योऽसौ रक्तामात्यो महाधनः ।
शूरश्च राजा तेनास्मै दूतो धीमान्विसृज्यताम् ॥ ३७० ॥
इति मन्त्रिगिरा राजा वर्चस्वी गुणवान्द्विजः ।
हरस्वामी विसृष्टस्तत्कटकं सहसाभ्यधात् ॥ ३७१ ॥
तत्र राज्ञा समाधाय संधिं तस्मिन्स्थिते क्षणम् ।
विप्रः कश्चित्तमभ्येत्य ययाचे रुचिरः सुताम् ॥ ३७२ ॥
सोऽब्रवीज्ज्ञानिविज्ञानिशूरेभ्यो नापरः सखे ।
योग्यः पुत्री मयोद्वोढुमिति नः समयो दृढः ॥ ३७३ ॥
तत्सुता ब्राह्मणयुवा विज्ञानं स्वमदर्शयत् ।
क्षणेन दृष्टवान्येन हरिस्वामी जगत्रयम् ॥ ३७४ ॥

---

१. 'एतत्कोष्ठान्तर्गतपाठः क-पुस्तके त्रुटितः.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृष्टस्ततः स्वतनयां विस्मितो वचसा ददौ ।
शुभे दिने सप्तमेऽस्तु विवाह इति संविदा ॥ ३७५ ॥
अत्रान्तरेऽपरो विप्रः शूरो धीमान्कृतश्रमः ।
देवस्वामिनमभ्येत्य तत्स्वसारमयाचत ॥ ३७६ ॥
ज्ञानिविज्ञानिशूराणां मध्यादेको लभेत ताम् ।
इत्यसौ तद्वचः श्रुत्वा धनुर्विद्यामदर्शयत् ॥ ३७७ ॥
अनेकमल्लसंचार्यं दृष्ट्वा तस्यानतं धनुः ।
देवस्वामी ददौ तस्मै विस्मितो भगिनीं गिरा ॥ ३७८ ॥
मात्रापि द्विजपुत्राय कस्मैचिज्ज्ञानशालिने ।
पुत्री वाक्येन दत्तासौ तत्प्रभावोदितस्मयात् ॥ ३७९ ॥
सप्तमेऽह्नि वृतस्तेषां लग्ने प्राप्ते गृहाधिपः ।
हरस्वामी स्वतनयां ददर्शोज्ज्वलभूषणाम् ॥ ३८० ॥
ज्ञानिविज्ञानिशूरेषु तुल्यं प्राप्तेष्वथोत्सवे ।
अन्विष्टापि प्रयत्नेन कन्या नैव व्यदृश्यत ॥ ३८१ ॥
ततस्तज्जनकः प्राह दुःखितः साश्रुलोचनः ।
ज्ञानिन्वद क यातासौ निकषेयं तवागता ॥ ३८२ ॥
इति पृष्टः स चोवाच धूम्राक्षेणाद्य रक्षसा ।
सा नीता रूपलुब्धेन घोरां विन्ध्याटवीमितः ॥ ३८३ ॥
विज्ञानिना कल्पितेऽथ समारुह्य रथोत्तमे ।
शूरस्तं राक्षसं हत्वा कन्यकामानिनाय ताम्) ॥ ३८४ ॥
ततो लग्नक्षणे प्राप्ते तत्पिता [1]श्रान्तमानसः ।
सर्वे कृतोपकाराश्च तुल्याश्चेति व्यचिन्तयत् ॥ ३८५ ॥
कथयित्वेति वेतालः पप्रच्छ धरणीपतिम् ।
कस्तेभ्यः कन्यकालाभयोग्य इत्युच्यतां विभो ॥ ३८६ ॥
पृष्टोऽब्रवीन्नरपतिः स पात्रं येन निर्जिता ।
सा कन्यान्यौ तु विधिना दिष्टौ तौ सिद्धिकारणम् ॥ ३८७ ॥

---

१. 'भ्रा' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रुत्वेति वेतालो गत्वा क्षिप्रमलक्षितः ।
तस्मिन्विटपिपर्यन्ते तथैवोल्लम्बितः स्थितः ॥ ३८८ ॥

इति षष्ठो वेतालः ॥ ८ ॥

राजा पुनस्तमादाय प्रययौ वीतसंभ्रमः ।
स च स्कन्धस्थितः प्राह वेतालः शृणु भूपते ॥ ३८९ ॥
शोभावत्यां पुरि श्रीमान्यज्ञकेतुः क्षितीश्वरः ।
गौर्या भक्तिपरश्चक्रे तीर्थयात्रामहोत्सवम् ॥ ३९० ॥
स्नातुं स्निग्धा समायाते जने गौरीसरस्तदा ।
चेरुः सरोजनयना नूपुराहूतसारसा ॥ ३९१ ॥
तां नीतां वक्रपद्मैश्च दोर्मृणालीवनैस्तथा ।
तासां भ्रूवीचिजालैश्च पुनरुक्तमभूत्सरः ॥ ३९२ ॥
वराङ्गनानां कुचयोः ससंभ्रुतनखव्रणा ।
स्वच्छफेनावली चीरैः[1] प्रीत्येवाबन्धि वारिणा ॥ ३९३ ॥
स्नानधौताञ्जनसिता तासां दृष्टिर्व्यरोचत ।
निष्क्रं[2]ष्टकालकूटाशा चटुलैवामृतच्छटा ॥ ३९४ ॥
स्नातोत्थिता वारिधाराहारिभिस्ताः स्तनैर्बभुः ।
दृष्टाग्रबिससूत्रास्यैश्चक्रवाकैरिवाङ्किताः ॥ ३९५ ॥
धवलो नाम तत्राथ रजकः स्नातुमागतः ।
युवा ददर्श रजकीं कन्यां मदनसुन्दरीम् ॥ ३९६ ॥
स्नात्वा बाहुलताक्षेपत[3]रलोत्क्षेपितैर्मुहुः ।
यस्या लावण्यसलिलैः प्रक्षालितमिवाम्बरम् ॥ ३९७ ॥
कटाक्षशफरोत्[4]फाला या विभ्रमतरङ्गिता ।
रजकानामिव गृहे जाता मूर्तिमती नदी ॥ ३९८ ॥
मुहुर्लीलास्मितस्मेरच्छायाव्याजैर्दिदेश या ।
यात्रोत्सवे जनस्येव धौतपीत[5]पटावली ॥ ३९९ ॥

---

१. 'दिरभ्यः' क. २. 'कृ' क. ३. 'सलिलोत्सर्पिभिर्मु क. ४. 'द्वारा' क.
५. 'वीर' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तां चन्द्रबिम्बवदनां विलोक्य स्तबकस्तनीम्।
स्वगृहं रजको गत्वा बभूव स्मरतापितः ॥ ४०० ॥
पिता विदितवृत्तान्तस्तस्य दृष्ट्वा स्मरव्यथाम्।
कन्यां ययाचे रजकं गत्वा शुद्धपटाभिधम् ॥ ४०१ ॥
आदरेण ततः पित्रा दत्तां मदनसुन्दरीम्।
अवाप्य धवलो लेभे जीवितं विततोत्सवः ॥ ४०२ ॥
दत्तां कदाचित्तां पुत्रीं भर्तृगेहे चिरस्थिताम्।
आनेतुं ग्राहिणोत्पुत्रं [1]स्वीयं शुद्धपटस्ततः ॥ ४०३ ॥
भ्रात्रा निमन्त्रिता साथ भर्त्रा सह समागता।
पथि गौर्याश्रमं प्राप्य निषण्णा तत्सरस्तटे ॥ ४०४ ॥
द्रष्टुं ततो भगवतीं प्रविष्टो धवलः स्वयम्।
उपहारं निजशिरः प्रददौ [2]दैवनोदितः ॥ ४०५ ॥
भगिनीपतिमन्वेष्टुं प्रविष्टो वीक्ष्य तं पुर[3]ः।
तथैव निजमूर्धानं चिच्छेदाकुलिताशयः ॥ ४०६ ॥
अथैका तावपश्यन्ती देवीं रजकसुन्दरी।
द्रष्टुं प्रविष्टा तौ दृष्ट्वा पतितौ मर्तुमुद्यता ॥ ४०७ ॥
अशोकशाखिनः प्रान्ते पाशं सज्जीचकार सा।
ज्वलितास्त[4]स्य तद्दुःखवह्निना कुसुमश्रियः ॥ ४०८ ॥
मुहुः स्तनाग्रविन्यस्तसाञ्जनाश्रुकणावली।
लतेव स्त[5]बकासक्तभृङ्गाली सा[6]स्तवीत्सतीम् ॥ ४०९ ॥
श्रीकण्ठकण्ठनीलाब्जनवषट्[7]पदमालिका।
दृष्टिर्जयति ते देवि दैत्यसंहारया[8]मिनी ॥ ४१० ॥
त्रिलोचनमनःसिन्धुहर्षवीचिर्विलासिनी।
कान्तिर्जयति ते गौरि शुम्भकैरवकौमुदी ॥ ४११ ॥

१. 'सोत्कं' क. २. 'दे' क. ३. 'नः' क. ४. 'तस्यैव दुःखस्य व' क.
५. 'मस्तकास' क. ६. 'ददत्सती' क. ७. 'दायिनी' क. ८. 'का' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[१]व्याजृम्भि वाहशार्दूलदंष्ट्रांशुविशमण्डलम् ।
अम्बिके जयति स्मेरं पादाम्बुजयुगे तव ॥ ४१२ ॥
श्रुत्वेति पार्वती तुष्टा शिरःसंघट्टने तयोः ।
[२]द्राग्जीवितुं व्यादिदेश भक्तिः कल्पलतेव यत् ॥ ४१३ ॥
भर्तुर्भ्रातुश्च सा शीर्षयोजने संभ्रमाकुला ।
दैवाद्विनिमयं चक्रे मुग्धा तत्र शरीरयोः ॥ ४१४ ॥
भ्रातरं भर्तृवदनं भर्तारं चाग्रजाननम् ।
ततस्तावुत्थितौ दृष्ट्वा सा संदेहाकुलाभवत् ॥ ४१५ ॥
कथयित्वेति वेतालः पृष्टवानु[३]र्वरापतिम् ।
भर्तारं सेव्यतां बाला कं ताभ्यां सा सुलोचना ॥ ४१६ ॥
श्रुत्वेति राजा प्रोवाच यस्या भर्तृमुखः पतिः ।
शिरः सर्वेन्द्रियाधारं सकलं हि कलेवरम् ॥ ४१७ ॥
इति मौनपरित्यागाद्राज्ञः क्षणमलक्षितः ।
वेतालो वृक्षमभ्येत्य तथैवोल्लम्बितः स्थितः ॥ ४१८ ॥

इति सप्तमो वेतालः ॥ ९ ॥

ततः पुनस्तमादाय जगाम जगतीपतिः ।
तत्स्कन्धस्थोऽपि वेतालः प्राह तं श्रूयतामिति ॥ ४१९ ॥
बभूव [४]चन्द्रसिंहाख्यस्ताम्रलिप्त्यधिपो नृपः ।
दिक्षु यद्विक्रमोत्साहश्लथा वीरकथाभवत् ॥ ४२० ॥
तस्य सेवाव्रतः सत्वशीलाख्यो राजवंशजः ।
आसीत्कार्पटिको द्वारि शीतातपसहश्चिरम् ॥ ४२१ ॥
ततः कदाचिन्मृगयारसाकृष्टः स भूपतिः ।
पार्ष्णिसंस्पर्शरोषेण हृतोऽश्वेनातियायिना ॥ ४२२ ॥
निर्मानुषं वनं प्राप्य स दूराध्वश्रमातुरः ।
नापश्यदनुगं कंचिदेकं कार्पटिकं विना ॥ ४२३ ॥

---

१. 'विजृम्भि' क. २. 'तज्जीवितं व्यादिदेश' क. ३. 'नवनीपतेः' क. ४. 'चण्डसेनः' कथासरित्सागरे.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र संदृश्य पानीयं वितीर्यामलकद्वयम् ।
नृपं सार्धं समाश्वास्य मार्गं कार्पटिकोऽदिशत् ॥ ४२४ ॥
पुनः स्वनगरं प्राप्तो मन्त्रिभिर्विहितोत्सवः ।
तुष्टः कार्पटिकं श्रीमांश्चकारात्मसमं नृपः ॥ ४२५ ॥
ततः कदाचिद्दर्पेण स सिंहलपतेः सुताम् ।
मृगाङ्कलेखामुचितां विसृष्टो याचितुं ययौ ॥ ४२६ ॥
स प्रापाम्भोनिधिं तुङ्गतरङ्गालिङ्गिताम्बरम् ।
कैलासमिव चार्वर्कशिखरोल्लिखिताखिलम् ॥ ४२७ ॥
तत्रारुह्य प्रवहणप्रस्थिते सिंहलोन्मुखे ।
तस्मिन्महिषसंकाशः समुत्तस्थौ महाधनः ॥ ४२८ ॥
तदुद्भूतमहावात्या चण्डताण्डविते़ऽम्बुधौ ।
प्रलयावर्तवित्रस्ताः क्वापीव ककुभो ययुः ॥ ४२९ ॥
ततः प्रवहणारूढा वणिजो ब्राह्मणास्तथा ।
चन्द्रसिंहमहीपालं चुक्रुशुर्भयकातराः ॥ ४३० ॥
तं स्वामिशरणाक्रन्दं श्रुत्वा कार्पटिकोऽम्बुधौ ।
अमृष्यमाणः सहसा ममज्जाकोशखड्गभृत् ॥ ४३१ ॥
ततो भग्ने प्रवहणे सर्वे ते जलचारिभिः ।
भक्षिताः सत्वशीलस्तु निजोत्साहेन रक्षितः ॥ ४३२ ॥
ध्वजयष्टिं जले दृष्ट्वा तत्पार्श्वेन प्रविश्य सः ।
अपश्यत्काञ्चनपुरं पाताले रत्नतोरणम् ॥ ४३३ ॥
मणिप्रासादमध्यस्थां तत्र तुष्टाव पार्वतीम् ।
भुजङ्गदैत्यकन्याभिः कृतपूजां[1]महोत्सवाम् ॥ ४३४ ॥
जय गौरि [2]गलद्गर्वगीर्वाणगणवन्दिते ।
जय काल[3]लघुग्रासहेलाहुंकृतिशालिनि ॥ ४३५ ॥
जय सोत्सुकचण्डीशनेत्रषट्पदपद्मिनि ।
जय दैत्येन्द्रहृत्पद्मसंकोचघनकौमुदि ॥ ४३६ ॥

१. 'र्णं' क. २. 'नमन्मौलिगीर्वाण' क. ३. 'कला' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जय मायागुणप्रोतजगद्यन्त्रविनोदिनि ।
यज स्फोटसमुन्मेषव्याप्तविश्वेसरस्वति ॥ ४३७ ॥
इति स्तुत्वा भववधूं तत्पुराग्रे ददर्श सः ।
दासीसहस्रानुगतां कन्यां दिव्यविभूषणाम् ॥ ४३८ ॥
हरिणीहारिनयनां मत्तमातङ्गगामिनीम् ।
विलासलीलालसितां स्मरोपवनमञ्जरीम् ॥ ४३९ ॥
लावण्यवारिपरिखां मेखलायन्त्रमालिकाम् ।
रुद्धनेत्रानलध्वस्तस्मररक्षापुरीमिव ॥ ४४० ॥
तां दृष्ट्वा स स्खलद्धैर्यो मुद्रितः पुष्पधन्वना ।
चित्रन्यस्त इव क्षिप्रमभूद्विस्मयनिश्चलः ॥ ४४१ ॥
सं पूजयित्वा शर्वाणीं प्रविष्टां मणिमन्दिरे ।
अनुप्रविश्य तत्कान्तिं पपौ नयनचन्द्रिकाम् ॥ ४४२ ॥
तस्यां स्फाटिकपर्यङ्कनिषण्णायां स सादरम् ।
नीतः कार्पटिकः स्नातुं दासीभिर्विमलं सरः ॥ ४४३ ॥
स्नानार्थं नोदितस्तत्र ताम्रलीप्तान्तरस्थितात् ।
उत्तस्थौ भूमिपोद्यानक्रीडाकमलिनीतटात् ॥ ४४४ ॥
ततो नवमधुक्षीब इवानन्दितमानसः ।
कन्दर्पसर्पदष्टोऽभूत्स तत्रात्यन्तमूर्च्छितः ॥ ४४५ ॥
क्षिप्रमुद्यानपालेन विज्ञप्तोऽहं तदागमम् ।
चण्डसेननृपोऽभ्येत्य तं ददर्श तथास्थितम् ॥ ४४६ ॥
स कथंचित्परिज्ञाय नृपमुन्मील्य लोचने ।
मन्दमन्देन वचसा निजवृत्तान्तमभ्यधात् ॥ ४४७ ॥
तच्छ्रुत्वा विस्मितो राजा तमुवाच स्मरातुरम् ।
समाश्वसिहि पातालं गच्छावः पुनरब्धिना ॥ ४४८ ॥

---

१. 'श्वेश्वरेश्वरि' क. २. 'लि' क. ३. 'द्रनेत्रानलत्रस्त' क. ४. 'तां' क.
५. 'स्नातुरूषव्यसोऽपश्यत्ताम्रलिप्तपुरे स्थितम्' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्त्वा सचिवन्यस्तराज्यः प्रणयिवत्सलः[1] ।
सह कार्पटिकेनैव चण्डसेनोऽम्बुधिं ययौ ॥ ४४९ ॥
तत्र प्रवहणारूढः सलिले तत्प्रदर्शिते ।
निमज्य तेन सहितः क्षिप्रं पातालमासवान् ॥ ४५० ॥
ततो गौर्याश्रमे कन्यां तामपश्यत्सुलोचनाम् ।
नवां स्मरमयूरस्य निवासकदलीमिव ॥ ४५१ ॥
सैंहिकेयपरित्रासाल्लक्ष्मी हरिणलक्ष्मणः ।
चक्रिचक्रसमाक्रान्तामिव पातालमाश्रिताम् ॥ ४५२ ॥
तां दृष्ट्वा भूमिपालोऽभूद्गाढप्रमदविस्मयः ।
अहो स्थानेऽनुरक्तोऽयमिति लोलितशेखरः ॥ ४५३ ॥
सापि संपूज्य वरदां प्राप्तोद्वाहवरा सती ।
दृष्ट्वा राजानमवदन्निजदासीं सविस्मया ॥ ४५४ ॥
ब्रूहि सत्वोचिताकारं गत्वैनं पुरुषोत्तमम् ।
देव पूजां गृहाणेति तमादिष्टेत्यभाषत ॥ ४५५ ॥
इह स्थितेनैव मया गृहीता सुभ्रु सत्कृतिः ।
इति भूमिभुजाप्युक्ता कन्यकामेत्य सावदत् ॥ ४५६ ॥
निर्विकारेण सत्त्वेन तस्यावष्टम्भशालिना ।
सा भुजङ्गी ततः कृष्टा मन्त्रेणेवान्तिकं ययौ ॥ ४५७ ॥
सुवर्णवल्लरीरम्ये रत्नपादपकानने ।
सर्वर्तुफलपुष्पाढ्ये विश्रान्तं सा तमब्रवीत् ॥ ४५८ ॥
पूजां देव गृहायातो गृहाण मम सादरम् ।
इत्यार्थितस्तया राजा जगाद सहितोऽमुना ॥ ४५९ ॥
द्रष्टुं गौरीमहं प्राप्तस्त्वां ज्ञात्वा त्वार्थिवत्सलाम् ।
इति श्रुत्वा परिज्ञाय तं कार्पटिकमानतम् ॥ ४६० ॥
मुहूर्तं लज्जया तस्थौ स्मृत्वा तां तस्य वञ्चनाम् ।
ततोऽब्रवीत्सा राजेन्द्र सुताहमसुरप्रभोः ॥ ४६१ ॥

१. 'य' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालनेमेः पुरयुगं ममेदं भोगमोक्षदम् ।
सर्वसिद्धिप्रदं दीप्तं रत्नहाटकनिर्मितम् ॥ ४६२ ॥
जन्ममृत्युजराव्याधिवर्जितं दिव्यसौरभम् ।
अहं पुरद्वयोपेता त्वदधीना नरेश्वर ॥ ४६३ ॥
इत्याकर्ण्य नृपः प्राह स्पृशन्कार्पटिकं दृशा ।
प्रेमविश्रम्भभूरेको मम मानसदर्पणः ॥ ४६४ ॥
सुहृत्पिता सुतो बन्धुः स्वामी सर्वमयं मम ।
कुलोन्नतः सत्त्वशीलस्तदस्मै त्वं मयार्पिता ॥ ४६५ ॥
([1]पुंत्रीव सुभ्रु गुणिने भव्यस्ते प्रणयो यदि ।
नि[2]शम्य तां नरपतेर्गिरमौचित्यमन्थराम् ॥ ४६६ ॥
तथेति लज्जिता प्राह सा लिखन्ती दृशा भुवम् ।
कन्यामसुरराज्यं च दत्त्वा तस्मै नृपोऽब्रवीत्) ॥ ४६७ ॥
एकस्यामलकस्यैतत्फलमन्यद्गुणं मम ।
तावापृच्छत्ततस्तस्मिन्स निमज्य सरोवरे ॥ ४६८ ॥
उन्ममज्ज निजोद्यानलीलापुष्करिणीतटात् ।
कथां राज्ञे निवेद्येति वेतालः पुनरभ्यधात् ॥ ४६९ ॥
वद कः सत्त्ववानत्र नृपः कार्पटिको नु वा ।
इति पृष्टोऽब्रवीद्राजा किं चित्रं यदि भूपतिः ॥ ४७० ॥
कृते प्रतिक्रियां कर्तुं निमग्नो दृष्टवर्त्मना ।
श्लाघ्यः कार्पटिको येन भीताक्रन्दासहिष्णुना ॥ ४७१ ॥
अदेशिके निरालम्बे निमग्नो मकरालये ।
श्रुत्वेत्यलक्षितो यातो वेतालो विपुलच्छलै[3]ः ।
शिंशिपाप्रान्तमागत्य पुनरुल्लम्बितः स्थितः ॥ ४७२ ॥
इत्यष्टमो वेतालः ॥ १० ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः २. 'निशाम्य' इति भवेत्. ३. 'विः' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ततस्तमादाय निरुद्वेगो ययौ जवात्।
स च तत्स्कन्धगः प्राह धिक्ते निर्वेधमीदृशम्॥ ४७३॥
क्व राज्यं क्व सुधागर्भपूर्णेन्दुवदनाश्च ताः।
क्व चेदं मत्तवेतालं स्मशानमतिभीषणम्॥ ४७४॥
क्षान्तिशीलेन पापेन जगच्चूडामणिर्भवान्।
पातितः संशये घोरे शृणु तांवत्कथमिमाम्॥ ४७५॥
वीरदेवोऽभवच्छ्रीमानुज्जयिन्यां महीपतिः।
तस्य पैद्मरतिर्नाम भार्याभूच्चित्तचन्द्रिका॥ ४७६॥
तपसा देवमासाद्य भवानीवल्लभं विभुम्।
लेभे सभार्यस्तनयं कन्यां चायतलोचनाम्॥ ४७७॥
शूरदेवाभिधे तस्मिन्दाँरके मुक्तशैशवे।
अनङ्गरतिनाम्नी सा कन्यापि प्राप यौवनम्॥ ४७८॥
तस्या बभूव संकल्पो यः शूरो विपुलाकृतिः।
लोके विस्तीर्णविद्यश्च स मे प्रणयभूरिति॥ ४७९॥
नानादिगन्तभूपाला याचमाना नृपात्मजाम्।
प्रत्याख्याता ययुर्लोके कुतः सर्वगुणो जनः॥ ४८०॥
ततः कदाचिदाजग्मुश्चत्वारः सदृशा नराः।
विक्रान्ता विपुलाकारा विद्यासु च विचक्षणाः॥ ४८१॥
ते समभ्येत्य राजानमयाचन्त प्रियां सुताम्।
प्रतीहारेण पृष्टाश्च निजाभिजनमूचिरे॥ ४८२॥
एकोऽवदच्चित्रवस्त्रनिर्माणकुशलो धनी।
शूद्रोऽहं शौर्यसंपन्नो वपुः प्रत्यक्षमीक्ष्यताम्॥ ४८३॥
द्वितीयः प्राह वैश्योऽहं भाषाज्ञः सर्वदेहिनाम्।
तृतीयः प्राह राजन्यः खड्गी नान्योऽस्ति मत्समः॥ ४८४॥
चतुर्थश्चाब्रवीद्विप्रो जानेऽहं मृतजीवनम्।
शौर्यरूपगुणैर्विद्धि तुल्यानस्मान्महीपते॥ ४८५॥

---

१. 'राजन्' क. २. 'सोमवती' क. ३. 'बालके' क. ४. 'विनीम्' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रुत्वा वीरदेवः संदेहाकुलितोऽभवत् ।
मन्त्रिभिः संहितो[1] दृष्ट्वा मिथो बिम्बागतानिव ॥ ४८६ ॥
उक्त्वेति पप्रच्छ नृपं वेतालो विपुलाशयः ।
कस्मै नरपते ब्रूहि सा कन्या दीयतामिति ॥ ४८७ ॥
राजावदद्वैश्यशूद्रौ नार्हावत्र न संशयः ।
अन्यवृत्तिर्द्विजः पापः क्षत्रियः क्षत्रियापतिः ॥ ४८८ ॥
इति श्रुत्वाथ वेतालो गत्वा पुनरलम्बत ।
नृपो भूयस्तमादाय ययौ स्कन्धाच्च सोऽब्रवीत् ॥ ४८९ ॥

इति नवमो वेतालः ॥ ११ ॥

वीरबाहोर्नरपतेर्नगरं पुरमण्डले ।
निदर्शनं धनवतामर्थदत्तोऽभवद्वणिक् ॥ ४९० ॥
धनदत्ताभिधस्तस्य पुत्रो भूतलनन्दनः[2] ।
सुता मदनसेना च मदनस्येव देवता ॥ ४९१ ॥
धनदत्तवयस्यो[3]ऽथ धर्मदत्तो युवा वणिक् ।
तस्यानुजां कदाचित्तामपश्यत्तद्गृहागतः ॥ ४९२ ॥
दृष्टिर्युवनिरानन्दसमयगुर्वी तरङ्गिते ।
यत्कान्तिसलिले मग्नान्समुद्धर्तुं न पार्यते ॥ ४९३ ॥
भ्रूलास्यवीचितरले हारहंससितोर्मिणि ।
लावण्यमानसे यस्याः कटाक्षैः शफरायितम् ॥ ४९४ ॥
उन्निद्रचन्द्रवदनां तां विलोक्य निजालयम् ।
गतो न लेभे स धृतिं सार्थभ्रष्ट इवाध्वगः ॥ ४९५ ॥
स वै निःश्वाससंतापग्लपिताधरपल्लवः ।
अशान्तसर्वशिखिना कामेनेवान्तराश्रितः ॥ ४९६ ॥
अत्रान्तरे जलनिधिं संध्यारक्ते दिवाकरे ।
तापादिव क्लान्ततनौ प्रविष्टे पद्मिनीप्रिये ॥ ४९७ ॥

---

१. 'सह तां दृष्ट्वा मिथो' क. २. 'स्कुलन' क. ३. 'स्तुल्यो' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिक्षु कालागरुस्यन्दनीलैस्तिमिरसंचयैः ।
अभिसारोचितं वेषमाश्रितास्विव तत्क्षणात् ॥ ४९८ ॥
उदिते पूर्वदिक्कान्तासीमन्तमणिमौक्तिके ।
शशाङ्के शंकरक्रुद्धकामसंजीवनौषधम् ॥ ४९९ ॥
ज्योत्स्नाविलासविलसत्प्रभाशुभ्रे नभस्तले ।
दुग्धाब्धिशायिनः शौरेः सुधालिप्त इवोरसि ॥ ५०० ॥
वणिक्पुत्रः स्मराक्रान्तः सुहृदाश्वासितो मुहुः ।
क्षणार्धनिद्रितोऽपश्यत्स्वप्ने तामेव कामिनीम्[1] ॥ ५०१ ॥
ततः प्रभाते विजने स्थितां तामेव कन्यकाम् ।
ययाचे संगमं तस्या[2] लज्जा रागेण सह्यते ॥ ५०२ ॥
तेन प्रणयिभृङ्गेन वल्लरीवाकुलीकृता ।
स्तनाग्रलग्नवदना बभाषे सा नता ह्रिया ॥ ५०३ ॥
अहमद्यैव तातेन वचसा प्रतिपादिता ।
सखे समुद्रदत्ताय वणिजे गुणशालिने ॥ ५०४ ॥
पूर्वमेव त्वयाभ्येत्य पिता मे किं न याचितः ।
अधुनाहं परवधूरगम्या विदुषस्तव ॥ ५०५ ॥
इति श्रुत्वा बलवता मन्मथेन समाहतः ।
सोऽवदद्वीक्ष्यमाणस्तां हठात्कण्ठग्रहोत्सुकः ॥ ५०६ ॥
मम प्राणैः पणः सुभ्रु त्वां विना समुपस्थितः ।
कार्याकार्यविचारो हि कस्य जीवितसंशये ॥ ५०७ ॥
त्यजते प्राप्तममृतं यदेतद्बुद्धिलाघवम् ।
को जानीते परे लोके कस्य किं नु भविष्यति ॥ ५०८ ॥
भज मामनवद्याङ्गि न चेत्त्वद्वदनामृतम् ।
स्वयं पिबामि किं प्राप्ते विधौ नक्षत्रचिन्तया ॥ ५०९ ॥
श्रुत्वेति चकिता तन्वी प्रोवाचानन्तवीक्षितैः ।
लज्जयेव वितन्वाना ततो मायूरकञ्चुकम् ॥ ५१० ॥

१. 'सुन्दरीम्' क. २. 'कस' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टायां मयि तातस्य विनष्टे कन्यकाफले ।
कुलं पतति नः सर्वं तत्र मा कारणं भव ॥ ५११ ॥
प्राग्जन्मविहितः कोऽपि निबन्धो[1] यदि मे प्रभो ।
तत्पित्रे[2] स्वफलं दत्वा कृतोद्वाहास्मि ते वशे ॥ ५१२ ॥
वणिग्युवा निशम्येति प्राह सर्वं न मे वरम् ।
नवां मालां परित्यज्य निर्माल्ये रमते नु कः ॥ ५१३ ॥
अनभ्यस्प्रष्टुमुचितं त्यक्तुं नेशोऽस्मि ते वपुः ।
को हि हस्तात्परित्यज्य कुर्यादन्वेषणश्रमम् ॥ ५१४ ॥
इत्याग्रहेण तेनोक्ता निर्जने भयविह्वला ।
अवला बलिना लब्धा निःश्वसन्ती जगाद सा ॥ ५१५ ॥
सत्यं वृत्तविवाहाहं त्वदन्तिकमदूषिता ।
समेष्यामि क्षपामेकामिति ते सुकृतैः शपे ॥ ५१६ ॥
श्रुत्वेति स ययौ तुष्टः प्रीतये हि मृगीदृशाम् ।
प्रणयादस्त्युपगमो यथा नैव तथा हठात् ॥ ५१७ ॥
अथ लग्नदिने प्राप्ते प्रवृत्ते विपुलोत्सवे ।
समुद्रदत्तस्तरुणीं परिणीय निनाय ताम् ॥ ५१८ ॥
ततो भुक्तोत्तरं स्मेरकुसुमोत्तंसमन्दिरे ।
भेजाते दम्पती शय्यां तनुस्वच्छोत्तरच्छदाम् ॥ ५१९ ॥
लज्जानतमुखी तेन चाटुकारेण कामिना ।
करेण रुद्धां नो नीवीं याचितापि मुमोच सा ॥ ५२० ॥
ततः सा तस्य वणिजः स्मृत्वा प्राग्विहितं वचः ।
यत्नाद्विहाय सहजां लज्जां भर्तारमब्रवीत् ॥ ५२१ ॥
प्रौढा समुचितं बाला वैदग्ध्यं सहते कथम् ।
अफुल्लां चूतकलिकां नहि चुम्बति षट्पदः ॥ ५२२ ॥
इति नीवीहठाकृष्टप्रगल्भं विनिमंय्य[3] तम् ।
सा प्राह पूर्ववरणद्रोहकाङ्क्षीकृतेप्सितम् ॥ ५२३ ॥

१. 'न्धस्त्यज्यतामयम्' क. २. 'स्वपि' क. ३. 'वार्य तम्' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वणिजो धर्मदत्तस्य हठसङ्गभयान्मया।
अभ्रष्टाहं समेष्यामि त्वामिति प्राक्प्रतिश्रुतम् ॥ ५२४ ॥
असत्यं नोत्सहे कर्तुं तदनुज्ञातुमर्हसि।
इत्याकर्ण्य स तत्याज तामाशां च तदागमे ॥ ५२५ ॥
ततः सा तेन विजने संत्यक्ता प्रययौ निशि।
तारहारांशुधवला कमलेनेव कौमुदी ॥ ५२६ ॥
प्रयान्तीं धर्मदत्तस्य भाण्डशालां सुलोचनाम्।
सर्वस्वहारी चौरस्तां ददर्शोज्ज्वलभूषणाम् ॥ ५२७ ॥
विस्तीर्णवक्षःप्राकारो मेघश्यामो महाभुजः।
तमःशवरसंघातसेनापतिरिवाग्रतः ॥ ५२८ ॥
स्कन्धावलम्बिभिर्भृङ्गनीलैः कुटिलकुन्तलैः।
सदा संचरणप्रीत्या रात्रिचक्रैरिवाश्रितः ॥ ५२९ ॥
उद्भिन्नश्मश्रुलेखाग्रकेशमण्डलमण्डितः।
दिग्दन्तिमुक्ताचौर्येषु मदाम्बुभिरिवाङ्कितः ॥ ५३० ॥
विकोशासिप्रभाजालैर्दीपैरालम्बिताम्बरः।
तारा रत्नप्रहारार्थमिवारोहणरज्जुभिः ॥ ५३१ ॥
स दृष्ट्वा तां सुवदनां कूजद्भूषणमौक्तिकाम्।
दिवः सचन्द्रनक्षत्रां श्रियं संचारिणीमिव ॥ ५३२ ॥
नेत्रयोः कज्जलेनेव नीलाब्जेनेव कर्णयोः।
तनौ कृष्णांशुकेनेव तमसापि विभूषिताम् ॥ ५३३ ॥
करेणुं कुञ्जराकारस्तां राजकदलीमिव।
समालम्ब्यावदद्धन्यः कोऽसौ यो मृग्यते त्वया ॥ ५३४ ॥
सर्वस्वहारी चौरोऽहं क नु गच्छसि निर्भया।
([१]अथवा मण्डलोद्दण्डकोदण्डस्ते स्मरोऽनुगः ॥ ५३५ ॥
इत्युक्ता तेन सा प्राह चौरोऽसि यदि गृह्यताम्)।
रत्नभूषणमामुक्तमौक्तिकं किं तु मुञ्च माम् ॥ ५३६ ॥

१. एतत्कोष्ठान्तर्गतपाठः क-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुत्वेत्याह विहस्यैनां नाहं ग्राम्यः शुचिस्मिते ।
यस्त्वां स्मरालंकरणां त्यक्त्वा यास्याम्यचेतनः ॥ ५३७ ॥
इत्युक्ता तेन संरुद्धा सा जगौ वल्गुवादिनी ।
वचसा येन निर्बद्धा तस्मादेष्यामि ते वशे ॥ ५३८ ॥
स श्रुत्वेत्याह चित्रं ते सरलः कोऽप्ययं क्रमः ।
क्षिप्त्वा[1] दिक्षु क्षिपेत्को नु कण्ठस्थां रत्नमालिकाम् ॥ ५३९ ॥
गच्छामि पुनरेष्यामीत्येवं धूर्तो न वञ्च्यते ।
योषितां च नदीनां च पुनरागमनं कुतः ॥ ५४० ॥
यस्तु हस्तगतं रत्नं मोहात्त्यजति बालवत् ।
स मन्दपुण्यः सुभगे पुनस्तस्य न भाजनम् ॥ ५४१ ॥
इति वादिनमत्युग्रसाहसं तं चकार सा ।
निवेद्य निजवृत्तान्तं किंचिद्धि कलितग्रहम् ॥ ५४२ ॥
सोऽब्रवीद्धर्मदत्तस्य यथा तथ्यं वचः कृतम् ।
तथैव मे त्वया कार्यं गत्वा सत्यवती ह्यसि ॥ ५४३ ॥
इति चौरेण मुक्तासौ भाण्डशालान्तरस्थितम् ।
धर्मदत्तमवाप्याहं प्राप्तास्मीति सविस्मयम् ॥ ५४४ ॥
सोऽवदत्परभार्या मे न गम्या त्वं सुलोचने ।
शमितोऽनङ्गदावाग्निधूम्राभ्रमलिनः क्षणः ॥ ५४५ ॥
प्रतिमुक्तोऽपि[2] सा तेन चोरमेत्य तदाभ्यधात् ।
सत्यत्वात्[3]सोऽपि तच्छ्रुत्वा तां तत्याज सभूषणाम् ॥ ५४६ ॥
ततः समुद्रदत्तं सा पुनरभ्येत्य वल्लभम् ।
यथा वृत्तं निवेद्यास्मै भेजे तेन स्मरोत्सवम् ॥ ५४७ ॥
नृपमुक्त्वेति पप्रच्छ वेतालो वञ्चनोन्मुखः ।
ब्रूहि कोऽत्र महासत्त्वः श्रुत्वेत्याह च भूपतिः ॥ ५४८ ॥
तत्याज धर्मदत्तस्तां बहुकर्णगतां[4] प्रियाम् ।
राजभीत्या सुखे नित्यं धनिनो हि पराङ्मुखाः ॥ ५४९ ॥

---

१. 'हिला' क. २. 'क्तेति' क. ३. 'त्ववान्' क. ४. 'कालग' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धत्तां[1] समुद्रदत्तोऽपि कथं तामन्यमानसाम् ।
किं न कुर्युर्गृहे रुद्धा विरक्तहृदयाः स्त्रियः ॥ ५५० ॥
सत्त्ववानेक एवात्र चौरोऽसौ तां मुमोच यः ।
प्राणान्हि पणमाधाय धने धावन्ति दस्यवः ॥ ५५१ ॥
इति श्रुत्वैव वेतालस्तरौ पुनरलम्बत ।
भूयोऽप्यादाय तं राजा ययौ मारुतरंहसा ॥ ५५२ ॥
इति दशमो वेतालः ॥ १२ ॥

ततः स्कन्धस्थितः प्राह वेतालः प्रहसन्मुहुः ।
अहो राजन्निरुद्वेगो व्यवसायस्तवायतः ॥ ५५३ ॥
राजा धर्मध्वजो नाम बभूवोज्जयिनीपतिः ।
तिस्रस्तस्याभवन्भार्यास्तरुण्यः कान्तिभूषणाः ॥ ५५४ ॥
इन्दुलेखाभिधानैका कान्ता तारावली परा ।
अन्या मृगाङ्कवत्याख्या चेत्युन्नतकुचोद्धताः[2] ॥ ५५५ ॥
कदाचिद्दक्षिणमरुत्तरङ्गितलतावने ।
वसन्ते संततोत्फुल्लचूतचम्पककेसरे ॥ ५५६ ॥
काले केसरिणि स्मेरसिन्दुवारसटोद्भटे[3] ।
मानिनीमानमातङ्गदारणे कलिकानखे ॥ ५५७ ॥
शर्वरीकबरीपाशत्विषि षट्पदमण्डले ।
दिक्षु कालागरुस्यन्दपत्रभङ्गतुलास्थिते ॥ ५५८ ॥
सेव्यतां ललनाभोगः पीयतां पातलं मधु ।
न ह्यनन्तो वसन्तोऽयं वदतीवेति कोकिले ॥ ५५९ ॥
राजा चूतरजःपुञ्जपिञ्जरे वल्लभासखः ।
विजहार निजोद्याने विराजितमधूत्सवः ॥ ५६० ॥
([4]अथ तत्रेन्दुलेखायाः केलिलोलदिशा दिशः ।
इन्दीवरदलोदारा बभूवुर्नन्दनोत्सवे) ॥ ५६१ ॥

---

१. 'भुक्तां' क. २. 'सुशीला सत्कुलोचिता' क. ३. 'मदोत्कटैः' क. ४. एतत्कोष्ठान्तर्गतपाठः क-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रान्तरे मृगदृशस्तस्या भ्रमणविभ्रमात् ।
कर्णोत्पलेन पतता क्षिप्रमूरुरभज्यत ॥ ५६२ ॥

निजमन्तःपुरं नीत्वा दासीभिः कथमप्यसौ ।
तस्थौ स्फटिकपर्यङ्के मूर्च्छामोहनिमीलिता ॥ ५६३ ॥

ततस्तिमिरमायूरतालवृन्तसमाहृते ।
जगद्गृहे गृहपतौ गते दीप इवाखिले ॥ ५६४ ॥

सीत्काराचार्यतां याते निशीथे हरिणीदृशाम् ।
संकुचत्पद्मकोशाग्रबद्धभृङ्गरवैरिव ॥ ५६५ ॥

उदिते व्योमनलिनीराजहंसे सितत्विषि ।
कान्तास्मितामृतासक्त इवालोके विलासिनि ॥ ५६६ ॥

रजनीराजतनयाकन्दुकेनेन्दुना मुहुः ।
यामिनीकामिनीहारैः करैरापूरितेऽम्बरे ॥ ५६७ ॥

उत्सवेन विलासस्य विभ्रमेण मदश्रियः ।
जीवितेन मनोजस्य शशिना भूषिते मधौ ॥ ५६८ ॥

आखण्डलद्विपाखण्डदन्तदण्डोरुडम्बरैः ।
रश्मिखण्डैः शशाङ्कस्य मण्डिते क्षितिमण्डले ॥ ५६९ ॥

तारावलीसखो राजा सौधे लीलारतालसः ।
कर्पूरशुभ्रः सुष्वाप द्वितीय इव चन्द्रमाः ॥ ५७० ॥

मधुमत्ता रतिक्लान्ततनुवल्ली श्रमाम्बुभिः ।
संमृष्टतिलका क्षिप्रं देवी निद्रां समाययौ ॥ ५७१ ॥

तस्याः शीताभिलाषिण्यास्तत्र गात्रे निरम्बरे ।
पतितैश्चन्द्रकिरणैरुत्तस्थौ स्फोटकावली ॥ ५७२ ॥

ततो भुजगदष्टेव प्लुष्टेव शिखिनोत्थिता ।
ययावाश्वासिता राज्ञा कदलीशयनं शनैः ॥ ५७३ ॥

---

१. 'का' क. २. 'दग्धेव' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृगाङ्कवत्यथाहूता रतये भूभुजा निशि ।
समाययौ विभ्रमभूः क्वणन्नूपुरमेखला ॥ ५७४ ॥
निःशब्दजनसंचारे कुतोऽपि मुसलध्वनिम् ।
श्रुत्वा तदा जातकिणौ धुन्वाना करपल्लवौ ॥ ५७५ ॥
दृष्टा ईवैत्य मधुपैरुत्फुल्लकमलाशया ।
हा हतास्मीति चुक्रोश तारसीत्कारशालिनी ॥ ५७६ ॥
श्रीखण्डरससंसिक्तकरामाशु स भूपतिः ।
परिसान्त्व्य क्षपां क्षिप्रं क्षीणां वीक्ष्य समुत्थितः ॥ ५७७ ॥
कथयित्वेति वेतालः पप्रच्छ वसुधाधिपम् ।
सुकुमारतरा राजन्का तासां कथ्यतामिति ॥ ५७८ ॥
नृपोऽवदन्मृदुतनुः सुकुमारतरैव सा ।
यस्या मुसलशब्देन जातौ पाणी किणाङ्कितौ ॥ ५७९ ॥
इति श्रुत्वैव वेतालः सहसादर्शनं गतः ।
वृक्षाग्रात्पुनरादाय ययौ राजा महाजवः ॥ ५८० ॥

इत्येकादशो वेतालः ॥ १३ ॥

सोऽथ स्कन्धगतः प्राह कथां शृणु विशांपते ।
अशेषसंशयच्छेत्ता देवदेवो मतोऽसि मे ॥ ५८१ ॥
नृपोऽभूदङ्गविषये यशःकेतुरिति श्रुतः ।
यद्यशःपुण्डरीकस्य मृणालं फणिनायकः ॥ ५८२ ॥
पृथुवेपथुसिञ्जानैर्यतिं संधाय भूषणैः ।
यस्य किन्नरकान्ताभिर्गीयते चरितावली ॥ ५८३ ॥
यत्पराक्रममाकर्ण्य लङ्कालोडनसाक्षिणः ।
स्मरन्ति रामचरितं ते जीर्णा रजनीचराः ॥ ५८४ ॥
अमात्यो दीर्घदर्शीति तस्याभूदुचिताभिधः ।
यन्मन्त्रैः शत्रुसर्पाणां नाभवन्कचिदुद्भवाः ॥ ५८५ ॥

१. 'त्वैव संजात' क. २. 'विजित्य' क. ३. 'शील्य' क. ४. 'राजा पुनर्गृहित्वाथ प्रतस्थेऽतुलविक्रमः' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मिन्विन्यस्य पृथिवीभारं स वसुधाधिपः ।
सिषेवे चन्द्रवदनां श्यामां श्यामामिवोडुपः ॥ ५८६ ॥
तस्मिन्स्मररसासक्ते स श्रीमान्मन्त्रिपुंगवः ।
कोशदुर्गबलाधानव्यग्रोऽभूत्सततोत्थितः ॥ ५८७ ॥
दीर्घदर्शी श्रियं भुङ्क्ते नाममात्रं नृपो नृपः ।
जनप्रवादं श्रुत्वेति सोऽभूच्चिन्ताकुलस्ततः ॥ ५८८ ॥
मेधाविन्याथ संचिन्त्य भार्यया सह तां कथाम् ।
तीर्थयात्रापदेशेन ययावेको निशामुखे ॥ ५८९ ॥
([1]व्रजन्क्रमेण संप्राप्य तीरोपान्तं महोदधेः ।
निधिदत्ताभिधानेन सार्थवाहेन संगतः ॥ ५९० ॥
तेन संजातसौहार्दः सौवर्णद्वीपगामिना) ।
आरुह्य तत्प्रवहणं मध्यं प्राप महोदधेः ॥ ५९१ ॥
ततस्तत्र निवातेऽपि ददर्श सहसोत्थितम् ।
स्फटिकाचलशृङ्गाभं सलिलस्तम्भमुन्नतम् ॥ ५९२ ॥
पृथुं ददर्श तन्मध्ये कान्तं कनकपादपम् ।
पारिजातमिवोत्सृष्टं मन्थभीत्याब्धिना पुनः ॥ ५९३ ॥
विद्रुमस्त[2]म्भसुभगे चित्ररत्नलतोज्ज्वले ।
([3]तस्मिन्माणिक्यपर्यङ्के स्थितां कन्यां ददर्श सः) ॥ ५९४ ॥
पद्मरागाधरां नीललोलालकविभूषिताम् ।
मूर्तां रत्नाकरस्येव देवतां मौक्तिकस्मिताम् ॥ ५९५ ॥
तां दृष्ट्वा विस्मयोत्फुल्लस्तस्या गीतमथाशृणोत् ।
तन्मुखाम्भोजलुब्धानां भृङ्गाणामिव गुञ्जितम् ॥ ५९६ ॥
येन यदा यद्विहितं प्राप्तुमसौ तत्तदा स्वयं याति ।
आक्रम्य नीयते वा कर्मगुणैरायतैस्तत्र ॥ ५९७ ॥
देहभृतां किल सततं सर्वत्र शुभाशुभं याति ।
आमोदः कुसुमानां कीटमणीनामिवालोकः ॥ ५९८ ॥

१.,३. एतत्कोष्ठान्तर्गतपाठः क-पुस्तके त्रुटितः. २. 'स्कन्ध' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्मिन्कर्मक्षेत्रे येन यदुप्तं स एव तद्भुङ्क्ते।
लभते नान्धेन धृतं चक्षुष्मानप्युपायेन॥ ५९९॥
इति वीणास्वनजुषा गीतेन श्रवणामृतम्।
विकीर्य तरुपर्यङ्कसहिता सा तिरोदधे॥ ६००॥
ततस्तद्दर्शनाश्चर्यनिश्चलं दीर्घदर्शिनम्।
कर्णधारो विहस्याह सहेलं बर्बराभिधः॥ ६०१॥
किं विस्मितोऽसि कन्यैषा सदैवात्र प्रदृश्यते।
ज्ञायते नाम शीलं वा कुलं वास्या न केनचित्॥ ६०२॥
इति ब्रुवाणे शनकैः कर्णधारे महाद्भुतम्।
पवनस्यानुकूल्येन द्वीपं प्राप स सार्थपः॥ ६०३॥
कृतकृत्ये गृहं प्राप्ते तस्मिन्रत्नवति क्षणात्।
तद्वेश्मनि चिरं स्थित्वा मन्त्री स्वनगरं ययौ॥ ६०४॥
अत्रान्तरे यशःकेतुस्तद्वियोगाग्नितापितः।
आगतो दीर्घदर्शीति विज्ञप्तो द्वाररक्षिणा॥ ६०५॥
ततो नरपतिः क्षिप्रं हृष्टस्तेन समागतः।
मेने वराकं त्रैलोक्यराज्यं विस्तारिलोचनः॥ ६०६॥
तमपृच्छत्परिष्वज्य परित्यज्य गतोऽसि किम्।
गृहं बन्धुजनं भार्यां श्रियं मां च निरादरः॥ ६०७॥
इति राजवचः श्रुत्वा पुण्यतीर्थार्थितां वदन्।
समुद्रदृष्टमाश्चर्यं दिव्यकन्यामवर्णयत्॥ ६०८॥
तां निशम्य नवोत्कण्ठानिर्भरोऽभून्महीपतिः।
श्रुतो ह्येव विशत्यन्तः प्राग्जन्मदयितो जनः॥ ६०९॥
स दीर्घदर्शिने राज्यं न्यासीकृत्य स्मरातुरः।
द्रष्टुं शशाङ्कवदनां भिक्षुवेषोऽम्बुधिं ययौ॥ ६१०॥
सरित्पुराकरारण्यग्रामशैलान्समुत्तरन्।
क्रमाच्छ्रीपर्वतं प्राप्य नत्वा देवीं हरिप्रियाम्॥ ६११॥

१. 'मणि' क. २. 'न्महाद्बुद्धे' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुशनाभेन मुनिना दयितां प्राप्स्यसीत्यथ ।
कृताश्वासस्तदादिष्टं सार्थवाहं समभ्ययात् ॥ ६१२ ॥
लक्ष्मीदत्ताभिधानस्य तूर्णं प्रवहणं ततः ।
स समारुह्य जलधेर्मध्यं प्राप्य प्रियाशया ॥ ६१३ ॥
तत्र वैडूर्यशिखराकारकल्लोलमालिते ।
समुत्थिते जलस्तम्भे ददर्श मणिपादपम् ॥ ६१४ ॥
धात्रा वैचित्र्यनिर्माणरम्योपकरणश्रियम् ।
निधानमिव रक्षायै हस्ते न्यस्तं महोदधेः ॥ ६१५ ॥
तस्य कल्पतरोः स्कन्धे गायन्तीं दिव्यकन्यकाम् ।
निषण्णां रत्नपर्यङ्के ददर्शानङ्गमङ्गलाम् ॥ ६१६ ॥
लावण्यपुण्यनिर्मज्जद्गात्रलेखां महोदधेः ।
सुधाकल्लोलकलितां[1] पुनर्लक्ष्मीमिवोद्गताम् ॥ ६१७ ॥
वीक्ष्य तां सोऽभवद्भूरिकम्पप्रमदविस्मयः ।
अहो रूपमहो कान्तिरित्यालोलितकन्धरः ॥ ६१८ ॥
लयं तालानुगं चित्रपदमालास्थितस्वरम् ।
संगीयतां निमज्जन्तीं सवृक्षां वीक्ष्य सोऽब्रवीत् ॥ ६१९ ॥
जय भगवञ्शशिकौस्तुभकमलापीयूषवारुणीसूते ।
रत्नाकर मम कान्तां लोचनपात्रामृतं वितर ॥ ६२० ॥
उक्त्वेति चिक्षेप नृपः सहसा सलिले तनुम् ।
([2]स्मरदावाग्निनिर्वाणधियेवाहितसाहसः ॥ ६२१ ॥
सार्थवाहोऽपि तं वीक्ष्य निमग्नं मकराकरे ।
ममज्ज दुःखसलिले तद्वियोगोरुसागरे) ॥ ६२२ ॥
पूर्वभार्यां समन्वेष्टुं यशःकेतुरसौ नृपः ।
प्रविष्टोऽब्धिमिति क्षिप्रमुच्चचार वचस्ततः ॥ ६२३ ॥
तदाकर्ण्य समाश्वास्य कृतकार्यो वणिक्पतिः ।
प्रययावानुकूल्येन मरुतां स्वपुरं शनैः ॥ ६२४ ॥

---

१. 'रचितां' क. २. एतत्कोष्ठान्तर्गतपाठः क-पुस्तके त्रुटितः.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नृपोऽप्यम्भोधिमाविश्य काञ्चनोदारमन्दिरे।
(ददर्श[1] निर्जनं रत्नप्राकारप्रवरं पुरम्) ॥ ६२५ ॥
शून्यामन्वेष्य यत्नेन माणिक्यभवनावलीम्।
हेमवेश्मन्यपश्यत्तां मणिपर्यङ्कशायिनीम् ॥ ६२६ ॥
ददर्शांशुकमुद्धाट्य ततोऽस्याः संमुखाम्बुजम्।
नलिन्या इव नीहारं विनिवार्य दिवाकरः ॥ ६२७ ॥
सा प्रबुद्धा नरपतिं वीक्ष्य विस्मितमानसा।
प्रदध्यौ छन्नवेषोऽयं चक्रवर्तिपदोचितः ॥ ६२८ ॥
ध्रुवं राजा यशःकेतुः श्रीमान्कमललोचनः।
विचिन्त्येत्यभवत्कम्पतरला स्मरवल्लरी ॥ ६२९ ॥
संबभार[2] समुद्भूतसंभूतपुलकाङ्कुरा।
अङ्गैरनङ्गसुभगैः कदम्बमुकुलश्रियम् ॥ ६३० ॥
ततो विदित[3]सत्कारस्तया लज्जाविलोलया।
पृष्टो निजकथामुक्त्वा पर्यङ्के निषसाद सः ॥ ६३१ ॥
नामाभिजनमाकर्ण्य यशःकेतुरिति स्फुटम्।
सस्वेदकम्पा लोलाम्बुबिम्बितेव विधोः कला ॥ ६३२ ॥
तेनाथ राजभृङ्गेण तैस्तैः किमपि वर्णनैः।
बालिका कलिकेवासौ कृता हर्षविकासिनी ॥ ६३३ ॥
ततस्तयोरभूत्स्पष्टं संभोगाभिमुखं मनः।
यूनोः प्रथमसङ्गेऽपि लज्जां न क्षमते स्मरः ॥ ६३४ ॥
अहं नाथ त्वदायत्ता विना कृष्णचतुर्दशीम्।
अष्टमीं चेति विदधे सा तेन सह संविदम् ॥ ६३५ ॥
पेशला सह तेनैषा प्रौढा समुचितं रतम्।
इतीवाराविणीं राजा चकर्ष रशनां ततः ॥ ६३६ ॥
हृते तेन स्मररसात्सहसा जघनांशुके।
आलोकनभयात्तस्य सा गाढालिङ्गनं व्यधात् ॥ ६३७ ॥

१. एतत्कोष्ठान्तर्गतपाठः क-पुस्तके त्रुटितः. २. 'सा ब' क. ३. 'हि' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अविभागममर्यादमपास्तविनयक्रमम् ।
ततस्तयोः किमप्यासीद्विकल्पविरतं रतम् ॥ ६३८ ॥
विस्रस्तमाल्यधम्मिल्लं स्वेदमज्जद्विशेषकम् ।
व्यामीलितार्धनयनं तस्याः कान्तमभूद्वपुः ॥ ६३९ ॥
एवं प्रतिनिशं तेन रममाणा सुमध्यमा ।
ज्ञात्वा चतुर्दशीं प्राप्तां प्रययौ तदनुज्ञया ॥ ६४० ॥
नलिनीमण्डपे नास्मिन्प्रवेष्टव्यं त्वया विभो ।
उक्त्वेति तस्यां यातायामन्वगात्सोऽप्यलक्षितः ॥ ६४१ ॥
गत्वाथ खड्गी दूरस्थो ददर्श जलदत्विषा ।
राक्षसेन निगीर्णां[1] तां राहुणेव विधोः कलाम् ॥ ६४२ ॥
दृष्ट्वा वृत्तान्तसंत्रासन्नाम्नातीतेन रक्षसा ।
ग्रस्तां दुःखाच्च कोपाच्च खड्गेनाथ जघान तम् ॥ ६४३ ॥
तत्कृपाणाग्रनिकृत्तं शिरस्तस्यापतद्भुवि ।
शृङ्गं नीलाचलस्येव पिङ्गकेशदवानलम् ॥ ६४४ ॥
ततस्तस्योदरदरीदेहगर्ताद्[2]विनिर्गता ।
क्षीणशापा निजकथां स्मृत्वा कान्तमुवाच सा ॥ ६४५ ॥
अहं मृगाङ्कवत्याख्या विद्याधरमहीपतेः ।
ज्येष्ठा मृगाङ्कसेनस्य पुत्री पुत्रसहस्रिणः ॥ ६४६ ॥
न भुङ्क्ते मां विना नित्यं स दिव्यरसभोजनम् ।
अप्यात्मसदृशैः पुत्रैर्बहुभिः परिवारितः ॥ ६४७ ॥
गौरीव्रते कदाचित्तु चतुर्दश्यामुपोषिता ।
अहं तेनाभवत्तातो दिनमेकमभोजनः ॥ ६४८ ॥
तत्कोपान्मां शशापासौ चतुर्दश्यां निशाचरः ।
अष्टम्यां च सदैव त्वां भुक्त्वा त्यक्ष्यत्यवीक्षिताम् ॥ ६४९ ॥
शून्ये च स्थास्यसि चिरं भ्रष्टविद्या रसातले ।
अङ्गराजेन भर्त्रा ते हतो यावन्न राक्षसः ॥ ६५० ॥

---

१. 'विशीर्णां' क. २. 'र्भो' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यहं गुरुणा शप्ता तच्च रक्षस्त्वया हतम् ।
नष्टशापा सविद्या च स्वस्ति गच्छाम्यहं विभो ॥ ६५१ ॥
इति श्रुत्वाङ्गनृपतिर्वियोगचकितोऽवदत् ।
गमिष्यसि मया सुभ्रु विहृत्य दिनसप्तकम् ॥ ६५२ ॥
इति तेनार्थिता मुग्धा प्रेम्णा सा हरिणेक्षणा ।
सिषेवे रुचिरोद्याने तं हेमकदलीवने ॥ ६५३ ॥
ततस्तया सह नृपस्तस्मिन्पुष्करिणीजले ।
निमज्य केलिरभसादुन्ममज्ज निजात्पुरात् ॥ ६५४ ॥
दीर्घदर्शिनमासाद्य निवेद्यास्मै निजां कथाम् ।
भेजे राज्यं प्रियाप्राप्तिविस्तारितमहोत्सवः ॥ ६५५ ॥
अत्रान्तरे नभो गन्तुमुद्यता दिनसप्तके ।
प्रयाते सा न सस्मार विद्यां मानुषसंगमात् ॥ ६५६ ॥
विद्याविहीनां तां ज्ञात्वा ननर्त जगतीपतिः ।
तां सेवमानः सुचिरं विललास सुलोचनाम् ॥ ६५७ ॥
तस्मिन्नेवोत्सवदिने दीर्घदर्शी व्यपद्यत ।
अज्ञातकारणः सर्वैर्निशीथे स्फुटिताशयः ॥ ६५८ ॥
कथयित्वेति वेतालः पृष्टवान्पृथिवीश्वरम् ।
मन्त्रिणः प्रलये तस्य हेतुं ब्रूहि महीपते ॥ ६५९ ॥
किं वा दृष्ट्वा नृपतिना तामानीतां मृगेक्षणाम् ।
प्राप्ता मयैव किं नेयमित्यभूत्तस्य चेतसि ॥ ६६० ॥
उत प्राप्तं मया राज्यं राजा तस्मिन्महार्णवे ।
मग्नोऽपि नष्टः किमिति किं तु दुःखार्दितोऽभवत् ॥ ६६१ ॥
राजन्कथय मे तत्त्वमिति पृष्टोऽब्रवीन्नृपः ।
स मन्त्री प्रलयं यातो येन तच्छ्रूयतां सखे ॥ ६६२ ॥
स्वभावरागिणा प्राप्ता राज्ञा दिव्येयमङ्गना ।
कष्टमुत्सन्नकार्योऽयमित्यभूत्तस्य हृद्गतम् ॥ ६६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रुत्वेति वेतालं क्षिप्रमन्तर्हितं पुनः ।
आदाय वृक्षशाखाग्राज्जगाम जगतीपतिः ॥ ६६४ ॥

इति द्वादशो वेतालः ॥ १४ ॥

ततोऽवदत्स्कन्धगतो धरेशं भीषणाकृतिः ।
शृणु राजन्कथामेकां यस्यां ते कोऽपि संशयः ॥ ६६५ ॥
वाराणस्यां शिवस्वामी[1] द्विजन्माभून्महाजनः ।
ऐश्वर्यलालितस्तस्य हरिस्वामी सुतोऽभवत् ॥ ६६६ ॥
तस्य लावण्यवत्याख्या मनस्तारुण्यशालिनी ।
प्रिया बभूव त्रैलोक्यललामललिताकृतिः ॥ ६६७ ॥
स कदाचित्तया कान्तिसरिता सौधशेखरे ।
सुष्वाप केलिशयने संभोगसुभगोत्सवे ॥ ६६८ ॥
अत्रान्तरे रतश्रान्तां तां ददर्श नभश्चरः ।
सुप्तां मदनवेगाख्यः प्रियां जायां द्विजन्मनः ॥ ६६९ ॥
तस्या विवसनं दृष्ट्वा करिणीदन्तनिर्मलम् ।
स्तनोरुजघनाभोगं बभूव स मनोभुवः ॥ ६७० ॥
अलक्षितो जहाराशु ततस्तामायतेक्षणाम्[2] ।
अदृष्टपूर्वसंरम्भकम्पमानां मनोजवः ॥ ६७१ ॥
प्राप्तः प्रबुद्धो दयितामपश्यन्नथ दुःखितः ।
अभवद्ब्राह्मणयुवा वियोगविषमूर्च्छितः ॥ ६७२ ॥
हा सुन्दरि सुधास्यन्दमन्दिरं क्वापि सुस्मितम् ।
पुनरिन्दुमिवानन्दबन्धु द्रक्ष्यामि ते सुखम् ॥ ६७३ ॥
इति प्रलापमुखरः सुहृत्स्वजनशोकदः ।
उन्मत्त इव बभ्राम तत्र तत्र स्मरातुरः ॥ ६७४ ॥
संप्राप्य कृष्णपक्षेन्दुतानवैकोपमागताम् ।
त्यक्त्वा स्वनगरं प्रायाद्देहं देहीश्वरो यथा ॥ ६७५ ॥

---

१. 'देवस्वा' क. २. 'रतम्लानायते' क.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भोगो रोगो विषं वेश्म सर्पबन्धश्च बान्धवाः ।
दग्धारण्यं जगच्चेदं वियोगव्यासचेतसाम् ॥ ६७६ ॥
स सूर्यकिरणाश्लिष्टः कृष्यमाण इवानिशम् ।
भ्रान्त्वा सर्वाणि तीर्थानि क्षुत्क्षामः पांसुधूसरः ॥ ६७७ ॥
श्रीमतः पद्मनाभस्य सत्रशालां द्विजन्मनः ।
प्रविश्य दत्तं पत्न्या वै परमान्नमवाप सः ॥ ६७८ ॥
प्रस्तुते नलिनीतीरे न्यग्रोधस्य तरोरधः ।
भोक्तुं तत्र दिवानक्तं न दिशोऽप्यैक्षत क्षुधा ॥ ६७९ ॥
अत्रान्तरे श्येनहृतः पन्नगोऽगादमूर्च्छितः ।
विषौघश्यामलां लालां तस्य तत्याज भोजने ॥ ६८० ॥
तदनालोकितं भुक्त्वा पञ्चतां स ययौ द्विजः ।
विधौ हि वामतां याते सर्वमेति विपर्ययम् ॥ ६८१ ॥
तं त्यक्तजीवितं ज्ञात्वा सत्रदोऽन्नाधिपो निजाम् ।
साध्वीं विवासयामास वधूं तद्भोजनक्रुधा ॥ ६८२ ॥
कथयित्वेति वेतालः पप्रच्छ नृपतिं पुनः ।
ब्रह्महत्या नरपते कस्य सा कथ्यतामिति ॥ ६८३ ॥
राजा जगाद सर्पोऽसौ श्येनेनात्यन्तपीडितः ।
परतन्त्रो विषोत्सर्गे[1] कथं नामापराध्यति ॥ ६८४ ॥
श्येनोऽपि दैवनिर्दिष्टं भोक्तुमामिषमुद्यतः ।
बुभुक्षितो निर्विवेकी[2] केन पापीति कथ्यते ॥ ६८५ ॥
अन्नदानपतिः[3] सत्यं सभार्यः सोऽप्यकिल्बिषः ।
किं च[4] जानन्वदेद्यः स सत्यं तत्पापभाजनम् ॥ ६८६ ॥
इति तावदहं मन्ये कथं वेताल मन्यसे ।
श्रुत्वेत्यन्तर्हितः सोऽथ तरौ[5] पुनरलम्बत ॥ ६८७ ॥

इति त्रयोदशो वेतालः ॥ १५ ॥

---

१. 'सृजेल्लालाम्' ख. २. 'कः' ख. ३. 'सत्र' ख. ४. 'किं लजानन्वदेदेतद्यः स तत्पापभाजनम्' क. ५. 'ततः' ख.

Nepal Sanskrit University, Balmeeki Campus. Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततस्तमादाय ययौ तथैव वसुधाधिपः ।
([1]सं च स्कन्धस्थितः प्राह कथां भूमिपते शृणु) ॥ ६८८ ॥
वीरकेतुरभूच्छ्रीमानयोध्यायां महीपतिः ।
यत्प्रतापानलः कोऽपि राज्ञां जज्वाल मानसे ॥ ६८९ ॥
वभूव यस्य नगरे रत्नदत्ताभिधो वणिक् ।
तस्य रत्नवती नाम तनयाभून्मनोरमा ॥ ६९० ॥
रूपलावण्यललिता नवयौवनशालिनी ।
प्रत्याख्यातविवाहा सा बभूव द्वेषिणी नृषु ॥ ६९१ ॥
अत्रान्तरे नरपतिश्चौरविप्रकृते जने ।
वीरो वै निर्ययौ रात्रौ द्रष्टुं नगरचेष्टितम् ॥ ६९२ ॥
ततस्तमपि सोऽपश्यच्चौरं तालमिवोन्नतम् ।
निःशब्द[2]र्जनसंचारं क्वचित्पार्श्वविलोकिनम् ॥ ६९३ ॥
क्वचिन्नि[3]र्भृतनिःश्वासं क्वचिद्व[4]क्रीकृताकृतिम् ।
यक्ष्माणमिव तृष्णाढ्यं दा[5]वाग्निमिव दुःसहम् ॥ ६९४ ॥
वियोगमिव सोच्छ्वासं कल्पान्तमिव दा[6]हिनम् ।
सर्वस्वापहरं घोरं क[7]ल्पान्तमिव विप्लुतम् ॥ ६९५ ॥
संधिच्छेदेषु कुशलं प्रच्छन्नमिव दुर्जनम् ।
विलोक्य तं नृपोऽ[8]वादीत्स्वैरं विश्वासघातकम् ॥ ६९६ ॥
कस्त्वमस्मिन्निरालोके सखे चरसि निःसखः ।
श्रुत्वेत्युवाच स व्याजाद्देवीपुत्रोऽहमीदृशः ॥ ६९७ ॥
कस्त्वमित्यपि तेनोक्तस्तदेव क्षितिपोऽभ्यधात् ।
एहि तुभ्यं प्रयच्छामि द्रविणं गर्तसंचितम् ॥ ६९८ ॥
इत्युक्त्वा स्वगृहं चौरस्तं निनाय वधोद्यतः ।
बहिर्निधाय तं वेश्म प्रविष्टे धनहारिणि ॥ ६९९ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः २. 'लघु' ख. ३. 'द्रुतविनिःश्वासं ख. ४. 'शीक्र' ख. ५. 'दुर्भिक्षमिव' ख. ६. 'दारुणम् ख. ७. 'क्षपासंचरणं प्रियम्' ख. ८. 'पृच्छँश्चौरं' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्येत्य वत्सला प्राह नृपं तद्गृहचेटिका।
केन त्वं मृत्युवदने प्रेषितो भद्र गम्यताम्॥ ७०० ॥
विश्वासघातकश्चौरस्त्वामयं हन्तुमुद्यतः।
इति श्रुत्वा ययौ राजा राजधानीमलक्षितः॥ ७०१ ॥
प्रभाते तूर्णमुत्थाय सज्जीकृतबलाधिपः।
चौरं सुदुर्जयं युद्धे स्वयं जग्राह तं नृपः॥ ७०२ ॥
ततोऽपरक्तसंसिक्तो नीतो राजाज्ञया क्षणात्।
निग्रहाय तया दृष्टो वणिक्पुत्र्या ससंभ्रमम्॥ ७०३ ॥
तद्दृष्ट्वा सहसा जातरागा जनकमभ्यधात्।
अयं वृतो मया तात वीरो मान्योऽधिको मम॥ ७०४ ॥
इति तद्वचनं श्रुत्वा सनिर्बन्धं पुनः पुनः।
कथंचित्स नृपं गत्वा तन्मोक्षायावदद्धनम्॥ ७०५ ॥
ततो राजा विहस्याह यश्चौरस्यास्य रक्षिता।
सोऽपि वध्यो मम व्यक्तं पापी पापसमाश्रयात्॥ ७०६ ॥
इति क्ष्मापतिना तस्मिन्निषिद्धे तत्सुता ययौ।
चौरमेवानुमरणे निर्बन्धे निहितेक्षणा॥ ७०७ ॥
सा स्मशानमथासाद्य धृतं शूले ददर्श तम्।
ऊर्ध्वाननाक्षमचिरादाप्तैश्वर्यमिवाधनम्॥ ७०८ ॥
स किंचिच्छेषजीवो[1]ऽथ तां दृष्ट्वा श्रुततत्कथः।
मुक्ताश्रुबिन्दुनिकरो विहस्यात्मानमत्यजत्॥ ७०९ ॥
ततस्तेन समारूढां चितां तां वीक्ष्य शंकरः।
केलिप्रियो वरं तस्यै स्मशाननिलये ददौ॥ ७१० ॥
शंभोर्वरात्पुत्रशतं पित्रे योग्यमयाचत।
अजीवयच्च भर्तारं श्रिया धर्मेण चावृ[2]तम्॥ ७११ ॥
ततः स सहसावाप्तजीवितः प्राप्य तां प्रियाम्।
सेनापतिः कृतो राज्ञा ननन्द सुभटाग्रणीः॥ ७१२ ॥

१. 'जीवशेषोऽ' ख. २. 'संवृ' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कथयित्वेति वेतालः पप्रच्छ छलसंमुखः ।
राजन्रुरोद किमसौ जहास च ततोऽनु किम् ॥ ७१३ ॥
इति पृष्टो नृपः प्राह श्रुत्वा वणिजमुद्यतम् ।
प्रत्याख्यातुं विधिवशाद्राज्ञोऽकारणबान्धवम् ॥ ७१४ ॥
सर्वथा दैवलिखितं प्रमार्ष्टुं कस्य कः क्षमः ।
इति ध्यात्वा रुरोदासौ तत्स्त्रीवृत्तं जहास च ॥ ७१५ ॥
इत्याकर्ण्यैव वेता[१]लो गत्वा पुनरलम्बत ।
राजापि तं समालम्ब्य प्रययावचलाशयः ॥ ७१६ ॥

इति चतुर्दशो वेतालः ॥ १६ ॥

सोऽथ स्कन्धस्थितः प्राह शृणु विश्वंभराप्रभो ।
त्वां विना संशयानेतान्को हि नरश्छेत्तुमीश्वरः ॥ ७१७ ॥
नेपालविषये श्रीमान्य[२]शःकेतुरभून्नृपः ।
पुत्री शशिप्रभा नाम तस्याभूद्भूषणं र[३]तेः ॥ ७१८ ॥
तां वसन्तोत्सवे कान्तां कदाचिद्द्विजपुत्रकः ।
कुसुमावचयेऽपश्यन्मनःस्वामी सुलोचनाम् ॥ ७१९ ॥
यस्या लावण्यसलिलैरुह्यमान इवानिशम् ।
आलम्बते रोमलतां त्रिवलीकूलजां स्मरः ॥ ७२० ॥
तां वीक्ष्य कान्तिस[४]र्वस्वकोशं कुसुमधन्वनः ।
बि[५]म्बाधररुचिस्फारसिन्दूरेणेव मुद्रिताम् ॥ ७२१ ॥
सोऽभवन्मन्मथाक्रान्तः संक्रान्तः खे[६]दवारिणि ।
संभ्रान्तो मोहगहने विश्रान्तः पुलकोत्तरे ॥ ७२२ ॥
अत्रान्तरे मदक्रोधान्निहताधोरणो गजः ।
आययौ मण्डलाकारकरकृष्टमहाद्रुमः ॥ ७२३ ॥
प्रेर्यमाणः स पवनैरिव प्रलयवारिदः ।
ज[७]गर्जोग्रं गलगुहागर्भगम्भीरविभ्रमम् ॥ ७२४ ॥

---

१. 'लस्तरौ पुनरलम्ब' ख. २. 'न्त्रीरकीर्तिर' ख. ३. 'वेः' ख. ४. 'लावण्य' ख. ५. 'विद्याधररु' ख. ६. 'खे' ख. ७. 'अनार्यायां ग' ख.

ततस्तद्भयवि[1]त्रस्तां कम्पासिञ्जानमेखलाम् ।
दैवेन दत्तावसरः स युवा तामसादे[2]यत् ॥ ७२५ ॥
रक्षिता द्विजपुत्रेण तत्र सा तरलेक्षणा ।
स्थित्वा क्षणं विश्रमभूर्जगामान्तःपुरं निजम् ॥ ७२६ ॥
सोऽपि स्मरशरासारपक्षाँ[3]ग्रपवनैरिव ।
कम्पमानः प्रचलितं बभार विरहानलम् ॥ ७२७ ॥
क्षीणेन्दुरिव बिभ्राणः शरकाण्डविपाण्डुरम् ।
सकान्ति प्रययौ मित्रसदनं जीविताशयः ॥ ७२८ ॥
अवाप्य मूलदेवाख्यं शशिना सह संस्थितम् ।
वँ[4]हुधूर्तशतावासं प्रणनाम स निःश्वसन् ॥ ७२९ ॥
विभ्रष्टँ[5]वदनच्छायं मूलदेवोऽपि वीक्ष्य तम् ।
हसन्कंदर्पसर्पेण दष्टोऽसीति तमब्रवीत् ॥ ७३० ॥
तद्वृत्तान्तमथाकर्ण्य स योगँ[6]घटिकां ददौ ।
स्त्रीरूपकारिणीं तस्मै स्वयं वृद्धो बभूव ह ॥ ७३१ ॥
तं कान्तकन्यकारूपं समादाय द्विजात्मजम् ।
वृद्धर्षिरूपः प्रययौ मूलदेवो महीपतिम् ॥ ७३२ ॥
यथोचिताप्तसत्कारो यँ[7]शःकेतुमुवाच सः ।
राजन्स्वँ[8]पुत्रकायेयमानीता कन्यका मया ॥ ७३३ ॥
तरुणः क्वापि यातोऽसौ तमन्वेष्टुं व्रजाम्यहम् ।
न्यासभूतामिमां कन्यां जगद्रक्षाक्षम प्रभो ।
रक्षेत्युक्त्वा क्षणं दम्भादभवन्मीलितेक्षणः ॥ ७३४ ॥
शशिप्रभामथाहूय नरनाथो निजात्मजाम् ।
आदिदेश द्विजसुता रक्ष्येयमिति संभ्रमात् ॥ ७३५ ॥
मुनिवेषे प्रयातेऽथ तस्मिन्नन्तःपुरे स्थितः ।

---

१. 'चित्रस्थां' ख. २. 'न्लयत्' ख. ३. 'ग्रा' ख. ४. 'धूर्त धू' ख. ५. 'ष्टं वदनं क्षामं' ख. ६. 'गाङ्गुलिकां' ख. ७. 'वीरकान्ति(कीर्ति)रुवाच सः' ख. ८. 'न्सपुत्रकार्येय' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स कूटकन्यकारूपो मनःस्वामी व्यचिन्तयत् ॥ ७३६ ॥
अहो नु धूर्तधुर्येण किमप्युपकृतं मम ।
यन्मयेयं सुवदना दृष्टा तैरेव लोचनैः ॥ ७३७ ॥
इति ध्यात्वा सविस्रम्भं तां कदाचिदुवाच सः ।
सखि त्वं सततोच्छ्वासा किमुद्विग्नेव लक्ष्यसे ॥ ७३८ ॥
ब्रूहीति कन्यारूपेण पृष्टा तेन सुमध्यमा ।
प्राह स्तनतटे हारं कुर्वाणा बाष्पनिर्झरैः ॥ ७३९ ॥
सखि दृष्टो मयोद्याने कुञ्जरत्रस्तया युवा ।
यदाकृतिसमुल्लेखे संकल्पोऽपि न पण्डितः ॥ ७४० ॥
तस्य लोचनसंचारचतुरेण[1] किमप्यहम् ।
विषेणेव भुजङ्गस्य मूर्च्छिता न लभे धृतिम् ॥ ७४१ ॥
स्वप्नेऽद्य तेन विहितो निर्वाच्यो मे रतोत्सवः ।
सखि सस्वेदपुलकैर्योऽङ्गैः किमपि सूच्यते ॥ ७४२ ॥
इत्याकर्ण्य मनःस्वामी धन्योऽस्मीति व्यचिन्तयत् ।
अपास्य योगगुटिकां बभूव पुरुषाकृतिः ॥ ७४३ ॥
प्रत्यभिज्ञाय तं सद्यः सुधासिक्तेव लज्जिता ।
तदालिङ्गनसंजातकम्पा साभूदनङ्गभूः ॥ ७४४ ॥
मनोरथैर्यदभ्यस्तं हृदयेन यदार्थितम् ।
मन्मथेन यदादिष्टं तयोस्तदभवद्रतम् ॥ ७४५ ॥
तद्गाढसुरताश्लेषग्लपिताप्यथ सात्यजत् ।
संतापशान्तिं सहसा निर्वहन्हि मनःसुधाम् ॥ ७४६ ॥
सततं सेवमानस्तां स दिवा कन्यकाभवत् ।
राजपुत्री च कालेन गर्भमाधत्त पुष्पिता ॥ ७४७ ॥
अत्रान्तरे मातुलेयी स्वसा[2] तस्याः सुमध्यमा ।
पित्रा मृगाङ्कवत्याख्या वितीर्णा मन्त्रिसूनवे ॥ ७४८ ॥

---

१. 'चातुर्येण' ख. २. 'सुता' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदुत्सवे मातुलेन राजपुत्री निमन्त्रिता।
कूटसख्या तया सार्धं प्रययौ जनकाज्ञया॥ ७४९॥

तत्र मन्त्रिसुतो दृष्ट्वा कान्तां तां कूटकन्यकाम्।
बभूव मन्मथोन्मादविधुरो नष्टचेतनः॥ ७५०॥

तं तु मूर्खनृपो ज्ञात्वा वल्लभं मन्त्रिणः सुतम्।
विप्रनिःक्षेपितां कन्यां तस्मै सभ्यगिरा ददौ॥ ७५१॥

वितीर्यमाणा सा प्राह क्रमः कोऽयं महीपते।
न्यासीकृताहं विप्रेण यदन्यस्मै समर्पिता॥ ७५२॥

अथवा बलिनो राज्ञः स्वाधीनैवास्मि किं स्वयम्।
तीर्थयात्रां मन्त्रिसुतः कृत्वा स्पृशतु मामिति॥ ७५३॥

ततस्तां प्राप्य तीर्थानि ययौ मन्त्रिसुतः क्षणात्।
स्त्रीरूपः स तु तद्गेहे तस्थौ तद्भार्यया सह॥ ७५४॥

तयापि जातविश्वासो दर्शयित्वा निजाकृतिम्।
लेभे तत्सुरतं हृष्टो मनःस्वामी दिवानिशम्॥ ७५५॥

मूलदेवोऽथ राजानं ययाचे निजकन्यकाम्।
शापभीतस्ततो राजा कम्पमानो निरुत्तरः।
विविच्य मन्त्रिभिस्तस्मै पुत्रार्थं स्वसुतां ददौ॥ ७५६॥

ततः कपटपुत्राय शशिने तां नृपात्मजाम्।
दापयित्वा प्रतिययौ मूलदेवो महामतिः॥ ७५७॥

स व्रजञ्शशिना सार्धं राजपुत्र्या च वर्त्मनि।
मनःस्वामिनमासाद्य तद्वृत्तान्तमथाशृणोत्॥ ७५८॥

मनःस्वामी ततः प्राह धूर्तेश त्वदनुग्रहात्।
अभीष्टं मम [2]संपन्नं दीयतां मे नृपात्मजा॥ ७५९॥

---

१. 'रागामृततरङ्गितम्॥ ततः कदाचित्तं ज्ञात्वा मन्त्रिपुत्रं समागतम्। ययौ गृहीत्वा तज्जायां निशीथे तामलक्षत॥ अत्रान्तरे मूलदेवः शशिना सहितो नृपम्। मुनिस्त्वद्रूपमभ्येत्य ययाचे निजकन्यकाम्॥ शापभीतस्ततो' ख. २. 'संपूर्णं' ख.

Nepal Sanskrit University, Balmeeki Campus. Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गान्धर्वेण विवाहेन प्राप्तैषा सुन्दरी मया ।
अन्तर्वत्नी च संजाता मत्त एव सुमध्यमा ॥ ७६० ॥
इति श्रुत्वा शशी प्राह सेयं राज्ञा ममार्पिता ।
कन्यका जनकाधीना इति किं न श्रुतं मया ॥ ७६१ ॥
इत्थं तयोस्तद्विवादे मूलदेवोऽपि संशयम् ।
अवाप्य निर्णयस्थाने नो चेत्किंचिदधोमुखः ॥ ७६२ ॥
कथयित्वेति वेतालः पप्रच्छ वसुधाधिपम् ।
सा भार्या कस्य धर्मेण संशयो वार्यतां मम ॥ ७६३ ॥
इति पृष्टो नृपः प्राह शशी धर्मेण तत्पतिः ।
छन्नकामी मनःस्वामी पित्रा तस्मै न सार्पिता ॥ ७६४ ॥
श्रुत्वेत्यन्तर्हितः सोऽथ तरौ पुनरलम्बत ।
सोऽपि[2] स्कन्धस्थितः प्राह कथां शृणु महीपते ॥ ७६५ ॥

इति पञ्चदशो वेतालः ॥ १७ ॥

अस्ति श्रीकाञ्चनपुरी मूर्ध्नि गौरीगुरोर्गिरेः ।
रत्नप्राकारकिरणैरश्रान्तोल्लिखिताम्बरा ॥ ७६६ ॥
जीमूतकेतुस्तस्याभूद्विद्याधरपतिः पतिः ।
यस्याभूच्छेषयशसः प्रख्याता काप्यनन्तता ॥ ७६७ ॥
विद्याधरेन्द्रदुहिता भार्याभूत्तस्य संमता ।
कान्ता कनकवत्याख्या ख्यातिक्षेत्रं मनोभुवः ॥ ७६८ ॥
तेनाजनि सुतस्तस्यां कल्पवृक्षवराद्वरः ।
जीमूतवाहनो नाम समूहो गुणसंपदाम् ॥ ७६९ ॥
सोत्कण्ठं काञ्चनलताकुञ्जेष्वमरभूभृतः ।
गायन्ति त्यागसुभगं यस्य स्वर्गाङ्गणे यशः ॥ ७७० ॥
तं सर्वगुणसंपन्नमभिषिच्यात्मजं पिता ।
कल्पवृक्षं ददावस्मै नानासिद्धिसुधाफलम् ॥ ७७१ ॥

---

१. 'त्व' ख. २. इतः प्राक् ख-पुस्तके 'तं क्षितेः पतिरादाय संप्रायाद्गरुडोपमः' एवं पाठ उपलभ्यते.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कान्ताकटाक्षचपलं चपलं यौवनं धनम्।
जीवितं चेति स ध्यात्वा तमर्थिभ्यस्तरुं ददौ ॥ ७७२ ॥
तेन दारिद्र्यनाशाय जगति प्रतिपादितः।
हेम्ना संपूर्य निखिलं क्षणात्सोऽन्तर्दधे द्रुमः ॥ ७७३ ॥
कुलक्रमागते तस्मिन्कल्पवृक्षे व्ययीकृते।
अपूर्वत्यागिना तेन त्रिलोकी विस्मयं ययौ ॥ ७७४ ॥
(ज्ञात्वा तं प्रतिसामन्ता रहितं सुरशाखिना।
तद्राज्यहरणोद्योगे बभूवुः संहता मिथः ॥ ७७५ ॥
जीमूतवाहनो ज्ञात्वा विद्यया तद्विचेष्टितम्।
तद्वेधाकूणितमना राज्यं तत्याज निस्पृहः ॥ ७७६ ॥
स पित्रा सह मात्रा च तपसे सिद्धसेवितम्।
मलयं खेचरवधूविलासनिलयं ययौ) ॥ ७७७ ॥
खेलद्भुजङ्गकटकं सिद्धमण्डलसेवितम्।
चण्डीपतिमिवोत्सर्पन्नीलकण्ठप्रभावनम् ॥ ७७८ ॥
संचरत्सिद्धललनाचरणाम्भोजकान्तिभिः।
बिभ्राणामिव पर्यङ्कसक्ताब्धेर्विद्रुमावलीम् ॥ ७७९ ॥
निर्भरस्मेरहाराङ्कमकरन्दोज्ज्वलांशुकम्।
स त्वाद्यं भूभृतां धुर्यं चन्दनागरुभूषितम् ॥ ७८० ॥
सं प्राप्य सर्वसिद्धीनामाश्रयं विषयं श्रियः।
पित्रोः सपर्यानिरतस्तस्थौ जीमूतवाहनः ॥ ७८१ ॥
कदाचिदथ विश्रम्भसारिणा सुहृदा सह।
स्वैरं मधुकराख्येन चचारोपवनेषु सः ॥ ७८२ ॥
स तत्र कान्तं कुसुमकरन्दं नाम काननम्।
प्रविश्यापश्यदुच्छ्वासिसौरभाः पुष्पवल्लरीः ॥ ७८३ ॥
यत्र खेचरनारीणां तारानूपुरराविभिः।
अशोकाश्चरणाघातैरुत्फुल्ला भान्ति रागिणः ॥ ७८४ ॥

---

१. 'विक्षेपचपलं' ख. २. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. ३. 'तं' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्र विद्याधरवधूमधुगण्डूषनिर्भरैः[1] ।
जृम्भेवारम्भि बकुलैः पुष्पाननविकाशिभिः ॥ ७८५ ॥
यत्र दिव्याङ्गनातुङ्गस्तनोत्सङ्गतरङ्गिणः ।
मन्दारमकरन्दाढ्याः सुन्दरा वान्ति वायवः ॥ ७८६ ॥
यत्रोद्धूतालिपटलं[2] विलोक्य घनविभ्रमम् ।
नृत्यन्ति हेमकदलीकुञ्जेषु शिखियोषितः ॥ ७८७ ॥
उत्कण्ठाकोमलं यत्र गीतं किन्नरयोषितः ।
शृण्वन्ति निश्चलाः साश्रुनयना हरिणाङ्गनाः ॥ ७८८ ॥
ददर्श तत्र कैलासशिखरस्फारविभ्रमम् ।
गङ्गायितपताकाङ्कं गौर्याः प्रासादमुन्नतम् ॥ ७८९ ॥
स्वयमेत्य सितच्छायास्पष्टीकृतदिगन्तरम् ।
(स्थितं[3] दुहितृवात्सल्यादिव तत्र हिमाचलम्) ॥ ७९० ॥
देवीगर्भगृहे तस्मिन्गीतं वीणास्वनाश्रितम् ।
शुश्राव श्रोत्रपीयूषं हृदयानन्दनिर्झरम् ॥ ७९१ ॥
तच्छ्रुत्वा कौतुकाकृष्टः प्रविश्य गिरिजालयम् ।
कन्यामपश्यत्संसारसारं सरसिजेक्षणाम् ॥ ७९२ ॥
प्रवालपल्लवच्छायपादाम्बुजयुगं बभौ ।
रागसागरसंचारादिव लग्नारुणद्रवम् ॥ ७९३ ॥
लावण्यनलिनीबालमृणालयुगलोपमे ।
जङ्घाकाण्डद्वये तस्याः कान्तिहंसी व्यरोचत ॥ ७९४ ॥
विलासबर्हिकदलीदण्डावूरू बभार सा ।
पुष्पायुधपुरीकान्तदन्ततोरणविभ्रमे ॥ ७९५ ॥
पुलिने कान्तिसरितः पर्यङ्कशयने रतेः ।
मेखलापरिखं यस्या जघनं मान्मथं पुरम् ॥ ७९६ ॥

---

१. 'र्झ' ख. २. 'पुष्पाहतालि' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मग्नो नाभीह्रदावर्ते हरकोपानलाकुलः ।
कामोऽनुमीयते यस्या रोमालीधूम्रलेखया ॥ ७९७ ॥
तारहारांशुमुकुलैर्जातौ यस्याः पयोधरौ ।
चक्रवाकाविव मुखासक्तबालबिसाङ्कुरौ ॥ ७९८ ॥
यस्या वलयकेयूरनीलरत्नांशुभोगिभिः ।
तारुण्यचन्दनलताललिते बभतुर्भुजे ॥ ७९९ ॥
स्मरबालवसन्तेन कृतेवाधरकान्तिभिः ।
श्यामा बभौ वनस्थाया यस्याः किशलयावलिः ॥ ८०० ॥
सुस्पष्टनासावंशोच्चललाटच्छत्रमाश्रिताः ।
यत्कटाक्षच्छटाः प्रापुरुत्पलोद्दामदायताम् ॥ ८०१ ॥
वदनाम्भोजभृङ्गालीं या बभारालकावलीम् ।
प्रशस्तिमिव कामेन न्यस्तां सौभाग्यभूपतेः ॥ ८०२ ॥
तां दृष्ट्वा विस्मयोत्फुल्ललोचनस्तन्मयोऽभवत् ।
क्षिप्रं नवावतारेण स्मरेण तरलीकृतः ॥ ८०३ ॥
विस्तीर्णं सुकृतिप्राप्यं तारुण्यस्तनपादपम् ।
प्रशान्तविग्रह कथं न्यस्तचापमिव स्मरम् ॥ ८०४ ॥
लक्ष्मीविलासभवनं भुजस्तम्भविभूषितम् ।
सापि लावण्यनलिनी राजहंसं विलोक्य तम् ॥ ८०५ ॥
लज्जामज्जत्तनुलता कम्पसंपत्तरङ्गिता ।
असूत्रमौक्तिकलता बभूव स्वेदबिन्दुभिः ॥ ८०६ ॥
क्षिप्रं पुलकिता तस्या विरराज कुचस्थली ।
विशद्भिरिव पुष्पेषुशरैराकीर्णकेसरा ॥ ८०७ ॥
ततः सहेलं तामेत्य प्राह जीमूतवाहनः ।
प्रागुपायनकर्पूरमिव दन्तांशुभिर्दिशन् ॥ ८०८ ॥
आचाररुचिरः कोऽयं क्रमस्तव सुलोचने ।
संभाष्य तेन यत्पूर्वस्वागतं प्रणयी जनः ॥ ८०९ ॥

१. 'सुर' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उक्त्वेति तन्मुखाम्भोजन्यस्तलोचनषट्पदः ।
अपृच्छत्तत्सखीं लोलकुण्डलोद्द्योतिताननः ॥ ८१० ॥
रसाधारे गुणाधारः कुरुते कस्य नो मनः ।
कौतुकोत्कलिकालोलस्वभावसुभगो जनः ॥ ८११ ॥
विधेरवधिनिर्माणत्रैलोक्यनयनोत्सवः ।
कुलालंकरणं कन्या कस्येयं ललिताकृतिः ॥ ८१२ ॥
इत्युक्ता तेन सा प्राह सखी प्रणयमन्थरम् ।
गम्भीरोदारमधुरं कलयन्ती तदाशयम् ॥ ८१३ ॥
सत्यमुन्नतसत्त्वानां दर्शनेन भवादृशाम् ।
मनो नृत्यति किं त्वस्याः क्षणं वाङ्न प्रवर्तते ॥ ८१४ ॥
लज्जानिकेतनं कन्या कथं नाथ तवाग्रतः ।
संभाषणे सुप्रतिभा ललनेव प्रगल्भते ॥ ८१५ ॥
विश्वावसोः सिद्धपतेर्वंश[1]मुक्तालता सुता ।
इयं मलयवत्याख्या नित्यं गौरीस्तु[2]तिव्रता ॥ ८१६ ॥
निवेद्येति सखी क्षिप्रं तद्वयस्यादथाशृणोत् ।
जीमूतवाहनकथां प्राज्याभिनयशालिनीम् ॥ ८१७ ॥
ततो नवसमुन्मेषकुसुमेषुतरङ्गिताम् ।
कान्तां पिबन्निव दृशा प्राह जीमूतवाहनः ॥ ८१८ ॥
सहजेनाभिलाषेण गुणैः कान्त्या च भूषिता ।
इयमालोक्यते क्षिप्रं यदेतज्जन्मनः फलम् ॥ ८१९ ॥
आनन्दमधुरा दृष्टिर्मनः प्रीतितरङ्गितम् ।
सतामेतावदौचित्यं बाह्यस्त्वाचारडम्बरः ॥ ८२० ॥
समागमं सुधावृष्टिं दृष्टिपातमनुग्रहम् ।
एवंविधस्य वपुषः को हि नाम न मन्यते ॥ ८२१ ॥
इति ब्रुवाणे सानन्दं तस्मिन्विद्याधराधिपे ।
आहूता सा प्रतीहार्या प्रतस्थे मातुरन्तिकम् ॥ ८२२ ॥

---

१. 'विश्वमु' ख. २. 'व्रते स्थिता' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यस्तं मयि मनः पाल्यमेतदत्यन्तपेशलम् ।
इतीव कान्तं सा प्राह व्रजन्ती नूपुरारवैः ॥ ८२३ ॥
ददौ त्रिकपरावृत्तिलक्षितैकस्तनी मुहुः ।
तस्मै दृशं सा धम्मिल्लमधुपासारणच्छलात् ॥ ८२४ ॥
वेपथुस्तम्भसंरुद्धा तन्वी कृच्छ्रेण सा ययौ ।
सुकुमारेण मनसा सा वहन्ती महाभुजम् ॥ ८२५ ॥
निजमन्तःपुरं प्राप्य निःश्वसन्ती श्लथांशुका ।
पपात शयनोत्सङ्गे दष्टा मकरकेतुना ॥ ८२६ ॥
तस्याः प्रववृधे क्षिप्रं स कोऽपि विरहानलः ।
यः सिच्यमानो बाष्पाम्बुपूरैरुज्जृम्भतेऽधिकम् ॥ ८२७ ॥
अत्रान्तरे जलनिधिं प्रविष्टे वासरेश्वरे ।
बभूव रागिणी संध्या नलिनीवनशालिनी ॥ ८२८ ॥
पद्मसंकोचचकिता बभ्रमुर्भ्रमरा भुवि ।
संध्यया सपदि व्युत्तास्तमोवीरुजणा इव ॥ ८२९ ॥
तिमिरैरञ्जनश्यामैः श्यामावदनकुन्तलैः ।
चक्रवाकीवियोगाग्निधूमाभैरुत्थितं ततः ॥ ८३० ॥
नीलाम्बुजैरिवोत्सृष्टं भ्रमरैरिव मूर्च्छितम् ।
नीलकण्ठैरिवोद्गीर्णं चचार सुचिरं तमः ॥ ८३१ ॥
अथादृश्यत चण्डीशजटामण्डलमण्डनम् ।
श्यामाकर्पूरतिलको रोहिणीरमणः शशी ॥ ८३२ ॥
दिक्कान्ताकेलिमुकुले निशामौक्तिककुण्डले ।
स्मरराजसितच्छत्रे शशिनि स्मेरजृम्भिते ॥ ८३३ ॥
उत्फुल्लकुसुमामोदनन्दितेन्दीवरा मुहुः[2] ।
पद्मिनीविरहोच्छ्वासा[3] इव बालानिला ववुः ॥ ८३४ ॥
योषितां हृदयाकाण्डभङ्गयन्त्रोपले विधौ ।
प्रौढिं प्रयाते पञ्चेषुवह्निकुण्डमहोल्मुके ॥ ८३५ ॥

१. 'रधा' ख. २. 'च सा' ख. ३. 'वदनो' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीखण्डरससंसिक्तकदलीदलशायिनी ।
बभूव गाढसंतापक्लान्ता सिद्धपतेः सुता ॥ ८३६ ॥
न जलार्द्रैर्न वसनैर्न हारैर्न सरोरुहैः ।
तस्या न चन्द्रकान्तैश्च शशाम मदनानलः ॥ ८३७ ॥
सा लज्जातरला प्राह तां सखीं पार्श्ववर्तिनीम् ।
अयि त्वमेव मे तत्र कान्तदर्शनसाक्षिणी ॥ ८३८ ॥
किं करोमि क्व गच्छामि कस्यैतत्कथयामि वा ।
अयं कन्याविरुद्धो मे क्रमः कामेन निर्मितः ॥ ८३९ ॥
([1]प्रत्यादिशन्ति संदेशं प्रयान्ति स्वयमेव वा ।
प्रियं प्रणयशालिन्यो निर्लज्जा बत योषितः) ॥ ८४० ॥
किं वा संदिश्यते तस्मै लीलया हृतचेतसे ।
युवासौ भाग्यसंपन्नो वाचः कस्य शृणोति वा ॥ ८४१ ॥
विज्ञप्तोऽसीति कार्पण्यं वदतीति प्रगल्भता ।
एहीत्याज्ञावलेपोऽयं प्रियोऽसीति विलज्जता ॥ ८४२ ॥
न जीवामीत्यसदृशं त्वत्प्रियास्मीत्यलक्षितम् ।
आगच्छामीत्यनुचितं स्मरार्तास्मीति चापलम् ॥ ८४३ ॥
न जाने सखि किं वाच्यो दैवादासादितोऽपि सः ।
सर्वथा नष्टसार्थेऽस्मिन्मरणं शरणं मम ॥ ८४४ ॥
वयस्यामभिधायेत्थं सा निनायाशु निर्झरैः ।
संतापशोककठिनं कुचचन्दनमार्द्रताम् ॥ ८४५ ॥
जीमूतवाहनोऽप्यस्मिन्नन्तरे विरहाकुलः ।
तस्मिन्गौरीवरोद्याने चचारेन्दुमुखीं स्मरन् ॥ ८४६ ॥
स कामभुजगाक्रान्तः कौमुदीविषमूर्च्छितः ।
संतापविह्वलो भेजे वातूलतरलां स्थितिम् ॥ ८४७ ॥
तं ध्यानमूकमभ्येत्य क्षामं मधुकरः सखा ।
उवाच विप्लवः कोऽयं तवापि मनसः सखे ॥ ८४८ ॥

---

1. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भजन्ति सततं सन्तो विद्यार्जनपरिश्रमम्।
येन न व्यसनापाते मुह्यन्ति मतिविप्लवैः ॥ ८४९ ॥
इति श्रुत्वा विनिःश्वस्य तप्तो जीमूतवाहनः।
क्षणं विलोक्य वसुधां स्वस्थोऽसीति तमभ्यधात् ॥ ८५० ॥
प्रत्यग्रचन्दनदलैः कल्पिते सुहृदा ततः।
निषण्णः शयने प्राप न स संतापतानवम् ॥ ८५१ ॥
अत्रान्तरे मलयवत्यभ्येत्य विरहासहा।
गौर्याश्रमे तरुलताप्रान्ते पाशमकल्पयत् ॥ ८५२ ॥
ततः प्रणम्य गिरिजां हा हतेति विलप्य सा।
विधाय साश्रुनयनास्तत्र बाला मृगाङ्गनाः ॥ ८५३ ॥
जीमूतवाहनो भूयादन्यस्मिन्मे स जन्मनि।
विभुरित्यभिधायाभूत्सा पाशाभिमुखी क्षणात् ॥ ८५४ ॥
तच्छ्रुत्वा सुहृदाहूतस्तूर्णं जीमूतवाहनः।
छन्नस्तरुलताजालैः शुश्राव च ददर्श च ॥ ८५५ ॥
ततो भगवती प्राह पुत्रि मा साहसं कृथाः।
भविता चक्रवर्ती ते भर्ता जीमूतवाहनः ॥ ८५६ ॥
इति देवीवरं प्राप्य सा ददर्श पुरःस्थितम्।
जीमूतवाहनं हर्षलज्जामुकुलितेक्षणा ॥ ८५७ ॥
अत्रान्तरे समभ्येत्य चेटिका तां व्यजिज्ञपत्।
दिष्ट्या विवर्धसे देवि कल्पितस्ते महोत्सवः ॥ ८५८ ॥
त्वद्भ्रात्रा जनकादेशादद्य विद्याधरात्मजः।
जीमूतकेतुपुत्राय दातुं त्वां सादरोत्थितः ॥ ८५९ ॥
तदेहि कल्पितोऽद्यैव विवाहो जनकेन ते।
इति श्रुत्वैव सा तूर्णं प्रययौ चारुहासिनी ॥ ८६० ॥
जीमूतवाहनोऽप्याशु समेत्य पितुरन्तिकम्।
उवाह मङ्गलोदारविवाहोचितभूषणम् ॥ ८६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो महोत्सवानन्दि विद्याधरशतानुगः ।
परिणीय प्रियतमां सोऽभूत्संभोगतत्परः ॥ ८६२ ॥
प्रेयस्याः सोऽग्रजं तुल्यरूपं मित्रावसुं व्यधात् ।
विलासकेलिलीलासु प्ररूढप्रेमभाजनम् ॥ ८६३ ॥
कदाचिदथ विश्रम्भात्स मित्रावसुना सह ।
चचार जलधेर्वेलावनान्तमवलोकयत् ॥ ८६४ ॥
ददर्श तत्र शिखराकारं नागास्थिसंचयम् ।
युगक्षये महाभूतं करकैरिव पूरितम् ॥ ८६५ ॥
किमेतदिति तेनाशु पृष्टो मित्रावसुस्ततः ।
उवाच गरुडेनात्र भक्षिता भुजगोत्तमाः ॥ ८६६ ॥
सर्वक्षयभयात्ताक्ष्यस्ततो वासुकिनार्थितः ।
विसृष्टं तेन वारेण सदैकं नागमत्त्यसौ ॥ ८६७ ॥
अयमस्थिचयस्तेषामद्रिकूटसमुच्छ्रयः ।
उक्त्वेति जनकाहूतस्तूर्णं मित्रावसुर्ययौ ॥ ८६८ ॥
जीमूतवाहनोऽप्येकः सर्पेषु करुणाकुलः ।
चचार तत्र निःसारं संसारं कलयन्धिया ॥ ८६९ ॥
ततो ददर्श करुणाक्रन्दशुष्काधराननाम् ।
वृद्धाङ्गनां कुमारेण सान्त्वमानां मुहुर्मुहुः ॥ ८७० ॥
पूर्णेन्दुसुन्दरमुखं कान्तिधूर्तदिगन्तरम्[1] ।
स्फुरत्स्फीतफणारत्नपुञ्जपिञ्जरिताम्बरम् ॥ ८७१ ॥
आनन्दमिव कासारं संतोषमिव जङ्गमम् ।
तं वीक्ष्य तनयं वृद्धा [2](विललापाश्रुगद्गदम् ॥ ८७२ ॥
हा पुत्र नयनानन्द सौन्दर्यामृतदीधिते ।
शङ्खपालमहावंशव्यक्तमुक्तामणीयित) ॥ ८७३ ॥
हा शङ्खचूड लावण्यनिधानमिदमेव ते ।
वपुर्गरुडचञ्चग्रवज्रपातासहं कथम् ॥ ८७४ ॥

---

१. 'द्योतिदिगन्तरम्' ख. २. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भीतेन नागराजेन प्रेषितोऽसि गरुत्मते।
सुकुमारशरीरेऽस्मिन्कस्ते त्राणं भविष्यति ॥ ८७५ ॥
इति पुत्रमुखाम्भोजमाघ्राय विललाप सा।
जीमूतवाहनोऽभ्येत्य तामुवाच कृपाकुलः ॥ ८७६ ॥
मातः स्थितोऽस्मि ते पुत्रपरित्राणकृतक्षणः।
परोपकारः संसारे निःसारे प्राप्यते कुतः ॥ ८७७ ॥
अयमेव सदापाये काये सारसमुच्चयः।
यत्प्रयाति परायासत्राणसत्पुण्यपात्रताम् ॥ ८७८ ॥
इत्याकर्ण्य परित्रस्ता सुपर्णाशङ्किनी ततः।
पुत्रमासाद्य साकम्पा सा पुरः प्रणनाम तम् ॥ ८७९ ॥
नाहं भुजङ्गाधिपतिर्वितीर्य निजविग्रहम्।
विद्याधरो रक्षिताहं त्वत्पुत्रस्येति सोऽभ्यधात् ॥ ८८० ॥
वृद्धावदत्त्वं त्वमथ ([१]शङ्खचूडाधिको मम।
बहुकल्पशतं धन्यां रक्ष सौम्यामिमां तनुम् ॥ ८८१ ॥
इति तस्यां ब्रुवाणायां शङ्खचूडोऽतिविस्मितः।
तमभ्यधात्स्मितमुखो ललाटरचिताञ्जलिः) ॥ ८८२ ॥
अभिनन्दितमेतत्ते दर्शनं सत्त्व[२]शालिनः।
पूर्णेन्दुरमृतोद्गारिकिरणः कस्य न प्रियः ॥ ८८३ ॥
अहो नु त्वं निजान्प्राणान्मदर्थं दातुमुद्यतः।
[३]सहामहे कथं नाम तृणार्थे रत्नविक्रयम् ॥ ८८४ ॥
कियन्तो न भवाम्भोधौ जाता याताश्च मद्विधाः।
कौस्तुभस्येव भवतः क्व दृष्टः पुनरुद्भवः ॥ ८८५ ॥
सत्त्वोज्ज्वलं तवैवेतन्मुखेन्दौ शोभते वचः।
[४]अन्धकायस्य जगतामनास्थाने तु पातितम् ॥ ८८६ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. २. 'सागरः' ख. ३. 'सोऽहं सहे कथं' ख. ४. 'अन्धकाराय जगतामनु...नैतयाचितम्' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मद्वियोगाग्निविधुरा समाश्वास्या विभो त्वया ।
[1]माता मे स्या अदृष्टोऽपि साधुः सुचिरबान्धवः ॥ ८८७ ॥
इति नागकुमारस्य वचः श्रुत्वा कुलोचितम् ।
जीमूतवाहनः प्राह बत चित्रं प्रभाषसे ॥ ८८८ ॥
वृद्धेयं त्वां विना पुत्रं कुलालंकरणं सखे ।
कथं जीवति दुःखं हि जननीनां सुदुःसहम् ॥ ८८९ ॥
एतां त्रातुं निजात्मानं रक्ष त्वज्जीविता ह्यसौ ।
अस्याः प्राणपरित्यागे विद्धन्मा कारणं भवः ॥ ८९० ॥
शरीरेण मदीयेन द्वयं पाहि महामते ।
इत्युक्त्वा शङ्खचूडस्य पादयोर्निपपात सः ॥ ८९१ ॥
फणिसूनुस्तमवदन्निर्बन्धाकुलितस्ततः ।
श्रुत्वा विवेचितं नैव मादृशामीदृशं वचः ॥ ८९२ ॥
न नाम शङ्खधवलं शङ्खपालं महाकुलम् ।
[2]मयापि शङ्खचूडेन सत्त्वभङ्गात्कलङ्क्यते ॥ ८९३ ॥
आसन्नो गारुडः कालः स्वस्ति गच्छाम्यहं विभो ।
[3]वधशैले प्रणम्याशु गोकर्णं शशिशेखरम् ॥ ८९४ ॥
उक्त्वेति मात्रानुगते याते तस्मिन्क्षणादभूत् ।
उच्चण्डाकाण्डकल्पान्तवातव्याकुलितं जगत् ॥ ८९५ ॥
[4]कालदोर्दण्डशङ्काभास्छटाघटितदिक्तटाः ।
उत्तस्थुर्मकरो[5]स्फारकरालाः सागरोर्मयः ॥ ८९६ ॥
ततश्चण्डांशुतप्तस्य सुमेरोरिव रश्मिभिः ।
अभूदौर्वानलेनेव पूरितं पिञ्जरं नभः ॥ ८९७ ॥
आगतं गरुडं ज्ञात्वा सूचितं पक्षमारुतैः ।
आरुरोह मदावद्धः शिलां जीमूतवाहनः ॥ ८९८ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. २. 'न मया' ख. ३. 'विन्ध्यशै' ख.
४. 'कालांशैर्दण्डशङ्काभाः स्पष्टा घटितदिक्तटाः' ख. ५. 'रोत्फुल्लाः क' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रत्नांशुकेन संछन्नः स्थितस्तत्र व्यचिन्तयत्।
सत्त्वोपकाराय पुनर्जन्म भूयान्ममेति सः॥ ८९९॥
ततोऽदृश्यत दिग्दाहदारुणच्छविरम्बरे।
प्रलयाग्निशिखालोलपक्षाक्षेपः खगेश्वरः॥ ९००॥
तस्योरुवेगसंघट्टस्फूर्जद्घनघनारवैः।
चुक्रोशाकालकल्पान्तसंत्रस्तेव जगत्रयी॥ ९०१॥
ततः स तस्य धैर्याब्धिविद्याधरशिरोमणेः।
जहार शिरसश्चूडं चूडारत्नेन मण्डितम्॥ ९०२॥
ततः शरीरमादाय तस्य तुण्डेन खेचरः।
गगने वलयाकारं चकार गतिविभ्रमम्॥ ९०३॥
तच्चञ्चुक्रकचभ्रष्टं रक्तधारापुरःसरम्।
अङ्के मलयवत्यास्तु चूडारत्नमथापतत्॥ ९०४॥
तद्दृष्ट्वा वज्रसंरुग्णा[1] शिरीषलतिकेव सा।
जीमूतकेतवे तन्वी परित्रस्ता न्यवेदयत्॥ ९०५॥
स्वविद्यया परिज्ञाय स्वसूनोर्जीवितव्ययम्।
भार्यास्नुषाभ्यां सहितः सौपर्णीं तां शिलां ययौ॥ ९०६॥
अत्रान्तरे शङ्खचूडस्तूर्णं तं देशमागतः।
गोकर्णमर्णवतटे प्रणिपत्य मनोजवः॥ ९०७॥
तत्रापश्यन्नखमुखोत्खातस्खलितशेखरम्।
विद्याधरेन्द्रमादाय तार्क्ष्यमुत्पतितं दिवि॥ ९०८॥
तं वीक्ष्य साश्रुनयनो विनाघातं विदारितः।
आत्मानं तद्वधे मत्वा कारणं विललाप सः॥ ९०९॥
हा सत्त्वविपुलौदार्यधैर्यगाम्भीर्यसागर।
हा पूर्णकरुणाकोश[2] हा निष्कारणबान्धव॥ ९१०॥
इति शोचन्स विपदमनुसर्तुं गरुत्मतः।
जगाम जीवितत्यागदृढीकृतविनिश्चयः॥ ९११॥

१. 'भग्ना' ख. २. 'शोक' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आस्वाद्यास्वाद्य तार्क्ष्योऽपि व्योम्नि जीमूतवाहनम् ।
क्षिप्रं स्थगितसंरम्भं प्रदध्यौ विस्मयाकुलः ॥ ९१२ ॥
अहो नु सत्त्ववानेष कोऽपि धैर्यमहोदधिः ।
भक्ष्यमाणस्य यन्नास्ये जायन्ते पुलकाङ्कुराः ॥ ९१३ ॥
प्रसन्नवदनः क्षिप्रं जीवशेषोऽपि वर्तते ।
चिन्तयित्वेत्यपृच्छत्त्वं कोऽसीति विनतात्मजः ॥ ९१४ ॥
स तं प्राह किमेतेन तव भक्षय मामिति ।
अस्मिन्नवसरे शङ्खचूडोऽभ्येत्य तमब्रवीत् ॥ ९१५ ॥
हा हा मा मा कृथास्तार्क्ष्य साहसं किं न पश्यसि ।
अस्य विद्याधरेन्द्रस्य स्वस्तिकाङ्कमुरस्तटम् ॥ ९१६ ॥
अहं[1] स नागस्ते भक्ष्यं पश्य जिह्वालताद्वयम् ।
विस्फूर्जद्विषफूत्कारं रक्तस्फीताः फणाश्च मे ॥ ९१७ ॥
इदानीमपि मे देहे मांसशोणितमस्ति भोः ।
न च पश्यामि ते तृप्तिं स त्वं दूरे स्थितः कुतः ॥ ९१८ ॥
इत्युक्त्वा विपुलं वक्षः प्रसार्योत्तानविग्रहः ।
तूर्णं मां भक्षयेत्याह स सुपर्णं पुनः पुनः ॥ ९१९ ॥
ततोऽस्थिशेषं तं त्यक्त्वा विषण्णे पन्नगेश्वरे ।
जीमूतवाहनवधूर्गुरुभ्यामाययौ सह ॥ ९२० ॥
दृष्ट्वा मलयवत्यग्रे प्राणनाथं तथागतम् ।
मुमोहापूर्वशोकाग्निधूमेनेवान्धकारिता ॥ ९२१ ॥
जीमूतकेतुस्तनयं विलोक्य सह जायया ।
पपात मूलनिर्लून इव चन्दनपादपः ॥ ९२२ ॥
तार्क्ष्येणाश्वास्यमानेषु तेषु जीमूतवाहनम् ।
संस्पृश्य पाणिना माता शुशोच करुणस्वनम् ॥ ९२३ ॥
मुहूर्ताच्छेषजीवोऽपि सोऽब्रवीज्जननीं शनैः ।
मातर्विनश्वरस्यास्य किं शरीरस्य शोच्यते ॥ ९२४ ॥

---

१. 'अहं स नागराजस्ते भक्ष्यो जिह्वानलद्वयम्' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवेऽस्मिन्पवनोद्भ्रान्तवीचिविभ्रमभङ्गुरे ।
जायते पुण्ययोगेन परार्थे जीवितव्ययः ॥ ९२५ ॥
उक्त्वेति विसृजन्प्राणानविच्छायमुखच्छविः ।
स्फारेण शोकतमसा जगत्संपूरयन्निव ॥ ९२६ ॥
ततो मलयवत्यासीन्मरणे कृतनिश्चया ।
शोकस्तम्भेन संरुद्धा न चचाल पपात वा ॥ ९२७ ॥
अथ साक्षाद्भगवती गौरी तां भक्तवत्सला ।
समाश्वास सुधासारैस्तद्भर्तारमजीवयत् ॥ ९२८ ॥
चक्रवर्तिश्रियं चास्मै दत्त्वा क्षिप्रं तिरोदधे ।
ततो देवाः सगन्धर्वास्तस्य सत्त्वमपूजयन् ॥ ९२९ ॥
गरुडोऽप्यथ हृष्टात्मा वरदस्तेन याचितः ।
प्रददौ सर्वनागानां पुण्यामभयदक्षिणाम्[१] ।
जीमूतवाहनो हृष्टः प्रययौ दयितासखः ॥ ९३० ॥
कथयित्वेति वेतालः पप्रच्छ वसुधाधिपः ।
सत्त्ववाञ्शङ्खचूडोऽत्र किं वा जीमूतवाहनः ॥ ९३१ ॥
इति पृष्टो नृपः प्राह शङ्खचूडोऽत्र सत्त्वभूः ।
यो बालोऽपि निजौचित्यान्न चचाल महाशयः ॥ ९३२ ॥
जीमूतवाहनस्यैतदात्मदानं किमद्भुतम् ।
बोधिसत्वः स हि पुरा दत्तवान्बहुशस्तनुम् ॥ ९३३ ॥
तपस्तीव्रं यशः शुभ्रं श्लाघ्या श्रीः सत्त्वमद्भुतम् ।
निर्व्याजदानं च नृणां पूर्वाभ्यस्तं हि जायते ॥ ९३४ ॥
श्रुत्वेत्यलक्षितो गत्वा वेतालः शिंशपातरौ ।
तेनैव कण्ठपाशेन तथैवोल्लम्बितः स्थितः ॥ ९३५ ॥

इति षोडशो वेतालः ॥ १८ ॥

१. एतदुत्तरं ख-पुस्तके 'अजीवयच्चास्थिशेषान् हतान् प्राक्पन्नगेश्वरान् । चक्रवर्तिश्रियं भेजे ततो जीमूतवाहनः ॥ स प्राप्य काञ्चनपुरं हिमाद्रिशिखरे स्थितम् । पित्रोः समास्थितो राज्ये रराज दयितासखः ॥' एवंविधः पाठ उपलभ्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनस्तमादाय ययौ जवेन जगतीपतिः ।
स्कन्धस्थितः स च प्राह कथेयं श्रूयतामिति ॥ ९३६ ॥
[1]रूठकाख्ये पुरे राजा श्रीमानासीद्यशोधनः ।
मांधातृरामनहुषा यत्कीर्त्या विस्मृता इव ॥ ९३७ ॥
स कदाचित्समभ्येत्य विज्ञप्तो वणिजा भयात् ।
ममास्ति कन्यकारत्नं देव तस्यास्ति भाजनम् ॥ ९३८ ॥
इति श्रुत्वा नरपतिर्द्रष्टुं तां प्राहिणोद्द्विजान् ।
ते दृष्ट्वोन्मादिनीं नाम्ना तामुन्मादं समाययुः ॥ ९३९ ॥
इमां भूमिपतिः प्राप्य प्रजाकार्यपराङ्मुखः ।
ध्रुवं नङ्क्ष्यति रागेण द्विजास्तत्रेति चिन्तयन् ॥ ९४० ॥
ते नरेश्वरमभ्येत्य कन्यां दुर्लक्षणां जगुः ।
अनादृतां ततो राज्ञा सेनान्ये तां पिता ददौ ॥ ९४१ ॥
कदाचिदथ मत्तालिमालावलयिते मधौ ।
उत्फुल्लफुल्लधवले कोकिलालापमालिनि ॥ ९४२ ॥
मकरन्दपिशङ्गासु दिक्षु दक्षिणमारुतैः ।
कौङ्कुमेनाङ्गरागेण विलि[2]खन्निव कामिभिः ॥ ९४३ ॥
राजा गजेन्द्रशैलस्थश्चम्पकापीडशेखरः ।
अशोकमालासच्छायो मधुमास इवापरः ॥ ९४४ ॥
पुरे चैत्रोत्सवं द्रष्टुं चचार कमलेक्षणः ।
विलोक्यमानः कान्ताभिः कुसुमायुधशङ्कया ॥ ९४५ ॥
दुर्लक्षणेत्यनेनाहं प्रत्याख्यातेति मानिनी ।
उन्मादिनी ततो राज्ञः सौधात्तनुमदर्शयत् ॥ ९४६ ॥
नेत्रांशुभिः कन्दलिता पाणिभ्यां जातपल्लवा ।
बभौ मूर्तेव चैत्रश्रीः सा मुग्धस्मितपुष्पिता ॥ ९४७ ॥
तारहारकरस्फीतफेनाङ्के कान्तिसागरे ।
तस्याः कटाक्षैरभवद्यमुनाभ्रान्तिविभ्रमः ॥ ९४८ ॥

---

१. 'कनकाख्यपुरे' ख. २. 'स्नामिव' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विम्बाधरारुणदलं लोललोचनषट्पदम्।
सा बभार मुखाम्भोजं सुगन्धिसितशेखरम् ॥ ९४९ ॥
तां वीक्ष्य चन्द्रवदनां मदनोद्यानकौमुदीम्।
अहो नु वञ्चितोऽस्मीति प्रदध्यौ वसुधाधिपः ॥ ९५० ॥
राजधानीं प्रविश्याथ स्मरज्वरनिपीडितः।
नोद्यानेषु न वापीषु न सौधेष्वाययौ धृतिम् ॥ ९५१ ॥
दुर्लक्षणेति यैरुक्ता दुर्नयैर्नयबुद्धिभिः।
उन्मादिनी ब्राह्मणास्ते निर्गच्छन्तु पुरान्मम ॥ ९५२ ॥
इत्यादिश्य नृपस्तस्थौ दह्यमान इवानिशम्।
कदलीदलशय्यासु श्रीखण्डसलिलोच्छ्रितः ॥ ९५३ ॥
भिषग्भिः सेव्यमानोऽपि स्वास्थ्यं न प्राप भेषजैः।
स्मरज्वरचिकित्सा हि दयितालिङ्गनामृतैः ॥ ९५४ ॥
विश्रम्भसाक्षिणैकेन सा तस्य विरहव्यथा।
विराजनाम्ना विज्ञाता राजन्येन कथान्तरे ॥ ९५५ ॥
पृष्टोऽब्रवीन्नृपस्तेन सखे तां सुन्दरीं विना।
सेनापतिवधूं प्राणाः क्वापि गन्तुं ममोद्यताः ॥ ९५६ ॥
यौवनोदयशीतांशुं तन्मुखं सुन्दरं दृशोः।
धन्याः पश्यन्ति लावण्यरसायनतरङ्गितम् ॥ ९५७ ॥
भूपतेः परदारेषु संगमो मे न शोभते।
प्रमादान्नृपमूढानां मरणं हि प्रमेयता ॥ ९५८ ॥
(इत्युक्त्वा दीर्घमुष्णं च निःश्वस्य क्षामविग्रहः।
आनीयतां सेति वचो वयस्याहं न चक्ष्महे) ॥ ९५९ ॥
अन्येद्युर्ज्ञातवृत्तान्तः सेनापतिरुपेत्य तम्।
स्वैरं बलधरो नाम सप्रणामं व्यजिज्ञपत् ॥ ९६० ॥

१. 'केशरम्' ख. २. 'जनै' ख. ३. 'प्रमाणापदरूढानां मर' ख. ४. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके नोपलभ्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाजनं सर्वरत्नानामेकस्त्वं देवतापरः ।
गृहाणोन्मादिनीं कान्तां ललनारत्नमुत्तमम् ॥ ९६१ ॥
इति श्रुत्वा विहस्यैनमुवाच वसुधाधिपः ।
अहो भक्तोऽपि मे भृत्योऽहितं नैव प्रभाषते ॥ ९६२ ॥
अयं लोको निरालोकः कलिकर्दमसंकुलः ।
नृपाणां साधुशीलानां चरितैर्हि प्रकाश्यते ॥ ९६३ ॥
तदहं पृथिवीपालो दण्डधारपदे स्थितः ।
[1]अनीतिगहनावृत्तं व्यसनाधिं कथं भजे ॥ ९६४ ॥
कुले जन्मगुणाः सन्ति धर्मे यशसि चादरः ।
मतिश्च परदारेषु सत्यं न सदृशं मम ॥ ९६५ ॥
इति ब्रुवाणं राजानं सेनापतिरभाषत ।
उन्मादिनीं करोम्येनां नर्तकीं सुरमन्दिरे ॥ ९६६ ॥
भजस्वैतां देवदासीं देव दोषो न विद्यते ।
इति तेनार्थ्यमानोऽपि तं निनिन्द रुषा नृपः ॥ ९६७ ॥
ततः सेनापतौ याते तामेवोन्मादिनीं स्मरन् ।
यशःशरीरममलं विवेश भ्रष्टजीवितः ॥ ९६८ ॥
तस्मिन्नु[2]परते राज्ञि सेनानीः शोकविह्वलः ।
वह्निं विवेश सद्भक्तिः पर्य[3]न्ते हि प्रदृश्यते ॥ ९६९ ॥
अभिधायेति वेतालः क्ष्मापालं पृष्टवान्पुनः ।
सेनानीभूमिपालाभ्यां कोऽधिकः सत्त्ववानिति ॥ ९७० ॥
राजावदत्स्वामिभक्तिर्भृत्यानां किमिवाद्भुतम् ।
श्लाघ्यो नरेन्द्र एवैको प्राणांस्तत्याज न स्थितिम् ॥ ९७१ ॥
उद्दाममदसंरुद्धा लीलामीलितदृष्टयः ।
न शृण्वन्ति न पश्यन्ति राजानः कुञ्जरा इव ॥ ९७२ ॥
नारीणामिव सद्भावो दौर्जन्यं महतामिव ।
विवेको भूमिपालानां कदा केनोपमीयते ॥ ९७३ ॥

---

१. 'कीर्तिवासनावृ' ख. २. 'न्भूपर' ख. ३. 'पन्ते' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति श्रुत्वैव वेतालं प्रयातं शिंशिपातरुम्।
पुनरादाय भूपालः प्रययौ पवनोपमः॥ ९७४॥
इति सप्तदशो वेतालः॥ १९॥

ततः स्कन्धस्थितो भूयः स बभाषे भुक्तो विभुम्।
शृणु राजन्कथामेकां कोऽन्यः कृन्तति संशयान्॥ ९७५॥
चन्द्रप्रभाभिधानस्य नृपस्योज्जयिनीपतेः।
द्विजो बभूव नगरे देवस्वामी महाधनः॥ ९७६॥
चन्द्रस्वामीति तस्याभूत्तनयः श्रुतिसागरः।
द्यूतव्यसनसंसक्तो निष्कलङ्काः क्व वा गुणाः॥ ९७७॥
स वृद्धकितवैर्धूर्तैर्व्याजाद्बहुधनं जितः।
बद्धा लताभिरनिशं ताडितो मौनमास्थितः॥ ९७८॥
मृतोऽयमिति कालेन त्यक्तस्तैर्निर्धनः कृशः।
प्रययौ निशि निःशेषकोशक्लेशसमाश्रयः॥ ९७९॥
स शून्यं देवनिलयं कथंचित्प्राप्य निःसहः।
अपश्यत्तुङ्गखट्वाङ्गव्रतिनं भस्मभूषितम्॥ ९८०॥
दीनं तपस्विना तेन क्षुत्क्षामोऽथ निमन्त्रितः।
तद्विद्यानिर्मितं भेजे स विप्रः काञ्चनं पुरम्॥ ९८१॥
तत्र बालमृगाक्षीभिः शशाङ्कशतकान्तिभिः।
कृतराजोपचारेण स लेभे स्नानभोजनम्॥ ९८२॥
विलोलमेखलादाम विरावयति सुन्दरम्।
सुरतं सुरसुन्दर्यास्तत्र चित्रमवाप्तवान्॥ ९८३॥
इति तद्विद्यया दिष्टमनुभूय समुत्थितः।
प्रभाते तद्विरहितः पृथुशोकाकुलोऽभवत्॥ ९८४॥
ततस्तत्कृपया चक्रे प्रत्यहं तन्महाव्रती।
निशि यद्दृश्यते सर्वं वासरेषु न किंचन॥ ९८५॥
ततः कदाचिदाराध्य स विप्रस्तमभाषत।
भगवन्देहि मे विद्यामिमामीप्सितसिद्धिदाम्॥ ९८६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति तेनार्थ्यमानोऽसौ प्रोवाच विततशयः ।
विद्येयं तीव्रनियमैश्छिन्नरागादिबन्धनैः ॥ ९८७ ॥
प्राप्यतेऽन्तर्जलजपादामुखं विघ्नकारिणीम् ।
सलिलान्तः प्रविष्टस्त्वं स्वप्नं द्रक्ष्यसि तत्क्षणात् ॥ ९८८ ॥
पुनः संजातमात्मानं बन्धुपुत्रकलत्रिणम् ।
तटस्थितेन च मया स्मारितो यदि विद्यया ॥ ९८९ ॥
वह्निं प्रवेक्ष्यसि तदा विद्यामेनामुपेष्यसि ।
इत्युक्त्वा स ददौ तस्मै निजविद्यां नदीतटे ॥ ९९० ॥
द्विजोऽपि प्राप्य तां जप्तुं विवेश सलिलान्तरम् ।
तत्रापश्यत्स विस्मृत्य सर्वमात्मानमात्मना ॥ ९९१ ॥
हिरण्यपुर्यां संजातं शंकरस्य पुरोधसः ।
कालेन वर्धमानोऽसौ सह विद्याकलागुणैः ॥ ९९२ ॥
भार्यां शशिप्रभां नाम लेभे विश्रम्भसाक्षिणीम् ।
युवा[1] वसन्तसंतोषविश्रान्तिसदने वने ॥ ९९३ ॥
विजहार तया हारि[2]वपुषा हरिणीदृशा ।
दासीशतवृतां तत्र रममाणां ददर्श सः ॥ ९९४ ॥
तां दैवयोगाद्दयितां सर्पेण निहतां भुवि ।
तां वीक्ष्य विललापासौ कन्दर्पविषमस्थितिः[3] ॥ ९९५ ॥
हा प्रिये हा मनःसिन्धुचन्द्रिके हा सुलोचने ।
लक्ष्मीरिवाविनीतस्य क्व मे यातासि सुन्दरि ॥ ९९६ ॥
इत्यश्रुगद्गदगिरा विलपन्तं चिराय तम् ।
आयुषोऽर्धं प्रयच्छास्यै देवदूतोऽभ्यधादिति ॥ ९९७ ॥
तच्छ्रुत्वा स ददौ तस्यै निजस्यार्धमथायुषः ।
अवाप्तजीवितां तेन तामालिङ्ग्य ननन्द सः ॥ ९९८ ॥
ततः कालेन तनयं लेभे कमललोचनम् ।
स्नेहस्य मन्दिरं कान्तं प्रतिबिम्बमिवात्मनः ॥ ९९९ ॥

---

१. 'स युवा सूनुसंतोषविश्रा' ख. २. 'हारिहारिणा वपुषा दृशा' क. ३. 'मूर्छितः' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति मायाविकल्पोत्थं स तन्मायां व्यलोकयत् ।
अत्रान्तरे तदा तेन व्रतिना स विबोधितः ॥ १००० ॥
स्मृत्वा वह्निप्रवेशाय सहसैव समुद्यतः ।
बन्धूनां करुणाक्रन्दराविणामश्रृणोद्गिरः ॥ १००१ ॥
तनयोत्सङ्गया पत्न्या तया सार्धं मृगीदृशा ।
प्रार्थ्यमानोऽपि यत्नेन वह्निमेव समाविशत् ॥ १००२ ॥
स्वस्यानुमरणोद्युक्ता दृष्ट्वा भार्याः समातरः ।
हा पापोऽस्मीति संचिन्त्य मुहूर्तं जडतां ययौ ॥ १००३ ॥
अनिर्दग्धतनुस्तेन पावकेन हिमत्विषा ।
उदतिष्ठन्नदीतीरादन्तर्जलजपास्थितः ॥ १००४ ॥
एतदह्नश्चतुर्भागे दृष्ट्वा सर्वं सविस्मयः ।
न्यवेदयद्यथावृत्तं व्रतिने लम्बिताञ्जलिः ॥ १००५ ॥
दुःखाकुलस्ततः प्राह व्रती हा धिग्विकल्पितः ।
त्वया विभ्रंशिता सिद्धिस्ता विद्या विस्मृता इति ॥ १००६ ॥
सोऽवदन्निर्विकल्पेन त्वदादिष्टं कृतं मया ।
न जाने केन विघ्नेन न दग्धोऽहं कृशानुना ॥ १००७ ॥
इत्युक्त्वा शपथं चक्रे स विप्रो व्रतिनः पुरः ।
तपस्वी भ्रष्टविद्योऽथ तत्कारणमचिन्तयत् ॥ १००८ ॥
कथयित्वेति वेतालः पप्रच्छ पृथिवीपतिम् ।
राजन्कृते विधानेऽपि सा विद्या किं[1] न दृश्यते ॥ १००९ ॥
इति पृष्टो नृपः प्राह कृतं तेन यथोदितम् ।
किंतु भावोऽस्य तत्कालं बान्धवेष्वार्द्रतां ययौ ॥ १०१० ॥
तेन प्रणष्टा तत्कोपाद्गुरोरपि चिरस्थिता ।
विद्यासौ भावदुष्टानां विनश्यन्त्येव सिद्धयः ॥ १०११ ॥
इत्याकर्ण्यैव वेतालः प्रययौ शिंशिपातरुम् ।
आनिनाय च तं भूयो निरुद्वेगो महीपतिः ॥ १०१२ ॥

इत्यष्टादशो वेतालः ॥ २० ॥

---

१. 'केन' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोऽथ स्कन्धस्थितः प्राह राजानं वेगगामिनम् ।
शृणु नाथ कथामेकां निशा यावन्न शीर्यते ॥ १०१३ ॥
[1]वंक्कोलके लवपुरे सार्वभौमः क्षमापतिः ।
सूर्यप्रभाभिधानोऽभूद्यशःकुसुमकाननम् ॥ १०१४ ॥
आख्यातविक्रमे तस्मिन्निखिलां रक्षति क्षितिम् ।
वणिजस्ताम्रलिप्ताया धनदत्तस्य पुत्रिका ॥ १०१५ ॥
विद्याधरी शापबलान्मानुषं भोगमास्थिता ।
हिरण्यवत्यां जायायामजायत सुलोचना ॥ १०१६ ॥
यत्कान्तिमधुना मत्तः प्रबलो विजयी स्मरः ।
सा यौवनं शनैः प्राप नाम्ना धनवती तनुः ॥ १०१७ ॥
कालेन त्रिदिवं याते तस्याः पितरि गोत्रजैः ।
हर्तुं द्रविणमाक्षिप्ता तद्भार्या राजसंश्रितैः ॥ १०१८ ॥
सा दुःखिता च भीता च गृहीत्वाभरणं निजम् ।
अलक्षिता निशि प्रायाद्दुहित्रा सह विह्वला ॥ १०१९ ॥
यान्ती तूर्णं निरालोके शोकैरिव तमोभरैः ।
विलुप्तदृष्टिः शूलस्थं जघानांसेन सा नरम् ॥ १०२० ॥
स चौरः स्कन्धनिर्घातसंजातविपुलव्यथः ।
चुक्रोश हा हतोऽस्मीति पर्यन्तश्वासगद्गदम् ॥ १०२१ ॥
वणिक्पत्न्या स दृष्टोऽथ प्राह चौरोऽस्मि पापकृत् ।
इयं तृतीया मे रात्रिः शूलस्थस्यैव वर्तते ॥ १०२२ ॥
तीव्रव्यथोऽपि जीवामि पातकैः पूर्वसंचितैः ।
अकृच्छ्रेण कथं यान्ति प्राणाः कलुषकर्मणः ॥ १०२३ ॥
इत्युक्त्वा तेन पृष्टासौ निजदुःखमभाषत ।
ततः प्रणयशोकार्ता येन स्वपुरमत्यजत् ॥ १०२४ ॥
अत्रान्तरे शशी नित्यक्षयशोकादिवाधिकम् ।
उदयौ पाण्डुरः स्थूलः कपालशकलच्छविः ॥ १०२५ ॥

१. 'कङ्कोलके' ख; 'वक्रोलकं नाम पुरम्' इति कथासरित्सागरः.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतेऽह्नि मित्रदयिते शान्ते संध्याचितानले।
तारास्थिसंचयं कर्तुमिवेन्दुरुत्सृजन्करान्॥ १०२६॥
दिशः सितांशुकच्छन्ना ज्योत्स्नापूरैः प्रचक्रिरे।
शोकादिवोद्धसलिलक्रियां कुमुदपाण्डुराः॥ १०२७॥
ततश्चौरोऽवदद्दृष्ट्वा प्रकाशे तत्सुतां पुरः।
कन्यैषा दीयतां मह्यं सुवर्णं वितरामि ते॥ १०२८॥
मुमूर्षुर्विलसत्येष मा वदेति पृथुस्मिता।
त्वया मात्रा वितीर्णेयमवाप्स्यति मदाज्ञया॥ १०२९॥
केनापि सह संगम्य पुत्रं त्राणं परत्र मे।
अस्ति काञ्चनलक्षं मे तेनेमां देहि कन्यकाम्॥ १०३०॥
इति श्रुत्वा सुतां तस्मै सा प्रादाद्वारिपूर्वकम्।
ददौ तरुतलन्यस्तं तस्यै सोऽप्यखिलं धनम्।
पुत्रार्थे तामनुज्ञाय कन्यां चौरो व्यपद्यत॥ १०३१॥
ततो भर्तुर्वयस्यस्य गृहं प्राप्य सुपुत्रिका।
सती कुमारदत्तस्य युक्त्या चौरं ददाह सा॥ १०३२॥
अथ कालेन सा गत्वा निःशेषधनवर्जिते।
सूर्यप्रभस्य नगरे तस्थौ हेमचयैः सुखम्॥ १०३३॥
तत्रस्था यौवनवती कदाचित्सौधमास्थिता।
ऋतौ ददर्श पञ्चेषुसुभगं द्विजपुत्रकम्॥ १०३४॥
सोमस्वामीति विख्यातः सुवेषां सुरतप्रियः।
यस्यां विलासरसिकः स विप्रो यौवनोन्मदः॥ १०३५॥
तस्या हारावललिता नर्तकी लोकविश्रुता।
हृदये तां समाधत्त विना भूरिधनव्ययम्॥ १०३६॥
तथाभूतं व्यसनिनं सा दृष्ट्वा तं द्विजात्मजम्।
वणिक्पुत्री स्मराक्रान्ता बभूव ध्याननिश्चला॥ १०३७॥
ततो विहाय सा लज्जां मात्रे सर्वं न्यवेदयत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चौरस्याज्ञां च तां स्मृत्वा तदाह्वानेऽदिशत्सखीम् ॥ १०३८ ॥
स च द्विजो मृषा यातः पुत्रार्थं तामभाषत ।
शतानि पञ्च रूप्याणां दीयतां व्ययिनो मम ॥ १०३९ ॥
इति श्रुत्वा सखी तस्मै दत्त्वा तच्छतकद्वयम् ।
एकक्षपाभ्युपगमादानिनाय द्विजं रहः ॥ १०४० ॥
तं दृष्ट्वा कान्तमानीतं निशि शय्यागृहस्थिता ।
हर्षोत्सिक्ता वणिक्पुत्री नवं भेजे रतोत्सवम् ॥ १०४१ ॥
अदृष्टपूर्वसंभोगा वेश्याशतविलासिना ।
नीता प्रौढेन सा तेन रतौ कामपि निर्वृतिम् ॥ १०४२ ॥
तस्मिन्प्रयाते प्रच्छन्नं निशान्ते साभवत्क्षणात् ।
स्रस्ताङ्गी क्लान्तवदना कृशा मुकुलितेक्षणा ॥ १०४३ ॥
ततः कालेन सा पुत्रमसूत रविवर्चसम् ।
कुन्तीव वर्णसंपूर्णराजलक्षणलक्षितम् ॥ १०४४ ॥
तस्मिञ्जाते वणिक्पुत्रीं स्वप्ने तज्जननी तथा ।
आदिदेश शिवः साक्षात्पुत्रोऽयं द्वारि भूपतेः ॥ १०४५ ॥
हेम्नः सहस्रमाधाय मञ्चके त्यज्यतां रहः ।
इति तद्वचसा सर्वं चक्राते ते यथाश्रुतम् ॥ १०४६ ॥
राजापि शंभुना स्वप्ने निर्दिष्टं प्राप्य तं शिशुम् ।
कौशेयवस्त्रसंछन्नं दिव्यरूपं सकाञ्चनम् ॥ १०४७ ॥
सूर्यप्रभस्य तनयः सोऽपि चन्द्रप्रभाभिधः ।
कालेन यौवनं प्राप कलाविद्याविशारदः ॥ १०४८ ॥
तं सर्वगुणसंपन्नं दृष्ट्वा पुत्रं स पार्थिवः ।
चक्रवर्तिश्रियं तस्मै दत्त्वा वाराणसीं ययौ ॥ १०४९ ॥
तपसा तत्र भूपाले प्रयाते शाश्वतं पदम् ।
चन्द्रप्रभः शोकतप्तो ज्ञात्वा चक्रे जलक्रियाः ॥ १०५० ॥
ततः स राज्यं मन्त्रिभ्यो विन्यस्य पितृवत्सलः ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गयाश्राद्धे कृतोत्साहो ब्राह्मणैः सहितो ययौ ॥ १०५१ ॥
सौहार्दस्योपकारस्य गुरुभक्तेः कुलस्य च ।
महतां हि वियोगेषु गयाश्राद्धे प्रतिक्रिया ॥ १०५२ ॥
स वाजिकुञ्जरानीकैः संछादितदिगन्तरः ।
व्रजन्मन्दाकिनीं प्राप्य पितुश्चक्रे यथोचितम् ॥ १०५३ ॥
ततः सर्वेषु तीर्थेषु दत्त्वा बहुधनो धनम् ।
गयामवाप कालेन पुण्यां कुलविभूषणः ॥ १०५४ ॥
ततः शास्त्रोदितं कृत्वा धर्मारण्येऽवसत्त्रयम् ।
राजकूपं समासाद्य पिण्डं क्षेप्तुं समुद्ययौ ॥ १०५५ ॥
सूर्यप्रभस्य नृपतेः स्वगोत्रे नाम्न्युदीरिते ।
पुरोहिताग्रतस्तत्र[1] त्रयो हस्ताः समुत्थिताः ॥ १०५६ ॥
तद्वीक्ष्य विस्मयाविष्टो मुहूर्तं स्थगितक्रियः ।
किमेतदिति पप्रच्छ राजा वृद्धगुरून्द्विजान् ॥ १०५७ ॥
ते प्राहुः शिवमालोक्य श्रुतिस्मृतिविचक्षणाः ।
एकश्चौरस्य हस्तोऽयं लाञ्छितः शस्त्रशङ्कुना ॥ १०५८ ॥
पवित्रकालंकरणः पाणिरन्यो द्विजन्मनः ।
अयं पद्मनिभो राज्ञः करः कङ्कणभूषितः ॥ १०५९ ॥
निश्चयं नाधिगच्छामः कस्मै पिण्डोऽर्प्यतामिति ।
राजा विप्रवचः श्रुत्वा संदेहाकुलितोऽभवत् ॥ १०६० ॥
वर्णयित्वेति वेतालः पप्रच्छ क्ष्मापतिं पुनः ।
राजन्कस्मै स धर्मेण पिण्डस्तेन प्रदीयताम् ॥ १०६१ ॥
इति पृष्टो नृपः प्राह स विप्रस्तस्य नो पिता ।
यो मूल्येन क्षपामेकां तन्मात्रा संगमं व्यधात् ॥ १०६२ ॥
राजापि तस्य संस्कारकर्ता संप्राप्तकाञ्चनः ।
न पिता कर्मसंबन्धाद्राज्यभागी स केवलम् ॥ १०६३ ॥
चौर एव पिता तस्य यो दत्त्वा हेमसंचयम् ।

1. 'तगिरा तत्र' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कन्यां तज्जननीं प्राप पिण्डस्यार्हेति वापनम् ॥ १०६४ ॥
श्रुत्वेत्यलक्षितः स्कन्धाद्वेतालः प्रययौ जवात् ।
वृक्षावलम्बिनं तूर्णमानिनाय च तं नृपः ॥ १०६५ ॥

इत्येकोनविंशो वेतालः ॥ २१ ॥

स शीघ्रगामिनं प्राह नृपं स्कन्धगतः पुनः ।
निःशब्देऽस्मिन्निरालोके दीर्घाध्वनि कथां शृणु ॥ १०६६ ॥
चन्द्रावलोक इत्यासीच्चित्रकूटपुरे नृपः ।
जहार भूरिरत्नौघः सदा रत्नाकरश्रियम् ॥ १०६७ ॥
स मृगव्यरसाकृष्टः कदाचिद्वातरंहसा ।
तुरगेण हृतः प्राप वनं रुचिरपादपम् ॥ १०६८ ॥
तत्र फुल्ललताजालकलितालिकुलोत्सवे ।
विशालतालहिन्तालतमालश्यामलावलौ[1] ॥ १०६९ ॥
ददर्श दर्पणस्वच्छं सरो नीरजराजितम् ।
स्नातसिद्धवधूवृन्दकुचकुङ्कुमपिञ्जरम् ॥ १०७० ॥
समाश्वास्य कृताहारस्तत्र बालबिसाङ्कुरैः ।
ददर्श कन्यां त्रैलोक्यसारं सारङ्गगामिनीम् ॥ १०७१ ॥
कटाक्षमधुपां हासपुष्पां किसलयाधराम् ।
स्तनस्तबकिनीं मूर्तां काननस्येव देवताम् ॥ १०७२ ॥
तां वीक्ष्य मन्मथशरव्याकुलीकृतचेतनः ।
दत्तशाप इवानेकसायकाभिहतैर्मृगैः ॥ १०७३ ॥
मुनेः कण्वस्य तां ज्ञात्वा तत्सख्याभिहितां सुताम् ।
इन्दीवरप्रभां नाम सुभगां मेनकात्मजाम् ॥ १०७४ ॥
गत्वा ययाचे प्रणतः स्थितं निजतपोवने ।
मुनीन्द्रं चन्द्रवदनां स चास्मै तां ददौ मुदा ॥ १०७५ ॥
ततः प्रतिनिवृत्तस्तामादाय तरुणीं नृपः ।
व्रजन्प्राप सरस्तीरं संध्ययालिङ्गितेऽहनि ॥ १०७६ ॥

---

1 'कुले' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्तं च तिग्मकिरणे याते भुवनभूषणे ।
अभूतां रोदसी भूरितिमिरैरावृताम्बरे ॥ १०७७ ॥
ततो हरकिरीटेन माद्यन्मदनबन्धुना ।
शर्वरी शर्वरीशङ्खवलयेनेन्दुनोदितम् ॥ १०७८ ॥
केतकीदलतां कर्णे तनौ कर्पूरपूरताम् ।
हारतां च ययौ ज्योत्स्ना कुचयोर्हरिणीदृशाम् ॥ १०७९ ॥
अथाश्वत्थतरोर्मूले बालपल्लवसंस्तरे ।
एलावल्लीलताकुञ्जे राजा भेजे नवां वधूम् ॥ १०८० ॥
सद्भावभोगसुभगं मन्दलज्जाभरं शनैः ।
सिषेवे चारुसुरतं सविदग्धोऽतिमुग्धया ॥ १०८१ ॥
ततः प्रभाते विकटाकारदंष्ट्रोत्कटाननः ।
ज्वालामुखाभिधोऽभ्येत्य प्राह तं ब्रह्मराक्षसः ॥ १०८२ ॥
अस्मिन्ममाश्रमे पाप कन्यया दुर्विनीतया ।
अहो निज इवोद्याने रमसे विगतत्रपः ॥ १०८३ ॥
व्यात्ताननगताटालविकटैर्दन्तसंपुटैः ।
पिष्टो विभ्रष्टपुण्यस्त्वं राजन्न भवसि क्षणात् ॥ १०८४ ॥
चन्द्रावलोकः श्रुत्वेति तमेव शरणं ययौ ।
देशकालावनालोक्य प्रभवन्ति न पण्डिताः ॥ १०८५ ॥
नृपतौ प्रश्रयजुषि प्रयातः किंचिदार्द्रताम् ।
ज्वालामुखोऽवदद्राजञ्शृणु येनाभिरक्ष्यसे ॥ १०८६ ॥
सत्त्ववर्षः स्वयं पित्रा जनन्या च धृतो दृढम् ।
पादाभ्यां च कराभ्यां च त्वयैवोद्धृतमस्तकः ॥ १०८७ ॥
शिशुर्ममोपहाराय कृताभ्युपगमः स्वयम् ।
विशस्यतां काननेऽत्र ब्राह्मणः सप्तमेऽहनि ॥ १०८८ ॥
नान्यथा तव मोक्षोऽस्ति सानुगस्येति तद्गिरा ।
बाढमुक्त्वा नरपतिः सभार्यो दुःखितो ययौ ॥ १०८९ ॥

१. 'पाण्डुताम्' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवाप्य श्वशुराङ्केन सभार्यः स्वपुरं ययौ ।
प्रदध्यौ मन्त्रिचक्रेण राक्षसाय प्रतिश्रुतम् ॥ १०९० ॥
मुख्यामात्यस्ततो धीमा([1]न्सुमतिर्नाम धीमतः ।
हैमं पुरुषमादाय महार्हं मणिभूषितम् ॥ १०९१ ॥
चचारात्मानमेतेन को ददातीति घोषयन् ।)
निशम्य ब्राह्मणः कश्चिद्बालोऽप्यङ्गीचकार तम् ॥ १०९२ ॥
सुवर्णपुरुषं पित्रे दापयित्वा महाशयः ।
उवाच मातरं दीनां निर्धनं[2] पितरं च सः ॥ १०९३ ॥
राज्ञः सपौरभृत्यस्य श्रेयसे वितराम्यहम् ।
आत्मानं राक्षसायाद्य मूल्येनानेन भूरिणा ॥ १०९४ ॥
युष्मद्दारिद्र्यनाशाय कुशलं प्रस्तुतं मया ।
पवनाकम्पिदीपाग्रशिखालोलैर्निजासुभिः ॥ १०९५ ॥
इदं मेदोस्थिमांसासृग्बीभत्सं क्षणिकं वपुः ।
सत्यं परोपकारेण यात्येव स्पृहणीयताम् ॥ १०९६ ॥
इत्यादि कुत्सयन्कायं जनकं शनकैः शिशुः ।
चकार धीरं संनद्धो भूमिपालसमीहिते ॥ १०९७ ॥
ततः स मन्त्री राजानं कृत्वा विदिततत्कथम् ।
निनाय पित्रा मात्रा च सहाश्वत्थतलं द्विजम् ॥ १०९८ ॥
स्वयमेत्य नृपस्तत्र मण्डलं ब्रह्मरक्षसे ।
पुरोधसा विधायाशु तं बालं हन्तुमुद्ययौ ॥ १०९९ ॥
स च स्तब्धकरो मात्रा प्रत्यक्षं वीक्ष्य राक्षसम् ।
पित्रा निरुद्धचरणः प्रदध्यौ हृदये शिशुः ॥ ११०० ॥
उद्दामकरवालेन राज्ञाद्य निहतस्य मे ।
भूयात्परोपकारैकप्रवणं जन्म सर्वदा ॥ ११०१ ॥
विचिन्त्येति हि सस्मेरं जहास द्विजदारकः ।
ते नृपप्रमुखा येन बभूवुर्विस्मयाकुलाः ॥ ११०२ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके नोपलभ्यते. २. 'निधने' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं कृताञ्जलयः सर्वे निवृत्ता वधसाहसात्।
किमेतदिति साशङ्काः प्रशशंसुः सराक्षसाः ॥ ११०३ ॥
कथयित्वेति वेतालो भूपालं बहलच्छलः।
पप्रच्छ ब्राह्मणशिशोरकाण्डस्मितकारणम् ॥ ११०४ ॥
राजा जगाद यः कश्चिदबलः परिभूयते।
केनापि याति शरणं मातरं पितरं च सः ॥ ११०५ ॥
तदसंरक्षितस्त्राणं राजानमधिगच्छति।
ततोऽप्यप्राप्य निर्वाणं देवं स्मरति पूजितम् ॥ ११०६ ॥
ते सर्व एव तत्रास्य निधनाय समुद्यताः।
तान्वीक्ष्याचिन्तयद्बालः स सत्त्वविपुलाशयः ॥ ११०७ ॥
अहोऽतिदुःखसारस्य शरीरस्यास्य भङ्गिनः।
कृते कुकर्मप्रारम्भो मतेरिति जहास सः ॥ ११०८ ॥
इति श्रुत्वेति वेतालः प्रययौ शिंशिपां पुनः।
आनिनाय च तं भूयो लम्बमानं नरेश्वरः ॥ ११०९ ॥

इति विंशो वेतालः ॥ २२ ॥

ततः स्कन्धस्थितः प्राह वेतालः शृणु भूपते।
गतागतपरिश्रान्तः कथामेकां विनोदिनीम् ॥ १११० ॥
अभूत्पुरि विशालायामर्थदत्ताभिधो वणिक्।
अनङ्गमञ्जरी नाम पुत्री तस्याभवत्प्रिया ॥ ११११ ॥
स तां ददौ रूपवतीं ताम्रलिप्तानिवासिने।
धनाभिजनतुल्याय वणिजे मणिकर्मणे ॥ १११२ ॥
शक्तः क्षणमपि स्थातुं न यदा रहितस्तया।
तदा न तत्याज पिता स तां निजगृहात्सदा ॥ १११३ ॥
कदाचित्स्वपुरीं याते सा पत्यौ मणिकर्मणि।
जहर्ष कृष्णसर्पेण निर्मुक्तेव निरर्गला ॥ १११४ ॥
राज्यमेतत्सुधा चैषा चन्द्रोऽयमयमुत्सवः।
यत्क्षणं नयनेनेष्टो जनः पुण्येन दृश्यते ॥ १११५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः सा यौवनोन्मत्ता ग्रीष्मे चन्दनचर्चिता ।
उत्फुल्लमल्लिकादामधम्मिल्लहृतषट्पदा ॥ १११६ ॥
ददर्श हर्म्यमारुह्य सौन्दर्यकुसुमायुधम् ।
कमलाकरनामानं युवानं द्विजपुत्रकम् ॥ १११७ ॥
तं वीक्ष्य नयनानन्दबान्धवं साभवत्क्षणात् ।
नलिनीव विलीनेव दष्टेव मुषितेव च ॥ १११८ ॥
तदालोकनसंजातपृथुवेपथुमोहिता ।
नेदं युक्तमितीवोक्ता सिञ्जानमणिभूषणैः ॥ १११९ ॥
चन्द्ररागमुखीं पद्मरागरक्तकरोज्ज्वलाम् ।
सोऽपि तां चिरमालोक्य लावण्यमणिपुत्रिकाम् ॥ ११२० ॥
ययौ विलोलयन्मौलिं रूपातिशयविस्मितः ।
प्रविष्टामिव तद्वक्त्रे कर्षन्निव शनैर्दृशम् ॥ ११२१ ॥
ततः सा प्रौढतापेन ग्लपिता मदनाग्निना ।
दाहोपकरणं मेने मृणालकदलीवनम् ॥ ११२२ ॥
तुषारकिरणस्मेरां शर्वरीं मदनोज्ज्वलाम् ।
दावानलैर्वलयितामिव घोराममंस्त सा ॥ ११२३ ॥
स्तौति स पार्वतीमेत्य सा निजोद्यानवर्तिनी ।
तेन पुष्पशरेणेव संगमो मे भवत्विति ॥ ११२४ ॥
कृष्णपक्षेन्दुलेखेव शरन्निर्झरिणीव वा ।
कान्तिमात्रावशेषाभूत्केयूराहतकङ्कणा ॥ ११२५ ॥
तां पाण्डुरमुखीं क्षामां स्मरज्वरभयातुराम् ।
सखी मालतिका नाम दृष्ट्वा शोकाकुलाभवत् ॥ ११२६ ॥
साथ गत्वा तदादिष्टा कमलाकरमन्दिरम् ।
तं ददर्श निजोद्याने प्रच्छन्ना विरहातुरम् ॥ ११२७ ॥
तामेव विलपन्तं तु सुहृदाश्वासितं मुहुः ।
तं समभ्येत्य सा प्राह सख्यास्तां मन्मथव्यथाम् ॥ ११२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यायति ग्लपते क्षिप्रं शेते मुह्यति वेपते ।
व्यावर्तते च सुभगा त्वां विना सा सुलोचना ॥ ११२९ ॥
चन्दनानीन्धनं यस्मिन्निन्दवो विषबिन्दवः ।
हारो वह्निविकारश्च तेन तापेन सार्दिता ॥ ११३० ॥
इति तद्वचसा सद्यः सुधासारैरिवोत्थितः ।
निशि प्रायात्तदुद्यानं स तया चारसूचितः ॥ ११३१ ॥
सख्या गिरा तमायातं विज्ञायानङ्गमञ्जरी ।
उन्मिमील प्रदीपश्रीरिव स्नेहेन पूरिता ॥ ११३२ ॥
ततस्तमागतं दृष्ट्वा व्याकोशनयनोत्पला ।
लज्जां विहाय सोत्कण्ठं कण्ठे जग्राह सुन्दरी ॥ ११३३ ॥
अयं लब्धोऽसि सुभग क्व गमिष्यसि मे पुरः ।
अभिधायेति सास्रं तं तन्वी तत्याज जीवितम् ॥ ११३४ ॥
सहसा विगतप्राणां दृष्ट्वा तां कमलाकरः ।
विलप्य सुचिरं गाढं परिष्वज्याभवद्व्यसुः ॥ ११३५ ॥
ततः प्रभाते तद्दुःखमिलिते वन्धुमण्डले ।
अर्थदत्ते सुतां कोपलज्जाशोकैश्च निन्दति ॥ ११३६ ॥
तस्याः स मणिकर्णाख्यः कौमारः पतिराययौ ।
उत्कण्ठानिर्भरः पश्यन्प्रेयस्याः कुशलं जनम् ॥ ११३७ ॥
उद्यानमथ संप्राप्य तामन्यनरसंगताम् ।
दृष्ट्वैव जीवितत्यक्तां रागी प्रायात्स पञ्चताम् ॥ ११३८ ॥
सान्यरागेण निर्दग्धा विपन्नः स च तां विना ।
अहो नु कोऽप्ययं कामो विदग्धोऽप्याहितभ्रमः ॥ ११३९ ॥
ततो भगवती गौरी वणिजां कुलदेवता ।
गुणैरभ्यर्थिता सर्वान्कृपया तानजीवयत् ॥ ११४० ॥
अभिधायेति वेतालः पप्रच्छ पृथिवीपतिम् ।
रागः कस्याधिको राजन्नेतेभ्यः कथ्यतामिति ॥ ११४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नृपः प्राह वणिक्पुत्री विप्रश्च झषकेतुना ।
अवस्थां दशमीं नीतौ क्रमेण न तदद्भुतम् ॥ ११४२ ॥
गाढरागोऽत्र कौमारः पतिरस्या मुमोच यः ।
सहसा दयितान्प्राणान्वज्रेणेव विदारितः ॥ ११४३ ॥
इति श्रुत्वेति वेतालो गत्वा पुनरलम्बत ।
स चानिनाय तं यत्नादखिन्नो मेदिनीपतिः ॥ ११४४ ॥

इत्येकविंशो वेतालः ॥ २३ ॥

अथ स्कन्धगतः प्राह वेतालः शृणु भूपते ।
ब्रह्मस्थलाग्रहारेऽभूद्विष्णुस्वामी[1] द्विजोत्तमः ॥ ११४५ ॥
चत्वारस्तस्य तनया बभूवुः श्रुतिशालिनः ।
मृते पितरि ते जग्मुर्मातुलानां निवेशनम् ॥ ११४६ ॥
सावज्ञमीक्षमाणास्तैर्निर्धनास्तत्र ते स्थिताः ।
अचिन्तयन्नहो दुःखं दारिद्र्यं मरणाधिकम् ॥ ११४७ ॥
गृध्राः प्रयान्ति च शवं नित्यं मांसोपजीविनः ।
निष्पत्रमपि दग्धं च नित्यमागारिकास्तरुम् ।
न तु दारिद्र्यसंस्पृष्टं कश्चित्स्पृशति पूरुषम् ॥ ११४८ ॥
शीतलैर्दीर्घनिद्रैश्च निरुच्छ्वाससुखैः शवैः ।
दरिद्रस्तापनिर्निद्रः सोच्छ्वासः स्पर्धते कथम् ॥ ११४९ ॥
एकः प्राह गतोऽद्याहं स्मशानं भूतभीषणम् ।
दौर्गत्यदुःखादात्मानं परित्यक्तुं समुद्यतः ॥ ११५० ॥
ततः केनापि कारुण्याद्बुधेनेवास्मि रक्षितः ।
अभुक्त्वा स्वकृतं कर्म मरणं प्राप्यते कुतः ॥ ११५१ ॥
इति ध्यात्वा ययुः स्वैरं सर्वे देशान्तरं पृथक् ।
पुनः संगमसंकेतस्थानमादिश्य ते ततः ॥ ११५२ ॥
ततः कालेन ते भ्रान्त्वा पृथिवीं बहुकौतुकाम् ।
अवाप्तविद्या मिलिताः परस्परमथोचिरे ॥ ११५३ ॥

१. 'विष्णुस्वामीत्यभूद्द्विजः' इति कथासरित्सागरे, 'देवस्वामी' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्थिसंपादिनीं विद्यां जानामीत्यग्रजोऽभ्यधात्।
तन्मांसयोजनज्ञोऽहमित्युवाच ततः परः ॥ ११५४ ॥
त्वग्रोमन्यासकुशलस्तत्रासीत्यपरोऽब्रवीत्।
जीवितार्पणविज्ञाने दक्षोऽसीत्येव तत्परः ॥ ११५५ ॥
विद्याप्रभावं ते द्रष्टुं मिथस्तत्र सकौतुकाः।
दैवादवापुः सिंहस्य कीर्णजीर्णास्थिसंचयम् ॥ ११५६ ॥
तं समग्रं समांसं च कृत्वा त्वग्रोमसंकुलम्।
क्रमैश्चतुर्थो विद्यानां पञ्चाननमजीवयत् ॥ ११५७ ॥
दंष्ट्राविटङ्कवदनः क्षुत्क्षामः समजायत।
जघान तीक्ष्णं करजैः पुरस्ताद्द्विजपुत्रकान् ॥ ११५८ ॥
कथयित्वेति वेतालः पप्रच्छ धरणीपतिम्।
ब्रूहि राजन्द्विजवधोद्भूतं तत्कस्य पातकम् ॥ ११५९ ॥
इति पृष्टोऽब्रवीद्राजा यो मृगेन्द्रमजीवयत्।
तस्य तत्पातकं घोरमन्येषां नास्त्यसंशयम् ॥ ११६० ॥
इति श्रुत्वेति वेतालो गत्वा पुनरलम्बत।
नृपोऽपि तं गृहीत्वा तु प्रायादतुलविक्रमः ॥ ११६१ ॥

इति द्वाविंशो वेतालः ॥ २४ ॥

भूयः स्कन्धगतः प्राह वेतालो बत भूपते।
नास्मादद्यापि निर्बन्धाद्विरतोऽसि कथां शृणु ॥ ११६२ ॥
यज्ञस्थलाग्रहारेऽभूत्कलिङ्गविषये द्विजः।
यज्ञसोमाभिधः सोमपानपूतः कुलोद्गतः ॥ ११६३ ॥
भार्यायां सोमदत्तायां तेनाजनि गुणी सुतः।
शशाङ्कविशदाकारो बाल्येऽपि विपुलश्रुतः ॥ ११६४ ॥
कालेन यौवनं प्राप देवस्वामी स तत्सुतः।
विद्याविनयसौभाग्यलावण्यामृतपूरितः ॥ ११६५ ॥
स कृतान्तस्य नैर्घृण्यात्कालस्य कालशासनात्।
पूर्वकर्मोर्मिवैचित्र्यात्प्रययौ पञ्चतां युवा ॥ ११६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नयनोत्सवलावण्यान्कुलाचारगुणाधिकान् ।
सहते नैव विबुधान्कालः कलिरिवाकुलः ॥ ११६७ ॥
पितरौ तस्य शोकार्तौ दृष्ट्वा तारप्रलापिनौ ।
चक्रन्दुरिव सोद्वेगाः प्रति सत्कारवैर्दिशः ॥ ११६८ ॥
ततस्तं बान्धवाः सर्वे समग्रगुणबान्धवाः ।
निन्युः स्मशानवाचालतमालवलयाकुलम् ॥ ११६९ ॥
संस्काराय तमानीतं द्विजसूनुं महाव्रती ।
श्मशानमठिकावासी ददर्श सुभगाकृतिम् ॥ ११७० ॥
वृद्धो नाम शिवो नाम कुर्वे क्लेशास्पदं मनः ।
ध्यानयोगसमाधाने तत्त्वे वादी विलोक्य सः ॥ ११७१ ॥
त्यक्त्वेदं भुक्तसंभोगं निजं जीर्णं कलेवरम् ।
प्रत्यग्रब्राह्मणतनुं प्रविशामीत्यचिन्तयत् ॥ ११७२ ॥
ततः प्रविश्य मठिकामेक एव कपालधृक् ।
ध्यात्वा स सार्द्रबाष्पौघगलगद्गदनिःस्वनम् ॥ ११७३ ॥
क्रन्दित्वा भस्मधवलो ननर्त व्यालवद्भुजः ।
हेलोलल्लज्जटापीडो[1] द्वितीय इव धूर्जटिः ॥ ११७४ ॥
भुजङ्ग इव निर्मोकंशेषं[2] त्यक्त्वा स विग्रहम् ।
शरीरं द्विजपुत्रस्य शून्यागारमिवाविशत् ॥ ११७५ ॥
सुप्तोत्थित इव प्राप्तस्ततो जीवं द्विजात्मजः ।
बभूव हर्षविस्फारजनकोलाहलश्चिरम् ॥ ११७६ ॥
प्रार्थ्यमानोऽप्यसौ दीनैर्बन्धुभिर्जनकेन च ।
तत्कालजातवैराग्यः स महाव्रतमग्रहीत् ॥ ११७७ ॥
अभिधायेति वेतालः पप्रच्छ नृपशेखरम् ।
स किं महाव्रती राजन्रुरोद च ननर्त च ॥ ११७८ ॥
इति पृष्टोऽब्रवीद्भूपः श्रूयतामत्र कारणम् ।
शरीरमिदमत्यन्तलालितं चिरसंगतम् ॥ ११७९ ॥

---

१. 'वेतालवज्जटापीठो' ख. २. 'कं सोऽथ' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाल्ये विवर्धितं मात्रा यौवने सेवितं सुखैः।
जीर्णमद्य त्यजामीति स रुरोदातिदुःखितः॥ ११८०॥
पुनः प्रविश्य सिद्धिर्मे जाता सद्व्रतशालिनः।
इति प्रहर्षाद्दर्पाच्च ननर्तावर्तितोत्सवः॥ ११८१॥
इति श्रुत्वेति वेतालो ललम्बे शिंशिपातरुम्।
नृपोऽपि गत्वा तं तूर्णमानिनाय महाशयः॥ ११८२॥

इति त्रयोविंशो वेतालः॥ २५॥

पुनः स्कन्धस्थितः प्राह निर्बन्धोऽयं महामते।
भोक्तुं गच्छ श्रियं राजन्न चेदेकां कथां शृणु॥ ११८३॥
दाक्षिणात्यो नरपतिर्धीमान्नाम महाबलः।
शत्रुभिर्विजितः पत्न्या पुत्र्या च सहितो ययौ॥ ११८४॥
तद्भार्या चन्द्रवत्याख्या कन्या लावण्यवत्यपि।
दूराध्वखेदिते [1]चन्द्रविलासे खेदितः शनैः॥ ११८५॥
ताभ्यां सहैव भूपालः समुत्तीर्य महाटवीम्।
भिल्लपल्लीवनं प्राप छादितं द्वीपिचर्मभिः॥ ११८६॥
मयूरपत्रवसनैर्गुञ्जास्रग्दामशेखरैः।
शबरैराचितं संध्यारक्तशृङ्गैरिवारिभिः॥ ११८७॥
तत्र तैः स महीपालो रत्नभूषणलोलुपैः।
निहतानेकशबरः पतितः संमुखो रणे॥ ११८८॥
तस्मिन्हते भयात्प्रायाद्दुहित्रा सह तद्वधूः।
शार्दूलपातवित्रस्ता हरिणीव सुलोचना॥ ११८९॥
सा गत्वा दूरमुत्कम्पिकुचश्रोणीभरालसा।
पुत्र्या त्रासचलन्नेत्रनीलोत्पलरुचा सह॥ ११९०॥
वनं प्रविश्य लवलीलवङ्गैलालताकुलम्।
निषसाद सरस्तीरे कमलामोदमन्दिरे॥ ११९१॥

१ 'हंसवि' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रान्तरे मृगकुलक्रीडारसकुतूहली।
क्षत्रियश्चण्डसिंहाख्यः सपुत्रः प्राप तद्वनम्॥ ११९२॥
नारीचरणमुद्रां तौ तत्र पांसुचयश्रियाम्।
विस्मयं जग्मतुर्वीक्ष्य रम्यलेखाविभूषिताम्॥ ११९३॥
लघुपादाम्बुजामेकां मत्वा दीर्घाङ्गुलिं पराम्।
चण्डसिंहः सुतं प्राह हर्षात्सिंहपराक्रमम्॥ ११९४॥
कान्तायुगलमेतन्नो यदि दृक्पथमेष्यति।
तदेषा दीर्घचरणा योग्या मे तव चापरा॥ ११९५॥
इत्युक्त्वा नर्मवचने कृत्वा तौ सत्यसंविदौ।
प्रापतुर्वीक्ष्य यत्नेन पूर्णेन्दुवदनायुगम्॥ ११९६॥
तौ प्राप्य ललिते नार्यौ स्मृत्वा तां निजसंविदम्।
लेभाते स्वगृहं गत्वा ताभ्यां स्मरमहोत्सवम्[1]॥ ११९७॥
कन्यां विशालचरणां चण्डसिंहोऽभजत्स्वयम्।
चण्डसिंहसुतः प्राप तां कन्याजननीमपि॥ ११९८॥
इति तौ सत्यवचसा बद्धौ विनिमयेन च।
लब्ध्वा भार्या सुताः काले प्रापतुस्तनयास्तथा॥ ११९९॥
वर्णयित्वेति वेतालः पप्रच्छ पृथिवीपतिम्।
ते तयोर्वंशसंभूताः के भवन्ति परस्परम्॥ १२००॥
इति पृष्टो नृपः प्रायादजानन्प्रश्ननिर्णयम्।
तेनाथ तुष्टो वेतालः प्रशंसंस्तमभाषत॥ १२०१॥
अनेन राजन्धैर्येण तव प्रज्ञाबलेन च।
रोमाञ्चकर्कशः कायः कस्य नाम न जायते॥ १२०२॥
पापोऽसौ क्षान्तिशीलस्ते प्रस्तुतो विपुले छले।
प्रपञ्चनीयो यत्नेन क्षिप्रं बुद्धिमता त्वया॥ १२०३॥
घोरे महाप्रेतयागे स त्वां वक्ष्यति दुर्मतिः।
अष्टाङ्गकृतभूस्पर्शः प्रणामः क्रियतामिति॥ १२०४॥

---

१. 'मदो' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो वाच्यो मृदुगिरा स दुष्टः श्रमणः स्वयम्।
अहं समस्तसामन्तमौलिनीताङ्घ्रिपङ्कजः।
अशिक्षितप्रणामोऽहं तं त्वमेव प्रदर्शय ॥ १२०५ ॥
इति त्वयोक्तः स यदा प्रणामं दर्शयिष्यति।
तदा खड्गेन हन्तव्यो हन्ति त्वामन्यथा तु सः ॥ १२०६ ॥
स चक्रवर्तितां प्राप्तुं विद्याधरधराभुजाम्।
समीहिते पशुं कृत्वा त्वां त्रैलोक्यविभूषणम् ॥ १२०७ ॥
इति सर्वं तवाख्यानं स्वस्ति तेऽस्तु व्रजाम्यहम्।
प्रायादुक्त्वेति वेतालो निर्गत्य प्रेतविग्रहात् ॥ १२०८ ॥
राजापि शवमादाय क्षान्तिशीलान्तिकं ययौ।
यामिन्यां भागशेषायामुत्साहविपुलेक्षणः ॥ १२०९ ॥

इति चतुर्विंशो वेतालः ॥ २६ ॥

तमागतमथालोक्य क्षान्तिशीलः प्रणष्टधीः।
अनार्यो धर्ममर्यादां तस्योच्चैः प्रशशंस सः ॥ १२१० ॥
ततश्चितारजःशुभ्रमण्डले बहुलाञ्छने।
नृरक्तपूर्णकलशे महातेजोरुदीपके ॥ १२११ ॥
उत्तारिते शवे तेन दक्षिणाभिमुखो व्रती।
नररक्तकृतार्घेण नेत्रधूपेन मन्त्रवित् ॥ १२१२ ॥
अथाहूय स वेतालं बलिं पुष्पैर्निरन्तरैः।
उवाच श्रेयसे राजन्प्रणामः क्रियतामिति ॥ १२१३ ॥
नृपोऽब्रवीन्नास्म्यभिज्ञः प्रमाणं दर्शय स्वयम्।
श्रुत्वेत्यदर्शयत्सोऽस्मै प्रणतिं दैवमोहितः ॥ १२१४ ॥
तमष्टाङ्गप्रणामस्थं निजधानासिना नृपः।
छित्वाथ शीर्षं तत्तूर्णमुद्धृत्यार्चाविधिं व्यधात् ॥ १२१५ ॥
पुष्पवर्षे निपतिते वेतालः प्रददौ वरम्।
राज्ञः कथेयं त्रैलोक्यपूजनीया भवत्विति ॥ १२१६ ॥

१. 'ह्' ख. २. 'धृती' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः साक्षात्समभ्येत्य ब्रह्मविष्णुमहेश्वराः ।
प्रशशंसुर्नरपतिं वरैश्च समपूजयन् ॥ १२१७ ॥
तं प्राह भगवान्विष्णुस्त्वं ममांशो महीपते ।
जातोऽसि विक्रमादित्य पुरा म्लेच्छशशाङ्कतः ॥ १२१८ ॥
त्वं त्रिविक्रमसेनोऽथ राजवंशविभूषणम् ।
भोगापवर्गसुभगां भुक्त्वा विद्याधरश्रियम् ॥ १२१९ ॥
त्रिपुरारिवरात्प्राप्य विद्याभृच्चक्रवर्तिताम् ।
निजं प्रविश्य नगरं प्रभाते स बभौ श्रिया ॥ १२२० ॥
इत्युर्वीवलये तुषारनिकरस्पष्टाट्टहासच्छविः
पाताले फणिनायकस्फुटफणाविस्फाररत्नोज्वला ।
व्योम्नि ब्रह्मविमानहंसविकसत्कान्तिप्रकाशद्युति-
स्तस्याकल्पमनल्पपुण्यपदवी गङ्गेव कीर्तिर्विभौ ॥ १२२१ ॥

इति पञ्चविंशो वेतालः ॥ २७ ॥

इति विप्रः समाश्वास्य ददौ मे मन्त्रमुत्तमम् ।
येन सिद्धेन वेतालः स मया वाहनीकृतः ॥ १२२२ ॥
तत्प्रभावान्मया दृष्टस्त्वमिहस्थः समागतः ।
इत्युक्त्वा हर्षमतुलं लेभे विक्रमकेसरी ॥ १२२३ ॥
मृगाङ्कदत्तस्तच्छ्रुत्वा तां शशाङ्कवतीं स्मरन् ।
व्रजन्नुज्जयिनीं प्राप सोऽटवीं निर्जलद्रुमाम् ॥ १२२४ ॥
ग्रीष्मोष्माश्लेषविषमं वर्त्मोत्तीर्य क्रमेण ते ।
तृष्णासंतापविधुरा ददृशुर्विशदं सरः ॥ १२२५ ॥
व्याप्तं विकाशिभिः पद्मैः सरसैर्गुणशालिभिः ।
श्रुत्वा मृगाङ्कनानीतं हर्षोत्कण्टकितैरिव ॥ १२२६ ॥
ललनालोचनौपम्यपत्रैरुत्पलसंस्तरैः ।
कृष्णवक्षःस्थलप्रीतिं विदधानमिव श्रियः ॥ १२२७ ॥
हंसांसघटितस्फारफेनोर्मिवलयोज्वलम् ।
इन्दुगर्भामृतोत्तुङ्गतरङ्गमिव सागरम् ॥ १२२८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रावृषेण्यघनश्यामैर्वराहैः सेवितान्तरम्।
चक्रवाकवियोगाग्निधूमपुञ्जैरिवामृतम्॥ १२२९॥
लोलाम्बुजदलभ्रान्तैर्मुक्ताभैर्जलबिन्दुभिः।
दर्शयन्तमिवाश्चर्यं संसारे तरलां स्थितिम्॥ १२३०॥
मुहुः करिकुलाकृष्टबिसदण्डविपाण्डुरम्।
कुमुदाकान्तचन्द्रांशुसहस्रैरिव पूरितम्॥ १२३१॥
तद्विलोक्य जहुः क्लान्तिं ते हर्षविकचेक्षणाः।
दृष्टमात्रा दिशन्त्येव संतोषं विपुलाशयाः॥ १२३२॥
पश्चिमे तस्य विस्तीर्णं तीरे शाखासहस्रिणम्।
विशालं फलपुष्पाढ्यं ददर्श वरपादपम्॥ १२३३॥
ऐश्वर्यमिव सच्छायमभिमानमिवोन्नतम्।
सौहार्दमिव संश्लिष्टं संतोषमिव सौख्यदम्॥ १२३४॥
तं वीक्ष्य संपदां पात्रं सेव्यसंतापवारणम्।
सर्वाशापूरणे शक्तमभिजातमिवेश्वरम्॥ १२३५॥
मृगाङ्कदत्तसचिवाः सहसा श्रुतधिं विना।
हर्षादारुरुहुर्भूरिफलं भोजनवाञ्छया॥ १२३६॥
शाखान्तरालं संप्राप्ताः क्षिप्रमन्तर्हितास्ततः।
मृगाङ्कदत्तो विक्रोशन्नापश्यत्सुहृदोऽथ तान्॥ १२३७॥
स तद्विरहविधुरो मुमोह पतितः क्षितौ।
वीज्यमानः श्रुतधिना पल्लवैर्धृतिमाप्तवान्॥ १२३८॥
ततः शरीरमुत्स्रष्टुं राजपुत्रं समुद्यतम्।
दुःखार्तस्य सरित्तीरे वागुवाचाशरीरिणी॥ १२३९॥
देवो गणाधिनाथोऽयं स्वेच्छातरुवराकृतिः।
एतदुल्लङ्घनात्तस्य शाखाः सुफलतां गताः॥ १२४०॥
तपसाराध्य हेरम्बं तत्सङ्गं समुपेष्यसि।
अन्यथा दुर्लभा मुक्तिस्तेषां वर्षशतैरपि॥ १२४१॥

१. 'व्य' ख. २. 'मन्यते' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति दिव्यवचः श्रुत्वा धृतिं प्राप नृपात्मजः ।
पूजयित्वा नृपवरं तुष्टाव प्रथमप्रभुम् ॥ १२४२ ॥
गजेन्द्र जयति स्फुरत्पृथुलकान्तिसद्दैर्घ्यभृ-
च्छशीव विशदो रदस्तव मुखोदयाद्रेस्तटे ।
विलासरसफूत्कृताकुलकपोलभृङ्गावली
निशाप्रणयिसीकरप्रकरहारतारागणः ॥ १२४३ ॥
गणेश्वरमिति स्तुत्वा द्वादशाहमुपोषितः ।
स्वप्ने तद्वरमासाद्य वाञ्छितं प्राप्स्यसीत्यथ ॥ १२४४ ॥
प्रीतः प्रबुद्धः सचिवान्ददर्श प्रणतान्दश ।
तान्दृष्ट्वा विस्मयाविष्टो हृष्टः प्राह मुदान्वितान् ॥ १२४५ ॥
अहो नु विपुलो लाभः कोऽप्यरण्ये ममोदितः ।
यदहं सुहृदो लब्ध्वा प्रीतः शेषैः सहाभवैः ॥ १२४६ ॥
दृढमुष्टे मेघवलस्थूलवाहो सुदुःसहः ।
व्याघ्रसेन क्व युष्माभिर्मद्वियोगोऽतिवाहितः ॥ १२४७ ॥
सप्तभिः सहितेनेति चतुर्षु नृपसूनुना ।
पृष्टेषु तेषु मतिमान्व्याघ्रसेनोऽभ्यभाषत ॥ १२४८ ॥
स्वस्ति देव वयं तत्र तेन नागेन शापिताः ।
क्षिप्ताः पारापताक्षेण दिक्षु मोहविमूर्च्छिताः ॥ १२४९ ॥
ततोऽहं निशि नीरन्ध्रे नीलशैलशिलाघने ।
तिमिरे शोकतिमिरैरभवं नष्टचेतनः ॥ १२५० ॥
सहस्रयामेव चिरात्त्रियामा यमकाङ्क्षिणा ।
अटव्यां सा मया नीता दुर्नीतेनेव दुःखदा ॥ १२५१ ॥
ततः प्रभाते संप्राप्य सरो विकचपङ्कजम् ।
निषण्णोऽहं कृतस्नानस्तीरे चिन्तानलाकुलः ॥ १२५२ ॥
तत्रापश्यमथायातान्क्रन्दितोच्छूनलोचनान् ।
दृढमुष्टिं मेघबलं स्थूलबाहुं च संगतान् ॥ १२५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो दुःखात्तनुत्यागसंभृता मुनिसूनुना ।
वयं नीताः समाश्वास्य शुभच्छायं तपोवनम् ॥ १२५४ ॥
तत्र कण्वमुनिः साक्षात्कृशानुरिव तेजसा ।
ब्रह्मलोक इवानेकैः सेव्यमानो मुनीश्वरैः ॥ १२५५ ॥
अरौद्ररूपः सततं जितकालमनोभवः ।
अकृष्णचरितः पुण्यसमाधानपदाच्युतः ॥ १२५६ ॥
कृष्णाजिनोत्तरासङ्गस्तेजसा पिङ्गलच्छविः ।
अब्जासन इवाब्जोत्थभङ्गमालारजःश्रितः ॥ १२५७ ॥
दृष्टोऽस्माभिः कुलगृहं शमसंतोषसंपदाम् ।
स हस्ततलविन्यस्तमुक्तायितजगत्त्रयः ॥ १२५८ ॥
सोऽस्मान्विलोक्य शोकार्तानाकर्ण्यास्मान्कथां च ताम् ।
उवाच करुणासिन्धुः पीयूषं विकिरन्निव ॥ १२५९ ॥
तेन दन्तांशुनिवहैः पूरिता विबभुर्दिशः ।
सोमपानसमुद्गीर्णैरिव शीतांशुसंचयैः ॥ १२६० ॥
विचित्रकर्मनिर्माणैर्भवन्त्येव भवे नृणाम् ।
संयोगैश्च वियोगैश्च[1] सुखदुःखे विपर्ययाः ॥ १२६१ ॥
मा निमज्जत निष्पारे विस्फारे शोकसागरे ।
तूर्णं मृगाङ्कदत्तेन भविता वः समागमः ॥ १२६२ ॥
पुरा सुन्दरसेनस्य राजसूनोरभूच्चिरात् ।
भार्यया च सुहृद्भिश्च हारितैरिह संगमः ॥ १२६३ ॥
श्रुत्वेति पृष्टः सोऽस्माभिर्मुनिभिश्च सकौतुकैः ।
तत्कथां प्राह भगवान्कृत्वा निखिलमाह्निकम् ॥ १२६४ ॥
अलका नाम नगरी निषधेष्वस्ति विश्रुता ।
यस्यां पौरवधूवक्त्रैर्जायते दिनकौमुदी ॥ १२६५ ॥
यस्याः[2] सुरगृहश्वेतपताकापङ्क्तिभिर्मुहुः ।
बहुधा विप्रकीर्णेव दृश्यते व्योम्नि जाह्नवी ॥ १२६६ ॥

---

१. 'वियोगश्चैव' ख. २. यस्यां सौधशिरःखच्छपताकापङ्क्तिभिर्मुहुः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्तिमानभवत्तस्यां महासेनाभिधो नृपः ।
शक्रशङ्कास्पदोत्साहो महासेन इवापरः ॥ १२६७ ॥
पाणिवाधारुणान्तेषु[1] कपोलेष्वरियोषिताम् ।
नेत्रेषु चाश्रुताम्रेषु यत्प्रतापोऽभजत्स्थितिम् ॥ १२६८ ॥
का निशा नेन्दुतिलका को नु गौरीगुरुर्गिरिः ।
यद्यशोभिरभूच्छुभ्रैः को वा देवो न धूर्जटिः ॥ १२६९ ॥
लक्ष्मीरक्षामणिस्तस्य गुणपालित इत्यभूत् ।
मन्त्री सर्वोपधाशुद्धः षाड्गुण्यनयभूषणः ॥ १२७० ॥
राज्ञः शशिप्रभा तस्य पौलोमीव शतक्रतोः ।
भार्या बभूव सौभाग्यवसन्तोपवनस्थली ॥ १२७१ ॥
स तस्यासदृशं लेभे सशरीरमिव स्मरम् ।
पुत्रं सुन्दरसेनाख्यं विलाससदनं द्युतेः ॥ १२७२ ॥
बभूवुः सचिवास्तस्य श्रीपरिष्वङ्गसाक्षिणः ।
चत्वारश्चारुकटका मुरारेरिव बाहवः ॥ १२७३ ॥
चण्डप्रभादिभिर्मित्रैः स तैः सह नृपात्मजः ।
कदाचित्पुरयात्रायां निर्ययौ द्रष्टुमुत्सवम् ॥ १२७४ ॥
पूजयित्वा द्विजवरान्मणिकाञ्चनमौक्तिकैः ।
सुहृदुत्साहितो दाता विचचार पुरोत्सवे ॥ १२७५ ॥
स तत्र विबभौ मत्तकुञ्जरेन्द्रघटा इव ।
संपूर्ण इव शीतांशुर्मेघमालाविनिर्गतः ॥ १२७६ ॥
गोरोचनापत्रभङ्गैस्तस्योरुयुगलं बभौ ।
हरेरिव चिरोत्पिष्टकैटभासृक्छटाङ्कितम् ॥ १२७७ ॥
रराज तारहारेण लक्ष्मीलीलास्मितेन सः ।
निर्झरेणेव गाङ्गेन स्फटिकाचलशेखरः ॥ १२७८ ॥
शौर्यद्विपालाननिभौ जयतोरणविभ्रमौ ।
प्रतापमन्दिरस्तम्भौ भुजौ तस्य विरेजतुः ॥ १२७९ ॥

1. 'पाणिच्छायारुणान्ते' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स लोलकुण्डलासक्तलसन्मरकतांशुभिः।
बभौ विभूषितो भोगिभोगैरिव महेश्वरः॥ १२८०॥
व्यूढोरस्कं हरिस्कन्धं प्रांशुं कमललोचनम्।
तं वीक्ष्य पौरललना बभूवुर्मन्मथाकुलाः॥ १२८१॥
मोट्टायितैः कुट्टमितैर्जृम्भितैः किलकिञ्चितैः।
तासां तद्दर्शनोद्भूतैरयं किल सखीजनः॥ १२८२॥
महोत्सवं समालोक्य कामिनीनयनोत्सवः।
अपरेद्युर्मृगरणक्रीडायै सानुगो ययौ॥ १२८३॥
तं व्रजन्तं ददर्शाथ यदृच्छासंगता पथि।
प्रौढा कात्यायनी नाम तापसी कौतुकाकुला॥ १२८४॥
आश्चर्यशालिनीं पृथ्वीं भ्रान्त्वा सा वीक्ष्य तं पुरः।
विस्मयस्तब्धनयना लिखितेवाभवत्क्षणात्॥ १२८५॥
अभिनन्द्य तमाशीर्भिः प्रहृष्टा गन्तुमुद्यता।
अनेकसेवकासक्तदृशा तेन न वीक्षिता॥ १२८६॥
सदर्पमिव तं मत्वा किंचिदुच्चैरुवाच सा।
अहो नु रूपसंमत्तो राजपुत्रो मदाकुलः॥ १२८७॥
हंसद्वीपपतेः पुत्रीं कान्तां दारवतीं यदि।
प्राप्नोति तन्न जानीमः कीदृशोऽयं भविष्यति॥ १२८८॥
इति तद्वचनं श्रुत्वा सेवका गर्वमन्थरम्।
न्यवेदयन्समभ्येत्य राजपुत्राय विस्मिताः॥ १२८९॥
स तामानाय्य पप्रच्छ प्रणम्य विनयानतः।
यथोक्तमवदत्सा च पृष्टा तेन पुनः पुनः॥ १२९०॥
स्नानभोजनसन्मानैः पूजनीयेयमित्यथ।
आदिश्य मन्त्रिणं प्रायान्मृगयायै नृपात्मजः॥ १२९१॥
ततः परिनिवृत्याशु राजधानीमुपेत्य ताम्।
पप्रच्छ पुनरेकान्ते सचिवैः सह निर्वृतः॥ १२९२॥

१. 'प्रोक्ता' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा प्राह राजपुत्रास्ति हंसद्वीपनराधिपः ।
श्रीमान्मन्दरदेवाख्यो राजसागरमन्दरः ॥ १२९३ ॥
तस्य मन्दारवत्याख्या तनयास्ति सुलोचना ।
यां विधाय विधेर्मन्ये चिरादुच्छ्वसितं मनः ॥ १२९४ ॥
मासि मासि समभ्यस्य विधिः शङ्के शशिक्रियाम् ।
तन्मुखाशेषसादृश्येनैवाद्यापि प्रगल्भते ॥ १२९५ ॥
[1]चन्द्रस्पर्धैव लज्जायै दूरे जलजसंकथा ।
तन्मुखस्योपमापात्रं स्वबिम्बं यदि दर्पणे ॥ १२९६ ॥
सौन्दर्यवसनं लोके सा च संवननं दृशः ।
तथा च पश्य चित्रस्थं तदाकारं ददाम्यहम् ॥ १२९७ ॥
मयेयं लिखिता तत्र तत्सौन्दर्यानुरक्तया ।
एवंविधा सुधामूर्तिर्नेत्राभ्यां लभ्यते कुतः ॥ १२९८ ॥
इत्युक्त्वा कौतुकज्ञाय राजपुत्राय तां ददौ ।
चित्रस्थां वीक्ष्य तां सोऽपि चित्रन्यस्त इवाभवत् ॥ १२९९ ॥
साक्षादिव स्थितां दृष्ट्वा किंचिद्वक्तुमिवोद्यतः ।
स तां प्रदध्यावाक्रान्तौ विस्मयेन स्मयेन च ॥ १३०० ॥

यस्याः कान्तितरङ्गिणी स्तनतटे हारांशुकेनोज्ज्वले
भ्रूवीचीचटुले विलाससुभगे वक्त्रे रुचिस्यन्दिनि ।
लावण्यामृतविभ्रमे कृतमहावर्ते च नाभीह्रदे
मज्जन्तीव मयार्पिता स्मरभरादानन्दगुर्व्या दृशः ॥ १३०१ ॥

इत्युक्त्वा सर्ववृत्तीनां निर्दिशन्नेव नेत्रताम् ।
योगीव तन्मयः क्षिप्रं निर्विकल्पो बभूव सः ॥ १३०२ ॥
तं वीक्ष्य पुलकापूर्णं स्वेदबिन्दुविराजितम् ।
ध्यात्वा तत्सचिवाः प्राहुस्तापसीं विस्मयाकुलाः ॥ १३०३ ॥
आर्ये तत्सदृशी कन्या चित्रस्था कैः प्रतीयते ।
लिख्यतां राजपुत्रोऽयं सादृश्ये कुशलासि चेत् ॥ १३०४ ॥

---

1 'मुखम्' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्ता तैर्लिलेखाथ तापसी भूमिपात्मजम् ।
अविसंवादिलावण्यं संक्रान्तमिव दर्पणे ॥ १३०५ ॥
ते दृष्ट्वा लिखितं चित्रे तुल्यं राजसुतं तथा ।
साधु साध्वित्यभाषन्त प्रहर्षोत्फुल्ललोचनाः ॥ १३०६ ॥
तापस्यां प्रतियातायां राजपुत्रस्ततोऽभवत् ।
अरतिस्मरतापानां करात्करमिवागतः ॥ १३०७ ॥
श्वासताम्राधरदलो ध्यानस्तिमितलोचनः ।
आपाण्डुगण्डः कदलीदलशय्यां ततोऽभजत् ॥ १३०८ ॥
विज्ञाय तत्सुहृद्वाक्यात्पुत्रं कामज्वरातुरम् ।
तापसीकथितं कन्यावृत्तान्तं च निशम्य तत् ॥ १३०९ ॥
महासेनोऽथ दूतेन हंसद्वीपाधिपं सुताम् ।
योग्यां सुन्दरसेनाय ययाचे दिक्षु विश्रुताम् ॥ १३१० ॥
लिखितं चित्रफलके राजपुत्रमदर्शयत् ।
महासेनविसृष्टोऽसौ दूतस्तत्र महीभुजे ॥ १३११ ॥
हंसद्वीपाधिपः पुत्र्यै चित्रस्थं भूमिपात्मजम् ।
प्रदिश्य तत्प्रयाणाय प्रति दूतं समादिशत् ॥ १३१२ ॥
मन्दारवत्यथालोक्य तं कान्तं प्रतिमापदम् ।
बभूवाभिनवोद्भिन्नमनोभवविभूषिता ॥ १३१३ ॥
ततस्तच्चिन्तनैकाग्रा तत्सौन्दर्यकथादरा ।
भेजे प्रलापिनी तापं हृदयान्ते मुखश्रिया ॥ १३१४ ॥
कान्तां विज्ञाय तां तुल्यवरव्यासक्तमानसाम् ।
आपादसहमानां च कालं परिणयोत्सवे ॥ १३१५ ॥
विससर्ज प्रवहणैर्महासेनपुरीं स्वयम् ।
पुत्रीं मन्दरदेवोऽथ हृष्टो दासीशतैर्वृताम् ॥ १३१६ ॥
रत्नपूर्णं प्रवहणं सा समारुह्य सोत्सुका ।
अवाप जलधेर्मध्यं तरङ्गावर्तभीषणम् ॥ १३१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथोदतिष्ठद्व्यालोलविद्युत्पिङ्गललोचनः ।
तमालजालमलिनो गर्जञ्जलदराक्षसः ॥ १३१८ ॥
तदुद्भूतमहावातवलयावर्तनर्तितः ।
कैलासशिखराकारतरङ्गः सागरोऽभवत् ॥ १३१९ ॥
तेन कल्पान्तसंरम्भगम्भीरेण नभस्वता ।
अभज्यत प्रवहणं राजपुत्र्याः कृतश्रमम् ॥ १३२० ॥
किमेतदिति निस्पन्दचेतनामोहविप्लवैः ।
वीचिहस्तैस्ततो न्यस्ता भवितव्यतयैव सा ॥ १३२१ ॥
तत्र संज्ञां समासाद्य चिरात्तरललोचना ।
एकाकिनी त्रासशोकशङ्कातङ्काकुलाभवत् ॥ १३२२ ॥
तालतालीवनश्यामे निर्जने जलधेस्तटे ।
बभ्राम चक्रवाकीव बाला तारप्रलापिनी ॥ १३२३ ॥
स्तनस्तबकिनी तस्याः साञ्जनैर्बाष्पबिन्दुभिः ।
आलीनभृङ्गमालेव बभूव तनुवल्लरी ॥ १३२४ ॥
वीक्ष्य शून्या दश दिशो निश्चलोत्पललोचना ।
त्रस्तेव बालहरिणी क्षिप्रमुत्कन्धराभवत् ॥ १३२५ ॥
हा तात हा प्रियतम क्व नु व्यग्रोऽसि पश्य माम् ।
इति चक्रन्द सा तन्वी दृषदामपि दारणम् ॥ १३२६ ॥
अत्रान्तरे महाम्भोधिवेलाविरचिताश्रमः ।
तं देशमागतः स्नातुं मतङ्गो मुनिपुंगवः ॥ १३२७ ॥
यमुनाभिधया पुत्र्या सहितस्तां ददर्श सः ।
विलापक्षामवदनां निःश्वासग्लपिताधराम् ॥ १३२८ ॥
तां वीक्ष्य करुणासिन्धुः सान्त्वयन्मुनिरब्रवीत् ।
समाश्वसिहि मा भैषीः पुत्रि मा विक्लवा भव ।
अस्यां तनौ न विपदश्चिरं तिष्ठन्ति सुन्दरि ॥ १३२९ ॥
इत्युक्त्वा तेन सा पृष्टा कारुण्याद्दुःखकारणम् ।

१. 'दृषं किमपि' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उवाच तत्समाश्वाससुधया लब्धजीविता ॥ १३३० ॥
हंसद्वीपपतेः पुत्री हताशा भगवन्नहम् ।
पित्रा सुन्दरसेनाय विसृष्टाम्भोधिवर्त्मना ॥ १३३१ ॥
अचिरप्रस्तुतोद्वाहा भग्ने प्रवहणे विभो ।
तीरेऽस्मिन्सलिलैः क्षिप्ता जीवामि कठिनाशया ॥ १३३२ ॥
निषधाधिपतेः पुत्रः प्राप्तो नाधन्यया मया ।
श्रीमान्सुन्दरसेनोऽसौ वरो दिव्यवरोचितः ॥ १३३३ ॥
इत्युदश्रुदृशस्तस्या निशम्य वचनं मुनिः ।
निनाय पुत्र्या सहितस्तामाश्वास्य निजाश्रमम् ॥ १३३४ ॥
भविष्यत्यचिरादेव तवेप्सितसमागमः ।
इति तत्र तदादिष्टा कंचित्कालमुवास सा ॥ १३३५ ॥
अस्मिन्नवसरे तीव्रमन्मथानलतापितः ।
दूतैः सुन्दरसेनोऽपि ज्ञात्वा पुत्रीं प्रतिश्रुताम् ॥ १३३६ ॥
राज्ञा मन्दरदेवेन कृतार्थोऽसीति वादिना ।
अक्षमः कालसहने सामात्यः पितुराज्ञया ॥ १३३७ ॥
प्रतस्थे विपुलानीकैर्विवाहोचितया श्रिया ।
हंसद्वीपं हरिखुरोट्टङ्कितावनिमण्डलः ॥ १३३८ ॥
स शशाङ्कपुरं प्राप्य क्रमेण जलधेस्तटे ।
राज्ञा महेन्द्रादित्येन पूजितः सादरं गृहम् ॥ १३३९ ॥
तमेवाग्रे समाधाय सोत्साहं सचिवैः सह ।
आरुरोह प्रवहणं तूर्णं परिणयोत्सुकः ॥ १३४० ॥
ततः संहारपिशुनैरकाण्डोच्चण्डमारुतैः ।
समुद्भूतैर्महाम्भोधावभज्यत सचेटकः ॥ १३४१ ॥
बाहुभ्यां तरणोद्युक्ताः पवनप्रेरितैर्जलैः ।
पृथक्तीरेषु विन्यस्ताः सर्वे प्रवहणाश्रयाः ॥ १३४२ ॥
एकेन सुहृदा सार्धं तीरं प्राप्य नृपात्मजः ।
अचिन्तयद्विलसितं भुजङ्गकुटिलं विधेः ॥ १३४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हा सुन्दरि न लब्धासि यत्नैरेवंविधैरपि ।
कुतो वा हीनपुण्यानां संकल्पाः फलयोगिनः ॥ १३४४ ॥
तैः सुहृद्भिर्वियुक्तस्य निष्फलोद्योगदुःखिनः ।
ममास्मिन्व्यसनापाते निधानान्नापरं सुखम् ॥ १३४५ ॥
इति प्रलापमुखरः सुहृदाश्वासितो मुहुः ।
तापसाभ्यां समादिष्टं शनैः प्राप तपोवनम् ॥ १३४६ ॥
अत्रान्तरे महासेनो विज्ञाय निषधेश्वरः ।
रहितं राजपुत्रेण प्रतीपं सैन्यमागतम् ॥ १३४७ ॥
श्रुत्वा समुद्रवृत्तान्तं घोरं कुलिशदारुणम् ।
हा पुत्रेति विलप्योच्चैर्निपपात महीतले ॥ १३४८ ॥
भूपतौ शोकपतिते रुरोदेव वसुंधरा ।
अन्तःपुरवधूच्छिन्नहारमुक्ताश्रुबिन्दुभिः ॥ १३४९ ॥
देवी शशिप्रभा तत्र पुत्रशोकप्रलापिनी ।
चक्रे केलिकुरङ्गीणां मुहुः साश्रुलवा दृशः ॥ १३५० ॥
अस्मिन्नवसरे ज्ञात्वा हंसद्वीपाधिपः सुताम् ।
निमग्नां सागरावर्ते सोऽभ्ययादलकां स्वयम् ॥ १३५१ ॥
तूर्णं समुद्रमुत्तीर्य संबन्धिनि नराधिपे ।
पुत्रीवियोगविधुरे संप्राप्ते वल्लभासखे ॥ १३५२ ॥
महासेनपुरं तारं चचाराक्रोशनारवः ।
समानदुःखसङ्गेन बाष्पग्रन्थिर्हि भिद्यते ॥ १३५३ ॥
शनैराश्वासितास्तेऽथ वृद्धामात्यपुरःसरैः ।
बहवः सागरे तीर्णा दृष्टा इति निदर्शनैः ॥ १३५४ ॥
ततस्तौ भूपती तत्र सभार्यौ शोककर्शितौ ।
अभूतां नियताहारौ शिवार्चनपरायणौ ॥ १३५५ ॥
अत्रान्तरे राजपुत्रः सुहृदा सह दुःखितः ।
प्राप्तः सुन्दरसेनस्तं मतङ्गाश्रमकाननम् ॥ १३५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उवाच तत्समाश्वाससुधया लब्धजीविता ॥ १३३० ॥
हंसद्वीपपतेः पुत्री हताशा भगवन्नहम् ।
पित्रा सुन्दरसेनाय विसृष्टाम्भोधिवर्त्मना ॥ १३३१ ॥
अचिरप्रस्तुतोद्वाहा भग्ने प्रवहणे विभो ।
तीरेऽस्मिन्सलिलैः क्षिप्ता जीवामि कठिनाशया ॥ १३३२ ॥
निषधाधिपतेः पुत्रः प्राप्तो नाधन्यया मया ।
श्रीमान्सुन्दरसेनोऽसौ वरो दिव्यवरोचितः ॥ १३३३ ॥
इत्युदश्रुदृशस्तस्या निशम्य वचनं मुनिः ।
निनाय पुत्र्या सहितस्तामाश्वास्य निजाश्रमम् ॥ १३३४ ॥
भविष्यत्यचिरादेव तवेप्सितसमागमः ।
इति तत्र तदादिष्टा कंचित्कालमुवास सा ॥ १३३५ ॥
अस्मिन्नवसरे तीव्रमन्मथानलतापितः ।
दूतैः सुन्दरसेनोऽपि ज्ञात्वा पुत्रीं प्रतिश्रुताम् ॥ १३३६ ॥
राज्ञा मन्दरदेवेन कृतार्थोऽस्मीति वादिना ।
अक्षमः कालसहने सामात्यः पितुराज्ञया ॥ १३३७ ॥
प्रतस्थे विपुलानीकैर्विवाहोचितया श्रिया ।
हंसद्वीपं हरिखुरोट्टङ्कितावनिमण्डलः ॥ १३३८ ॥
स शशाङ्कपुरं प्राप्य क्रमेण जलधेस्तटे ।
राज्ञा महेन्द्रादित्येन पूजितः सादरं गृहम् ॥ १३३९ ॥
तमेवाग्रे समाधाय सोत्साहं सचिवैः सह ।
आरुरोह प्रवहणं तूर्णं परिणयोत्सुकः ॥ १३४० ॥
ततः संहारपिशुनैरकाण्डोच्चण्डमारुतैः ।
समुद्धूतैर्महाम्भोधावभज्यत सचेटकः ॥ १३४१ ॥
बाहुभ्यां तरणोद्युक्ताः पवनप्रेरितैर्जलैः ।
पृथक्तीरेषु विन्यस्ताः सर्वे प्रवहणाश्रयाः ॥ १३४२ ॥
एकेन सुहृदा सार्धं तीरं प्राप्य नृपात्मजः ।
अचिन्तयद्विलसितं भुजङ्गकुटिलं विधेः ॥ १३४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हा सुन्दरि न लब्धासि यत्नैरेवंविधैरपि ।
कुतो वा हीनपुण्यानां संकल्पाः फलयोगिनः ॥ १३४४ ॥
तैः सुहृद्भिर्वियुक्तस्य निष्फलोद्योगदुःखिनः ।
ममास्मिन्व्यसनापाते निधानान्नापरं सुखम् ॥ १३४५ ॥
इति प्रलापमुखरः सुहृदाश्वासितो मुहुः ।
तापसाभ्यां समादिष्टं शनैः प्राप तपोवनम् ॥ १३४६ ॥
अत्रान्तरे महासेनो विज्ञाय निषधेश्वरः ।
रहितं राजपुत्रेण प्रतीपं सैन्यमागतम् ॥ १३४७ ॥
श्रुत्वा समुद्रवृत्तान्तं घोरं कुलिशदारुणम् ।
हा पुत्रेति विलप्योच्चैर्निपपात महीतले ॥ १३४८ ॥
भूपतौ शोकपतिते रुरोदेव वसुंधरा ।
अन्तःपुरवधूच्छिन्नहारमुक्ताश्रुबिन्दुभिः ॥ १३४९ ॥
देवी शशिप्रभा तत्र पुत्रशोकप्रलापिनी ।
चक्रे केलिकुरङ्गीणां मुहुः साश्रुलवा दृशः ॥ १३५० ॥
अस्मिन्नवसरे ज्ञात्वा हंसद्वीपाधिपः सुताम् ।
निमग्नां सागरावर्ते सोऽभ्ययादलकां स्वयम् ॥ १३५१ ॥
तूर्णं समुद्रमुत्तीर्य संबन्धिनि नराधिपे ।
पुत्रीवियोगविधुरे संप्राप्ते वल्लभासखे ॥ १३५२ ॥
महासेनपुरं तारं चचाराक्रोशनारवः ।
समानदुःखसङ्गेन बाष्पग्रन्थिर्हि भिद्यते ॥ १३५३ ॥
शनैराश्वासितास्तेऽथ वृद्धामात्यपुरःसरैः ।
बहवः सागरे तीर्णा दृष्टा इति निदर्शनैः ॥ १३५४ ॥
ततस्तौ भूपती तत्र सभार्यौ शोककर्शितौ ।
अभूतां नियताहारौ शिवार्चनपरायणौ ॥ १३५५ ॥
अत्रान्तरे राजपुत्रः सुहृदा सह दुःखितः ।
प्राप्तः सुन्दरसेनस्तं मतङ्गाश्रमकाननम् ॥ १३५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसन्नसुभगच्छायमञ्जुगुञ्जद्विहङ्गमे ।
मृदुलानिललोलाग्रफुल्लवल्लीमनोहरे ॥ १३५७ ॥
तत्राश्रमोपान्तनदीतीरे तरललोचनाः ।
जलकेलिकलालोला ददर्श मुनिकन्यकाः ॥ १३५८ ॥
तासां मध्ये ततोऽपश्यत्ताराणामिव रोहिणीम् ।
शोककञ्चुकसंवीतां कन्यां कुवलयेक्षणाम् ॥ १३५९ ॥
निर्दोषेणातिकान्तेन शतपत्रविकाशिना ।
अभिभूतेन्दुबिम्बेन वदनेन विराजिताम् ॥ १३६० ॥
निषिद्धमावयोरैक्यं श्रोत्राभ्यां नासया तथा ।
रोषादतीव रक्तान्तं बिभ्राणां लोचनद्वयम् ॥ १३६१ ॥
नागवल्लीकिशलयैर्भूषितामधरांशुभिः ।
लक्ष्मीमिवाब्धिसंक्रान्तबालविद्रुमपल्लवाम् ॥ १३६२ ॥
अत्युच्चकुचसंरुद्धं न पश्याम्येतदाननम् ।
इतीव चिन्तया मध्यं दधती क्षामतां गतम् ॥ १३६३ ॥
फुल्लोत्पलवरामोदां कुन्ददन्तां हिमस्मिताम् ।
अशोकपल्लवकरां मल्लीमुकुलकोमलाम् ॥ १३६४ ॥
केतकीकलिकाकोटितीक्ष्णान्तनयनच्छटाम् ।
स तां विलोक्य साकारामिव सर्वर्तुदेवताम् ॥ १३६५ ॥
बभूव विस्मयोत्तालनयनः सुहृदा सह ।
अग्राम्यमधुरं तस्याः प्रशंसन्नेष विभ्रमम् ॥ १३६६ ॥
साथ तत्र जलक्रीडाव्यग्रा ग्राहेण हारिणी ।
गृहीता मोहमगमत्त्रासकम्पिपयोधरा ॥ १३६७ ॥
तां विलोक्य तदाक्रान्तां मुनिकन्याः प्रचुक्रुशुः ।
हा हा मन्दारवत्येषा सखी ग्राहेण कृष्यते ॥ १३६८ ॥
इति प्रियतमानामश्रवणोत्फुल्लकाननः ।
क्षिप्रं सुन्दरसेनस्तु हत्वा ग्राहं ररक्ष ताम् ॥ १३६९ ॥

१. 'विविक्तन' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सखीभिर्वीज्यमानाथ सा बाला कदलीदलैः ।
लब्धसंज्ञा नृपसुतं पुरो दृष्ट्वा व्यचिन्तयत् ॥ १३७० ॥
अहो बत स एवायं यश्चित्रस्थो मया पुरा ।
दृष्टः सैवेयमम्लाना रेखा सौन्दर्यशालिनी ॥ १३७१ ॥
इति लज्जाकुले तस्याः कान्तिदर्शनसंशये ।
लेभे मनोभवः क्षिप्रं दोलारोहणविभ्रमम् ॥ १३७२ ॥
ततः सुन्दरसेनस्तां पप्रच्छ मुनिकन्यकाम् ।
लावण्यललिताकारा कस्येयमिति सादरम् ॥ १३७३ ॥
इयं मन्दरदेवस्य हंसद्वीपपतेः सुता ।
ख्याता मन्दारवत्याख्या प्रस्थिता पितुराज्ञया ॥ १३७४ ॥
वरं सुन्दरसेनाख्यं निषधाधीशितुः सुतम् ।
तरीतुं जलयानेन ततार जलधिं ततः ॥ १३७५ ॥
भग्ने प्रवहणे वातैर्दैवात्तटमधिश्रिता ।
न्यस्तेयं वीचिहस्तेन भग्ने प्रवहणेऽब्धिना ॥ १३७६ ॥
प्राप्ता मतङ्गमुनिना कन्येव प्रतिपालिता ।
इति स श्रुतवृत्तान्तस्तस्थावानन्दसंप्लुतः ॥ १३७७ ॥
पृष्टो मन्दारवत्याथ तत्सखा प्राह तत्कथाम् ।
यथावृत्तं तदाकर्ण्य प्रपेदे निर्वृतिं पराम् ॥ १३७८ ॥
इति श्रुत्वा परिज्ञाय मिथो वृत्तान्तविस्तरम् ।
दयितौ जग्मतुर्मूर्च्छां तौ वाष्पपिहितेक्षणौ ॥ १३७९ ॥
स्वयं ततः समभ्येत्य भगवाञ्ज्ञाततत्कथः ।
मतङ्गमुनिरानन्दाद्ददौ तां नृपसूनवे ॥ १३८० ॥
अथ संप्राप्तदयितो राजपुत्रो मुनीश्वरम् ।
यमुनां च समामन्त्र्य प्रतस्थे सुहृदा सह ॥ १३८१ ॥
किंचिन्मार्गं समुल्लङ्घ्य ततः स जलधेस्तटे ।
आलुलोके प्रवहणं वणिजो वल्लभासखः ॥ १३८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वणिक्सोऽपि विलोक्यैव दूरात्तां हंसगामिनीम् ।
आरुह्यतां प्रवहणं प्रोवाचेति नृपात्मजः ॥ १३८३ ॥
तदाकर्ण्य प्रियां पूर्वमारोप्य स समीहते ।
यावत्स्वयं समारोढुं वणिक्तावज्जहार ताम् ॥ १३८४ ॥
क्रोशन्तीं तां समादाय याते तस्मिन्नदृश्यताम् ।
मूर्च्छान्धकारितः क्षिप्रं निपपात नृपात्मजः ॥ १३८५ ॥
हा प्रिये क्व नु यातासि वद दृष्टासि पश्य माम् ।
इत्युन्मत्त इवानेकं विललाप मुहुर्मुहुः ॥ १३८६ ॥
भृङ्गावलीषु कबरीमुत्पलेषु विलोकितम् ।
लीलां च बालवल्लीषु स शुशोच मृगीदृशः ॥ १३८७ ॥
तन्व्या संभाषितोऽस्मीति स वदन्बालवल्लरीम् ।
मञ्जुसिञ्जानमधुपामालिलिङ्गानिलाकुलाम् ॥ १३८८ ॥
कान्ताकटाक्षमालेयमिति बर्हिशिखावलीम् ।
मोहाद्बाल इवाधावद्बालेन्दुफलकाम्यया ॥ १३८९ ॥
तस्मिन्प्रियावियोगाग्निदह्यमाने दिनेश्वरः ।
चित्रमस्ताद्रिमारुह्य ममज्ज जलधेर्जले ॥ १३९० ॥
अथाभूत्सांध्यरागेण मञ्जिष्ठपटशोभिना ।
चक्राह्वशोकशिखिना मूर्तेनेवावृतं जगत् ॥ १३९१ ॥
ततः सुन्दरसेनोऽग्रदुःखानिलसमुच्छ्रितैः ।
सान्द्रधूमैरिव ध्वान्तैर्बभूव पिहिता दिशः ॥ १३९२ ॥
ततश्चन्द्रोदयारम्भपाण्डुरा रजनी बभौ ।
वियोगिनीव संसिक्ता कर्पूरहरिचन्दनैः ॥ १३९३ ॥
अथादृश्यत शीतांशुर्नूतनोदयलोहितः ।
दह्यमानः स संतापैः प्रोषितावीक्षितैरिव ॥ १३९४ ॥
व्योमलक्ष्मीः शशिकरैः करिणीदन्तपाण्डुरैः ।
बभूव सरतसेव मण्डिता विषमण्डलैः ॥ १३९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र सुन्दरसेनोऽभूत्कौमुदीधवलत्विषि ।
कटाह इव विन्यस्तः शोचन्हरिणलोचनाम् ॥ १३९६ ॥
ज्योत्स्नाट्टहासधवलो वेताल इव चन्द्रमाः ।
प्राणान्समुद्यतो हन्तुं ममेत्युक्त्वा पपात सः ॥ १३९७ ॥
तं मूर्च्छितं निपतितं दृष्ट्वा साश्रुविलोचनः ।
विललापातिकरुणं तद्वयस्योऽपि विह्वलः ॥ १३९८ ॥
ततः प्रभाते शनकैः संज्ञामासाद्य दुःखितः ।
राजपुत्रोऽविशद्घोरामटवीं विस्खलद्गतिः ॥ १३९९ ॥
ददर्श तत्र चमरीवालैराच्छादितां पुरः ।
पुलिन्दपल्लीं शार्दूलकृत्तिप्रालम्बिभीषणाम् ॥ १४०० ॥
गजेन्द्रमांसकूटेषु काकरक्षाविराविभिः ।
विकृतैर्वृद्धशबरैः पिशाचैरिव सेविताम् ॥ १४०१ ॥
लम्बमानोरुतूणीरां संसक्तमृगवागुराम् ।
सारमेयकृतारावां तां पश्यन्प्रययौ द्रुतम् ॥ १४०२ ॥
तत्र दुर्गोपहाराय शबरैश्चापपाणिभिः ।
निहतानेकशबरो बद्धो राजसुतस्ततः ॥ १४०३ ॥
वयस्यसहितो नीतः स तैः कारागृहोदरम् ।
प्रविश्य सुचिरं वृद्धान्सचिवान्स्वान्ददर्श च ॥ १४०४ ॥
तांश्चण्डप्रमुखान्दृष्ट्वा निबद्धान्निगडैर्दृढैः ।
उवाच संगता दिष्ट्या वयमस्मिन्वधक्षणे ॥ १४०५ ॥
इति ब्रुवाणं शबरा निन्युस्तं चण्डिकालयम् ।
सहापरैस्तैः सचिवैः सायकव्रणपीडितम् ॥ १४०६ ॥
तत्र कात्यायिनीं दृष्ट्वा स प्रणम्य निराकुलः ।
तुष्टाव विरहात्क्षामः पदैरस्खलिताक्षरैः ॥ १४०७ ॥
जय देवि नमश्चन्द्रचूडाचूडाशशित्विषा ।
संपूर्यमाणपादाम्बुप्रवृद्धनखचन्द्रिके ॥ १४०८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यादि पार्वतीं स्तुत्वा स्थिते तस्मिन्नसंभ्रमे ।
हन्तुं पुलिन्दराजस्तान्विन्ध्यकेतुः समाययौ ॥ १४०९ ॥
निर्विकारं तमालक्ष्य स तत्र निधनक्षणे ।
हा धिङ् नः स्वामितनुभूरयमित्याह संभ्रमात् ॥ १४१० ॥
अहमाटविको राजा महासेनेन भूभुजा ।
कृतः सुन्दरसेनोऽयं पुत्रस्तस्योर्जिताशयः ॥ १४११ ॥
इत्युक्त्वा पादयोः सास्रं राजसूनोर्निपत्य सः ।
तैः सुहृद्भिः परिवृतं तं निनाय निजालयम् ॥ १४१२ ॥
तत्र विज्ञातवृत्तेन तेन प्रणयशालिना ।
पूज्यमानः सरन्कान्तां कंचित्कालमुवास सः ॥ १४१३ ॥
ततः कदाचिदासीनं शबरेन्द्रं तदन्तिके ।
व्यजिज्ञपत्समभ्येत्य सेनानीर्विहिताञ्जलिः ॥ १४१४ ॥
देव देशान्निरुद्धोऽसौ सार्थो बहुघनो वने ।
संयम्य समरे जित्वा समानीतश्च तत्पतिः ॥ १४१५ ॥
पश्चात्स्थिता तस्य कन्या हरिणीहारिलोचना ।
शङ्के शशाङ्को यत्कान्त्या क्षीणः क्षीणोऽपि पूर्यते[1] ॥ १४१६ ॥
श्रुत्वेति भिल्लराजेन राजपुत्रमतेन सः ।
दर्शयेति समादिष्टः सेनानीरानिनाय तम् ॥ १४१७ ॥
तस्यानुगां ततो दृष्ट्वा तां सौन्दर्यसुधानदीम् ।
राजपुत्रः परिज्ञाय मुमोह विरहातुरः ॥ १४१८ ॥
मन्दारवत्यपि पुरो विलोक्य हृदयप्रियम् ।
सहसा शोकहर्षाभ्यां निष्पन्देवाभवत्क्षणात् ॥ १४१९ ॥
ततः पुलिन्दराजेन स पृष्टो दुष्टचेष्टितः ।
वणिक्प्रोवाच पापेन पर्याप्तं सदृशं फलम् ॥ १४२० ॥
वञ्चितो राजपुत्रोऽयं हृतेयं राजकन्यका ।
स्ववेश्मनि विधास्यामि विवाहं विभवोचितम् ॥ १४२१ ॥

१. 'वर्धते' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति निश्चितसंकल्पो बद्धोऽहं भवता वने ।
प्राप्नुवन्ति कथं नाम परद्रोहरताः सुखम् ॥ १४२२ ॥
पुलिन्दराजः श्रुत्वेति हन्यतामेष दुर्मतिः ।
इत्यादिदेश सेनान्यं भृकुटीभीमविक्रमः[1] ॥ १४२३ ॥
राजपुत्रस्ततः प्राह धनमेवास्य गृह्यताम् ।
वणिजां द्रविणं प्राणः शरीरं तृणमेव यत् ॥ १४२४ ॥
इति सुन्दरसेनेन रक्षितः करुणाब्धिना ।
निरम्बरो वणिक्प्रायात्कृतकोलाहलः श्वभिः ॥ १४२५ ॥
ततो दिदेश संदेशं विन्ध्यकेतुर्महीभुजे ।
महासेनाय तनयप्राप्तिपीयूषनिर्भरम् ॥ १४२६ ॥
शबराधिपलेख्येन[2] निषधाधिपतिस्ततः ।
विज्ञाय सुतवृत्तान्तं तदग्रे सानुगो ययौ ॥ १४२७ ॥
हंसद्वीपाधिनाथेन सहामात्यसुतैस्तथा ।
स चक्रे कुञ्जरानीकैर्व्रजन्भुवि घनागमम् ॥ १४२८ ॥
ततः सुन्दरसेनोऽपि सानुगो दयितासखः ।
समेत्य दृष्ट्वा पितरं ववन्दे साश्रुलोचनः ॥ १४२९ ॥
ततः प्रविश्य ते सर्वे पुरीं कोलाहलाकुलाम् ।
अलकां हर्षसंपूर्णामिव चक्षुर्महोत्सवम् ॥ १४३० ॥
अथोचिता विवाहश्रीर्मुहूर्ते शुभलक्षणे ।
मन्दारवत्या राजेन्द्रसूनोः क्षिप्रमवर्तत ॥ १४३१ ॥
चिरं महोत्सवे तस्मिन्नानन्दामृतनिर्भरः ।
हंसद्वीपपतिः पुत्रीं परिष्वज्य पुनः पुनः ।
स्वपुरीं प्रययौ हृष्टः सानुगो वल्लभासखः ॥ १४३२ ॥
इति सुन्दरसेनेन प्राप्तास्ते सुहृदश्चिरात् ।
प्रिया च सा सुवदना नेत्रामृततरङ्गिणी ॥ १४३३ ॥

---

१. 'धूम्रविभ्रमः' ख. २. 'वाक्येन' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येवमद्भुता धातुर्विलासकुटिला गतिः ।
युष्माकमपि संकल्पः फलिष्यति न संशयः ॥ १४३४ ॥
इति कण्वेन मुनिना कृपयैवोपवर्णिताम् ।
कथामेतां समाकर्ण्य धैर्यं वयमुपागताः ॥ १४३५ ॥

इति मन्दारवत्याख्यायिका ॥ २८ ॥

तृतीयो गुच्छः ।

ततो मुनीन्द्रमामन्त्र्य विलङ्घ्य विकटाटवीम् ।
बहूपवाससंतप्ताः प्राप्ता वयमिमां भुवम् ॥ १ ॥
इहाप्यस्य तरोर्भुक्त्वा फलानि फलतां गताः ।
मुक्तास्त्वद्दर्शनात्सर्वे पश्यामस्त्वामनामयम् ॥ २ ॥
व्याघ्रसेनेन कथितां कथां श्रुत्वेति विस्मितः ।
मृगाङ्कदत्तः प्रययौ नत्वा हेरम्बपादपम् ॥ ३ ॥
विन्ध्याटवीमतिक्रम्य श्रुतधिप्रमुखैः सह ।
विन्ध्यशैलं परित्यज्य तथा गन्धवतीं नदीम् ॥ ४ ॥
करवीरं समासाद्य भूतवेतालसंकुलम् ।
महाकालं प्रणम्याशु ददर्शोज्जयिनीं निशि ॥ ५ ॥
पूर्णेन्दुविहितालोकैस्तां पुरीं वीक्ष्य दुर्गमाम् ।
दुर्गयन्त्रायुधोपेतां सुभटैः परिपालिताम् ॥ ६ ॥
संकल्पैरप्यनाधृष्यामलङ्घ्यां मारुतैरपि ।
अचिन्तयत्स सचिवैस्तां शशाङ्कवतीं स्मरन् ॥ ७ ॥
राजा कन्दर्पसेनोऽयं रक्तामात्यो महाधनः ।
इयं पुरी च दुर्भेद्या नात्रोपायः प्रगल्भते ॥ ८ ॥
अयं मे विपुलः क्लेशः प्रायो निष्फलतां गतः ।
अधन्यैः प्राप्यते नाम सा शशाङ्कवती कथम् ॥ ९ ॥

---

१. 'श्रुत्वा कथां संगमाशामाश्रितास्ते शनैर्वयम्' ख. २. 'त्वा मनोगताम्' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति ध्यात्वा नृपसुतः स्मरशोकाकुलोऽभवत् ।
ततः सस्मार वेतालं तत्र विक्रमकेसरी ॥ १० ॥
[¹उपस्थितः स वै ध्यातः किं करोमीत्यभाषत ।
कथयामास च पुनः कथमाश्चर्यशालिनीम् ॥ ११ ॥
सखे कन्दर्पनामाहं विप्रो रत्नपु.......... ।
प्रावृषेण्यघनश्यामे काले यातो महाटवीम् ॥ १२ ॥
तत्राथ मतिचक्रेण केलिसङ्केतमानिना ।
स प्रासादं विलोक्यैव नीतोऽहं व्योमगामिना ॥ १३ ॥
क्वचिद्द्विजालयोपान्ते मां विधाय गतास्तथा ।
देवीषु द्विजकन्यायास्तत्रोद्वाहमहोत्सवे ॥ १४ ॥
लग्ने पूर्वांशके प्राप्ते वरे दैवाङ्गनागते ।
सद्यो विभूषणजुषे मह्यं कन्यां ददुर्द्विजाः ॥ १५ ॥
अहं स मानसां नाम तामवापं मनोभुवः ।
हरनेत्राग्निदग्धस्य निर्वापणनदीमिव ॥ १६ ॥
तया प्रणयशालिन्या यावत्प्राप्तोऽस्मि निर्वृतिम् ।
समेत्य मतिचक्रेण नीतस्तावद्विहायसा ॥ १७ ॥
द्वितीये देवताचक्रे व्योमप्राप्तेऽथ तत्पुरः ।
संप्रवृत्ते च तद्युद्धे पतितोऽहं त्वदन्तिकात् ॥ १८ ॥
न जाने चन्द्रवदना सा क्वास्ते का च भूरियम् ।
अत्युक्त्वा बाष्पसंपूर्णलोचनस्तं मुहुर्मुहुः ।
समाश्वास्य ययौ प्रातस्तेनैव सहितः शनैः ॥ १९ ॥
ततो दूरतरं गत्वा मीनान्ददृशतुर्जनैः ।
विनिकृतान्महाकायान्निर्गतान्तौ वराङ्गनाम् ॥ २० ॥
संत्रासविह्वलां बालां तां दृष्ट्वा हरिणेक्षणाम् ।
प्रत्यभिज्ञाय कन्दर्पः पप्रच्छाशु सुमानसाम् ॥ २१ ॥
किमिदं चन्द्रवदने स्वप्नतुल्यं विचेष्टितम् ।

---

१. कोष्ठान्तर्गतस्थः पाठः क-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति पृष्टावदद्बाला कन्दर्पं सा विलज्जिता ॥ २२ ॥
अयि त्वयि हृते नाथ तदा तैः खेचरैर्गणैः ।
इयं विरहदुःखार्ता निमग्ना वाहिनीजले ॥ २३ ॥
निगीर्णा तेन मत्स्येन ततः केनाद्य मोचिता ।
कथं वेत्ति न जानेऽहं प्रमाणमधुना भवान् ॥ २४ ॥
इति श्रुत्वेव सोत्कण्ठां कण्ठे जग्राह तां प्रियाम् ।
कन्दर्प इव कन्दर्पो विललास रतिं········ ॥ २५ ॥
सुमानसायास्तद्देशनिवासी मातुलो द्विजः ।
यक्षस्वामी निनायाशु हृष्टस्तां स्वगृहं ततः ॥ २६ ॥
दयितासंगतं दृष्ट्वा कन्दर्पं तत्र केसटः ।
विश्वस्य तां रूपवतीं सस्मार विरहातुरः ॥ २७ ॥
यज्ञस्वामी तमालोक्य वियोगं त्वङ्गतापितम् ।
उवाच मा कृथाः शोकमचिरात्प्राप्स्यसि प्रियाम् ॥ २८ ॥
अभूच्चण्डपुरे विप्रः सोमस्वामीति विश्रुतम् ।
बभूव तनया तस्य दक्षा कमललोचना ॥ २९ ॥
दृष्टिबद्धानुरागैव सा सौन्दर्यविशेषकम् ।
कुसुमायुधनामानं द्विजपुत्रमचिन्तयत् ॥ ३० ॥
सा तं सखीमुखेनाह मामद्यैव निशामुखे ।
तयान्यथाह तातेन वितीर्णा·········तद्वशा ॥ ३१ ॥
इत्यर्थितस्तया हृष्टो मित्रमश्वतयीसुतम् ।
स विसृज्य जहाराशु गूढां कमललोचनाम् ॥ ३२ ॥
अविनीताभिधानोऽथ नीत्वा तां स्तवकस्तनीम् ।
मित्रद्रोहोद्यतः प्राह तां मन्मथशराहताम् ॥ ३३ ॥
भज मामनवद्याङ्गि विक्लीबं कुसुमायुधम् ।
मद्बाहुबलमाश्रित्य स सर्वत्र प्रगल्भते ॥ ३४ ॥
इति सा सहसैवोक्ता तेन··················· ।
प्रच्छाद्य प्राह को दोषस्त्वं ममाभ्यधिकः प्रियः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किंतूचितविधानेन त्वयोद्वाहमहं भजे ।
आनयोत्सवसामग्रीं त्वं विक्रीयाङ्गुलीयकम् ॥ ३६ ॥
इति श्रुत्वा गते तस्मिंस्ततः कमललोचना ।
विवेश त्रासात्स्वभिया मालाकारनिवेशनम् ॥ ३७ ॥
सोऽपि प्रतिनिवृत्तोऽथ तामदृष्ट्वा विषण्णधीः ।
कुसुमायुधमभ्येत्य सानायातेत्यभाषत ॥ ३८ ॥
ततो विरहसंतप्तो दुःखितः कुसुमायुधः ।
बभ्राम विपुलोच्छ्वासो विवशेनेव वक्षितः(?) ॥ ३९ ॥
ततः कदाचिदुद्याने मालाकारगृहान्तिके ।
तां कान्तां प्रत्यभिज्ञाय कृतोद्वाहो मुदं ययौ ॥ ४० ॥
स तां रतिमिव प्राप्य प्रहृष्टः कुसुमायुधः ।
नवसंभोगसाम्राज्यं भेजे लीलावतीसखः ॥ ४१ ॥

इति कुसुमायुधाख्यायिका ॥ २९ ॥

त्वमप्येवं रूपवतीमवाप्स्यसि सखीप्रियाम् ।
यक्षस्वामीं निगद्येति सान्त्वयामास केसटम् ॥ ४२ ॥
ततः सुमानसा तौ च दैवात्कन्दर्पकेसटौ ।
स्वपुरं प्रस्थिता गन्तुं गजेन्द्रं ददृशुः पथि ॥ ४३ ॥
तद्भयाद्विप्रयोगोऽभून्मिथस्तेषां तदा वने ।
अत्यन्तसुखलेशो हि बहुदुःखो भवाम्बुधिः ॥ ४४ ॥
केसटोऽप्यथ संप्राप्य शोचन्वाराणसीं शनैः ।
कन्दर्पं प्राप्य कालेन विरहक्षामविग्रहम् ॥ ४५ ॥
सुमानसाभिर्देवीभिः कन्दर्पः कृपया वनात् ।
···न्यरत्नपुरे ताभिर्भर्तुः कुलगृहे सतीम् ॥ ४६ ॥
रत्ना····नगर्वी नाम ज्येष्ठां कन्दर्पवल्लभाम् ।
तद्वियोगानलाक्रान्तां वह्निपाते समुद्यताम् ॥ ४७ ॥
सुमानसा निजकथां कथयित्वा प्रियो मतः ।
ध्रुवं समेष्यतीत्युक्त्वा तां सपत्नीमवारयत् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रान्तरे रूपवती तदा वृद्धद्विजालये ।
कुरूपं वीक्ष्य तत्पुत्रं पितुरेवाययौ गृहम् ॥ ४९ ॥
कालेन तत्र विरहक्षामौ दैवादथागतौ ।
कन्दर्पकेसटौ दृष्ट्वा सुधार्द्रेवाभवज्झषात् ॥ ५० ॥
प्रत्यभिज्ञाय तां कान्तां केसटः प्राप्य सुन्दरीम् ।
तस्यावाश्वासयंस्तत्र कन्दर्पं विरहातुरम् ॥ ५१ ॥
रूपवत्या स ते सख्याः परिणीयैव केसटः ।
लेखहारकसंदेशाज्ज्ञात्वा रत्नपुरे स्थिताम् ॥ ५२ ॥
सुमानसां विरहिणीं तां कन्दर्पपितुर्गृहे ।
तूर्णं तत्सहितः प्रायात्केसटो वल्लभासखः ॥ ५३ ॥
कन्दर्पः स्वगृहं प्राप्य समासाद्य सुमानसाम् ।
तां चानङ्गवतीं कान्तां विललास सुहृद्वर(?) ॥ ५४ ॥
प्रियाविरहितो गत्वा ताम्रलिप्तां च केसटः ।
विजहार स्वभवने संस्मरन्विरहानलम् ॥ ५५ ॥

इति केसटाख्यायिका ॥ ३० ॥

इति केसटकन्दर्पौ प्रापतुर्वल्लभौ पुरा ।
वणिक्पुत्र त्वमप्येवं ध्रुवं जायामवाप्स्यसि ॥ ५६ ॥
मयापि स्ववधूः पूर्वं प्रयाता पञ्चतामपि ।
कपोलिकेन मायेन हिंसिता मन्त्रशक्तितः ॥ ५७ ॥
हत्वा काम्पिलकं दूरात्सजीवा सा पुराहृता ।
जीवतां संगमो नाम मन्येऽहं किल जायते ॥ ५८ ॥
इत्यभ्यागतविप्रेण सुचिरं परिसान्त्वितः ।
भ्रान्त्वा महीं महीपाल त्वामहं शरणं गतः ॥ ५९ ॥
राजा विषमशीलस्तन्निशम्य वणिजो वचः ।
गजेन दत्तां तां कान्तामदात्तस्मै सुतामिव ॥ ६० ॥
तस्मिन्भार्यां समादाय याते वणिजि भूपतिः ।
कलिङ्गसेनासंप्राप्त्यै कलिङ्गेशं समभ्ययात् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो विजित्य समरे कलिङ्गनृपतिं विभुः ।
राजा श्रीविक्रमादित्यः स्त्रीं⋯प्राप⋯⋯श्रियम् ॥ ६२ ॥

इति कलिङ्गसेनालाभवर्णनम् ॥ ३१ ॥

इत्थं देवी प्रणयिना लब्ध्वा त्वं जगतीभुजा ।
तं पूर्वसाधितं प्राह स्वैरं विक्रमकेसरी ॥ ६३ ॥]
कन्दर्पसेनतनयां गुप्तान्तःपुरसुन्दरीम् ।
सखे मृगाङ्कदत्ताय खेचर क्षिप्रमानय ॥ ६४ ॥
श्रुत्वेत्युवाच वेतालो महाकालाभिपालिते ।
देशे न प्रभवामोऽस्मिन्वयं तद्वरदुर्जये ॥ ६५ ॥
इति वादिनि वेताले तद्विसृष्टे तिरोहिते ।
मृगाङ्कदत्तः सचिवैः प्राप्तकालमचिन्तयत् ॥ ६६ ॥
स्वयं ततो महामात्यो गत्वा विन्ध्यनिवासिनः ।
दूरं दुर्गपिशाचस्य मातङ्गाधिपतेः पुरम् ॥ ६७ ॥
संगम्य मायाबटुना विधाय बलसंग्रहम् ।
ततः किरातमानाय्य सुहृदं शक्तिरक्षितम् ॥ ६८ ॥
दशयोजनविस्तारकटकं बन्धुबन्धुरः ।
पूर्वं ययाचे दूतेन सुतामुज्जयिनीपतिम् ॥ ६९ ॥
तं सामविमुखं ज्ञात्वा दृप्तं समरसंमुखम् ।
जेतुं राजसुतः सैन्यैः प्रतस्थे सागरोपमैः ॥ ७० ॥
अवाप्यावन्तिविषयं विष्टभ्योज्जयिनीं ततः ।
मृगाङ्कदत्तः शुशुभे लङ्कामिव रघूद्वहः ॥ ७१ ॥
कोपात्कन्दर्पसेनेऽथ निर्गते युद्धदुर्मदे ।
ररास भूमिपालानां समरारम्भदुन्दुभिः ॥ ७२ ॥
करालकरवालोर्मिभीषणे रणसागरे ।
सावेगं शूरमकरा वाहिन्यां विविशुर्मिथः ॥ ७३ ॥
ततो वीरशिरःपद्मैराकीर्णाभूद्वसुंधरा ।
सरसीवास्तकल्लोला गजक्रीडानिपातिता ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स संप्रहारस्तुमुलो बभूव सुभटैः कृतः ।
लीलामहोत्सवो मृत्योरच्छिन्नो दिनपञ्चकम् ॥ ७५ ॥
ततः श्रुतधिरभ्येत्य गूढं वीक्ष्य रिपोः पुरीम् ।
मृगाङ्कदत्तमवदन्नयोपायविचक्षणः ॥ ७६ ॥
अस्मिन्प्रवीरसंहारे जयो युद्धे ससंशयः ।
तस्माद्युक्तिमुपाश्रित्य यत्नः सिद्धौ विधीयताम् ॥ ७७ ॥
मया प्रच्छन्नवेषेण विचितेयं रिपोः पुरी ।
दृष्टा च प्रमदोद्याने तां शशाङ्कवतीं स्वयम् ।
हृत्वा तामेव गच्छामस्तुरङ्गैः शीघ्रगामिभिः ॥ ७८ ॥
मृगाङ्कदत्तः श्रुत्वेति तथेति प्राह सादरः ।
धीमानेकः सहायोऽस्ति बहूनामुदयश्रिये ॥ ७९ ॥
अत्रान्तरे सखीवाक्यात्स्मररूपं नृपात्मजम् ।
श्रुत्वा तं राजतनया बभूव मदनातुरा ॥ ८० ॥
सा मन्मथव्यथाक्रान्ता गत्वा गौरीवनं निजम् ।
निशि चन्द्रोदये चक्रे रमणाभिमुखं मनः ॥ ८१ ॥
स्वैरं मृगाङ्कदत्तोऽथ सचिवैः सह तां भुवम् ।
समेत्यालोकयामास सोत्कण्ठस्तां मृगीदृशम् ॥ ८२ ॥
वक्त्रौपम्येन शशिनः सौन्दर्येण मनोभुवः ।
कान्त्या पुरसुधायाश्च सृजन्तीमिव जीवितम् ॥ ८३ ॥
कटाक्षशरकलापातवशीकृतजगत्त्रयम् ।
आनाय्यासितचापस्य कामिन्येव जयश्रियम् ॥ ८४ ॥
बालां प्रवालल‍ावण्यसोदरैरधरांशुभिः ।
रागदीक्षामिव नवां दिशन्तीमनिशं दिशाम् ॥ ८५ ॥
तन्वीं स्तनस्तबकिनीमारक्तकरपल्लवाम् ।
श्यामां यौवनदर्पेण वसन्तेनेव भूषिताम् ॥ ८६ ॥

---

१. 'ज्ञानोपाय' ख. २. 'सायकापाङ्गवशी' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विलोकितैः कृष्णसारैः सभृङ्गैरिव केतकैः ।
सलीलरत्नहारैर्वा पूजयन्तीं दिगन्तरम् ॥ ८७ ॥
वहन्तीं त्रिवलीकूपे श्यामलां रोमवल्लरीम् ।
निजवक्त्रशशाङ्कस्य लक्ष्मरेखामिव च्युताम् ॥ ८८ ॥
रतिपर्यङ्कपट्टेन[1] स्मरसिंहासनेन च ।
मदशैलनितम्बेन नितम्बेन विराजिताम् ॥ ८९ ॥
तामथ स्मरसंतापात्पाशं बद्धुं समुद्यताम् ।
अदृश्या पार्वती प्राह पुत्रि मा साहसं कृथाः ॥ ९० ॥
आसन्न एव ते भर्ता धन्यः प्राग्जन्मवल्लभः ।
इति गौर्या कृताश्वासां राजपुत्रो जगाद ताम् ॥ ९१ ॥
अयि बाले कुरङ्गाक्षि मदनोद्यानचन्द्रिके ।
दृशा विकिर पीयूषं यातु चन्द्रो विलज्जताम् ॥ ९२ ॥
श्रुत्वेति लज्जिता[2] तन्वी चरणेन लिलेख सा ।
महीं साचीकृतापाङ्गी वीक्ष्यमाणा नृपात्मजम् ॥ ९३ ॥
वशे तवैव मत्प्राणा वदन्तीमिव सुन्दरीम् ।
तां जहार ततः सोऽश्वैः संकल्पैरिव शीघ्रगैः ॥ ९४ ॥
मायाबटुपुरं प्राप्य सुहृद्भिः सहितोऽथ सः ।
पुलिन्दसुन्दरीवृन्दैर्हर्षादालोकितोऽविशत् ॥ ९५ ॥
कन्दर्पसेनस्तेनाथ विज्ञाय तनयां हृताम् ।
निष्कारणरणायासं वारयामास मन्दधीः ॥ ९६ ॥
ततः प्रतिनिवृत्तास्ते किरातेन्द्रमुखा नृपाः ।
मृगाङ्कदत्तमासाद्य ननन्दुर्जयशालिनः ॥ ९७ ॥
अथायोध्याधिनाथाय पित्रे भीमपराक्रमम् ।
स प्राहिणोत्कथयितुं निजवृत्तान्तमादरात् ॥ ९८ ॥
यदैव मन्त्रिवचसा तेन निर्वासितः पुरात् ।
ततस्तदैव सोऽज्ञासीन्मिथ्यादूषितमेव तम् ॥ ९९ ॥

---

१. 'स्राहित्यं' ख. २. 'तन्वी तन्वीता चर' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स निगृह्य महामात्यं त्यक्त्वा राज्यसुखश्रियम्।
नन्दिग्रामे स्थितिं चक्रे पुत्रसंदर्शनाशया॥ १००॥
सोऽथ कालेन विज्ञाय सूनोः सुहृदमागतम्।
पप्रच्छ हृष्टस्तद्वृत्तं सर्वं भीमपराक्रमम्॥ १०१॥
धीमानमरदत्तेन राज्ञा पृष्टो जगाद सः।
मृगाङ्कदत्तचरितं संसारे विपुलाद्भुतम्॥ १०२॥
तदाकर्ण्य सहामात्यः स पुनः प्राप्य जीवितम्।
राजा द्रष्टुं ययौ पुत्रं गजवाजिरथाकुलः॥ १०३॥
मायाबटुपुरं प्राप्य संप्राप्तविजयं सुतम्।
शशाङ्कवत्या सहितं दृष्ट्वाश्चर्यमयोऽभवत्॥ १०४॥
मृगाङ्कदत्तो जनकं प्रणम्य सह राजभिः।
स्थित्वा तत्रोत्सवव्यग्रः कंचित्कालं प्रियासखः॥ १०५॥
अयोध्यां प्रययौ हृष्टो विजयी सचिवैः सह।
पुरा कपीन्द्रसहितः सीतां प्राप्येव राघवः॥ १०६॥
राजधानीं प्रविश्याथ पूजयन्निखिलान्नृपान्।
प्रणम्य मान्यान्विदुषो भेजे स विपुलोत्सवम्॥ १०७॥
तैरेकादशभिर्मित्रैः श्रुतधिप्रमुखैर्बभौ।
दिवाकर इव श्रीमान्द्वादशात्मा नृपात्मजः॥ १०८॥
ततः कन्दर्पसेनेन विसृष्टस्तनयः स्वयम्।
सुखेणाभ्याययौ कर्तुं स्वसुः परिणयोत्सवम्॥ १०९॥
सुवर्णरत्नशकटैर्गजेन्द्ररथवाजिभिः।
स राजपुत्रो विदधे विपुलारम्भमुत्सवम्॥ ११०॥
निर्वर्तितविवाहेऽस्य गौर्येव शशिशेखरः।
शशाङ्कवत्या विहितो मृगाङ्कः पूर्णमङ्गलः॥ १११॥
ततो महोत्सवोत्साहसुभगां सोऽभजत्स्थितिम्।
वल्लभानवसंभोगसंभावितमनोभवः॥ ११२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमामन्त्र्य प्रयातेषु पूजितेषु नृपेष्वथ ।
श्रीमानमरदत्तोऽपि संक्रामय्यात्मजे श्रियम् ॥ ११३ ॥
देव्या सह ययौ शंभोः प्रियां वाराणसीं पुरीम् ।
वैराग्यलक्ष्मीपर्यन्ते महतामेव जायते ॥ ११४ ॥
मृगाङ्कदत्तो निखिलां वीरो जित्वा वसुंधराम् ।
प्रियाविलासरसिकः सार्वभौमोऽभवन्नृपः ॥ ११५ ॥
सा शशाङ्कवती श्यामा स्फुरत्तरलतारका ।
तस्य राजचकोरस्य बभूवानन्दनिर्भरा ॥ ११६ ॥
एवं मृगाङ्कदत्तेन प्राप्ता त्रैलोक्यसुन्दरी ।
त्वमपि प्राप्स्यसि क्षिप्रं रम्यां मदनमञ्जुकाम् ॥ ११७ ॥
इति निशम्य पिशङ्गजटोदितां विपुलकौतुकहर्षमयीं कथाम् ।
प्रियतमापरिरम्भमनोरथे हृदि बबन्ध धृतिं नरवाहनः ॥ ११८ ॥

इति शशाङ्कवतीविवाहः ॥ ३१ ॥

इति श्रीक्षेमेन्द्रविरचितायां बृहत्कथायां शशाङ्कवतीलम्बको नाम नवमः समाप्तः ।

विषमशीललम्बकः ।

प्रथमो गुच्छः ।

गौर्या द्यूतजिता नीता कर्णे केतकिपत्रताम् ।
शांभवी वः शशिकला भूयादानन्दसंपदे ॥ १ ॥
ततः श्रिया वियोगाग्निसंतापिततनुर्वने ।
भ्राम्यन्कण्वमुनेः प्रायादाश्रमं नरवाहनः ॥ २ ॥
मनःप्रसादजनने प्रशान्ताशेषविप्लवे ।
विवेक इव संतोषफले तस्मिंस्तपोवने ॥ ३ ॥
प्रणम्य तेजसां राशिं सहस्रांशुमिवापरम् ।
कण्वं दिव्यदृशा तेन तस्य चोपासितः क्षणम् ॥ ४ ॥
तं मुनीन्द्रस्ततः प्राह द्रुहिणस्पर्धया पुनः ।
कुर्वन्विमानं हंसालीमिव दन्तांशुसंचयैः ॥ ५ ॥
राजसूनो श्रय धृतिं वल्लभां तामवाप्स्यसि ।
संयोगान्ता भवन्त्येव वियोगाः पुण्यकर्मणाम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधातुरानुकूल्येन प्राप्यन्ते हारिता अपि।
वने धनसुहृद्बन्धुदयिताराजसंपदः ॥ ७ ॥
पुरा कैलासशिखरासीनः शीतांशुशेखरः।
समभ्येत्य जितैर्देवैः शतक्रतुपुरोगमैः ॥ ८ ॥
पुरारिनिहितैर्देवद्दप्तैर्दितिजदस्युभिः।
अवतीर्णैर्महाम्लेच्छैः स्वस्था देवास्तृणीकृताः ॥ ९ ॥
प्रमाणमत्र भगवानिति देवगिरा हरः।
भूभारशान्त्यै प्रथमं माल्यवन्तं समादिशत् ॥ १० ॥
सोऽथ त्रिनयनादिष्टः पार्वतीवचसा क्षितौ।
उज्जयिन्या नरपतेः श्रीमतः प्राप पुत्रताम् ॥ ११ ॥
राज्ञो महेन्द्रादित्यस्य स्वप्ने शर्वेण सूचितः।
सोऽभवद्विक्रमादित्यस्तनयो यशसां निधिः ॥ १२ ॥
नाम्ना विषमशीलोऽसौ द्वितीयेनापि विश्रुतः।
सर्वशास्त्रास्त्रविद्यानां लेभे भाजनतां विभुः ॥ १३ ॥
तस्मै महीपतिर्दत्त्वा श्रियं भूपतिविश्रुताम्।
ययौ वाराणसीं धीमान्कृतकृत्यः स्त्रिया सह ॥ १४ ॥
राजा विषमशीलोऽथ जनके प्रशमं श्रिते।
शशास वसुधां धन्वी म्लेच्छोच्छादनदीक्षितः ॥ १५ ॥
कुलक्रमागतस्तस्य बभूव विपुलाशयः।
रुद्रायुधः प्रतीहारः सचिवश्च महामतिः ॥ १६ ॥
स कदाचिद्गजघटामौलिलालितशासनः।
समानीतः समभ्येत्य विज्ञप्तो मन्त्रिणा पुरः ॥ १७ ॥
योऽसावनङ्गदेवाख्यो विसृष्टो दक्षिणापथम्।
देवेन सोऽयमायातः स्वामिनं द्रष्टुमिच्छति ॥ १८ ॥
इत्युक्त्वा नृपतेराज्ञां प्राप्य रूपमवेशयत्।
स द्वितीयं ततो दूतं हर्षविस्फारिलोचनम् ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स प्रणम्य महीपालं हेमसिंहासनस्थितम् ।
सुमेरुचूडामणितां प्रयातमिव भास्करम् ॥ २० ॥
विजिज्ञपदीक्षमाणः कौतुकाद्वसुधाधिपम् ।
किमयं वक्ष्यतीत्यन्तरुत्कण्ठाङ्कुरिताशयः ॥ २१ ॥
देव दक्षिणदिग्भूपैर्युष्मच्छासनमालिका ।
किरीटकोटौ विक्षिप्ता लक्ष्मीरक्षामहौषधिः ॥ २२ ॥
क्रमेणाम्बुधिमुत्तीर्य यातोऽहं सिंहलेश्वरम् ।
वीरसेनं भवद्भक्तिशीलं कुलगृहं श्रियः ॥ २३ ॥
स मां त्वच्छासनं मूर्ध्नि निधायोत्फुल्ललोचनः ।
प्राहास्ति मम सर्वस्वं कन्यारत्नमनुत्तमम् ॥ २४ ॥
विक्रमादित्यदेवश्च रत्नानां भाजनं विभुः ।
समर्पितेयं वचसा मया तस्मै सुमध्यमा ॥ २५ ॥
इत्युक्त्वा स सुतां राजा हरिणाक्षीमदर्शयत् ।
कान्तां विनयवत्याख्यामुपाख्यानं रतिश्रियः ॥ २६ ॥
कन्या नवसुधाधूतलावण्यवसुधां ततः ।
तामहं त्वत्समुचितां दृष्ट्वा जातोऽतिविस्मितः ॥ २७ ॥
तद्विवाहाहितोद्योगः सिंहलाधिपतिस्ततः ।
भवते प्राहिणोद्दूतं मयि न्यस्तं महामतिः ॥ २८ ॥
दूतेन सहितः क्षिप्रमहमारुह्य वारिधौ ।
वाहनं तीरनिकटे प्रागपश्यं द्विधागतम् ॥ २९ ॥
दोर्भ्यां दैवात्समुत्तीर्य सागरं च तटस्थितः ।
अपश्यं ललनां देव धनुर्षीं चित्तजन्मनः ॥ ३० ॥
हेमरत्नविचित्राङ्गः सारङ्गस्तत्पुरो मया ।
दृष्टश्चिरादविज्ञातो मारीचहरिणः पुनः ॥ ३१ ॥
ताभ्यां कृतकरालम्बो नीतः कामप्यहं भुवम् ।
दूतेन सहितस्तेन दिव्योद्याने विभूषिता ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र दिव्यसरस्तीरे हरार्चनरता मया।
दृष्टा वरवधूः कामा कन्या तरुणमञ्जरी ॥ ३३ ॥
सागरासलिलोद्भूतं पूजयित्वा महेश्वरम्।
दासीसहस्रानुगता सुन्दरी गन्तुमुद्ययौ ॥ ३४ ॥
तस्यां गतायां तद्दास्यः केयमित्यतिकौतुकात्।
मया यौवनदर्पान्धाः पृष्टा नो किंचिदूचिरे ॥ ३५ ॥
अभीष्टदेवताद्रोहे मुहुस्ताः शापिता अपि।
अवधीर्येव सावज्ञाद्विशालाः प्रययुः शनैः ॥ ३६ ॥
ततः श्रीविक्रमादित्यपादाब्जादथ शापिताः।
झटित्येवासकम्पास्ता निवृत्ता गतिविभ्रमात् ॥ ३७ ॥
अथ प्रह्वाः समभ्येत्य कीर्तितं त्वां प्रणम्य सा।
हृष्टा वराङ्गना प्राह मां स्तनाग्रकृताञ्जलिः ॥ ३८ ॥
सत्यं श्रीविक्रमादित्यो जयति त्रिजगज्जयी।
यत्प्रसादादहं मुक्ता तस्मादपि महाभयात् ॥ ३९ ॥
श्रुत्वेत्यहं तामपृच्छं कौतुकाविष्टमानसः।
कथं मत्स्वामिना भद्रे रक्षितासीति सादरम् ॥ ४० ॥
सावदच्छृणु सर्वाशा योषा त्रिदशशाखिनाम्।
यथा विषमशीलेन रक्षितासीति सादरम् ॥ ४१ ॥
अस्ति वैश्रवणभ्राता माणिभद्र इति श्रुतः।
तस्याहं वल्लभा भार्या यक्षी मदनमञ्जरी ॥ ४२ ॥
तेनाहं सह कान्तेन कदाचित्केलिलालिता।
रममाणा महीं भ्रान्त्वा विविधोद्यानमालिनी ॥ ४३ ॥
अथोज्जयिन्यां पुःपुः(?) किलासोपवने वने।
प्रियेणालिङ्गिता गाढं सुप्ताहं मदविह्वला ॥ ४४ ॥
अदूरवर्तिना स्वैरं तत्स्मशाननिवासिना।
खण्डकापालिकाख्येन दृष्टा कङ्कणमालिता ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मां दृष्ट्वा मन्त्रसिद्धोऽपि स निश्चेष्ट इवाभवत् ।
वृद्धोऽप्यत्यन्तवृद्धेन मन्मथेन विनिर्जितः ॥ ४६ ॥
तथा विषविपाकेषु विषयेष्वथ चेतसः ।
अपथ्येष्वातुरस्येव नाभिलाषः प्रशाम्यति ॥ ४७ ॥
ततो मयि प्रयातायां भर्त्रा सह निजां पुरीम् ।
खण्डकापालिकश्चक्रे मदर्थं मन्त्रसाधनम् ॥ ४८ ॥
तस्याप्रतिहतैर्मन्त्रैरहं सत्रासकम्पिता ।
कृष्यमाणा भुजङ्गीव भर्तारं शरणं गता ॥ ४९ ॥
सोऽप्यशक्तः परित्रातुं मां विषण्णमुखाम्बुजाम् ।
न्यवेदयत्कुवेराय कापालिकविचेष्टितम् ॥ ५० ॥
ततोऽब्रवीद्वैश्रवणो नाहं तद्वारणे क्षमः ।
किमसाध्यं स्फुरद्धाम्नां मन्त्राणां वीर्यशालिनाम् ॥ ५१ ॥
धनदेनापि संत्यक्तो मद्भर्ता शरणं ययौ ।
ब्रह्माणं सोऽपि तं प्राह दुर्जयोऽयं महाब्रवीत् ॥ ५२ ॥
किं तु श्रीविक्रमादित्यः समर्थस्तद्विनाशने ।
भयकाले भवद्भार्या तमाक्रन्दतु भूमिपम् ॥ ५३ ॥
इति प्रजापतिवचः श्रुत्वा प्राप्ते स्वमन्दिरम् ।
माणिभद्रे ततस्तेन कृष्टाहं व्रतिना निशि ॥ ५४ ॥
मन्त्रशक्तिसमाहूता श्मशानं प्राप्य भीषणम् ।
खण्डकापालिकं घोरमपश्यं कृतमण्डलम् ॥ ५५ ॥
प्रेतचक्रमहाकुण्डे क्षिपन्तं सर्षपाहुतीः ।
तं दृष्ट्वा ककुभः सर्वा ज्वालालोला व्यलोकयम् ॥ ५६ ॥
शफरी जालबद्धेव तत्राहं तद्भयाकुला ।
अभवं बान्धवत्यक्ता कम्पातङ्कतरङ्गिता ॥ ५७ ॥
देव श्रीविक्रमादित्य राजन्विषमशील माम् ।
त्रायस्वाशरणां बालामिति भारं ततोऽभ्यधाम् ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्मिन्नवसरे सोऽपि वीरचर्याविनिर्गतः।
विलोलकुण्डलः खड्गी राजा राजीवलोचनः॥ ५९॥
उत्साह इव साकारः प्रत्यक्ष इव विक्रमः।
गम्भीरमधुरोदारदृशा निर्वापयन्निव॥ ६०॥
मां समाश्वास्य दलयंस्तमो दन्तांशुसंचयैः।
आदिदेशाशु पुरतो वेतालं तद्विनिग्रहे॥ ६१॥
स तेनाग्निशिखाख्येन वेतालेनाशु घट्टितः।
खण्डकापालिकः प्राणांस्तत्याज व्याजबाधकः॥ ६२॥
राजधानीं गते राज्ञि भूतवेतालमण्डली।
खण्डकापालिकं भोक्तुमाययौ हठनिर्भया॥ ६३॥
ततो यमशिखो नाम वेतालो नेतुमुद्ययौ।
तत्सर्वं तत्प्रकोपाच्च तारमग्निशिखोऽवदत्॥ ६४॥
मा मा त्वमेक एवैनं नय दुर्नयभाजनम्।
विक्रमादित्यपादाब्जैः शापितोऽसि मया सखे॥ ६५॥
श्रुत्वेति स्थगितः सोऽथ प्रभावं पृथिवीपतेः।
पप्रच्छाग्निशिखं तस्य कौतुकाकुलिताशयः॥ ६६॥
सोऽवदड्डाकिनीकाख्यो निशीथे द्यूतकृत्पुरा।
विक्रीणानो महामांसं श्मशानमिममागतः॥ ६७॥
तन्मह्यमर्थानसो(?)थ ददौ निष्कम्पमानसः।
रूपं बलं च सप्ताहं गृहीत्वा मम संविदा॥ ६८॥
तत्कारणं मया पृष्टः सोऽवदत्कितवाग्रणीः।
अस्म्यहं विजितो धूर्तैर्धूसराङ्गो दिगम्बरः॥ ६९॥
देहीति वादिनां मध्ये वेद्यो द्यूतकृतामहम्।
शिलीभूतः स्थितो मूको योगीवानिमिषेक्षणः॥ ७०॥
उल्लुण्ठितश्मश्रुकेशस्तैर्लताभिः समाहतः।
लवणेनाम्बुना सिक्तस्तैर्मित्रैः पूर्वसेवितैः॥ ७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहूपवासनिःस्पन्दः क्षिप्तः कूपे बलादहम् ।
नरकायासदुःखानामिव संजातमन्दिरे ॥ ७२ ॥
तत्र दृष्टौ मया घोरविग्रहौ ब्रह्मराक्षसौ ।
तावूचतुर्मामालोक्य मद्वृत्तान्तं निशम्य च ॥ ७३ ॥
आवाभ्यां वणिजः पूर्वं स्वमन्त्रेण प्रिये सुते ।
तुल्यं गृहीते निर्भुग्नमन्त्रौषधिबलक्रमे ॥ ७४ ॥
ततो विषमशीलस्य दृशैव पृथिवीपतेः ।
पतितावन्धकूपेऽस्मिन्नावां संत्यक्तकन्यकौ ॥ ७५ ॥
संवत्सरोऽवधिस्तेन निर्दिष्टो नौ गतश्च सः ।
सप्ताहशेषस्तस्मात्त्वमस्मद्भोजनमानय ।
दत्ते सप्ताहमावाभ्यां भोजने मोक्ष्यसे भयात् ॥ ७६ ॥
श्रुत्वेति प्रतिपन्नं मां क्षुद्विनाशो मुदान्वितम् ।
तस्मादुज्जहृतुः कूपात्ततोऽहं त्वामुपस्थितः ॥ ७७ ॥
त्वद्रूपत्वद्बलेनैव ताभ्यां भोजनमीप्सितम् ।
दत्त्वाभ्येत्य प्रदास्यामि बलं रूपं च ते निजम् ॥ ७८ ॥
इत्युक्त्वा मद्बलाकारो गत्वा राक्षसयोर्ददौ ।
स्वयूथ्यानेव कितवान्सप्ताहं तूर्णभोजनम् ॥ ७९ ॥
तद्दत्वा स समभ्येत्य प्रादाद्रूपं बलं च मे ।
पुनश्च याचितस्ताभ्यां भोजनं तर्जनक्रमैः ।
प्रतार्य मां कौतुकिनं नीत्वा कूपे ततोऽक्षिपत् ॥ ८० ॥
राक्षसाभ्यामहं तत्र गृहीतो भुजपञ्जरे ।
अकार्षं सुचिरं युद्धं कम्पिताखिलभूतलम् ॥ ८१ ॥
ततोऽहं तौ ददौ युद्धश्रमाद्विश्रान्तविग्रहः ।
कथयित्वा निजं वृत्तं स्थितो लज्जानतः क्षणम् ॥ ८२ ॥
अथाब्रवीत्स्मितमुखस्तत्रैको ब्रह्मराक्षसः ।
अहो नु द्यूतकारेण मायया वञ्चिता वयम् ॥ ८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवंविधा भवन्त्येव कितवाः साहसव्रताः।
टेण्टाकरालवृत्तान्तमत्रैव कथयाम्यहम् ॥ ८४ ॥

अभूट्टेण्टाकरालाख्यो द्यूतकृद्वञ्चनावधिः।
सदा महाकालगृहे रजन्यां स स्वयं किल ॥ ८५ ॥

तत्र दीपघृताभ्यक्तैरपूपैः कृतभोजनः।
महाकालानुगान्प्राह प्रतिमादीपसंस्थितान् ॥ ८६ ॥

अस्यां दीर्घत्रियामायां द्यूतक्रीडा स्वमायया।
इत्युक्त्वा पञ्च चिक्षेप पुनश्चित्रा वराटिकाः ॥ ८७ ॥

ताभिः स्वकल्पनावाग्भिर्जितो यक्ष इति क्षणात्।
प्राह हेमसहस्रं च निर्बन्धात्तमयाचत ॥ ८८ ॥

निरुत्तरं समालोक्य कूपे त्वां प्रक्षिपाम्यहम्।
इत्युक्त्वा भयसंत्रस्तः सुवर्णं तमदापयत् ॥ ८९ ॥

ततः क्रमेण तेनैव त्रासयन्सततं गिरः।
प्रतिमागणवेतालानजयत्काञ्चनप्रदान् ॥ ९० ॥

ततः कदाचिद्भगवान्महाकालस्तमब्रवीत्।
पुत्र तुष्टोऽस्मि ते वीर व्रतेनानेन धीमताम् ॥ ९१ ॥

गच्छैतत्सरसस्तीर्थमत्र त्रिदशयोषितः।
क्रीडन्ति स्नातुमायातास्ताभ्यः कन्यामवाप्नुहि ॥ ९२ ॥

इति शर्वाज्ञया गत्वा दृष्ट्वास्तास्त्रिदशाङ्गनाः।
जहार तासां वासांसि तास्तस्मै तां सुतां ददुः ॥ ९३ ॥

कन्यां कलावतीं नाम प्राप्य तां स्वर्गसुन्दरीम्।
ननन्द मदनोदारः स शंकरवरोर्जितः ॥ ९४ ॥

पुरा पुरंदरास्थाने सा चक्रे मानुषस्थितिम्।
तेनाभवच्छक्रशापात्सुन्दरी मर्त्यसङ्गिनी ॥ ९५ ॥

कदाचिदथ सा स्वर्गनृत्ते कौतुकिनं प्रियम्।
तं निनाय सनिर्बन्धं कृत्वा कर्णोत्पलायिताम् ॥ ९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स तत्र रम्भां नृत्यन्तीं ददर्शायतलोचनाम् ।
गन्धर्वगीतानुगतां कलाताललयोर्जिताम् ॥ ९७ ॥
ततो हास्याय नृत्यन्तं छागं सुरपतेः पुरः ।
अपश्यद्विपुलाकारमीश्वरा हि स्मितप्रियाः ॥ ९८ ॥
गन्धर्वं मुनिशापेन तं दृष्ट्वा छागविग्रहम् ।
अयं स मर्त्यश्वरतीत्यभवत्तस्य चेतसि ॥ ९९ ॥
बहुकौतुकमालोक्य स्वर्गाद्भोगभुवं गतम् ।
टेण्टाकरालो दयितां शक्तो मेने ततोऽधिकम् ॥ १०० ॥
ततस्तमेव रोमन्थदलकूर्चमजं पुनः ।
आपणाग्रे सुखासीनमुज्जयिन्यां ददर्श सः ॥ १०१ ॥
टेण्टाकरालस्तं दृष्ट्वा प्राह दर्शय मां सखे ।
पुनर्नृत्तं सुरपुरे दृष्टस्त्वं हास्यकृन्मया ॥ १०२ ॥
इत्युक्त्वा सावलेपं तं प्रत्याख्यानरुषा ततः ।
जघान लगुडेनाजं येन सोऽभूत्सशोणितः ॥ १०३ ॥
अथ शक्रपुरं गत्वा सुरेन्द्राय न्यवेदयत् ।
द्यूतकारिनिकारं तं छागलः कोपकम्पितः ॥ १०४ ॥
शापान्तमुक्त्वा मुक्तेऽथ छागे गन्धर्वतां गते ।
इन्द्रः कलावतीं प्राह धिक्त्वां दुर्नयकारिणीम् ॥ १०५ ॥
आनीतो दुर्विनीतोऽसौ त्रिदिवं मानुषस्त्वया ।
तस्मादनल्पकं कालं योषा दारुमयी भव ॥ १०६ ॥
नरसिंहाभिधानेन राज्ञा नागपुरे कृते ।
सुरालये तत्र भित्तौ पुत्रिका त्वं भविष्यसि ॥ १०७ ॥
तस्मिन्कालेन निःशेषं गते देवगृहे क्षयम् ।
शापस्यान्तं समासाद्य पुनः स्वपदमेष्यसि ॥ १०८ ॥
इति शप्ता नतमुखी दुःखिता शतमन्युना ।
टेण्टाकरालमभ्येत्य सा निजं शापमभ्यधात् ॥ १०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शापवृत्तान्तमावेद्य तस्यां वृत्तं स्वकर्मणा।
श्रितां तां देवनिलयस्तम्भान्ते पुत्रिकाकृतिम् ॥ ११० ॥
छागदुःखानलाक्रान्तं स निन्दन्निजसाहसम्।
आदाय रत्ननिचयं ययौ नागपुरं जवात् ॥ १११ ॥
कलशान्रत्नसंपूर्णान्भूमिगर्ते निधाय सः।
तस्थौ दम्भव्रतैस्तत्र प्रसिद्धिं परमां गतः ॥ ११२ ॥
अशेषप्राणिभाषाज्ञ इति राज्ञा स पूजितः।
अदर्शयद्रत्नपूर्णं तस्मै कलशपञ्चकम् ॥ ११३ ॥
तत्प्रत्ययात्स भूपालो मेने सर्वज्ञमेव तम्।
महेश्वरमिवाभ्येत्य सततं प्रणनाम च ॥ ११४ ॥
कदाचिद्भूभुजा सार्धं देवायतनमेत्य सः।
दर्शनात्साश्रुनयनां दृष्ट्वा तां दारुपुत्रिकाम् ॥ ११५ ॥
उवाच धूर्तो भूपालं शान्तं शान्तममङ्गलम्।
इमं सुरगृहं तूर्णं कणशः क्रियतामिति ॥ ११६ ॥
तदाकर्ण्य महीपालः सामात्यस्तं ससंभ्रमः।
पप्रच्छ भगवन्ब्रूहि किमनिष्टं त्वयेक्षितम् ॥ ११७ ॥
सोऽब्रवीद्देव नो वाच्यमेतच्छृणु तथापि ते।
आयुषा क्षितिरासन्ना स्थितेऽस्मिंस्ते सुरालये ॥ ११८ ॥
समुन्मूल्य क्षणेनैतद्विपुलं सुरमन्दिरम्।
अपरं क्रियतां राजन्नित्युक्त्वा विरराम सः ॥ ११९ ॥
ततस्तद्वचनात्तूर्णं तमुत्पाट्य सुरालयम्।
अन्यं महीपतिश्चक्रे हेमरत्नाविकद्युतिम् ॥ १२० ॥
अचिराच्छापमुक्ताथ स्वर्गं प्राप्य कलावती।
विस्मिताय महेन्द्राय स्ववृत्तान्तं न्यवेदयत् ॥ १२१ ॥
धिया टेण्टाकराले च शापात्तामाशु मोचिताम्।
श्रुत्वा तुष्टस्तमानाय्य शक्रस्तस्मै ददौ श्रियम् ॥ १२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टेण्टाकरालचरितं प्रशंसामुखराननः ।
बृहस्पतिस्ततः प्राह विहस्य मरुतां पतिम् ॥ १२३ ॥
एवंविधा भवन्त्येव द्यूतकाराः पदं श्रियः ।
कुट्टिनीकपटो नाम बभूव द्यूतकृत्पुरा ॥ १२४ ॥
समस्तपापकोशस्य नरकक्षितिरक्षया ।
गतासोस्तस्य गणिका कालेन यमसद्मिनि ॥ १२५ ॥
सुरार्चनाद्दिनं चैकं विदधाति च शक्रताम् ।
भेजे पृष्टोऽथ तां पूर्वं दिनमेकं सुरेन्द्रताम् ॥ १२६ ॥
तत्र बुद्ध्या विनिश्चित्य दाता शर्वार्चनव्रतः ।
स्नात्वा सर्वेषु तीर्थेषु चिरमासीत्सुरेश्वरः ॥ १२७ ॥
इति धूर्ता भवन्त्येव द्यूतकारमहाशयाः ।
एतद्गुरोर्वचः श्रुत्वा विस्मितोऽभूत्पुरंदरः ॥ १२८ ॥

इति टेण्टाकरालाख्यायिका ॥ १ ॥

द्यूतकारकथामेतामाकर्ण्य ब्रह्मराक्षसात् ।
प्रयाते डाकिनीकेन वञ्चितः स्वयमाश्रमम् ॥ १२९ ॥
कदाचिदथ कालेन क्षुत्क्षामेन मया द्विजः ।
गृहीतो निशि चुक्रोश विक्रमादित्यमीश्वरम् ॥ १३० ॥
तच्छ्रुत्वा स नृपोऽभ्येत्य खड्गेनाशु जघान तम् ।
तत्क्षणं शरणायातं ररक्ष च कृपानिधिः ।
ततः प्रभृति दासोऽहं तस्य भूमिपतेर्विभोः ॥ १३१ ॥
इत्यग्निशिखवृत्तान्तं श्रुत्वा यमशिखः स्वयात् ।
मनसा विक्रमादित्यं प्रणनाम कृताञ्जलिः ॥ १३२ ॥

इति खण्डकापालिकवधः ॥ २ ॥

इत्यहं तेन भूपालमौलिलीढाङ्घ्रिणा स्वयम् ।
रक्षिता वल्लभं प्राप्य परां निर्वृतिमागता ॥ १३३ ॥
साहं कीर्तिपताकेव राज्ञस्तस्य यशोनिधेः ।
त्रैलोक्यचारिणी नित्यमस्मिन्यक्षपुरे स्थिता ॥ १३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिंहलेन्द्रेण तनयां वितीर्णां शौर्यशालिनीम् ।
ज्ञात्वा विषमशीलाय सर्वे म्लेच्छशकाभिधाः ॥ १३५ ॥
हर्तुमभ्युद्यताः पापा विधेयं तत्र यत्क्षमम् ।
इत्यस्मिन्भक्तिचिन्तैषा स च तान्निहनिष्यति ॥ १३६ ॥
यक्षाङ्गनायामुक्त्वेति विगतायामदृश्यताम् ।
तद्दिव्यकान्तायुगलं स च हेमकुरङ्गकः ॥ १३७ ॥
तद्वृत्तान्तं मया पृष्टा सा यक्षी प्राह मां पुनः ।
पुरा घण्टनिघण्टाख्यौ दानवेन्द्रौ बभूवतुः ॥ १३८ ॥
त्रैलोक्यकण्टकौ मत्वा दुर्जयौ तौ प्रजापतिः ।
असृजत्कान्तिसर्वस्वमिमे त्रिदशकन्यके ॥ १३९ ॥
एतद्दर्शनसंजातगाढमन्मथपावकौ ।
ममैवेति ममैवेति भेदादिति गतौ क्षयम् ॥ १४० ॥
त्यक्तं वैश्रवणायैते कान्ते कमलयोनिना ।
उचिताय प्रदातव्ये विधायेत्यथ संविदम् ॥ १४१ ॥
माणिभद्रगृहे न्यस्ते कुवेरेण ततः स्वयम् ।
पालयाम्यहमेवैते गुणैः को न वशीकृतः ॥ १४२ ॥
एतयोर्विक्रमादित्यो देव एवोचितः पतिः ।
अयं च हेमहरिणो योग्यस्तस्यैव हर्षदः ॥ १४३ ॥
नक्षत्रं मृगशीर्षं तु कर्षन्तं केलिकौतुकात् ।
दृष्ट्वा जयन्तं तनयं शक्रश्चिन्तापरोऽभवत् ॥ १४४ ॥
स ध्यात्वा तद्विनोदाय काञ्चनं विश्वकर्मणा ।
अकारयन्मणिमृगं पीयूषावाप्तजीवितम् ॥ १४५ ॥
सोऽयं पुरा दशास्येन विजित्य त्रिदशालयम् ।
सार्धमिन्द्रजिता नीतो लङ्कां रत्नाङ्कतोरणाम् ॥ १४६ ॥
कालेन निहते तस्मिन्रणे रामेण रावणे ।
दत्तो बिभीषणेनायं मह्यमुत्सवसंगमे ॥ १४७ ॥

१ 'गि' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमिमं रत्नसारङ्गं कन्ये चेमे सुलोचने ।
विक्रमादित्यदेवाय नयेत्युक्त्वैव सा ददौ ॥ १४८ ॥
ततस्तामहमामन्त्र्य प्राप्तो वैदर्भभूपतिम् ।
त्वच्छासनव्रतं वीरं सर्वं चास्मै न्यवेदयम् ॥ १४९ ॥

इति यक्षीसमागमकथा ॥ ३ ॥

अत्रान्तरे संहतास्ते पापा म्लेच्छशकाधिपाः ।
ज्ञात्वा तदर्थमायान्तीं सिंहलाधिपतेः सुताम् ।
पथि तस्थुः सुसंरब्धाः सेनाच्छादितदिक्तटाः ॥ १५० ॥
ततो विदर्भराजेन तेषां विक्रमशक्तिना ।
बभूव सुचिरं युद्धं विस्मयाद्वीक्षितं सुरैः ॥ १५१ ॥
ततः सा यक्षतनया सह गुह्यकसेनया ।
सेनां विदर्भाधिपतेरविशद्विजयश्रिये ॥ १५२ ॥
अथ तेषु निरस्तेषु रणे भग्नेषु शत्रुषु ।
आगताः पृथिवीपालाः सर्वे तद्वशवर्तिनः ॥ १५३ ॥
सिंहलेश्वरपुत्री च ते च त्रिदशकन्यके ।
आयातास्त्वद्विवाहाय सहिता सर्वराजभिः ॥ १५४ ॥
इतः स कटकावर्तो वर्तते योजनत्रये ।
प्रत्युद्गमनसत्कारस्तत्र देव विधीयताम् ॥ १५५ ॥
श्रुत्वेत्यनङ्गदेवेन कथितं पृथिवीपतिः ।
आदिदेश महोत्साहो यात्रासंरम्भदुन्दुभिः ॥ १५६ ॥
ततो गर्जद्गजानीकसंछादितदिगन्तरान् ।
नातिदूरं निजपुराद्गत्वापश्यन्नरेश्वरान् ॥ १५७ ॥
नामानि देशभूपालैः सूचितैर्बन्दिभिः पुरा ।
प्रणम्यमानः सुमुखीं वरयित्रीं ददर्श सः ॥ १५८ ॥
तां सिंहलेश्वरसुतां वीक्ष्य सारङ्गलोचनाम् ।
विप्रलब्धं स्मरं मेने रतिसौभाग्यगर्वितम् ॥ १५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिणीयेन्दुवदनां ततस्तां पृथिवीपतिः।
हेममौक्तिकरत्नानां कूटानप्यचलोपमान्॥ १६० ॥
दिव्येनोद्वाहविधिना प्रयाते दिव्यकन्यके।
कुलाधिदेवते कान्तं स्मरसौभाग्ययोरिव ॥ १६१ ॥
तं दिव्यहरिणं हारिरत्नकान्तिविचित्रितम्।
लब्ध्वा विवेश स्वपुरं सानुगो वल्लभासखः ॥ १६२ ॥
अतः संभोगसुभगः⋯⋯⋯तां यदृच्छया।
केनापि द्विजपुत्रेण ददर्शालेख्यपुत्रिकाम्॥ १६३ ॥
तां दृष्ट्वा चित्रफलके त्रैलोक्योन्मादनौषधिम्।
स्वप्ने तामेव चापश्यत्खेत्यङ्क (?) इव लम्बिनीम्॥ १६४ ॥
नग्नक्षपणकां ज्ञात्वा तां चित्रलिखितां प्रियाम्।
राज्ञो मलयसिंहस्य पुत्रीं मलयवासिनः ॥ १६५ ॥
कान्तां मलयवत्याख्यां विलासतिलकं रतेः।
स्वयं गत्वा सहामात्यो लेभे हरिणलोचनाम्॥ १६६ ॥

इति कन्याचतुष्टयप्राप्तिः ॥ ४ ॥

ततः कान्तां समादाय प्रत्यायाते निजां पुरीम्।
राज्ञि श्रीविक्रमादित्ये बभूव जगदुत्सवः ॥ १६७ ॥
देवी कलिङ्गसेनाथ तस्याग्रमहिषी रुषा।
ईर्ष्याकलुषिता चक्रे गणानां दयितागसाम्॥ १६८ ॥
सा प्राह देवसेनाख्यं पत्युर्विश्रमभाजनम्।
वीरं कार्पटिकं भ्रातः स्वामी ते बहुवल्लभः ॥ १६९ ॥
दृष्ट्वा मत्सदृशीं पूर्वमुत्कीर्णां सालभञ्जिकाम्।
कलिङ्गराजं निर्जित्य जितकासी जहार माम्॥ १७० ॥
आद्यायां भूपतिसुताः कान्तो नवनवो युवा।
सेवते बत सौभाग्यं सन्तः कस्य वशे प्रियः ॥ १७१ ॥
इति देवीवचः श्रुत्वा प्राह कार्पटिकस्तथा।
देवि स्वयं समायाति देवं दिव्याङ्गनाजनः ॥ १७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उच्चैःश्रवःकुले जातं पुरा राजा तुरङ्गमम् ।
ऊह्य श्रीविक्रमादित्यो मृगयारसिको ययौ ॥ १७३ ॥
हृतः पवनवेगेन तेनाश्वेन वने नृपः ।
अनुयातोऽहमेवैको योजनानां शतत्रयम् ॥ १७४ ॥
पादलेपं ददौ यक्षः प्राङ्मह्यं मन्त्रतोषितः ।
तेन मे क्षणलङ्घ्याभूत्सुदूरापि वसुंधरा ॥ १७५ ॥
ततोऽस्तशिखरं याते दिनेशे प्राह मां नृपः ।
अस्ति वह्निशिखाख्यो मे वेतालश्चिरसेवकः ॥ १७६ ॥
गृहं तेन····विप्रस्य स्वानुमाक्रन्दिनं पुरा ।
मोचयित्वा निशाचर्या निर्गतोऽहं प्रसङ्गतः ॥ १७७ ॥
समरक्षं सुविपुलाद्वेतालं नयनामयात् ।
ततः प्रभृति दास्ये[1] मे सर्वत्राज्ञाधरोऽभवत् ॥ १७८ ॥
इत्युक्त्वा भूभुजा ध्यातं तमपश्यमहं पुरः ।
वेतालं प्रबलज्वालाकरालानलमूर्धजम् ॥ १७९ ॥
अत्रान्तरे फलाहारान्महाजगरतां गतः ।
अहं स्वभावशक्तिर्हि द्रव्याणां केन लक्ष्यते ॥ १८० ॥
ततः पल्लीपतिं शीघ्रं शबराधिपतिं नृपः ।
तत्र तं प्रार्थयामास प्रणतं सिद्धिमुक्तये ॥ १८१ ॥
यस्य वानरदत्तेन फलेनापूर्वशक्तिना ।
यातो सप्तदशशती वत्सराणां किलायुषः ॥ १८२ ॥
सोऽप्यपश्यत्पुरा मार्गे उद्यानं वानरं पुनः ।
दीनावलोकिनं दुःखात्पतन्तं पादयोर्मुहुः ॥ १८३ ॥
विचिन्तयन्निङ्गितज्ञः स ततः पूर्वमाशयम्[2] ।
दिशो विलोक्य तज्जायामपश्यत्तद्विलम्बिनीम् ॥ १८४ ॥
तरुशाखानिरुद्धां तां वेष्टयन्तीं स वानरीम् ।
अमोचयत्कपिः प्रीतो ननर्त च ततो मुदा ॥ १८५ ॥

१ 'दासो मे' इति पाठो भवेत्. २. 'पूर्णमाशय' इति भवेत.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मै कृतोपकाराय सोऽथ शाखामृगः फलम्।
शबराय ददौ येन सोऽभवच्चिरजीवितः ॥ १८६ ॥
एवंविधः स शबराधीशो नृपतिनार्थितः।
दिव्यौषधेन केनापि चक्रे मां स्वस्थविग्रहम् ॥ १८७ ॥
घोराजगरभावान्मां मोचयित्वा स भूभुजे।
स्मरमुक्तावलीं कन्यां शबराधिपतिर्ददौ ॥ १८८ ॥

इति शबरराजपुत्रीलाभः ॥ ५ ॥

अत्रान्तरे गजक्रोडौ तत्र दर्पादभिद्रुतौ।
राजा जघान तौ चाशु मुक्तशापौ बभूवतुः ॥ १८९ ॥
इयं वातायने सुप्ता वणिक्पुत्रस्य वल्लभा।
मयाकृष्य कराग्रेण पुरानीता सुलोचना ॥ १९० ॥
इत्युदीर्य तयोरेको गजरूपो महाभुजः।
तां विन्यस्य ययौ व्योम्ना परेण सहितः क्षणात् ॥ १९१ ॥
तयोः प्रयातयोर्मुक्तशापयोः सा वणिग्वधूः।
पुत्रीवाश्वासिता राज्ञा तत्याज विपुलं भयम् ॥ १९२ ॥

इति गजवराहशापमुक्तिः ॥ ६ ॥

अत्रान्तरे दिनारम्भे कन्यायुगमदृश्यत।
रूपयौवनलावण्यविलासकुलमन्दिरम् ॥ १९३ ॥
ततस्तदनुगाः पृष्टा मया कौतुकशालिना।
ऊचुः कटाहद्वीपेशसुतेयं कमलेक्षणा ॥ १९४ ॥
सप्तद्वीपपतेर्भार्या भाविनी भुवि विश्रुता।
अस्याश्च मातुलसुता द्वितीयेयं मृगेक्षणा ॥ १९५ ॥
गुरुभ्यां प्रहिते चैते विक्रमादित्यभूभुजे।
अब्धौ भग्ने प्रवहणे निगीर्णे जलचारिणा ॥ १९६ ॥
विधातुरानुकूल्याच्च मुक्ते धीवरदारितात्।
मत्स्यादयं स देवः श्रीविक्रमादित्य एव किम् ॥ १९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्तस्तत्परिजनैरहं तानवदत्तदा।
अयमेव स भूपालः श्रीमान्कमललोचनः।
यत्कृते यूयमायाता राजकन्यायुगानुगाः॥ १९८॥
इति मद्वचनं श्रुत्वा ते प्रणम्य महीभुजे।
ददुर्विषमशीलाय हृष्टा राजसुताद्वयम्॥ १९९॥

इति राजपुत्रीद्वयलाभः॥ ७॥

ते कन्यके ततः प्राप्य विश्वकर्मसुरालयम्।
प्रविश्यापश्यदत्यन्तकान्तामुत्कीर्णपुत्रिकाम्॥ २००॥
तां दृष्ट्वा नयनानन्दसुधां भेजे सविस्मयः।
देवो विषमशीलोऽपि मदनानलवक्रिते॥ २०१॥
तेन पृष्टः स वेतालः केयमित्यतिकौतुकात्।
उवाच शिल्पिना देव कृतेयं सालभञ्जिका॥ २०२॥
कलिङ्गराजतनयामालोक्य सदृशाकृतिम्।
सेयं कलिङ्गसेनाख्या रूपकारेण निर्मिता॥ २०३॥
श्रुत्वेति वेतालवचस्तत्प्राप्तिन्यस्तमानसः।
अभूत्कलिङ्गयात्रायां प्रस्थानाभिमुखो नृपः॥ २०४॥
अत्रान्तरे समभ्येत्य वणिक्पुत्रो व्यजिज्ञपत्।
तं देव मम नागेन हर्म्यस्था दयिता हृता॥ २०५॥
तां विलासवतीं नाम नीतामालोक्य वल्लभाम्।
कुञ्जरेन्द्रेण तेनाहं निखिलं व्याकुलोऽभवम्॥ २०६॥
ततो मां दुःखसंतप्तं कश्चिदभ्यागतो द्विजः।
आश्वासयन्प्राह सखे मा विद्वं····वृथा कृथाः॥ २०७॥
भवन्त्यस्मिन्भवाम्भोधौ भ्राम्यतां कर्ममारुतैः।
संयोगाश्च वियोगाश्च स्थायिनो न हि देहिनाम्॥ २०८॥
अभवत्ताम्रलिप्तायां देसटस्य द्विजन्मनः।
तनयः केसटो नाम कन्दर्प इव मूर्तिमान्॥ २०९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदाचित्तीर्थयात्रायां यातः पथि ददर्श सः ।
यन्यात्र(?) प्रस्थितान्विप्रान्विशेषोचितभूषितान् ॥ २१० ॥
तन्मध्यादवदद्वृद्धः केसटं सुन्दराकृतिम् ।
भद्र वृद्धस्य कार्येऽस्मिन्सहायो मे सखे भव ॥ २११ ॥
अस्ति मे तनयो वक्रनासिको विकटाननः ।
लम्बोदरो दीर्घग्रीवो दन्तुरः खलतिः कृशः ॥ २१२ ॥
तदर्थं धनलुब्धेन मया विप्रो महाधनः ।
सुतां रूपवतीं नाम याचितो धनशालिनीम् ॥ २१३ ॥
विवाहः प्रस्तुतोऽद्यैव निशि तत्र ममात्मजम् ।
दृष्ट्वा कुरूपसाकां ना(?)न जाने किं करिष्यति ॥ २१४ ॥
अतस्त्वं मन्मथाकारः साहाय्यं कर्तुमर्हसि ।
मत्पुत्रार्थं परिणये प्राप्नुयाद्येन कन्यकाम् ॥ २१५ ॥
तच्छ्रुत्वा वाढमित्याह केसटः स्वच्छचेतसाम् ।
कथं परोपकारेषु निषेधे वाक्प्रवर्तते ॥ २१६ ॥
ततः सोष्णीषकुसुमापीडकल्पितशेखरः ।
कुसुमायुधसच्छायो नीतस्तेन द्विजालयम् ॥ २१७ ॥
विवाहवसुधां प्राप्य स ददर्श द्विजात्मजाम् ।
रूपयौवनलावण्यैः पुनरुक्तविभूषणाम् ॥ २१८ ॥
सखीनां सह कन्याभ्यां कटाक्षकिरणैर्दृशः ।
फुल्लेन्दीवरमालाङ्कं विदधानामिवोत्सवे ॥ २१९ ॥
तां दृष्ट्वा केसटस्याभून्मनसि स्मयशालिनः ।
अहो मे दर्शनादस्या धन्यता नेत्रयोरभूत् ॥ २२० ॥
ततः केसटमालोक्य शृङ्गारमिव रूपिणम् ।
आजानुबाहुदीर्घाक्षं परिष्वक्तमिव त्विषा ॥ २२१ ॥
कर्णोपान्तमुपेत्यास्य तत्सख्यावूचतुः शनैः ।
एकानुरागवत्याख्या परा शृङ्गारवत्यपि ॥ २२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धन्य रूपवती यस्यास्त्वं कान्तप्रवरो वरः ।
आवयोरपि कर्तव्यस्त्वया पाणिग्रहोत्वसः ॥ २२३ ॥
इति स्वैरे समाकर्ण्य निःश्वस्याचिन्तयन्मुहुः ।
भवतीभिर्ममान्यस्मिन्मन्ये जन्मनि संगमः ॥ २२४ ॥
ध्यात्वा त्वेवं समासन्ने लग्ने निशि नदीतटे ।
स्पष्टमम्भोविनिर्यातं सोऽपश्यत्पिशिताशनम् ॥ २२५ ॥
तं तु क्षामं तथालोक्य किं करोतीति कौतुकात् ।
अभक्षिता रूपवती तमेवानुययौ शनैः ॥ २२६ ॥
सापि प्राप्य नदीतीरे राक्षसं तमभाषत ।
तद्वाक्यविस्मितं रक्षः प्राह रूपवतीं ततः ॥ २२७ ॥
संत्रासातङ्कदुःखानां हस्ते न्यस्तेव वेधसा ।
मामत्सि राक्षसपते कान्तोऽयं मुच्यतां विभो ॥ २२८ ॥
एतद्वियोगायत्तसत्यं जीवितं निधनं मम ।
तच्छ्रुत्वा राक्षसः प्राह स्त्री न वध्या ममाबले ॥ २२९ ॥
सावदद्भर्तृहीनायाः का मे वृत्तिर्निशाचर ।
सोऽब्रवीत्सस्मितं सुभ्रु सदा वर्तस्व भिक्षया ॥ २३० ॥
सापि को मे ददातीति प्रोवाच रजनीचरम्[1] ।
सोऽब्रवीच्छतधा यातु तत्तुभ्यं न ददाति यः ॥ २३१ ॥
ततो रूपवती प्राह भर्तृभिक्षां त्वमेव मे ।
देहीति तन्निषेधात्तु तद्रक्षः शतधा ययौ ॥ २३२ ॥
मोचयित्वेति भर्तारं गत्वा तत्सहिता गृहम् ।
निशां निनाय तद्वक्त्रविन्यस्तानिमिषेक्षणा ॥ २३३ ॥
प्रातर्जन्यावली यात्रारम्भे वृद्धद्विजन्मनः ।
अवाप्य परिणीतां तां नावा गन्तुं समुद्ययौ ॥ २३४ ॥
मत्पुत्रोऽस्याः कुरूपोऽसौ केसटं वीक्ष्य न प्रियः ।
भविष्यतीति स[2] ध्यात्वा छलान्नद्यां तमक्षिपत् ॥ २३५ ॥

१. 'रान्' ख. २. 'सा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्राम्यमाणस्तरङ्गाद्यैः सोऽयं प्राप्य दिनैस्त्रिभिः ।
तीरं वियोगसलिले ममज्जापारदुस्तरे ॥ २३६ ॥
तां शशाङ्कवतीं ध्यात्वा यतो यत्नासशोषितः ।
निधिना दृष्टनष्टेन विप्रलब्ध इवाभवत् ॥ २३७ ॥
ततोऽस्तशिखरं याते पद्मिनीजीवितेश्वरे ।
संदेहं दिक्षु यातासु शोकैरिव तमश्चयैः ॥ २३८ ॥
भ्राजिष्णुरत्नाभरणं सोऽपश्यत्पतितं दिवः ।
पुरुषं यौवनोदारं विश्राममिव नेत्रयोः ॥ २३९ ॥
तं केसटोऽथ पप्रच्छ कोऽसीति प्रणयोदितम् ।
निवेद्य निजवृत्तान्तं कान्ताविरहपीडितः ॥ २४० ॥
संपृष्टः प्राह निःश्वस्य धैर्यमालम्ब्य विक्रियाम् ।
त्यजैतां श्रृणु मे तुल्यां के[1]...................॥ २४१ ॥
.... ।
.... ॥ २४२ ॥
.... ।
.... ॥ २४३ ॥
.... ।
.... ॥ २४४ ॥
.... ।
.... ॥ २४५ ॥
.... ।
.... ॥ २४६ ॥
.... ।
.... ॥ २४७ ॥
.... ।
.... ॥ २४८ ॥

१. एतत्त्रुटिचिह्नं पुस्तकद्वय एवोपलभ्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

.... ।
.... ॥ २४९ ॥
.... ।
.... ॥ २५० ॥
.... ।
.... ॥ २५१ ॥
.... ।
.... ॥ २५२ ॥
.... ।
............स सततं नासौ त्वयि निरादरः ॥ २५३ ॥
कलिङ्गसेना श्रुत्वेति दृष्ट्वा कार्पटिकोदितम् ।
सौभाग्यगर्वशैथिल्यं तत्याज मृगलोचना ॥ २५४ ॥
ततः श्रीविक्रमादित्यः पालयन्निखिलां महीम् ।
......कर्पूरधवलाश्चकार यशसा दिशः ॥ २५५ ॥
अत्रान्तरे शत्रुजितः कश्चिदेत्य नृपात्मजः ।
चक्रे विषमशीलस्य सेवां द्वादशवार्षिकीम् ॥ २५६ ॥
चिरस्थितं राजपुत्रं सोऽथ कार्पटिकव्रतम् ।
तं खण्डकपटाभिख्ये व्यधादेत्य पुरे नृपम् ॥ २५७ ॥
सर्वर्तुफलपुष्पाढ्यं मणिकाञ्चनमन्दिरम् ।
स सर्वकामदं प्राप्य तत्पुरं विस्मितोऽभवत् ॥ २५८ ॥
ततः प्रतिनिवृत्ताय पुनश्चास्मै ददौ स्वयम् ।
चतुरम्भोधिपर्यन्तं चतुर्भागं भुवो विभुः ॥ २५९ ॥
अत्रान्तरे समभ्येत्य पुनः कश्चिद्व्यजिज्ञपत् ।
देवं श्रीविक्रमादित्यं रोमाञ्चोद्भूतविग्रहम् ॥ २६० ॥
कृष्णशक्तिरिति ख्यातो वाहं···द्विजपुत्रकः ।
आगतः श्वशुरावासाद्भार्यामादाय तत्स्थिताम् ॥ २६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुरङ्गीमधिरुह्यायमस्या याने सुहृद्धृते ।
अभक्षयन्नरं साशु मद्भार्या गूढशाकिनी ॥ २६२ ॥
तां रक्ताक्तमहावक्त्रां दृष्ट्वाहं भयविह्वलः ।
देव त्वां शरणं प्राप्तः प्रमाणमधुना प्रभुः ॥ २६३ ॥
तच्छ्रुत्वा सस्मिते राज्ञि ध्वस्तायां च तदाज्ञया ।
शाकिन्यां तत्कथामध्ये प्राह मन्त्री नरेश्वरम् ॥ २६४ ॥
आलयः सर्वपापानां देव क्रूरतराः स्त्रियः ।
अग्निगर्भाभिधस्यासीत्प्रिया भार्या द्विजन्मनः ॥ २६५ ॥
सा चौररागिणी शूले चौरमुल्लम्बिनं पुरा ।
स्नेहदुःखस्मरावेशादालिलिङ्ग चुचुम्ब च ॥ २६६ ॥
तदा प्रविष्टो वेतालस्तस्याश्चिच्छेद नासिकाम् ।
छिन्ननासा च सा गत्वा पत्युर्वस्त्रान्तमग्रहीत् ॥ २६७ ॥
अनेन निगृहीताहमपापेत्यार्तराविणी ।
पित्रा मात्रा च सा सार्धं गत्वा राज्ञे न्यवेदयत् ॥ २६८ ॥
राज्ञादिष्टेऽथ तद्भर्तुर्निग्रहे रभसं स्थितः ।
तद्वृत्तं दिव्यपुरुषः कथयित्वा ररक्ष तम् ।
इति पापाः स्त्रियो देव भवन्ति कलुषाशयाः ॥ २६९ ॥
इत्युक्ते तेन भूपालं मूलदेवोऽप्यभाषत ।
पापा नैकान्ततो देव सन्ति साध्व्योऽपि योषितः ॥ २७० ॥
मत्प्रसिद्धिं समाकर्ण्य धूर्तैर्लभ्यास्मि नो बलात् ।
इत्युद्वाहविधौ बद्धनियमां शङ्कितां सदा ॥ २७१ ॥
पुरा धूर्तः प्रसिद्धोऽहं युक्त्या धूर्तैरनिर्जिताम् ।
अवापं विप्रतनयां विवाहे छन्नवेषभृत् ॥ २७२ ॥
ततस्तां विहितोद्वाहामवदं प्राज्ञमानिनीम् ।
हा वञ्चितासि गच्छामि स्वतिते(?) विजितं मया ॥ २७३ ॥
इति ब्रुवाणं मां प्राह प्रस्थितं सा स्मितव्रता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गच्छ मत्सूनुना बद्धो न चिरात्त्वं भविष्यसि ॥ २७४ ॥
इति प्रतिज्ञां श्रुत्वाहं तस्या यातो निजां पुरीम्।
याति काले कदाचित्सा छन्ना तामाययौ पुरीम् ॥ २७५ ॥
तस्थौ च तत्र गणिकामिषेणालक्षिता क्षितौ।
कामुकान्साथ संप्राप्तान्धियैव विमुखान्व्यधात् ॥ २७६ ॥
पूर्वे यामे स्नानविधिं द्वितीये भोजनक्रमम्।
तृतीये मण्डनारम्भं चतुर्थे तु कथान्तरम् ॥ २७७ ॥
निजैः परिजनैः कृत्वा कामिनामिति वञ्चनाम्।
शीलसंरक्षणपरा तस्थौ मत्संगमाशया ॥ २७८ ॥
नवां वाराङ्गनां प्राप्तां श्रुत्वाहं तामशङ्कितः।
प्रविष्टः कामुको भूत्वा तद्गृहं स्मरमोहितः ॥ २७९ ॥
सा मां प्रौढं परिज्ञाय संगमं विदधे मया।
मत्तश्च गर्भं संप्राप्य प्रच्छन्ना स्वपुरं ययौ ॥ २८० ॥
सासूताथ सुतं काले संप्रवृद्धिं कलानिधिम्।
मातुर्गृहात्समभ्येत्य मां द्यूतैः सोऽजयत्कृती ॥ २८१ ॥
स हारितानेकधनं बध्वा मां मातुरन्तिकम्।
निनाय सा च मां प्राह सा निजानां स्वसंगमम् ॥ २८२ ॥
तीर्णा मया प्रतिज्ञासौ प्रमाणमधुना भवान्।
इति ब्रुवाणां तां कान्तामभजं सत्यवादिनीम् ॥ २८३ ॥
इत्येवं सत्यशालिन्यो देव सन्ति पतिव्रताः।
मूलदेवो निगद्येति प्रणम्य प्रययौ नृपम् ॥ २८४ ॥
अथ श्रीविक्रमादित्यो हेलया निर्जिताखिलः।
म्लेच्छान्काम्बोजयवनान्नीचान्हूणान्सबर्बरान् ॥ २८५ ॥
तुषारान्पारसीकांश्च त्यक्ताचारान्विशृङ्खलान्।
हत्वा भ्रूभङ्गमात्रेण भुवो भारमवारयत् ॥ २८६ ॥
इत्येवं सत्यसंपन्नाः प्राप्नुवन्ति समीहितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नरवाहन कान्तां तामवाप्स्यसि धृतिं श्रियः ॥ २८७ ॥
इति निशम्य कथां स मुनेर्वचः प्रियतमाविरहानलतापितः ।
वनमहीषु चचार निजां पुरीमनुसरञ्शनकैर्नरवाहनः ॥ २८८ ॥

इति क्षेमेन्द्रविरचितायां बृहत्कथायां विषमशीलनामा दशमो लम्बकः समाप्तः ।

मदिरावतीलम्बकः ।

अनङ्गेनाबलासङ्गाज्जिता येन जगत्त्रयी ।
स चित्रचरितः कामः सर्वकामप्रदोऽस्तु वः ॥ १ ॥
अनेकसौरभोद्गारव्याकुलीकृतषट्पदे ।
प्रक्षुभ्यत्कोकिलकुले रसत्समदसारसे ॥ २ ॥
वलत्समीरणोद्धूतघनकिञ्जल्कपिञ्जरे ।
संजाताधिकसंतापस्तत्र वत्सेश्वरात्मजः ।
निजदेशपरित्यागे बभूवं कुरिसादरः ॥ ३ ॥
स गत्वा विरहक्षामः पदैः श्लथविशृङ्खलैः ।
कलहंसकुलालोलं प्राप भागीरथीतटम् ॥ ४ ॥
तरुणौ तत्र विश्रम्भसम्भोगाविव रूपिणौ ।
अग्राम्यवस्त्राभरणौ ददर्श द्विजपुत्रकौ ॥ ५ ॥
रतिहीनमिवानङ्गं विलोक्य नरवाहनम् ।
ॐ नमो मन्मथायेति ब्रुवाणौ तौ प्रणेमतुः ॥ ६ ॥
निजवृत्तान्तमावेद्य पृष्टौ राजसुतेन तौ ।
चक्रतुः स्वकथाख्याने लज्जिताविव मानसम् ॥ ७ ॥
तयोरेकोऽब्रवीद्देव श्रूयतां नौ विचेष्टितम् ।
वल्लभे प्रेरयत्येषा ब्रह्मदर्शननिर्वृतिः ॥ ८ ॥
अस्ति शोभावती नाम कलिङ्गविषये पुरी ।
तस्यां यशस्करो नाम बभूव ब्राह्मणोऽग्रणीः ॥ ९ ॥
तस्य मेखलिकाख्यायां ब्राह्मण्यां तनयः प्रियः ।

---

१. 'बभूवांस्त्वरितादरः' इति पाठो भवेत्. २. 'स्त्रा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जातः सद्भावनामाहं कुलार्थं विहितव्रतः ॥ १० ॥
ततः कदाचिद्दुर्भिक्षे त्यक्त्वा स्वनगरं वयम् ।
संप्राप्ता कृच्छ्रवीवाख्यं पुरं सुरपुरोपमम् ॥ ११ ॥
ततः कृतास्पदे तत्र सदा विद्यार्जने रतः ।
अहं गुरुकुले मित्रमवापं क्षत्रियं दिनैः ॥ १२ ॥
सोमदत्ताभिधानस्य राजन्यस्य तमात्मजम् ।
मित्रं विजयसेनाख्यं प्राप्याहं निर्वृतोऽभवम् ॥ १३ ॥
ततः कदाचिदुद्याने तत्स्वसा मदिरावती ।
दृष्टा मया मनोजन्मसाम्राज्यविजयोत्सवः ॥ १४ ॥
दधाना बाहुयुगलं बिसकन्दसुकोमलम् ।
वापीव मञ्जुसिञ्जानमेखलाहंसमालिका ॥ १५ ॥
बिभ्राणाभिनवोद्भिन्नकुचावव्यक्तचूचुकौ ।
तारहारनदीजाताविव पङ्कजकोरकौ ॥ १६ ॥
तां विलोक्याहमानन्दसुधानिःस्यन्दवाहिनीम् ।
कदम्बकुसुमाकारः संजातपुलकोऽभवम् ॥ १७ ॥
सापि मामवलोक्यैव साचीकृतविलोचना ।
स्फुटां गतिं परित्यज्य भेजे विभ्रमवक्रताम् ॥ १८ ॥
नवस्मरशराघातकल्पितास्य निजं गृहम् ।
गत्वा बभूव शनकैर्ध्यानोच्छ्वासपरायणः ॥ १९ ॥
ततो विजयसेनेन नीतोऽहं निजमन्दिरम् ।
तामपश्यं स्मरभुवं मय्येवार्पितलोचनाम् ॥ २० ॥
तया प्रणयशालिन्या गुम्फितां कुसुमस्रजम् ।
कण्ठे न्यवेशयं हर्षात्तामिवामीलितेक्षणः ॥ २१ ॥
रहस्तस्यास्ततो धात्री मामुवाचामृतोपमम् ।
त्वमेव मदिरावत्या जीवितं किमतः परम् ॥ २२ ॥
इत्यहं तद्गिरा हृष्टः प्राप्तो मन्मथतामिव ।

१. 'नि' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अकार्षं विपुलामाशां प्रियापरिणयोत्सवे ॥ २३ ॥
ततः कदाचिदश्रौषं तां पित्रा प्रतिपादिताम् ।
क्षत्रियायातिरूपाय वचसा गुणशालिनीम् ॥ २४ ॥
तच्छ्रुत्वाहं झटित्युग्रवज्राहत इव क्षितौ ।
पतितः प्रेमबन्धानामाशाभङ्गोऽतिदुःसहः ॥ २५ ॥
ततस्तस्याः सखी प्राह मामेत्य लघुचारिणी ।
पित्रा कुबुद्धिनान्यस्मै कल्पिता मदिरावती ॥ २६ ॥
भ्रमन्तमभिधत्ते च सा त्वत्प्रीतिपरायणा ।
त्वमेव मे प्राणनाथो मिथ्याभ्रान्तः पिता मम ॥ २७ ॥
इति तद्वचसा सद्यः संप्राप्ता साचलत्स्नना(?) ।
समारूढ इवाकाशं सुधासिक्त इवाभवम् ॥ २८ ॥
अथ कालेन संप्राप्ते तस्या लग्नदिनोत्सवे ।
श्रुतो मयानेकजन्यजनकोलाहलः पुरे ॥ २९ ॥
अन्यत्र पथि यातस्य दर्शने बद्धकौतुकः ।
परिणेतुस्ततो गत्वा मया दर्पगताः स्त्रियः ॥ ३० ॥
विवाहं मदिरावत्या दृष्ट्वाहं समुपस्थितम् ।
तत्संगमे जीवितेन तुल्यमाशां यदात्यजम् ॥ ३१ ॥
ततोऽहं तरुमारुह्य पाशवेष्टितकन्धरः ।
ऊर्ध्वेक्षणं तमोघोरं प्रविष्टो नष्टचेतनः ॥ ३२ ॥
केनापि मुक्तपाशोऽथ फेनोद्गारिमुखः क्षितौ ।
पातितः सुचिरात्संज्ञां प्राप्यापश्यं द्विजं पुरः ॥ ३३ ॥
कृपयाश्वास्य मां तैस्तैरुपपत्तिकथाक्रमैः ।
उवाच मत्कथां श्रुत्वा स निष्कारणबान्धवः ॥ ३४ ॥
जहास निन्दितं विप्र साहसं कृतवानसि ।
शरीरत्यागपापिष्ठं कर्मैतन्मा कृथाः पुनः ॥ ३५ ॥
अवश्यमेव पुरुषः प्राप्नोत्यपि यथेप्सितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवत्येवात्र संसारे दृष्टनष्टा मुहुर्मुहुः ।
संयोगाश्च वियोगाश्च तथा च शृणु तत्कथाम् ॥ ३६ ॥
अहं कुमारको नाम नेपालविषयाश्रयः ।
द्विजन्मा निखिलां पृथ्वीं भ्रान्तो विषयकौतुकात् ॥ ३७ ॥
ततः शङ्खमुखं नाम हिमवत्कच्छसंश्रयम् ।
अवापं विविधोद्यानं वसन्तस्येव मन्दिरम् ॥ ३८ ॥
शङ्खपालह्रदे तत्र यातयामे महोत्सवे ।
स्नानपूजारसव्यग्रसुन्दरीमन्दमण्डले ॥ ३९ ॥
अपश्यं कन्यकां कान्तां नवयौवनशालिनीम् ।
अशर्वामिव शर्वाणीमचन्द्रामिव रोहिणीम् ॥ ४० ॥
विभ्रमाणां कुलगृहं क्षेत्रं कान्तेः पदं तरोः ।
त्रिजगज्जयिनः शक्तिं मूर्तामिव मनोभुवः ॥ ४१ ॥
तां चन्द्रवदनां दृष्ट्वा कुरङ्गनयनामहम् ।
रम्भोरूं रम्भया तुल्यां गत्वैव गजगामिनीम् ॥ ४२ ॥
पुराहं राजपुत्रस्य याता क्रीडामयूरताम् ।
तस्यां मदाननन्यस्तलोचनायां महागजः ॥ ४३ ॥
प्रतिद्वीपरूपान्याया(?)ज्जनकोलाहलाकुलः ।
भ्रमद्भ्रमरसंभारमदाम्भोराजिराजितः ॥ ४४ ॥
मन्दराद्रिरिवोच्चञ्चत्कालकूटघटाकुलः ।
सरोविलोडनक्रीडाडम्बरे कवलीकृताः ॥ ४५ ॥
उद्गिरन्निव दन्तांशुच्छद्मना विषमण्डलीः ।
विलोलकर्णतालाग्रव्यालम्बिसितचामरः ॥ ४६ ॥
कालमेघ इवोत्सर्पद्बलाकावलयाङ्कितः ।
यस्य गम्भीरसंरम्भगुरुभिर्गलगर्जितैः ॥ ४७ ॥
तां त्रासस्खलितामेत्य दोर्भ्यामहमधारयम् ।

१. 'जें' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जग्राह निबिडं कण्ठे मां सा तद्भयविह्वला।
स्पर्शहर्षामृतासिक्तकम्पितोच्चकुचस्थलीम् ॥ ४८ ॥
भूयात्ते करिणीं सज्जौ मदलेशविलासन।
कृतोपकारं तं नागमित्यहं मनसाभ्यधाम् ॥ ४९ ॥
ततः पृथुलफूत्कारशीकराबद्धदुर्दिनः।
आवर्तितः करोत्कारः क्षणात्प्राप्तो मदन्तिकम् ॥ ५० ॥
तद्भयाद्विद्रुते दूरं जनसंघे सहस्रधा।
नापश्यं पद्मवदनां क्वचित्तां तरलेक्षणाम् ॥ ५१ ॥
ततोऽहं तद्वियोगार्तो यातेऽस्तं नलिनीप्रिये।
चक्राह्व इव यामिन्यां विलापमुखरोऽभवम् ॥ ५२ ॥
अथ चन्द्रकरस्मेरकुमुदामोदशालिभिः।
विषवेगैरिवासिक्तो रजनीपवनैरहम् ॥ ५३ ॥
एवं प्रतिनिशं कान्तावियोगविधुराशयः।
भ्रान्तोऽपि निखिलां पृथ्वीं तां न पश्यामि सुन्दरीम् ॥ ५४ ॥
बद्धस्पृहोऽपि निधने धारयाम्येव जीवितम्।
प्रियलाभा भवन्त्येव सत्सु प्राणेषु देहिनाम् ॥ ५५ ॥
अद्य त्वमपि दुःखार्तो रक्षितो मरणान्मया[1]।
अनुभूतव्यथः सर्वो जानाति परवेदनाम् ॥ ५६ ॥
धीरो भव भवे दैवात्कदाचिन्मदिरावतीम्।
अवाप्स्यसीति तद्वाक्यं श्रुत्वाहं धृतिमाश्रितः ॥ ५७ ॥
ततस्तेनैव सहितः पूज्यस्मरनिकेतनम्।
यातः परिणये रन्तुं यत्रायान्ति पुराङ्गनाः ॥ ५८ ॥
तत्र गर्भगृहे गूढं स्थिते मयि तदाशया।
विवाहे स्मरपूजायामायायौ[2] मदिरावती ॥ ५९ ॥
उत्साहवाद्यनिर्घोषक्षुभिते जनसागरे।
विराजमाना लावण्यपीयूषैः श्रीरिवोदिता ॥ ६० ॥

१. 'म' ख. २. 'वाययौ' इति पाठो भवेत्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निषिद्धान्यप्रवेशाय सा प्रविश्य स्मरालयम् ।
प्रणम्य प्राह सा वाक्यमुद्वाहोऽयं विधाय मे ॥ ६१ ॥
दृष्टः पुरा मया विप्रो यः स मे हृदयप्रभुः ।
स मे जन्मान्तरे भूयात्पतिः प्राणांस्त्यजाम्यहम् ।
इत्युक्त्वा विदधे पाशं कण्ठे हारविभूषिते ॥ ६२ ॥
ततोऽहं सुन्दरीं दृष्ट्वा तां रागान्मर्तुमुद्यताम् ।
प्रहृष्टो दयितामानी पाशं तस्या न्यवारयम् ॥ ६३ ॥
साथ मां प्रत्यभिज्ञाय विहितालिङ्गनोत्सवम् ।
सकम्पा कामपि ययौ क्षीवतां मदिरावती ॥ ६४ ॥
निर्जनामटवीं त्यक्त्वा पुरं प्राप्तोऽचलाभिधम् ।
ततो गृहपतेर्गेहे तत्रत्यस्य च कस्यचित् ॥ ६५ ॥
विधिना विहितोद्वाहः संभोगसुभगोऽभवम् ।
तया प्रणयशालिन्या रममाणो मृगीदृशा ॥ ६६ ॥
तत्राङ्गनामुखं प्राप्तं तमपश्यं सुहृद्वरम् ।
दैवाद्यदृच्छया यातः स पृष्टः प्रणयान्मया ॥ ६७ ॥
प्राहाप्यहं वधूवेषो यातः शिबिकया गृहम् ।
तत्रोद्वाहोत्सवे व्यग्रजनकल्लोलसंकुले ।
दीर्घावगुण्ठनां प्राह सखी मां पाटलाभिधा ॥ ६८ ॥
मदिरावति कोऽयं ते विषादविषविभ्रमः ।
अस्मिन्नप्युत्सवे येन विकृतेवोपलक्ष्यते ॥ ६९ ॥
जानेऽहं त्वां सदा बद्धप्रीतिं तस्मिन्द्विजात्मजे ।
धात्रा न लिखितः किं तु तव तेन समागमः ॥ ७० ॥
प्राप्तां भज विधेराज्ञां को हि नामातिवर्तते ।
ममाप्येवंविधा चिन्ता सततं सखि वर्तते ।
शृणु यन्मे पुरा वृत्तं नागयात्रामहोत्सवे ॥ ७१ ॥
शङ्खपालह्रदे स्नातुं याता बहुजनागमे ।

---

१. 'त्सा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपश्यं कुञ्जरत्रस्ता पुरुषं मन्मथोपमम् ॥ ७२ ॥
तेन पद्मदलाक्षेण यूनाहं भयविह्वला ।
गाढमालिङ्गिता येन मामद्यापि स्मरज्वरः ॥ ७३ ॥
तं मदं मदनस्यापि यौवनस्यापि यौवनम् ।
तं विस्मरति मे[1] मन्ये मनो जन्मान्तरेष्वपि ॥ ७४ ॥
ततोऽहं कुञ्जरभयात्तद्वियुक्तो निजं गृहम् ।
कण्ठे गृहीत्वा सोत्कण्ठं लब्धजीव इवाभवम् ॥ ७५ ॥
सापि मां मन्मथाविष्टा दृष्ट्वाभ्यस्तं मनोरथैः ।
प्लावितेवामृतस्यन्दैरभवत्स्मेरचन्द्रिका ॥ ७६ ॥
ततस्तयाहं गूढेन द्वारेणालक्षितो निशि ।
निर्गतो लघुसंचारो मधुमत्तजनाद्गृहात् ॥ ७७ ॥
दूरं गत्वा वनं प्राप्तः........................ ।
सौजन्याद्विहितातिथ्यः कृतोऽहं मृगयाज्ञया ॥ ७८ ॥
दैवाद्दिष्टमिमं मार्गं विचिन्त्य दयितासखः ।
इह त्वया संगतोऽहमानन्देनेव रूपिणा ॥ ७९ ॥
इति तद्वचनं श्रुत्वा दृष्टोऽहं जाह्नवीतटे ।
स्थितोऽद्य यावत्तावत्त्वं मया दृष्टो नृपात्मजः ॥ ८० ॥
अयं मम सखा बन्धुः सहजः स्वर्गमेव च ।
राजसूनो मनःसिन्धुचन्द्रः प्राणा बहिश्चराः ॥ ८१ ॥
इति द्विजसुतेनोक्तं निशम्य नरवाहनः ।
शनैर्बबन्ध सानन्दो दयितासंगमे धृतिम् ॥ ८२ ॥
अथ स निजसुहृद्भिः संगतो गोमुखाद्यैः
प्रणयविनतमौलिस्तौ समानम्य विप्रौ ।
विरहविधुरधैर्यः संस्मरन्वल्लभायाः
प्रविशिथिलमयासीत्स्वां पुरीं राजपुत्रः ॥ ८३ ॥

इति क्षेमेन्द्रविरचितायां बृहत्कथायां मदिरावती नाम एकादशो लम्बकः समाप्तः ।

---

1. 'मा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मावतीलम्बकः ।

जाह्नवीधूर्जटिजटाकुन्दमाला पुनातु वः ।
राजहंसश्रियं धत्ते यद्वारि वलये शशी ॥ १ ॥
ततो विरहसंतप्तं प्रियां मदनमञ्चुकाम् ।
विलपन्तं सुहृत्प्राह गोमुखो नरवाहनम् ॥ २ ॥
धैर्यसागर कोऽयं ते मन्मथानलविप्लवः ।
एष ह्यसंवृतः सत्यं महतामपि दुःखदः ॥ ३ ॥
ब्रह्मदत्त इति ख्यातो वाराणस्यामभून्नृपः ।
कीर्तिरासागरं यस्य गता गङ्गेव भूभृतः ॥ ४ ॥
तस्य सोमप्रभा नाम भार्या सोमप्रभाभवत् ।
मन्त्री च धीमतां धुर्यः शिवभूतिरिति श्रुतः ॥ ५ ॥
स कदाचिन्नृपश्चन्द्रकान्तिधौते नभस्तले ।
सौधोत्सङ्गगतोऽपश्यन्निशीथे हंसमालिकाम् ॥ ६ ॥
तन्मध्ये काञ्चनमयं प्रवालचरणोज्वलम् ।
ददर्श हंसमिथुनं शुक्ला रुचिरलोचनम् ॥ ७ ॥
पृष्टौ राज्ञा प्रोचतुस्तौ पूर्ववृत्तमथात्मनः ।
पुष्पशेखर इत्यासीद्दुर्विनीतो गणः पुरा ॥ ८ ॥
जयया कन्यया सार्धं संस्थितो दुर्विनीतया ।
दृष्ट्वा गणौ जहसतुर्मृगेश्वर[गुहे]श्वरौ ॥ ९ ॥
अकाण्डे प्रणयं तेषां विलोक्य त्र्यम्बकप्रिया ।
कोपाग्निधूमलतिकां बभार भृकुटीं मुखे ॥ १० ॥
सावदद्दुर्विनीतोऽयं कन्ययैव सहानया ।
मर्त्यतां यातु निर्लज्जो विलासी पुष्पशेखरः ॥ ११ ॥
हासशीलावपि पुरावेतौ चापलसूचकौ ।
बहुशः कुत्सितां जातिं प्राप्य बोधः श्रुपास्यत(?) ॥ १२ ॥
इति शंसेषु पार्वत्या तेष्वेकः प्रमथोऽब्रवीत् ।
कृपया धूर्जटी नाम देवि दासेषु मा क्रुध ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्छ्रुत्वा गिरिजा प्राह पत त्वमपि भूतले ।
ईश्वरा गाढनिर्बन्धं यान्ति धार्ष्ट्यनिवारिताः ॥ १४ ॥
सुतास्नेहात्ततः प्राप्य जया गौरीं व्यजिज्ञपत् ।
देवीसेवाजुषां तेषां शापस्यान्तो विधीयताम् ॥ १५ ॥
इत्यर्थिता सा तपसा तया प्रोवाच पार्वती ।
एकत्र संगता जातिं स्मृत्वैष्यन्ति निजं पदम् ॥ १६ ॥
इत्युक्ते शंकरस्तूर्णं सतीसंदर्शनोत्सुकः ।
व्योम्ना मनोरथेनेव समभ्यायात्ककुद्मता ॥ १७ ॥
सिप्राप हर्षपीयूषवर्षिणीं हिमवत्सुताम् ।
अश्रृणोदन्धकाक्षं तं निकामं तु परम्परा ॥ १८ ॥
ततस्तं विदधे क्रुद्धो भगवानस्थिपञ्जरम् ।
मुस्ताङ्गः सोऽपि तपसा भृङ्गिरित्यभवद्गणः ॥ १९ ॥
अत्रान्तरे यौ गिरिजाशप्तौ पिङ्गगुहेश्वरौ ।
द्विजस्य पुत्रतां यातौ यज्ञस्थलनिवासिनः ॥ २० ॥
ततस्तावतिदारिद्र्यान्मातामहगृहे स्थितौ ।
मातुलेन पशुप्रायौ नियुक्तौ पशुरक्षणे ॥ २१ ॥
अथैकं भक्षितं दृष्ट्वा ताभ्यामृक्षविदारितम् ।
छागलं मातुलः शापं ददौ रक्षस्तनुप्रदम् ॥ २२ ॥
ततस्तौ राक्षसौ घोरौ कदाचिद्धन्तुमुद्यतौ ।
पतिताचस्य शापाच्च वने यातौ पिशाचताम् ॥ २३ ॥
कालेन दुर्दिने होमधेनुरक्षाकुमारकम् ।
भोक्तुं मुनेरुद्यतौ च शापाच्चाण्डालतां गतौ ॥ २४ ॥
कर्णनासाविरहितौ शबरैश्चौर्यकोपतः ।
कृतौ गत्वा शिवगृहं धेनुं हन्तुं समुद्यतौ ॥ २५ ॥
अन्धीकृतौ भगवता दृष्टौ पौरजनैस्ततः ।
निराहारौ वायसतां किंचित्कर्मक्षयाद्गतौ ॥ २६ ॥

---

१. 'सं' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भासतां च ततः प्राप्तौ क्रमेण च मयूरताम् ।
शिवार्चनरतौ काले जातिं स्मृत्वा च हंसताम् ॥ २७ ॥
प्राप्तौ ततोऽपि वैचित्र्यं हेमरत्नमयाकृती ।
तावावां पार्वतीशप्तौ मृगेश्वरगुहेश्वरौ ॥ २८ ॥
स पुष्पशेखरस्त्वं च त्वत्प्रियेयं जयात्मजा ।
महामात्यश्च ते राजन्धूर्जटोऽयं गणाग्रणीः ॥ २९ ॥
तदेहि तूर्णं गच्छामः सिद्धिक्षेत्रं महागिरिम् ।
प्राग्मुक्तकेतुना यत्र मुक्ता लक्ष्मीस्ततः श्रिया ॥ ३० ॥
इति हंसवचः श्रुत्वा ब्रह्मदत्तः प्रियासखः ।
मन्त्रिणा सह ताभ्यां च व्योम्ना जातिस्मरस्तु सः ॥ ३१ ॥
आद्यस्थानं समासाद्य ते विज्ञानमयाः क्षणात् ।
शांभवं पदमभ्येत्य संगता भेजिरे निजाम् ॥ ३२ ॥

इति ब्रह्मदत्ताख्यायिका ॥ १ ॥

गोमुखेनेति कथितं निशम्य नरवाहनः ।
मुक्तकेतुकथाजातमपृच्छत्कौतुकाकुलः ॥ ३३ ॥
स पृष्टः प्राह सुहृदं मन्मथार्तं विनोदयन् ।
मुक्तकेतोः शृणु कथां देव विद्याधरप्रभोः ॥ ३४ ॥
अभूद्विद्युत्प्रभो नाम दैत्यानामधिपो बली ।
विद्युद्ध्वजः सुतस्तस्य तीव्रेण तपसाभवत् ॥ ३५ ॥
सोऽपि घोरेण तपसा प्रजापतिवरात्कृती ।
विना पाशुपतं प्राप दिव्याण्यस्त्राण्युदारधीः ॥ ३६ ॥
स पित्रा सहितो गत्वा सेव्यमानो महासुरैः ।
स्वयं शतक्रतुस्तस्य वज्रनिर्दारितासुरः ।
चचार समरे वीरो मरुद्भिरभितो वृतः ॥ ३७ ॥
ततो विद्युद्ध्वजोत्सृष्टैर्ब्रह्मास्त्रप्रमुखैर्युधि ।
महास्त्रैरभवन्देवा दावव्याप्ता इवाद्रयः ॥ ३८ ॥

---

१. 'मृगेश्वरगुहेश्वरौ' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जम्भारिरथ संत्रासं संस्मृत्य त्रिपुरान्तकम्।
चक्रे पाशुपतास्त्रेण संहारं त्रिदशद्विषाम् ॥ ३९ ॥
विद्युद्ध्वजस्य जनको महद्भिर्दानवोत्तमैः।
तेनास्त्रवह्निना दग्धः प्रययौ शाश्वतं पदम् ॥ ४० ॥
लब्धलक्ष्येषु देवेषु विध्वस्ते दैत्यमण्डले।
लज्जाविभुग्नवदनो वनं विद्युद्ध्वजो ययौ ॥ ४१ ॥
तत्र वर्षायुतं कृत्वा तपः संतापितामरम्।
देवैरप्यभवद्युद्धे वरं प्राप स शूलिनः ॥ ४२ ॥
[[1]गत्वाथ त्रिदिवं व्योम्ना संग्रामे वज्रिणं जयी।
विद्राव्य सुरगन्धर्वकिन्नरानकरोद्वशे ॥ ४३ ॥
परित्यज्य प्रयातेषु स्वपुराण्यथ तद्भयात्।
क्वापि देवनिकायेषु मत्तेषु दितिसूनुषु ॥ ४४ ॥
अमृष्यमाणस्तां मानम्लानिं विद्याधराधिपः।]
वज्रकेतुस्तपस्तप्त्वा पुत्रं प्रापासुरान्तकम् ॥ ४५ ॥
स मुक्तकेतुनामाभूत्तस्येश्वरवरात्सुतः।
देवा यस्य बलाधाने बभूवुः सततोद्यताः ॥ ४६ ॥
भाविनीं वल्लभां तस्य गन्धर्वाधिपतिः सुताम्।
प्राप पद्मावतीं शर्वप्रसादात्पद्मशेखरः ॥ ४७ ॥
अत्रान्तरे दैत्यजिता मधुहन्तारमच्युतम्।
श्वेतद्वीपं समभ्येत्य त्रिदशाः शरणं ययुः ॥ ४८ ॥
तेनादिष्टाः सरहरं प्रयातास्त्रिपुरान्तकम्।
गीर्वाणाः शुश्रुवुस्तस्मान्मुक्तकेतुं परायणम् ॥ ४९ ॥
सिद्धक्षेत्रे ततश्चक्रे मुक्तकेतुर्महत्तपः।
येनास्य सिद्धयः सर्वा बभूवुरभिसारिकाः ॥ ५० ॥
दर्पाद्विद्युद्ध्वजेनाथ त्रैलोक्ये व्याकुलीकृते।
शून्यारण्यतुले नीतं नन्दने छिन्नचन्दने ॥ ५१ ॥

1. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्दिग्रहगृहीतासु सुरनारीषु दानवैः ।
उच्छ्वासैर्दीपयन्तीषु तत्प्रतापानलं मुहुः ॥ ५२ ॥
अर्थितः सुरराजेन मुक्तकेतुः शिवाज्ञया ।
प्रतस्थे त्रिदिवं तूर्णं महादैत्यरणोत्सुकः ॥ ५३ ॥
स व्रजन्नभसा तूर्णं विद्याधरनृपात्मजः ।
ददर्श पार्वतीपूजाव्यग्रां गन्धर्वपुत्रिकाम् ॥ ५४ ॥
कान्तामभिनवोद्याने स तां पद्मावतीं युवा ।
निर्वर्णयन्क्षणमभूत्कौतुकोत्कलिकाकुलः ॥ ५५ ॥
राजधानीमनङ्गस्य वज्रनाम्बुधुनीं रतेः ।
विभ्रमाणां कुलगृहं लीलोद्यानं मदश्रियः ॥ ५६ ॥
स तामालोक्य शीतांशुसौन्दर्यस्येव देवताम् ।
बभार मानसं हर्षात्तुङ्गवीचितरङ्गितम् ॥ ५७ ॥
अत्रान्तरे समुत्थाय राक्षसीयुगलेन सा ।
पातालाद्भूमिकोपेन गृहीता कम्पिताकृतिः ॥ ५८ ॥
संत्रासविह्वलां बालां तां लोलनयनां ततः ।
ररक्ष गन्धर्वसुतां मुक्तकेतुर्निहत्य ताम् ॥ ५९ ॥
साथ तद्भयनिस्तीर्णा तं विलोक्य स्मरोपमम् ।
पुलकालंकृततनुः कम्पसंपद्युताभवत् ॥ ६० ॥
ततो बन्दिगिराकर्ण्य तौ नामाभिजनौ मिथः ।
ननन्दतुः संगमाशां विधाय विपुलां हृदि ॥ ६१ ॥
अथ नाकिगणाहूतो दैत्येन्द्रसमरावनिम् ।
प्रययौ मानसं तस्यां विन्यस्य स्मरतापितः ॥ ६२ ॥
तत्र विद्युद्ध्वजमुखैरसुरैः संप्रहारिभिः ।
प्रावर्तत महद्युद्धं मुक्तकेतो सुरश्रिये ॥ ६३ ॥
देवदानवसंग्रामे तस्मिन्नतिभयंकरे ।
क्षुभ्यत्तप्ताब्धिकल्लोलमालिका विचचार भूः ॥ ६४ ॥

१. 'नं संहर्षा' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1].. ।
.... ॥ ६५ ॥
.... ।
.... ॥ ६६ ॥
.... ।
.... ॥ ६७ ॥
.... ।
पततां तत्र नागानां हयानां स्फुटतामपि ।
निर्घोषैः कम्पिताशेषलोकैर्जगदपूर्यत ॥ ६८ ॥
वीरावीरशिरोभिस्तं प्रकराश्चक्रिरे पुरः ।
कमला.........विकोशकमलाकरान् ॥ ६९ ॥
भिन्नेभमुक्तानिचयास्तेषामग्रे चकासिरे ।
शौर्यलक्ष्मीपरिणये लाजानामिव मुष्टयः ॥ ७० ॥
केशसेवालजटिला रुधिरावर्तदुस्तरा ।
ससर्प रक्ततटिनी भूतवेतालमालिका ॥ ७१ ॥
अपूर्वः प्राप तां रक्तवाहिनीं वाहिनीपतिः ।
ननर्तेव चलत्तुङ्गतरङ्गभुजमण्डली ॥ ७२ ॥
अथ विद्युद्ध्वजः प्रौढदोर्दण्डाकृष्टकार्मुकः ।
मुक्तकेतुं स्फुरच्चापट्टारक्रेङ्कारमभ्ययात् ॥ ७३ ॥
तयोर्लघु विचित्रं तु तत्पुरो युद्धमुद्धतम् ।
निश्चलाः सुभटाः सर्वे ददृशुः प्रेक्षका इव ॥ ७४ ॥
ततः खड्गेन तपसा प्रोन्ममाथ प्रमाथिनः ।
शिरो विद्युद्ध्वजस्याशु मुक्तकेतुरसंभ्रमः ॥ ७५ ॥
तथा च धैर्येण समं प्रौढकर्णोत्पलं शिरः ।
पपात दानवेन्द्रस्य रणश्रीकेलिकन्दुकः ॥ ७६ ॥

१. इदं त्रुटिचिह्नं पुस्तकद्वय एव.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः शक्रमुखा देवाः संप्राप्तविजयोत्सवाः ।
विविशुश्चिरसंघृष्टनन्दनाममरावतीम् ॥ ७७ ॥

इति विद्युद्ध्वजवधः ॥ २ ॥

संपूजितोऽथ शक्रेण स्तूयमानो नभश्चरैः ।
पितुश्चन्द्रावलपुरं मुक्तकेतुर्ययौ बली ॥ ७८ ॥
तत्र पद्मावतीं ध्यायन्विरहानलदुःसहाम् ।
बभूव पाण्डुरच्छायः शशीव दिनभूधरः ॥ ७९ ॥
पद्मावती च हिमवत्तटोपान्तवनस्थलीम् ।
समेत्य तस्थौ विरहव्यथया सुविसंस्थुला ॥ ८० ॥
सा समाश्वास्यमानेव वल्लीभिर्भृङ्गकूजितैः ।
मुहुर्मूर्च्छां न तत्याज मुक्तकेतुप्रलापिनी ॥ ८१ ॥
दीर्घं निःश्वस्य बाष्पाम्बुपूरप्लावितलोचना ।
पट्टे लिलेख दयितां तदाकारानुरागिणीम् ॥ ८२ ॥
ततो मनोहरा नाम सखी तां द्रष्टुमाययौ ।
विचित्योपवनोपान्तं शङ्कितां विजने स्थिताम् ॥ ८३ ॥
तया लिखितमालोक्य सा लतान्तरिता प्रियम् ।
मुक्तकेतुं परिज्ञाय स्वैरं साध्वित्यभाषत ॥ ८४ ॥
ततः सखी स्मितमुखी रहः प्राह मनोहरा ।
लज्जानताननाम्भोजां मीलितार्धविलोचनाम् ॥ ८५ ॥
अभिलाषोऽयमुचितो न ते लज्जाकरः सखि ।
मनो विधत्ते कमला नान्यत्र पुरुषोत्तमात् ॥ ८६ ॥
समाश्वसिहि गच्छामि व्योम्ना द्रष्टुं तव प्रियम् ।
मन्ये त्वद्विरहायासात्सोऽपि न स्वस्थविग्रहः ॥ ८७ ॥
इत्युक्त्वा सा विमानेन गत्वा चन्द्रावलं पुरम् ।
मुक्तकेतुं निजोद्याने ददर्श मदनातुरम् ॥ ८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुहृदा संयताख्येन तुषारकणवर्षिणा ।
आश्वास्यमानं प्रत्यग्ररम्भापल्लवशायिनम् ॥ ८९ ॥
मुहुः पद्मावतीमेव विलपन्तमुपेत्य तम् ।
सखी विरहवृत्तान्तं सा तस्मै तन्व्यवेदयत् ॥ ९० ॥
सहसामृतवर्षेण प्लाव्यमान इवाथ सः ।
तया तदुपदिष्टेन प्रययौ हिमवत्तटीम् ॥ ९१ ॥
तत्रोपवनपर्यन्ते सिद्धर्षिगणसेविते ।
गौरीमिवेश्वरप्राप्त्यै बद्धध्यानां ददर्श ताम् ॥ ९२ ॥
प्राप्य पद्मावतीं कान्तां स तां मन्मथतापिताम् ।
स्मरहर्षरसाकृष्टस्तपोवनमुपाविशत् ॥ ९३ ॥
समुल्लङ्घ्याश्रमद्वारं प्रयातं वल्लभान्तिकम् ।
मुनिर्दृढव्रतो दृष्ट्वा भुवं गच्छेत्यथाशपत् ॥ ९४ ॥
दैवादमृतमासाद्य भग्नं मत्वेव भाजनम् ।
स शापदुःखात्प्रययौ शरणं तद्गुरुं मुनिम् ॥ ९५ ॥
स तं कुलपतिः प्राह वत्स मा दुःखितो भव ।
अवश्यंभाविनो भावा न भूत्वा यान्ति संक्षयम् ॥ ९६ ॥
पुरा देवासुररणे मोहनास्त्रे त्वयेरिते ।
अभूतां दानवपुरे वियुक्तौ किल दम्पती ॥ ९७ ॥
कान्तावियोगस्तच्छापादयं ते समुपस्थितः ।
अयं तु मुनिशापस्ते प्रयातः पुनरुक्तिताम् ॥ ९८ ॥
असावल्पापराधेऽपि पृथुकोपो दुराशयः ।
दृढव्रतस्ते मर्त्यस्य यातु वाहनपक्षिताम् ॥ ९९ ॥
इति श्रुत्वा मुनिवचो मुक्तकेतुरगाद्द्रुतम् ।
चन्द्रचूडसमादिष्टं गणं प्राप्यानुगं क्षणात् ॥ १०० ॥

इति मुक्तकेतुशापः ॥ ३ ॥

ततो देवसभाभिख्ये पुरे सुरपुरोपमे ।
मेरुध्वजस्य नृपतेः स श्रीमान्प्राप्य पुत्रताम् ॥ १०१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुक्तध्वज इति ख्यातः सोऽभूद्विक्रमभूषणः ।
गणपध्वज इत्यासीद्गणस्तस्यैव चानुजः ॥ १०२ ॥
मुक्तध्वजोऽथ कालेन तं खगं प्राप्य वाहनम् ।
मुनीन्द्रयज्ञरक्षार्थे ययौ धन्वी पितुर्गृहात् ॥ १०३ ॥
सानुगोऽसौ मुनिमखे धत्ते दानवमण्डलम् ।
जघान घननिर्घोषैरस्त्रैरस्त्रविदां वरः ॥ १०४ ॥
दग्ध्वा पाशुपतास्त्रेण निखिलं दैत्यकाननम् ।
सानुजो राजतनयो जेतुं पातालमाविशत् ॥ १०५ ॥
विलोक्य मालिनां तत्र जित्वा पातालवासिनम् ।
प्रददौ तत्सुतां कान्तां तस्मै मुक्तध्वजस्ततः ॥ १०६ ॥
अथ प्रणम्य श्रीकण्ठं प्रहृष्टो हाटकेश्वरम् ।
पूर्वाभ्याससमादिष्टां प्रययौ हिमवत्तटीम् ॥ १०७ ॥
तत्र जातिं निजां स्मृत्वा मुक्तकेतुतनुं ततः ।
प्रियां पद्मावतीं प्राप्य स्वप्ने शर्वेण सूचिताम् ॥ १०८ ॥
सापि स्वप्ने समादिष्टं पार्वतीपतिना वरम् ।
पार्वती विरहक्षामा सिक्तेवासीत्सुधारसैः ॥ १०९ ॥
गणे जाते तु कालेन शांकरं तत्पदं निजम् ।
मुक्तकेतुरभूत्कान्तासंभोगासक्तमानसः ॥ ११० ॥
संभोगाविधवां राजंस्तामादाय सुलोचनाम् ।
ययौ व्योम्ना विमानेन स सुरैरभिनन्दितः ॥ १११ ॥
चन्द्रावलपुरं गत्वा चन्द्रकेतुं प्रणम्य सः ।
जनकं विजये भेजे विद्याभृच्चक्रवर्तिताम् ॥ ११२ ॥
इति विद्याधरेन्द्रेण सा गन्धर्वनृपात्मजा ।
वियोगाब्धिं समुत्तीर्य प्राप्ता पद्मावती प्रिया ॥ ११३ ॥
अचिरात्त्वमपि प्राप्य प्रियां मदनमञ्जुकाम् ।
विधातुरानुकूल्येन देव निर्वृतिमाप्स्यसि ॥ ११४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्याकर्ण्य सुहृद्वचः प्रियतमासंप्राप्तिचिन्तापरः
केयूरार्पितकङ्कणः शिखिसखैर्निःश्वासवातैर्मुहुः ।
म्लानिं हारलतां नयन्दिनशशिच्यापाण्डुगण्डस्थल-
स्तस्थौ बालमृणालपल्लवमये श्रीवत्सराजात्मजः ॥ ११५ ॥

इति क्षेमेन्द्रविरचितायां बृहत्कथायां पद्मावती नाम द्वादशो लम्बकः ।

पञ्चलम्बकः ।

वल्गत्कालीकटाक्षावलिकलित इव स्फारहाराहिराज-
स्फूर्जद्दंष्ट्राग्रधूमभ्रममलिन इव त्र्यम्बकस्याशु कण्ठः ।
भूत्यै वः क्षिप्तकर्णं प्रणयिकरधृतः केकिपिच्छाभिरामै-
र्गौरी लीलाकिराती भवति पुनरिव प्रेषिभिर्यन्मयूखैः[1] ॥ १ ॥

अत्रान्तरे क्वापि यातं पुनः प्राप्तमथात्मजम् ।
दृष्ट्वा लेभे रतिं वीरो वत्सराजः प्रियासखः ॥ २ ॥
तं वल्लभावियोगार्तं ज्ञात्वा वत्सनरेश्वरः ।
बभूव सह देवीभ्यां शोकपावकमूर्च्छितः ॥ ३ ॥
तदा रुमण्वानवदत्कुपितः पृतनापतिम् ।
युष्माभिर्बान्धवैः किं मे रक्षितं नृपतेरिति ॥ ४ ॥
सोऽब्रवीद्देव सर्वत्र नास्माभिरनधिष्ठितम् ।
प्राकारगोपुरादालं कृतमव्यग्रमानसैः ॥ ५ ॥
वयं कस्य वराकस्य लोके परिभवास्पदम् ।
भवत्प्रतापसिन्दूररक्षातिलकमुद्रिताः ॥ ६ ॥
किं तु न प्रभवामोऽत्र देव व्योमविहारिणाम् ।
विद्याधराणां तैर्मन्ये कृतः कार्येषु विप्लवः ॥ ७ ॥
अथ वा राजपुत्रेण गोत्रस्खलनकोपिता ।
स्थिता मानवती क्वापि छन्ना मदनमञ्चुका ॥ ८ ॥

---

1. 'प्रेङ्खिभिर्य–' इति भवेत्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टावक्रस्य तनयां सावित्रीमङ्गिराः पुरा ।
धर्मपत्नीमवाप्यासीद्गृहाश्रमसुखस्थितिः ॥ ९ ॥
ध्यानस्थितं कदाचित्तं सा दृष्ट्वा दयितं प्रिया ।
अन्यां चिन्तयसीत्युक्त्वा ययौ कोपपराङ्मुखी ॥ १० ॥
सा गत्वा काननोपान्तं पाशं कण्ठे निवेशयत् ।
प्राणास्तृणं हि नारीणां प्रियप्रणयतानवे ॥ ११ ॥
सविश्र्या सा ततोऽभ्येत्य देव्या दिव्यशरीरया ।
सावित्री रक्षिता पाशादितीर्ष्याकलुषाः स्त्रियः ॥ १२ ॥

इति सावित्र्याख्यायिका ॥ १ ॥

इति सेनापतिवचः श्रुत्वा वत्सनरेश्वरः ।
यौगंधरायणसखो बभूव ध्याननिश्चलः ॥ १३ ॥
नरवाहनदत्तोऽपि प्रियाविरहमोहितः ।
नोद्यानेषु न वापीषु न हर्म्येष्वाययौ रतिम् ॥ १४ ॥
दोलासु चित्रशालासु वासवेश्मसु कानने ।
न बबन्ध धृतिं वीरः कः स्वस्थो विप्रिये विधौ ॥ १५ ॥
गुरुलज्जाङ्कुशस्त्वेवं मित्रेणाश्वासितस्य च ।
पुटपाक इवासक्तस्तस्याभूच्छोकपावकः ॥ १६ ॥
स प्रविश्य पुरोद्यानं विमाने सुरभिण्यपि ।
शुशोच तत्कुचापीडफुल्लां कुरुबकावलीम् ॥ १७ ॥
दयितामधुगण्डूषचरणाघातपुष्पितौ ।
अशोकबकुलौ दृष्ट्वा प्रियाकेलिशिखण्डिनम् ॥ १८ ॥
बर्हीं बिभर्ति यस्तस्याः कटाक्षपटलीमिव ।
न हि तं फुल्लकमलं पूर्णचन्द्रां न वा निशाम् ।
स सेहे चन्द्रवदनावदनध्यानतत्परः ॥ १९ ॥
सरोजनयनां वापीं रथाङ्गपुलकस्तनीम् ।
हंसालीरसनां वीक्ष्य शुशोच स्मृतवल्लभः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोमुखाङ्कनिषण्णाङ्गं प्रियाविरहमोहितम् ।
उद्यानमलिनीतीरमरुतस्तं सिषेविरे ॥ २१ ॥
मरुभूतिरथाभ्येत्य दन्तांशुनिवहैः सुधाम् ।
विकिरन्निव तं प्राह हर्षव्याकोशलोचनः ॥ २२ ॥
दिष्ट्या विवर्धसे देव दृष्टा मदनमञ्चुका ।
इयमास्ते सुवदना रक्ताशोकतरोरधः ॥ २३ ॥
श्रुत्वेति सहसोत्थाय प्रहृष्टो नरवाहनः ।
न सत्यं दर्शय क्वासावित्याहोत्कण्ठिताशयः ॥ २४ ॥
मन्यमानस्ततः स्वप्नं गत्वा तद्दिष्टवर्त्मना ।
स ददर्श प्रियां स्फारनेत्रपात्रं पिबन्निव ॥ २५ ॥
किमेतदिति सानन्दं पृष्टा तेन सुमध्यमा ।
साब्रवीन्नवलावण्यैः पूरयन्ती दिगन्तरम् ॥ २६ ॥
पुरा त्वत्संगमोपाये यक्षः संतोषितो मया ।
पूजावलिप्रदानेन पानं तस्मै तु नार्पितम् ॥ २७ ॥
तस्मादयं वियोगोऽभूदावयोः क्षपितश्च सः ।
इत्याह कृतकाकारतुल्या मदनमञ्चुका ॥ २८ ॥
स तु प्रियक्षुषां ज्ञात्वा लब्धां वत्सनरेश्वरः ।
कौशाम्बीमुत्सवस्मेरसिन्दूरारुणितां व्यधात् ॥ २९ ॥
पुनर्विघ्नविनाशाय कल्पितोद्वाहमङ्गलम् ।
कूटविद्याधरी तस्थौ नरवाहनकामिनी ॥ ३० ॥
ततस्तद्वदनामोदसुगन्धमधुनिर्वृतः ।
ययौ वत्सेश्वरसुतः सेव्यमानः सुहृज्जनैः ।
यत्नात्स दयितां मेने स्पर्शे मदनमञ्चुकाम् ॥ ३१ ॥
निद्रानिमीलितदृशो वदनं मम वल्लभ ।
न द्रष्टव्यं त्वयेत्याह सा न हारादिव प्रियम् ॥ ३२ ॥
ततः सुरतसंमर्दे गाढनिद्रां सकौतुकः ।
ददर्शांशुकमुद्घाट्य तां विनिद्रो नृपात्मजः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्मितामिव लावण्यैः कल्पितामिव यौवनैः ।
निष्पन्नामिव पीयूषैर्वीक्ष्यैतां निश्चलोऽभवत् ॥ ३४ ॥
अमानुषोचितस्फारं प्रभाभरितमाननम् ।
स तस्या हेमकमलच्छायं दृष्ट्वा स्मयं ययौ ॥ ३५ ॥
अहो दिव्यवधूः कान्ता केयमानन्दकौमुदी ।
बिभर्ति मत्प्रियारूपमिति स्वैरं विचिन्तयत् ॥ ३६ ॥
क्व सा प्रियेति दुःखार्तो निर्विशेषेऽतिविस्मितः ।
दिव्येति धन्यतामानी सोऽभूद्दोलाचलाशयः ॥ ३७ ॥
तत्कान्तिपानहृष्टोऽपि विना मदनमञ्जुकाम् ।
सद्यस्तत्याज स धृतिं प्रेमबन्धो हि रम्यता ॥ ३८ ॥
सहसा प्रतिबुद्धाथ पादसंवाहनोद्यतम् ।
तमालोक्य तु सा प्राह हृष्टा विनयशालिनी ॥ ३९ ॥
अस्ति विद्याधराधीशो यशस्वी वेगवानिति ।
यस्याषाढपुरे रम्या राजधानी मनोजवा ॥ ४० ॥
तस्या मानसवेगाख्यः पुत्रो बलवतां वरः ।
सुता वेगवती चाहं त्वन्मुखेन्दुचकोरिका ॥ ४१ ॥
स कदाचिन्निजयशःशुभ्रं पलितमात्मनः ।
दृष्ट्वाभिषिच्य तनयं विरक्तोऽभूद्वने मुनिः ॥ ४२ ॥
याचितोऽपि मया भ्राता कुलविद्यापदस्थितिम् ।
मात्सर्यान्न ददौ लुब्धो न हि स्वजनवत्सलः ॥ ४३ ॥
ततस्तपोवनस्थस्य गत्वाहं पितुराश्रमम् ।
स्थिता सपर्यासंतोषप्रसादितमुनीश्वरी ॥ ४४ ॥
तत्र केलिकलालोला कदाचिन्मत्तबर्हिणम् ।
अङ्गहाराभिधं बाला करतालैरनर्तयम् ॥ ४५ ॥
नृत्यतस्तस्य विबभौ कलापो विविधच्छविः ।
व्योमयानादिव गतः शक्रचापः सहस्रधा ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहुरूपं विधायाशु मणिमान्नाम राक्षसः।
जहार मां ततस्तस्मै चुकोप मुनिमण्डलः॥ ४७॥
स मां विमुच्य प्रोवाच मुनिक्रोधावधिर्मम।
कौबेरोऽयं गतः शापो निगद्येति दिवं ययौ॥ ४८॥
ततोऽहमपि कालेन तुष्टस्य पितुराज्ञया।
अवापमखिला विद्यास्तत्प्रभावाधिकप्रभाः॥ ४९॥
अत्रान्तरे स्मरोन्मत्तो विप्रलोक्य विशृङ्खलः।
जहार तव मद्भ्राता प्रियां मदनमञ्जुकाम्॥ ५०॥
अलक्षितस्तामादाय निर्मर्यादः पतिव्रताम्।
अयाचत रतिं पापः शप्तः स्वर्गाङ्गनामिव॥ ५१॥
दशास्यस्येव शापोऽस्ति तस्याप्यन्यवधूरते।
पावयैनामिति स्वैरं मामलज्जस्ततोऽवदत्॥ ५२॥
तूर्णं मानसवेगेन प्रेरिताहं तव प्रियाम्।
अवदं मानुषी किं त्वं शक्रतुल्ये निरादरा॥ ५३॥
श्रीमान्मानसवेगोऽयं कस्या न नयनप्रियः।
का हि दैवविपर्यस्ता मधुरं वेत्ति नामृतम्॥ ५४॥
इति मद्वचनं श्रुत्वा साध्वी मदनमञ्जुका।
निःश्वस्य साश्रुनयना मत्पुरस्त्वद्यशोऽभ्यधात्॥ ५५॥
श्रुत्वैव त्वद्गतमतिस्ततोऽहमभवं विभो।
मनोभवभुजङ्गो हि यत्सत्यं श्रुतिलोचनः॥ ५६॥
गौरीवरो ममाभूच्च यस्य नाम्नि श्रुतिं गते।
वशमेष्यसि कामस्य स ते भर्ता भविष्यति॥ ५७॥
ततस्तां स्वैरमामन्त्र्य बद्धवेणीं पतिव्रताम्।
त्वामागतासि तद्रूपा प्राप्तुं परिणयश्रियम्॥ ५८॥
पूर्णश्च मम संकल्पः प्रमाणमधुना भवान्।

---

१. 'वलिति' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

.... ।
...........................एवं द्रष्टुं मदनमञ्चुकाम् ॥ ५९ ॥

इति वेगवतीप्राप्तिः ॥ २ ॥

इति तद्वचसा व्योमयानारूढो नृपात्मजः ।
ददर्श कुलशैलेन्द्रान्बलाकानिव भूतले ॥ ६० ॥
जलपात्रमिवाम्भोधिं नदीं शतपदीमिव ।
पश्यन्समीरणपथा स ययौ दयिताङ्गगः ॥ ६१ ॥
क्षणं वेगवतीवक्त्रशशाङ्कोद्भासितं नभः ।
वभूवामृतकल्लोलक्षाल्यमानमिवाभितः ॥ ६२ ॥
कुटिलावर्तविधुरं राजसूनोः सितांशुकम् ।
कर्पूरकर्णपूरत्वमगमद्गगनश्रियः ॥ ६३ ॥
तस्य सूर्यकरोच्चण्डकुण्डलाताण्डवैर्बभौ ।
आखण्डलधनुर्दण्डमण्डितेवाभ्रमण्डली ॥ ६४ ॥
वेगाद्गतिविलोलेन तस्या हारेण हारिणा ।
रराजोद्दण्डडिण्डीरपाण्डुराब्धिनिभं नभः ॥ ६५ ॥
अत्रान्तरे नरपतेः सहसान्तःपुरोदरे ।
उदतिष्ठद्गते तस्मिन्करुणो रोदनध्वनिः ॥ ६६ ॥
प्रियासखः क यातो मे पुत्रको नरवाहनः ।
सा गत्वा तं समुद्रस्य तीरे कनकपर्वते ॥ ६७ ॥
नीत्वास्थाप्य पुरं याता द्रष्टुं मदनमञ्चुकाम् ।
तत्र विद्याधरपतिं सा तमन्धगृहेऽक्षिपत् ॥ ६८ ॥
वीणादत्ताभिधानोऽथ श्रीमान्दिव्यकुमारकः ।
तमुज्जहार सख्येन कुलं सुकृतवानिव ॥ ६९ ॥
कथितान्वयनामानं नरवाहनमाह सः ।
इह सागरदत्ताख्यो गन्धर्वाधिपतेः पतिः ॥ ७० ॥
गन्धर्वदत्ता तस्यास्ति पुत्री तस्या मृगीदृशः ।
विष्णुगीतिकृतज्ञाय देयाहमिति निश्चयम् ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वयं तच्च न विद्मेह गीताभ्यासपरायणाः ।
निःशब्दजनसंचारे वल्लकीपाणयः स्थिताः ॥ ७२ ॥
श्रुत्वेति गीतिकाभिज्ञं सत्यमसीतिवादिनम् ।
वीणादत्तो निनायाशु तत्पुरं नरवाहनम् ॥ ७३ ॥
तत्र गन्धर्वराजस्य सभायामभिपूजितः ।
शुश्राव वीणां तत्पुत्र्याः सारमञ्जुलमूर्च्छनाम् ॥ ७४ ॥
केशांशमिश्रया तन्त्र्या श्रुत्यंशो विस्तरीकृतः ।
इत्युक्त्वा राजपुत्रस्तां स्वयं जग्राह वल्लकीम् ॥ ७५ ॥
वालक्लेशं विचार्यासौ गायन्वैष्णवगीतकम् ।
वीणास्वनस्य वाद्येन गन्धर्वा विस्मयं ययुः ॥ ७६ ॥
प्रतिज्ञापाठमुच्चार्य वरपुत्रीं वरे स्थिताम् ।
ततो गन्धर्वदत्तां स ददर्श वरवर्णिनीम् ॥ ७७ ॥
दृशा कुवलयाकीर्णां त्विषा शशिसमाकुलाम् ।
भ्रुवा स्मरधनुर्व्यासं विदधानामिवाखिलाम् ॥ ७८ ॥
पित्रार्पितां तां लावण्यनलिनीं नरवाहनः ।
प्राप्य फुल्लोत्पलदृशं विजहार स्मराकृतिः ॥ ७९ ॥

इति गन्धर्वदत्ताप्राप्तिः ॥ ३ ॥

ततः कदाचिद्गन्धर्ववरोद्यानस्थितं दिवः ।
विद्याधरी समभ्येत्य प्राह तं कन्यकानुगा ॥ ८० ॥
पुत्री ममेयं विद्यानां धाम नाम्नाजिनावती ।
विद्याधरपतेश्चण्डसिंहस्य कुलभूषणम् ॥ ८१ ॥
असंशयं त्वया भाव्यं विद्याभृच्चक्रवर्तिना ।
तद्देया सुन्दरी तुभ्यमेतामर्हति नापरः ॥ ८२ ॥
इह स्थितिर्न युक्ता ते मायिनो गुलिकाधराः ।
अवन्तिनगरीमेहीत्युक्त्वा तमनयत्क्षणात् ॥ ८३ ॥
राजा प्रसेनजित्तत्र तं वरोद्यानचारिणम् ।
दृष्ट्वा ज्ञातान्वयायास्मै हृष्टः स्वतनयां ददौ ॥ ८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भगीरथयशां नाम तां प्राप्य नरवाहनः ।
न पूर्वपरिणीतानां सस्मार सुहृदो न वा ॥ ८५ ॥
विशाललोचनदलं सुगन्धिसरकेसरम् ।
पिबतस्तन्मुखाम्भोजं भृङ्गता तस्य काप्यभूत् ॥ ८६ ॥

इति भगीरथयशःप्राप्तिकथा ॥ ४ ॥

याते संध्यासखे क्वापि कदाचिदथ भास्करे ।
निमीलति जगत्पद्मे विशाला""शलासिनी ॥ ८७ ॥
संकुचन्नलिनीखण्डसमुत्थैरलिमण्डलैः ।
मण्डितेष्वथ लोकेषु तिमिरच्छद्मना निशि ॥ ८८ ॥
ज्योत्स्नामृतनदीधौतव्योम्नि कान्तितरङ्गिणीम् ।
पाञ्चजन्यांशुविशदे मुरारेरिव वक्षसि ॥ ८९ ॥
कान्तास्मितैरिव स्नातैर्यशोभिरिव मार्जितैः ।
आनन्दैरिव संसिक्तैर्जातैर्जगति सर्वतः ॥ ९० ॥
सौधे भगीरथयशागाढालिङ्गननिर्वृतः ।
सुष्वाप पृथुमाणिक्यपर्यङ्के नरवाहनः ॥ ९१ ॥
ततः प्रभावती नाम तं विद्याधरसुन्दरी ।
हा दुःखं दुःखमित्युक्त्वा ससंभ्रममबोधयत् ॥ ९२ ॥
प्रतिबुद्धोऽथ ललनावदनं मदनोपमः ।
शरीररहितं ज्ञात्वा गवाक्षेण ददर्श सः ॥ ९३ ॥
तं दृष्ट्वा विस्मितोऽत्यन्तं राजपुत्रो व्यचिन्तयत् ।
अहो लोलालकमिदं पतितं ललनाननम् ॥ ९४ ॥
अथ विस्मयमापन्नोऽचिन्तयत्प्रयतः पुरा ।
वातापिदानवपतिश्चचारैको वनान्तरे ॥ ९५ ॥
अलक्तकारुणं पादं स ददर्श सनूपुरम् ।
शेषाङ्गहरितं तं च दृष्ट्वाभूद्विस्मयाद्यसुः ॥ ९६ ॥
हर्षशोकाद्भुतस्तस्मात्सहसान्तः समुत्थिताः ।
सर्वेन्द्रियनिरोधेन संत्यजन्त्येव जीवितम् ॥ ९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिन्तयित्वेति वत्सेशतनयस्तां निरीक्षितुम् ।
निर्ययौ सा च सहसा बभूवाकारसंयुता ॥ ९८ ॥
सा दुःखकारणं पृष्टा राजपुत्रेण सुन्दरी ।
प्राह गान्धारनाम्नोऽहं विद्याधरपतेः सुता ॥ ९९ ॥
गङ्गाधरे जनपदे तत्पुरी पुष्करावती ।
साहं प्रभावती तुभ्यं धात्रा दिष्टा त्वयि प्रिया ॥ १०० ॥
पूर्वभार्यां परित्यज्य कान्तां मदनमञ्चुकाम् ।
तां च वेगवतीं बालां त्वमन्यललनारतः ॥ १०१ ॥
दुःखकारणमेतन्मे श्रुत्वेति नरवाहनः ।
प्रियां स्मृत्वा शुचं लज्जामुत्कण्ठां च समं ययौ ॥ १०२ ॥
दीपप्रदक्षिणव्याजात्तेनोद्वाहं विधाय सा ।
तं निनाय वधूं द्रष्टुं रुद्धां मदनमञ्चुकाम् ॥ १०३ ॥
गच्छन्गगनमार्गेण दृष्ट्वा दिव्यनदीतटम् ।
प्रौढां नितम्बविपुलां प्राह तां नरवाहनः ॥ १०४ ॥
प्रभावति प्रियतमे हेमवल्लीनिकुञ्जके ।
अस्मिन्वरसरस्तीरे रन्तुं त्वामीहते मनः ॥ १०५ ॥
प्रभावती निशम्येति वल्लभं प्राह सस्मिता ।
न संप्रति रतक्रीडां भजे लज्जावती त्वया ॥ १०६ ॥
स्मृतं मयाब्रवीद्यन्मां सखी मदनमञ्चुका ।
मदर्थं राजपुत्रं चेदानेतुं यासि सुन्दरि ।
न तत्कार्यं स्मरवशाद्वेगवत्या यथा कृतम् ॥ १०७ ॥
इति सख्यं मृषा कापि कृतवत्यस्मि चापलम् ।
गुप्तं तदधुना सेव्यं जानीते न यथा सखी ॥ १०८ ॥
ज्ञात्वान्यकान्तासक्तं त्वां कदाचिज्जीवितं सती ।
जहाति विषमः स्त्रीणामीर्ष्याविषकृतो ज्वरः ॥ १०९ ॥
पुरान्यनरसंसक्ता चण्डी प्रच्छन्नकामिनी ।
निर्गताभ्येत्य सततं ददौ पुत्राय मोदकम् ॥ ११० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदाचिदथ सा गत्वा रिक्तहस्तागता गृहम् ।
पुत्रेण याचिता प्राह सदा मे मोदकः कुतः ॥ १११ ॥
इदानीमत्र भुक्तोऽसि नासन्नो मोदकः कुतः ।
श्रुत्वेति बालस्तत्याज जीवितं त्रुटिताशयः ॥ ११२ ॥
सहसा प्रियविच्छेदं वज्रपातं सहेत कः ।
त्वत्सङ्गात्कुप्यति व्यक्तं मह्यं मदनमञ्जुका ॥ ११३ ॥
इति प्रभावतीवाक्यं श्रुत्वा वत्सेश्वरात्मजः ।
अवापदाषाढपुरे गूढां मदनमञ्जुकाम् ॥ ११४ ॥
विशालविरहक्षामां पाण्डुगण्डां श्लथालकाम् ।
तां रूक्षवेणीमालोक्य जानकीमिव राघवः ॥ ११५ ॥
भेजे त्वरां च हर्षं च संभ्रमं च व्यथां तथा ।
दैन्यं क्रोधं च शोकं च लज्जां च नरवाहनः ॥ ११६ ॥
प्रभावत्याः प्रभावेण तद्रूपच्छन्नविग्रहः ।
विजहार ततः कान्तारतिसंभोगलालसः ॥ ११७ ॥
कण्ठावलम्बितं दृष्ट्वा चिरात्प्रियतमं सती ।
सद्यः सिक्तेव पीयूषैरभून्मदनमञ्जुका ॥ ११८ ॥
ततो मासद्वये जाते विज्ञायान्तःपुराश्रयैः ।
क्रुद्धो मानसवेगस्तमाययौ युद्धदुर्मदः ॥ ११९ ॥
राजपुत्रोऽपि तं लब्धानालब्धुं गुलिकाधरान् ।
हत्वा तत्खड्गमादाय तस्थौ समरसंमुखः ॥ १२० ॥
बाणासुरमिव क्रुद्धं ज्ञात्वा विद्याधरेश्वरम् ।
माता तं प्राह रक्ष्योऽयं प्राद्युम्निरिव धैर्यभूः ॥ १२१ ॥
वेगवत्याः पतिरसौ स्वसुस्तव नृपात्मज ।
जामाता तव धर्मेण रक्षणीयः प्रयत्नतः ॥ १२२ ॥
त्वत्सभायां विचारोऽद्य क्रियतां साधुसंसदि ।
वधो न शस्यते राजन्नपर्यालोचितागसः ॥ १२३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातुः पृथिव्याः श्रुत्वेति तथेत्युक्त्वा समाययौ ।
बद्ध्वा राजसुतं यत्नान्निनाय स्वसभास्थलम् ॥ १२४ ॥
तत्र वायुपथाभिख्यः कुलवृद्धः सभापतिः ।
त्राये मानसवेगं तं तां च पप्रच्छ धर्मवित् ॥ १२५ ॥
भगिनी दूषितानेन ममेत्याह स मानसः ।
विक्रीत इव मौनं स चक्रे वत्सेश्वरात्मजः ॥ १२६ ॥
वदैनं मूकतां प्राप्तं प्राह धीमान्सभापतिः ।
अहो विषादमौनं ते ह्यपराजयसिद्धये ॥ १२७ ॥
मौनं वादे क्षमां शक्तौ याच्ञां लुब्धे मदं गुरौः[1] ।
लज्जां च व्यवहारेषु न शंसन्ति विपश्चितः ॥ १२८ ॥
श्रुत्वेति राजतनयः प्रोवाच गतसंभ्रमः ।
सतां सुखे च दुःखे च समानो धैर्यविक्रमः ॥ १२९ ॥
विभान्ति ये सदा न्यायैः सभा भाति च सज्जनैः ।
ते धर्मेण प्रकाशन्ते न सोऽस्तीह किमुच्यते ॥ १३० ॥
मया मानसवेगस्य विवादोऽयमुपस्थितः ।
आसनस्थो ममाग्रे च संयतो माययान्वहम् ॥ १३१ ॥
अर्थिनोः समता यत्र तत्र न्यायो विवेच्यते ।
प्राप्तौ विवादपदवीं समौ सामान्यभूमिपौ ॥ १३२ ॥
उपपन्नमिति श्रुत्वा तथेत्याह सभापतिः ।
इति राजसुतस्योक्त्या जितो विद्याधरात्मजः ।
स तैर्निवार्यमाणोऽपि हन्तुमैच्छन्नृपात्मजम् ॥ १३३ ॥
ततः सभापतिः क्रुद्धो विद्याभिरवधूय तान् ।
निजसेनां समाहूय ररक्ष नरवाहनम् ॥ १३४ ॥
विद्याभृतां कुले देवो मामवाद्यः कपालभृत् ।
तद्रूपेण प्रभावत्या रक्षितः सोऽभवत्सुखी ॥ १३५ ॥

१. 'पुरेषः'.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः क्षणात्प्रभावत्या रक्षायै सानुरागया ।
ऋ[1]ष्यमूकगिरेः सानौ न्यस्तः सिद्धतपोवने ॥ १३६ ॥
तत्र बाहुलताजालश्यामले काननस्थले ।
विजहार तया स्वैरं लीलासुरतलालसः ॥ १३७ ॥
ततः पम्पाभिधं प्राप्य सरो रामेण यत्र ताः ।
निःश्वासग्लपिताब्जेन क्षपिता विरहक्षपाः ॥ १३८ ॥
साधुचित्तमिव स्वच्छं परार्थमिव शीतलम् ।
उन्मत्तमिव सावेगं शृङ्गारिणमिवोज्ज्वलम् ॥ १३९ ॥
चन्द्रस्येव निजावासं स्फटिकाद्रेरिवाशयम् ।
सुधाम्बुधेरिवापत्यं गगनस्येव दर्पणम् ॥ १४० ॥
अप्सरःकेशकुसुमैः किन्नरीकुचकुङ्कुमैः ।
नागतिलककर्पूरैः सूचितस्नानविभ्रमम् ॥ १४१ ॥
भिन्नाञ्जनकणश्यामैर्भ्रमरैर्बद्धमण्डलम् ।
चक्रवाककुलोत्सृष्टरामशापाक्षरैरिव ॥ १४२ ॥
कृतावगाहमाकुम्भं विन्ध्यकुञ्जरयूथपैः ।
आश्रितं सागरधिया वज्रभीतैरिवाद्रिभिः ॥ १४३ ॥
तीरोपान्तलतालास्यगुरुभिः कमलानिलैः ।
अपि दिग्गजगण्डेभ्यः सुहृत्सेवकषट्पदम् ॥ १४४ ॥
रतिमानिव पुष्पेषुः स तद्वीक्ष्य प्रियासखः ।
जहर्ष गुणसङ्गेन को हि नाम न तुष्यति ॥ १४५ ॥
ततः प्रभावती प्राह निर्वर्ण्य सरसः श्रियम् ।
ऋष्यमूकतटोपान्ते कान्तसंतोषिताशया ॥ १४६ ॥
इह वानरराजेन हत्वा दुन्दुभिदानवम् ।
सुग्रीवो वालिनो भ्राता चिरं तस्थौ विवासितः ॥ १४७ ॥
एते सप्त महाताला विद्धा रामेण पत्रिणा ।
यैर्नीतं यद्यशः सप्तलोककर्णावतंसताम् ॥ १४८ ॥

---

१. 'कृष्य' इति क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यादि रामसंवद्धं कथयित्वा प्रभावती ।
ललास सह कान्तेन विलासरतिलालसा ॥ १४९ ॥

इति प्रभावतीप्राप्तिकथा ॥ ५ ॥

अथादृश्यत वक्रेन्दुकान्तिक्षालितदिङ्मुखा ।
धनवत्या समं मात्रा चारुनेत्राजिनावती ॥ १५० ॥
तत्संभोगसुखासक्तं राजपुत्रमभाषत ।
तन्माता नेह ते युक्तं स्थातुं वहुरिपोरिति ॥ १५१ ॥
ततस्तद्विद्यया तूर्णं कौशाम्बीं नरवाहनः ।
विद्याधरीभ्यां सहितः प्राप धीमानिव प्रियम् ॥ १५२ ॥
वयस्यैः संगतस्तत्र प्रहृष्टैर्गोमुखादिभिः ।
विवाहे सहसा यातां लेभे वेगवतीमपि ॥ १५३ ॥
विद्याधरीवृतं पुत्रं प्राप्तं वत्सनरेश्वरः ।
ज्ञात्वा ननन्द देवीभ्यां सामात्यो विहितोत्सवः ॥ १५४ ॥

इत्यजिनावतीप्राप्तिकथा ॥ ६ ॥

अथाजग्मुश्चमूचन्द्रप्रभामण्डलमण्डिताः ।
विद्याधराधिपा व्योम्नि वेगताण्डविकुण्डलाः ॥ १५५ ॥
श्वशुरास्तद्वयस्याश्च द्रष्टुं वत्सनरेश्वरम् ।
हृष्टाः सभामाविविशुः पूजिता जगतीभुजा ॥ १५६ ॥
रत्नासनेषूपविष्टा विवर्णास्ते प्रभाजुषः ।
सुमेरुशिखरारूढास्त्रिदशा इव संगताः ॥ १५७ ॥
वीरोऽमितगतिः श्रीमान्सदा वायुपथाभिधः ।
तथा पिङ्गलगान्धारश्चण्डसिंहनासहस्तिणः(?) ॥ १५८ ॥
ते वत्सराजमाभाष्य कुशलं नतमौलयः ।
प्राहुर्मुखैर्वितन्वाना वहु सोमप्रभां सभाम् ॥ १५९ ॥
अयं तव सुतः श्रीमान्विजयी नरवाहनः ।
हरेण नः समादिष्टश्चक्रवर्ती भविष्यति ॥ १६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जगत्त्रयकृतास्माभिरस्य शासनमुद्रिता ।
कृते मानसवेगाच्च गौरीमुण्डाच्च दुर्भगात् ॥ १६१ ॥
वीरो विद्याविरतस्तविद्धं(?) नरवाहनः ।
नार्हति त्रिपुरारातिवरदृप्ता हि शेखराः ॥ १६२ ॥
सहास्माभिरितो गत्वा सिद्धक्षेत्रं यतव्रतः ।
सिद्धविद्यः पुरा जित्वा पुनरेष्यति ते सुतः ॥ १६३ ॥
इति तद्वचसा राज्ञा विसृष्टो नरवाहनः ।
सह तैस्तद्विमानेन सिद्धक्षेत्रं क्षणाद्ययौ ॥ १६४ ॥
मरुभूतिमुखैः सार्धं सिद्धक्षेत्रमवाप्य सः ।
तस्थौ मुनिरिवाक्षोभ्यो निस्तरङ्गोऽम्बुधिप्रभः ॥ १६५ ॥
ततश्चचाल वसुधा ववुर्वाताः शिलामुचः ।
पेतुरुल्काः सनिर्घ्वानाश्चुक्षुभुर्मकराकराः ॥ १६६ ॥
अथ चाभूद्दिवा क्षोभाद्गुहाविवरदारुणः ।
स्फुटतामिव वेणूनां घोरश्चटचटारवः ॥ १६७ ॥
ततश्चकार कल्पान्तजलदध्वानदुःसहः ।
प्रचण्डो गौरीमुण्डस्य समरारावडिण्डिमः ॥ १६८ ॥
अदृश्यत सितच्छत्रशुभ्रीकृतनभस्तलः ।
सह मानसवेगेन गौरीमुण्डो गजाग्रगः ॥ १६९ ॥
तस्य व्योम्नि विकोशासिश्यामांशुपटलीभवेत् ।
मालानीलो व्यलदलैर्विहते वरुणाश्रयः ॥ १७० ॥
तत्र विद्याधरेन्द्राणां मालारत्नांशुबिम्बिते ।
रवौ सहस्रसूर्येव बभूव नभसस्तटी ॥ १७१ ॥
तेषां गम्भीरसंरम्भं संभाव्य गतविभ्रमा ।
प्रत्यर्थ····महासेनाश्चण्डसिंहादयः स्वयम् ॥ १७२
ततस्तरणिसंपातस्फुरद्रत्नकिरीटकाः ।
द्यां विधे····सामन्ताश्चक्रुर्ज्वालाजटोत्कटाम् ॥ १७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गन्धर्वाणां सहस्रौघैर्विद्याभिर्गुलिकाभृताम्।
अभूत्प्रकटसस्फोटसंचट्टचिच्चटं नभः ॥ १७४ ॥
गौरीमुण्डस्मृता देवी गौरी हुंकारमोहितान्।
चकार चण्डसिंहाद्यान्संप्राप्तविजयानपि ॥ १७५ ॥
संक्रुद्धोऽथ समभ्येत्य गौरीमुण्डो महाजवः।
जग्राह बाहुसंग्रामसंमुखं नरवाहनम् ॥ १७६ ॥
मायायोधी(?) तमादाय संविधूय गिरेस्तटे।
चिक्षेप दूरसंतापमूर्च्छाविस्मृतसंभवम् ॥ १७७ ॥
वेगान्मानसवेगोऽपि तद्वयस्यान्दिगन्तरे।
तत्याज गोमुखमुखा························ ॥ १७८ ॥
विद्यया धनवत्या ते रक्षिता न ययुः क्षयम्।
ततस्त्र्यम्बकनिर्दिष्टो ररक्ष नरवाहनम् ॥ १७९ ॥
वीरोऽमृतप्रभो नाम वह्निशैलान्नभश्चरः।
नरवाहनदत्तोऽथ तपस्तेपे हराचले ॥ १८० ॥
पूर्वमाराध्य हेरम्बं तद्वराच्च महेश्वरम्।
गौरीं च तत्प्रसादेन विद्यां प्राप नृपात्मजः ॥ १८१ ॥
स्वयं विनिर्मितं यत्नाद्विमानं पद्मयोनिना।
सहस्रपत्र वचसा शंकरस्यारुरोह सः ॥ १८२ ॥
ततो वक्रपुरे गत्वा प्रापामितगतेः सुताम्।
सुलोचनानामत····स्तसारङ्गलोचनाम् ॥ १८३ ॥
रममाणस्तया तत्र लेभे विद्याधरेश्वरः।
प्रतीहारं स्वयं प्राप्तं सनन्दिनमिवेश्वरम् ॥ १८४ ॥
चण्डसिंहप्रभृतिभिर्दयिताभिश्च संगतः।
यदस्थानजविद्याभिर्वयस्यानानिनाय सः ॥ १८५ ॥
कृतप्रणामांस्तान्दृष्ट्वा न्यपृच्छन्नरवाहनः।
क्व युष्माभिरियान्कालः क्षपितः प्रेक्षितै रतिः ॥ १८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उवाच गोमुखः पूर्वं देव तस्मिन्महारणे ।
क्षिप्तो मानसवेगेन प्राप्तोऽहं किं वटाटवीम् ॥ १८७ ॥
तत्राहं शोकविधुरो यत्नान्मर्तुं समुद्यतः ।
आश्वासितो ब्राह्मणेन स्वामिनं द्रक्ष्यसीत्यथ ॥ १८८ ॥
नागस्वामी स मामाह पुराहं पाटलापुरे ।
अबन्धूर्जडधीर्नापि लिपिमात्रबुधोऽभवम् ॥ १८९ ॥
ततोऽहं लज्जितो भिक्षाव्रतो भस्मकपालभृत् ।
अवापं योषितादत्तं रक्ताब्जं सत्कृपावकः ॥ १९० ॥
अपरा मम तद्वीक्ष्य हस्ते प्राह सुराङ्गना ।
कया स्तोप्य····दत्त्वेदं शाकिन्या रक्तमम्बुजम् ॥ १९१ ॥
श्रुत्वेत्यहमपश्यं तं स्वकरे पौरुषं करम् ।
ततोऽहं तद्गिरा गत्वा सुरभिं शरणं गतः ॥ १९२ ॥
रक्षितो रजनीमेकां तयाहं शाकिनीभयात् ।
तद्गिरा श्रुतिसोमाख्यमाचार्यं शरणं गतः ॥ १९३ ॥
तेनापि रजनीमेकां रक्षितोऽस्मि परेऽहनि ।
विसृष्टः परिसंख्यायां प्राप्तोऽहं खेचरीगणैः ॥ १९४ ॥
ममैवायं ममैवायमिति तासां हरारवे ।
उक्तोऽस्मि पतितो दैवादायुःशेषेऽथ चापरम् ॥ १९५ ॥
ततो निशि च यक्षिण्या संगतः शापमुक्तया ।
कृतो निजप्रभावाद्यस्तेनाहं वेद्म्यनागतम् ॥ १९६ ॥
प्रभुस्तवेश्वरवरान्प्राप्तवान्नरवाहनः ।
न क्षराद्रक्षति च स मामुवाचेति सोऽग्रजः ॥ १९७ ॥
ततोऽहं तदनुज्ञातो विद्यया दिव्यरूपया ।
त्वत्पादमूलमानीतो धन्योऽस्मि सफलः क्षणः ॥ १९८ ॥

इति गोमुखकथा ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोमुखेनेति कथितं मरुभूतिर्[1]मभाषत ।
अस्म्यहं पातितस्तेन मूर्च्छितः शून्यकानने ॥ १९९ ॥
सरितः शीतलाख्यायास्ततस्तीरे महामुनिम् ।
अपश्यं तेन चा[2]स्म्युक्तः शुभं ते न चिरादिति ॥ २०० ॥
ततस्तत्तटिनीस्नाताः पीनोन्नतपयोधराः ।
कान्ता दृष्ट्वा मया पृष्टः प्रोवाच क्षुभितो मुनिः ॥ २०१ ॥
एकस्या वस्त्रममलं वीरोपान्तात्त्वमानय ।
ततो ज्ञास्यसि वृत्तान्तमिति श्रुत्वा हृतं मया ॥ २०२ ॥
यातास्वन्यासु चैवैका हेमकुम्भोपमस्तनी ।
विस्तीर्णश्रोणिपुलिना नदीव प्राह रूपिणी ॥ २०३ ॥
मम मुञ्चांशुकं क्षिप्रमहं विद्याधरी मया ।
शंभोर्वराच्चक्रवर्ती द्रष्टव्यो नरवाहनः ॥ २०४ ॥
इति श्रुत्वा प्रहृष्टोऽहं तया सुरतसंगतम् ।
तमपश्यं मुनिवरं दुर्निवारो हि मन्मथः ॥ २०५ ॥
ततो विमुच्य सा गर्भं कदलीपल्लवाङ्गना ।
मुनिं प्राह स्वयं जित्वा भुक्तेन सिद्धिमाप्स्यसि ॥ २०६ ॥
इति श्रुत्वा तथा कृत्वा भुङ्क्ष्वेदमिति सोऽवदत् ।
प्रत्याख्यातं मया सर्वं भुक्त्वा स त्रिदिवं ययौ ॥ २०७ ॥
तस्य सिद्धिं परां दृष्ट्वा पश्चात्तापमहं गतः ।
तत्करभ्रष्टसिद्धान्नकणयुग्ममभक्षयम् ॥ २०८ ॥
तेनाहं सततं तप्तकाञ्चनष्ठीवतां गतः ।
वराङ्गनागृहं यातः कस्य नोन्मादनं धनम् ॥ २०९ ॥
सुवर्णष्ठीविनं दृष्ट्वा तत्र मां वृद्धकुट्टिनी ।
ग्रस्तलोकार्थविभवा कालजिह्वेव भीषणा ॥ २१० ॥
विधाय वमनद्रव्यं मम वान्तं ततोऽन्यया ।
तदन्नरत्नयुगलं निगीर्यालिङ्गि[3]तो ययौ ॥ २११ ॥

१. 'रभा' ख. २. 'स्त्यु' ख. ३. 'ता' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो नष्टहिरण्योऽहं निर्गतो वञ्चितस्तया ।
श्वजिह्वाभिरिव स्त्रीणां लीढः को नैति रिक्तताम् ॥ २१२ ॥
आराध्य चण्डिकां देवीं तद्वरादहमागतः ।
त्वत्पादमूलमानीतः सिद्धया तत्र विद्यया ॥ २१३ ॥
इति मरुभूतिकथा ॥ ८ ॥
इत्युक्त्वा विरते तस्मिन्दृष्टो हरिशिखोऽब्रवीत् ।
उज्जयिन्यामहं देव पातितस्तेन मायिना ॥ २१४ ॥
दुःखाद्धोरे महाकालश्मशाने मर्तुमुद्यतः ।
पुंसां प्रियवियोगाग्नेर्देहत्यागोऽतिशीतलः ॥ २१५ ॥
वह्निप्रवेशकामं मां दृष्ट्वा भूताधिपोऽवदत् ।
[1]कालसङ्घो न मर्तव्यं त्वया जीवति ते प्रभुः ॥ २१६ ॥
महेश्वरवरात्सोऽऽस्ति सर्वविद्याधरेश्वरः ।
वृतः समस्तविद्याभिः संप्राप्तश्चक्रवर्तिताम् ॥ २१७ ॥
इति श्रुत्वा प्रहृष्टोऽहमाहूतस्ततविद्यया ।
त्वत्पादमूलं संप्राप्तः सुकृतीव शुभां गतिम् ॥ २१८ ॥
इति हरिशिखकथा ॥ ९ ॥
इति स्थित्वा निजकथाविनोदैर्नरवाहनः ।
सज्जीकृतबलाम्भोधिर्निर्ययौ विजयोत्सुकः ॥ २१९ ॥
तस्योग्रदुन्दुभिध्वानपूरिताशामुखे दिवि ।
अभवत्पु[2]ष्करोद्भ्रान्तपुष्करावर्तकभ्रमः ॥ २२० ॥
विस्तीर्णविद्यास्तेनैव वयस्या गोमुखादयः ।
तद्विमानं महापद्ममारुह्यासन्रणोत्सुकाः ॥ २२१ ॥
ततः समाययौ वीरो गौरिमुण्डः क्रुधा ज्वलन् ।
शिरा मानसवेगेन सेनास्वत्रतिना वरः ॥ २२२ ॥
तत्र युद्धमभूद्धोरं वित्रासितसुरासुरम् ।
च[3]ण्डसिंहमुखैर्वीरैर्गौरीमुण्डानुयायिनाम् ॥ २२३ ॥

---

१. 'तालजङ्घो' ख. २. 'त्प्रलयोद्भ्रा' ख. ३. 'न्द्र' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नरवाहनदत्तोऽथ हत्वा तमपि दुर्मदम्।
घोरं मानसवेगाख्यं खड्गाग्रच्छिन्नमस्तकम्॥ २२४॥
गौरीमुण्डं वधप्राप्तं नावधीत्करुणामयः।
जग्राह तद्बलं सर्वं संप्राप्य मधुरस्मितः॥ २२५॥
गौरीमुण्डपुरं प्राप्य राजधानीं प्रविश्य सः।
निरुद्धामानिनायाशु प्रियां मदनमञ्जुकाम्॥ २२६॥

इति मानसवेगाधिवधः॥ १०॥

विद्याधरवरोद्याने दयिताभिः पिबन्मधु।
विजहार ततः श्रीमान्वयस्यैर्नरवाहनः॥ २२७॥
गौरीमुण्डस्य तनयां कान्तां मन्दिरिकाभिधाम्।
परिणीयामितगतिप्रमुखैः सेवितो बभौ॥ २२८॥
अत्रान्तरे विदित्वासौ चारैः समरसंमुखम्।
जेतुं[1] मन्दरदेवाख्यं[2] चक्रे मनसि विक्रमम्॥ २२९॥
स संनद्धबलाम्भोधिर्निर्गतो नरवाहनः।
चक्रवर्ती परां प्राप्य स्वसारं तस्य सुन्दरीम्॥ २३०॥
तस्याः सख्यश्चतस्रो या विद्याधरनृपात्मजाः।
समं विवाहः कर्तव्यः संवित्तासामभूदिति॥ २३१॥
एकैव परिणीताभूत्त्वां(?)वि····विमुखाः क्षणम्।
तद्वैमुख्या(?) विजहास दयितां नरवाहनः॥ २३२॥
कालकूटाधिनाथस्य तनयां कालिकाभिधाम्।
महादंष्ट्रस्य तु सुतां विद्युत्पुञ्जां[3] मृगीदृशम्॥ २३३॥
मद्धरस्यात्मजामिन्दुवदनां वरमतङ्गिनीम्।
चित्रकूटेश्वरस्यापि पुत्रीं पद्मप्रभामिति॥ २३४॥
तद्वाक्याताः सखीस्तस्याः परिणीयाभवत्सुखी।
तद्विलासरसावासनवयौवनमण्डितः॥ २३५॥

---

१. 'य' इति स्यात्. २. 'वेगा' ख. ३. 'त्पुञ्जां' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ रिपुवधयात्रायातसेनासमुद्रः
प्रतिहतघनभेरीघोषसंपूरिताशः ।
त्रिनयनवरलक्ष्मीं प्राप्तसिद्धिप्रसिद्धः
पणिरिव तनु यायात्स्वां पुरीं राजपुत्रः ॥ २३६ ॥

इति श्रीक्षेमेन्द्रविरचितायां बृहत्कथामञ्जर्यां पञ्चलम्बको नाम त्रयोदशो लम्बकः ।

रत्नप्रभालम्बकः ।

नमोऽस्तु भावनामात्रनानावर्णविधायिने ।
त्र्यक्षचित्रकृते लक्ष्यत्रैलोक्याश्चर्यकारिणे ॥ १ ॥
नरवाहनदत्तोऽथ प्रौढयौवनमण्डितः ।
अभूद्विलासलतिकाविकाशकुसुमाकरः ॥ २ ॥
(१स हेमकदलीकुञ्जे पारिजातलतावने ।
मन्दारामोदसुभगे विजहार सुहृद्वृतः ॥ ३ ॥
ततः प्राह समभ्येत्य हर्षपूर्णस्तपन्तकः(?) ।
आश्चर्यदर्शनाकोशनयनो नयनोत्सुकः ॥ ४ ॥
सखे व्योमावती नाम दृष्टा विद्याधरी मया ।
मनोजकुञ्जरस्येव निमज्जनसरोजिनी ॥ ५ ॥
त्वां द्रष्टुमिच्छति क्षिप्रमेहीत्याकर्ण्य तद्वचः ।
तूर्णं तद्देशमभ्यागात्कौतुकान्नरवाहनः ॥ ६ ॥
पतितं लाञ्छनमृगं स्वयमन्वेष्टुमागतम्२ ।
स ददर्श शशाङ्कस्य कान्तिं मूर्तिमतीमिव ॥ ७ ॥
त्रिवलीकुलसंसर्पिहारहंसा मनोभुवः ।
हरहुंकारहु३तभुङ्निर्वापणनदीमिव ॥ ८ ॥
निमग्नामिव शृङ्गारे संक्रान्तामिव यौवने ।
बिम्बितामिव लावण्ये मिलितामिव विभ्रमे ॥ ९ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः क-पुस्तके त्रुटितः. २. 'ता' ख. ३. 'संतप्तो नि' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तां विलोक्य मनोमीनविस्तीर्णगुणजालिकाम् ।
[1]बालिकां मन्मथस्येव यात्रामङ्गलमालिकाम् ॥ १० ॥
अर्च्यमान इवालोलकटाक्षोत्पलदामभिः ।
तया मनोभवधिया प्रोवाच नरवाहनः ॥ ११ ॥
कस्यासि कान्तिकल्लोलमाला कमललोचने ।
कैर्भागधेयैरस्माकं दर्शितामृतवाहिनी ॥ १२ ॥
श्रुत्वेति तद्वचो हृष्टा सावदद्दशनांशुभिः ।
चन्द्रोपमा म्लानिमिव क्षालयन्ती कपोलयोः ॥ १३ ॥
अस्ति युष्मद्यशःशुभ्रः श्रीमान्मलयभूधरः ।
यस्य प्रमाणं माहात्म्ये गौरीगुरुरिति श्रुतिः ॥ १४ ॥
नलिनासनहंसालीकलक्वाणमनोहरा ।
[2]स्वकीर्तिर्वैजयन्तीव भाति यस्य त्रिमार्गगा ॥ १५ ॥
कान्तिपिञ्जरितव्योम्नि तस्य काञ्चनशेखरे ।
अस्ति हेमप्रभो नाम विद्याधरधरापतिः ॥ १६ ॥
अलंकारप्रभा नाम दयिता तस्य सुन्दरी ।
दिशो विभाति यत्कान्ति[3]भ्रान्[4]तिर्निःसीमन्तिता इव ॥ १७ ॥
सा कदाचित्प्रियं दृष्ट्वा चिन्तास्तिमितलोचनम् ।
उवाच देव कोऽयं ते वीरस्य धृतिविप्लवः ॥ १८ ॥
भयप्रदोऽसि शत्रुभ्यो द्विजेभ्यः कनकप्रदः ।
प्रीतिप्रदोऽसि कान्ताभ्यो राजकुञ्जर गीयसे ॥ १९ ॥
इति प्रियावचः श्रुत्वा प्राह हेमप्रभो मुहुः ।
चिन्तानलपरिस्पन्दमुच्छ्वासैर्दीपयन्निव ॥ २० ॥
वंशमुक्तामणिः पुत्रो नास्त्यधन्यस्य मे [5]शुभम् ।
निष्फला चन्दनस्येव न श्रीः प्रीणाति मे मनः ॥ २१ ॥
नेत्रामृतं श्रुतिसुधाहृदयानन्दनि[6]र्भरः ।
पीयूषपेशलस्पर्शः किं किं नाम न पुत्रकः ॥ २२ ॥

---

१. 'वलिनो' ख. २. 'कान्ति' ख. ३. 'श्रा' ख. ४. 'श्री' ख. ५. 'प्रियः' ख. ६. 'झ' ख.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवाप्यते धनं धन्यैर्यशश्च विशदाशयैः ।
निरवद्यैस्तथा विद्यास्तनयस्तु सुदुर्लभः ॥ २३ ॥
राजा ब्रह्मधनो नाम चित्रकूटाधिपोऽभवत् ।
सेवकः सत्त्वशीलाख्यस्तस्याभूदुचिताशयः ॥ २४ ॥
स सुवर्णशतं लेभे राज्ञः प्रत्यहवेतनम् ।
निजभोजनपर्यन्तं तच्चार्थिभ्यः सदा ददौ ॥ २५ ॥
विवृत्तानि निधानानि तस्योदारमतेः पुरः ।
आसंस्तद्द्रविणैः सोऽर्थिसार्थसंख्यामपूरयत् ॥ २६ ॥
सगोत्रैः शत्रुभिर्दाता स राज्ञे विनिवेदितः ।
निधिपूर्ण इति क्षिप्रं नृपाहूतश्च सोऽवदत् ॥ २७ ॥
देव प्राप्तनिधानोऽहमिहापि त्वत्पुरो लभे ।
गृहाणेति समुद्धाट्य निधानं भूभुजे ददौ ॥ २८ ॥
एवं स सत्त्वसंप्राप्तविभवो नृपपूजितः ।
त्र्यम्बकव्रतसंपन्नो दाता पुत्रमयाचत ॥ २९ ॥
तमाह तुष्टो भगवान्वत्स सिद्धिमवाप्स्यसि ।
न तु द्रक्ष्यसि पुत्रस्य जन्मन्यस्मिन्मुखाम्बुजम् ॥ ३० ॥
इत्येवं सत्त्वशीलेन तुष्टेऽपि शशिशेखरे ।
न प्राप्तस्तनयो देवि कुलश्रीमणिदर्पणः ॥ ३१ ॥

इति सत्त्वशीलाख्यायिका ॥ १ ॥

अलंकारवती श्रुत्वा पत्युरित्युचितं वचः ।
उवाच देव धन्यस्य किं नाम तव दुर्लभम् ॥ ३२ ॥
व्रतिनां दानशीलानां भक्तानां पार्वतीपतौ ।
अधीनाः सिद्धयः सर्वाः कियन्मात्रं तु पुत्रकाः ॥ ३३ ॥
राजा विक्रमतुङ्गोऽभूत्पुरे पाटलिपुत्रके ।
यत्सत्त्वकौमुदीधौता विबभौ भुवनावली ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्दीवरप्रभा नाम तस्येन्दीवरलोचना।
बभूव भार्या मर्यादा धातुर्लावण्यकौशले ॥ ३५ ॥
स कदाचिन्मृगक्रीडारणकेलिकुतूहली।
विवेश विपिनं धन्वी विचित्रदृढसौष्ठवः ॥ ३६ ॥
तत्रापश्यन्मन्त्रसिध्यै बिल्वहोमपरायणम्।
द्विजं ज्वलितसप्तार्चिःपिङ्गीकृतदिगन्तरम् ॥ ३७ ॥
यदा काञ्चनतां याति श्रीफलं पावकान्तरे।
तदा मन्त्रस्य सिद्धस्य लक्षणं कथितं बुधैः ॥ ३८ ॥
जुह्वतस्तस्य रुचिरं न फलं प्राप हेमताम्।
ततो राजा समभ्येत्य ददर्शाहुतितत्परम् ॥ ३९ ॥
तं दृष्ट्वा ज्वलिते वह्नौ बिल्वमेकं स कौतुकात्।
चिक्षेप तत्क्रुधा विप्रो भ्रुकुटीभीषणोऽभवत् ॥ ४० ॥
अस्नातस्त्वमनाचम्य सर्वस्पर्शो विशृङ्खलः।
वह्नौ जुहोषि पापात्मन्नित्याह स महीपतिम् ॥ ४१ ॥
तत्फलं भूभुजा क्षिप्रं द्विजेन फलमण्डलम्।
हुतं राज्ञः काञ्चनतां यावन्नैव द्विजन्मनः ॥ ४२ ॥
तद्विलोक्याद्भुतं विप्रो विस्मयस्थगिताकृतिः।
बभूव मन्त्रगणनाविच्छेदाद्विचलाधरः ॥ ४३ ॥
ततः स्वयं जातवेदाः समुत्थाय महीभुजे।
ददौ फलं स्वहस्तेन तदपृच्छच्च सोऽग्रजः ॥ ४४ ॥
भगवन्नियमस्थस्य न मेऽद्यापि प्रसीदसि।
विकीर्णाचारमनसः कथं तुष्टोऽसि भूपतेः ॥ ४५ ॥
इत्युक्तः सोऽब्रवीद्वह्निः संकल्पोऽस्याभवद्दृढः।
शिरश्छित्वा जुहोमीति दर्शनेन विना मम ॥ ४६ ॥
त्वं तु शुष्कक्रियातन्त्रः केवलं मन्त्रसाधकः।
सिद्धिः सत्त्ववतामेव संकोचो ह्यतिसंयमः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्त्वा भगवानग्निः कृतकृत्यं नृपं व्यधात् ।
तस्यैव वाक्याद्विप्रं तं विधायान्तरधीयत ॥ ४८ ॥
ततः स्वनगरीं गत्वा महासत्त्वो महीपतिः ।
इन्दीवरप्रभासक्तश्चचारोद्यानभूमिषु ॥ ४९ ॥
धातुवादी ततोऽभ्येत्य धातुशर्माभिधो वचः ।
तमभ्यधादहं ताम्रं विदधे देव काञ्चनम् ॥ ५० ॥
हेमकारं समाहूय द्राविते शुल्बपिण्डके ।
स्वैरं राज्ञा समादिष्टो बहु चिक्षेप चूर्णकम् ॥ ५१ ॥
हृते यक्षकुमारेण तत्र चूर्णे मुहुर्मुहुः ।
न तत्कनकतां प्राप विघ्नेनादृश्यमूर्तिना ॥ ५२ ॥
नरेश्वरोऽथ चिक्षेप चूर्णं तत्कौतुकात्स्वयम् ।
तच्चूर्णपातात्सर्वं तत्प्रययौ जातरूपताम् ॥ ५३ ॥
इत्येवं शुद्धसत्त्वानामनपेक्षितसंयमाः ।
भवन्ति सिद्धयो देव त्वं च सत्त्ववतां वरः ॥ ५४ ॥

इति महासत्त्वाख्यायिका ॥ २ ॥

इति कान्तावचः श्रुत्वा हृष्टो विद्याधरेश्वरः ।
मनःप्रसादादासन्नं पुत्रलाभममन्यत ॥ ५५ ॥
ततः प्रयतवाक्चित्तः शुचिर्जयपराक्रमः ।
दर्भानास्तीर्य तुष्टाव स सभार्यो महेश्वरम् ॥ ५६ ॥
ॐनमः सप्तसंकल्पपूरणाकल्पशाखिने ।
कुमारगुरवे शुभ्रभोगमोक्षफलश्रिये ॥ ५७ ॥
नमश्चिद्[१]गगनाभोगभासिने बोधभास्वते ।
अविभि[२]न्नस्वभावाय भवायाभयदायिने ॥ ५८ ॥
नमः प्रकाशव्याकोशहृत्कुशेशयशालिने ।
शिवाय शमिताशेषदोषायाविषयस्पृशे ॥ ५९ ॥

---

१. 'त्राज्ञना' ख. २. 'चिन्त्यस्व' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमन्दानन्दनिस्पन्दमदिराम्बुधिबिन्दवे ।
नमः कुन्दोदरस्पन्दस्वच्छन्दायेन्दुमौलिने ॥ ६० ॥
नमः कालकलाजालहेलाकवलकेलये ।
कालीकटाक्षवलनाकलिताय कपालिने[1] ॥ ६१ ॥
नमश्चर्माम्बरभृते धर्माधर्मगुणच्छिदे ।
कुर्मो नर्मविनिर्माणसर्वसंसारकर्मणे ॥ ६२ ॥
नमो दक्षमखाक्षान्तिक्षणलक्ष्याक्षिवह्नये ।
क्षुभ्यत्क्षयक्षपाक्षिप्रसंक्षेपाय त्रिचक्षुषे ॥ ६३ ॥
नमः शिवाय भीमाय मङ्गलायास्थिधारिणे ।
श्मशानस्थाय जटिने वामार्धायोर्ध्वरेतसे ॥ ६४ ॥
महेश्वराय नग्नाय हराय वरदायिने ।
[2]अनीलनीलकण्ठाय विचित्राय त्रिशूलिने ॥ ६५ ॥
निर्लेपनित्यनिरुपाधिनिरञ्जनाय
संविद्विकाशकुसुमोत्सवनन्दनाय ।
वैराग्यसिक्तशमपल्लवभक्तिवल्ली-
नादायमानमधुपाय नमः शिवाय ॥ ६६ ॥
इति विद्याधरेणाशु स्तुतः श्रीमानुमापतिः ।
वरमस्मै सभार्याय पार्वतीशो ददौ तदा ॥ ६७ ॥
अचिरेणाप्स्यसि सुतं हेमप्रभ कुलोचितम् ।
कन्यां च नरवाहस्य भाविनीं वल्लभामिति ॥ ६८ ॥
वरं हेमप्रभः प्राप्य सुहृष्टो दयितासखः ।
द्विजेभ्यः प्रददौ भूरिमणिकाञ्चनमौक्तिकम् ॥ ६९ ॥
ततः कालेन[3] तनयं विद्येव विनयं सती ।
अलंकारप्रभासूत माहात्म्यमिति संततिः ॥ ७० ॥
स वज्रप्रभनामाभूत्कुमारो वंशभूषणः ।
यः प्राप वृद्धिं सहसा कुमार इव शक्तिमान् ॥ ७१ ॥

१. 'व्यालिने' ख. २. 'च' ख. ३. 'व स' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथासूत पुनर्देवी तनयामतनुद्युतिम् ।
सत्संगतिरिव प्रीतिं मन्त्रगुप्तेरिवाश्रयम् ॥ ७२ ॥
रत्नप्रभाभिधानाभूत्कन्यकासौ मनोभुवः ।
रत्नमालेव विहिता वेधसा विहितैर्गुणैः[१] ॥ ७३ ॥
वज्रप्रभोऽयं द्युतिमान्युवा क्षीरोदवासिनः ।
पुत्रीममृतवर्णस्य प्रापामृतवतीं वधूम् ॥ ७४ ॥
विद्याधरेन्द्रतनयां स तामासाद्य सुन्दरीम् ।
बभार कान्तिं कामस्य रतिसंभोगशालिनः ॥ ७५ ॥
अथ हेमप्रभो दृष्ट्वा पुत्रमात्मगुणाधिकम् ।
यौवराज्येऽभिषिच्याशु परां प्रीतिमवाप्तवान् ॥ ७६ ॥
साहं रत्नप्रभा नाम कन्या[२] हेमप्रभात्मजा ।
अश्रौषं त्वद्यशः शुभ्रं वर्ण्यमानं पितुर्गृहे ॥ ७७ ॥
ततो मां भृशसंतप्तामभिलाषवशीकृताम् ।
उवाच पार्वती स्वप्ने पुत्रि मा विप्लवा भव ॥ ७८ ॥
प्रातस्त्वं नरवाहेन मुहूर्ते शुभलक्षणे ।
स्वयं गत्वा तदुद्देशं पाणिग्रहणमाप्स्यसि ॥ ७९ ॥
इति[३] स्वप्ने यथादिष्टं देव्या मात्रे न्यवेदयम् ।
तद्गिरा त्वामिहस्थं च प्राप्ताहं विद्यया प्रभो ॥ ८० ॥
उक्त्वेति लज्जाललितक्षामाक्षरविसंस्थुला ।
नतानना महीं चक्रे दृशा नीलोत्पलाकुलाम् ॥ ८१ ॥
मुखाब्जसौरभाकृष्टगुञ्जद्भ्रमरविभ्रमम् ।
रत्नप्रभावचः श्रुत्वा जहर्ष नरवाहनः ॥ ८२ ॥
ततः समाययौ व्योम्ना हेम्ना संपूरयन्निव ।
दिशो महिम्ना वपुषः श्रीमान्हेमप्रभः स्वयम् ॥ ८३ ॥
मौलिरत्नोज्ज्वलालोको वत्सराजेन पूजितः ।
भेजे कुण्डलकेयूरकान्तिपिञ्जैः[४] स तत्सभाम् ॥ ८४ ॥

---

१. 'पुलै' ख. २. 'देव' ख. ३. 'प्रातः' ख. ४. 'ञ्जां' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निजाभिजनमावेद्य वृत्तान्तं वत्सभूभुजे ।
तं ययाचे ततः पुत्रं पुत्रीपरिणयश्रिये ॥ ८५ ॥
दत्तानुज्ञं स गुरुणा वयस्यैः सहितस्ततः ।
यौगन्धरायणोपेतं निनाय नरवाहनम् ॥ ८६ ॥
अथ विद्याधरपुरे महोत्सवविभूषिते ।
भेजे विवाहवसुधां प्रहृष्टो नरवाहनः ॥ ८७ ॥
ततो रत्नप्रभा देवी विवेश विशदद्युतिः ।
क्षीरोदनिर्गतेव श्रीः सितचीनांशुकोज्ज्वला ॥ ८८ ॥
निःश्वाससौरभाहूतैर्भ्रमरैराकुलीकृता ।
रतिदीक्षां गृहाणेति स्मरस्याज्ञाक्षरैरिव ॥ ८९ ॥
तारहारांशुपटलैस्तरङ्गितकुचस्थली ।
वल्लभालोकनानन्दे मूर्तैरिव पुरस्थितैः ॥ ९० ॥
वह्निप्रदक्षिणे तस्या मुखं धूमलताकुलम् ।
क्षणं बभार लोलालिमालाङ्ककमलश्रियम् ॥ ९१ ॥
प्रियपाणिग्रहे तस्या बभुर्दीर्घनखांशवः ।
वरपत्न्योः करे लग्नाः पुष्पचापशरा इव ॥ ९२ ॥
अरुन्धती तनौ तस्या निर्गतं श्रवणोत्पलम् ।
पत्युः कटाक्षमालायाः प्राप प्रथमदूतताम् ॥ ९३ ॥
निर्वर्तितविवाहोऽथ रत्नपर्यङ्कमास्थितः ।
प्रियाविन्यस्तनयनो जहर्ष नरवाहनः ॥ ९४ ॥
कपोलफलके तस्याः स मुहुर्बिम्बितो बभौ ।
त्यज लज्जामिति स्वैरं शशी वक्तुमिवागतः ॥ ९५ ॥
मुक्तावलीरत्नमध्ये बिम्बितां स दधद्वधूम् ।
बभार विभ्रमं शौरेर्लक्ष्मीर्ललितवक्षसः ॥ ९६ ॥
ततो हेमप्रभादिष्टं प्रविश्य मणिमन्दिरम् ।
कान्ताविलासरसिको बभूव नरवाहनः ॥ ९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वज्रप्रभो बभूवास्य प्रीतये दयिताग्रजः ।
सर्वविभ्रमलीलासु हृदयस्येव दर्पणः ॥ ९८ ॥
विद्याधरेन्द्रमामन्त्र्य ततो रत्नप्रभासखः ।
यौगन्धरायणगिरा कौशाम्बीं सानुगो ययौ ॥ ९९ ॥
रत्नप्रभायुतं दृष्ट्वा वंशमुक्तामणिं सुतम् ।
तत्र भूषितमात्मानं मेने[1] वत्सनरेश्वरः ॥ १०० ॥

इति रत्नप्रभाख्यायिका ॥ ३ ॥

अन्तःपुरं प्रविश्याथ मित्रादिष्टं नृपात्मजः ।
रत्नप्रभानुगो भेजे विलासरसनिर्वृतिम् ॥ १०१ ॥
ततो व्यजिज्ञपद्दूरात्तमभ्येत्याशु कञ्चुकी ।
गोमुखप्रमुखाः सर्वे देव द्वारि स्थिता इति ॥ १०२ ॥
ततो रत्नप्रभा प्राह तूर्णमेव प्रवेशय ।
आर्यपुत्रस्य सचिवास्ते हि विश्रम्भसाक्षिणः ॥ १०३ ॥
इति तद्वचसा तेषु प्रविष्टेष्वविलम्बितम् ।
उवाच हासकरुणास्मेराङ्गो नरवाहनः ॥ १०४ ॥
प्रिये निरर्गलक्रीडास्वच्छन्दालापविभ्रमे ।
विघ्नः कञ्चुकिवर्गोऽयं कामिनां केन निर्मितः ॥ १०५ ॥
रत्नप्रभा निशम्येति प्रोवाच ललितस्मिता ।
देव कञ्चुकिवर्गोऽयं राजलक्ष्मीविभूषणः ॥ १०६ ॥
अन्तःपुराणि रक्ष्यन्ति न कुब्जजडवामनाः ।
निजशीलं सुसत्त्वानां रक्षा हरिणचक्षुषाम् ॥ १०७ ॥
रत्नकूटाभिधद्वीपे राजा रत्नाधिपोऽभवत् ।
यस्या[2]शीतिसहस्राणि कलत्रं तरलभ्रुवाम् ॥ १०८ ॥
हरेरिवाभवत्तस्य गजः श्वेतो नभश्चरः ।
यमारुह्य जगद्भ्रान्त्वा लेभे भूपतिपुत्रिकाः ॥ १०९ ॥

१. 'लेभे' ख. २. 'पञ्चाशी' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः कदाचिदाकाशे ताडितो व्याडिना रुषा ।
तुण्डेन पक्षिणा नागः सोऽपतद्भृशविह्वलः ॥ ११० ॥
न शशाक महाकायः समुत्थातुं महीतलात् ।
स जनैश्चाल्यमानोऽपि व्यसनादिव नष्टधीः ॥ १११ ॥
ततः पञ्चसु यातेषु वासरेषु सुदुःखितः ।
नृपः शोचन्निराहारः शिरश्छेत्तुं समुद्ययौ ॥ ११२ ॥
तत्सत्त्वचकिताः प्राहुर्देवा गगनचारिणः ।
राजन्साध्वीकरस्पर्शादुत्तिष्ठति तव द्विपः ॥ ११३ ॥
इत्याकाशवचः श्रुत्वा हृष्टो रत्नाधिपो नृपः ।
आनिनायामृतलतां स तां[1] प्रथमवल्लभाम् ॥ ११४ ॥
तत्पाणिना[2] कृतस्पर्शो नोदतिष्ठत्स कुञ्जरः ।
कुर्वन्मदमषीपङ्कैरिव तां मलिनाननाम् ॥ ११५ ॥
ततः क्रमेण नृपतेः समस्तैस्तैर्वधूजनैः ।
स्पृश्यमानोऽपि वसुधां न तत्याज महागजः ॥ ११६ ॥
यथा यथा प्रयान्ति स्म विमुखा राजयोषितः ।
तथा तथा लज्जयेव नृपः पातालमाविशत् ॥ ११७ ॥
मन्त्रिपुत्रवधूवृन्दे तथैव विफले गते ।
आययौ हर्षगुप्ताख्यो वणिग्देशान्तरागतः ॥ ११८ ॥
तस्य शीलवती भार्या कटके कर्म[3]चारिणी ।
मनोवाक्कायनिष्ठाभिः साध्वी पस्पर्श तं गजम् ॥ ११९ ॥
तया स्पृष्टः स सहसा समुत्तस्थौ गजाधिपः ।
सह लोकनिनादेन हिमवानिव जङ्गमः ॥ १२० ॥
ततः शीलवतीं राजा वणिजं चार्थसंचयैः ।
पूजयित्वा प्रियाः सर्वा मेने संकल्पदूषिताः ॥ १२१ ॥
अथानुजां शीलवत्या राजदत्ताभिधां नृपः ।
परिणीय चकारास्यै मन्दिरं सागरान्तरा ॥ १२२ ॥

१. 'तीं परमवल्लभाम्' ख. २. 'तया कृतकरस्पर्शो' ख. ३. 'सद्धर्मचा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असती हि विवाहे सा निर्दिष्टा गणकैर्यदा ।
तदा निष्पुरुषे द्वीपे धरा तस्याः स्थितिं व्यधात् ॥ १२३ ॥
सदा व्योम्ना गजेन्द्रेण तदन्तःपुरमेत्य सः ।
विजहार सरसेरो निवर्तितनृपक्रियः ॥ १२४ ॥
पौरकार्योन्मुखं गन्तुं प्रस्तुतं सा प्रभुं पतिम् ।
न गन्तव्यमिति प्राह हेलया हरिणेक्षणा ॥ १२५ ॥
स्थित्वा क्षणं तद्विलासरसिको नृपतिः पुनः ।
समेष्यामीति तामुक्त्वा जगामाकाशदन्तिना ॥ १२६ ॥
ततः फलहकासक्तो भग्नप्रवहणो नरः ।
तरन्समुद्रलहरीः क्षिप्तस्तं देशमाययौ ॥ १२७ ॥
स राजदत्तानिलयं प्रविवेश सविस्मयः ।
कौतुकाच्च तया पृष्टो बभाषे जातसंभ्रमः ॥ १२८ ॥
अहं पवनसेनाख्यः सुभगे माथुरो वणिक् ।
रत्नहेमार्जने धात्रा कृतः सर्वत्र निष्फलः ॥ १२९ ॥
ततो विच्छिन्नसर्वांशं मां वह्निपतनोद्यतम् ।
धनिनाम्बुधियात्रायां[1] जीवदत्ताभिधो वणिक् ॥ १३० ॥
तत्र प्रवहणे भग्ने विस्फूर्जत्स्फारमारुतैः ।
अहं फलहकावाप्त्या दैवात्प्राप्तो महीमिमाम् ॥ १३१ ॥
राजदत्ता निशम्येति भूरिपानमदाकुला ।
विश्रान्तमुपरिष्टात्तं कण्ठे सोत्कण्ठमग्रहीत् ॥ १३२ ॥
धनं कुलं[2] परिचयं नर्माभ्यासं पथिस्थितम् ।
अनिरीक्ष्य प्रवर्तन्ते रतौ मत्ता हि योषितः ॥ १३३ ॥
अत्रान्तरे समभ्येत्य राजा रत्नाधिपः प्रियाम् ।
ददर्शागम्यदेशेऽपि तां केनापि समागताम् ॥ १३४ ॥
तां दृष्ट्वा प्रौढकोणेऽपि मत्वा दैवं सुदुर्जयम् ।
न तं जघान निःसारसंसारपरिहारधीः ॥ १३५ ॥

---

१. 'निनाया' ख. २. 'कथापरिभवं नामाभ्यासं रहःस्थि' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वणिक्पर्वनसेनोऽपि गत्वा फल(हैंकाश्रयः।
अथ प्रवहणं प्राप वणिजः क्रोधवर्मणः॥ १३६॥
तेनोत्क्षिप्तः करुणया तस्यैवेर्ष्यावतो वधूम्।
दैवात्स भगिनीं यातो निहतस्तेन दुर्मतिः॥ १३७॥
रत्नाधिपोऽथ नृपतिर्नारायणपरायणः।
राज्यं ब्राह्मणसात्कृत्वा गजेन तपसे ययौ॥ १३८॥
ततो निपतितो व्योम्नः सहसा स महागजः।
पृष्टो महीभुजा प्राह संप्राप्य निजमन्दिरम्॥ १३९॥
अहं श्वेतप्रभो नाम गन्धर्वो मलयालयः।
त्वं च देवप्रभो नाम नरनाथ ममाग्रजः॥ १४०॥
ईर्ष्यावतस्तव पुरा दयितां रूपशालिनीम्।
महेश्वराग्रे गायन्तीं मुनिः कश्चिद्व्यलोकयत्॥ १४१॥
तद्विलोकनसंक्रुद्धः स मुनिस्त्वां ततोऽशपत्।
मर्त्यो भूत्वा प्रियतमां द्रष्टास्यन्यरतामिति॥ १४२॥
शप्तं त्वामहमालोक्य गजेनापीडयन्मुनिम्।
तच्छापादस्मि संप्राप्तो भ्रातः कुञ्जरतामिमाम्॥ १४३॥
विष्णुप्रसादपर्यन्तः शापस्तेनायमावयोः।
दिष्टः स च परिक्षीणः संकल्पात्कैटभद्विषः॥ १४४॥
इत्युक्त्वा भूभुजा सार्धं प्राप्तो गन्धर्वतां द्विजः।
संगतः सिद्धगन्धर्वैः प्रययौ मलयाचलम्॥ १४५॥
शीलवत्यपि भूपालादाप्तैः कनकसंचयैः।
देवतायतनं चक्रे ब्राह्मणेभ्यश्च संचयम्॥ १४६॥

इति शीलवत्याख्यायिका॥ ४॥

इत्येवं निजशीलेन राजन्ते योषितः प्रभो।
ईर्ष्यावतां केवलं तु स्त्रीरक्षा मनसो गदः॥ १४७॥

---

१. 'पुत्रसमेतोऽपि' ख. २. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति रत्नप्रभावाक्यं श्रुत्वा वत्सेश्वरात्मजः ।
साधूक्तमिति संहृष्टो विस्मयादभ्यभाषत ॥ १४८ ॥
अथाह गोमुखस्तत्र कथाप्रस्तावकोविदः ।
अस्मिन्नेवान्तरे देव श्रूयतामिति कौतुकम् ॥ १४९ ॥
अस्ति श्रीकण्ठदयिता सतीवोज्जयिनी पुरी ।
मालतीस्फीतशान्तांशुमालाकलितकौमुदी ॥ १५० ॥
अस्यां विभान्ति क्षीरोदधवलाः स्फटिकालयाः ।
महाकालाट्टहासानां निहिता इव राशयः ॥ १५१ ॥
कुशस्थली कृतयुगे त्रेतायां पद्मवत्यपि ।
अम्बिका द्वापरे ख्याता कलावुज्जयिनी च या ॥ १५२ ॥
इन्द्रवर्मा नृपस्तस्यामभूदिन्द्र इवापरः ।
असंख्यमखसंहर्षादथ वाभ्यधिकस्ततः ॥ १५३ ॥
वणिङ्निश्चयदत्ताख्यो द्यूतकारो महान्वयः ।
बभूव तत्पुरे सक्तो माल्यताम्बूलसौरभे ॥ १५४ ॥
महाश्मशानं गत्वासौ शिलास्तम्बे विलेपनम् ।
धृत्वा करतलागम्यमेकः पृष्ठं विलिम्पति ।
नित्यसंघर्षणात्स्तम्बः श्लक्ष्णतां स समाययौ ॥ १५५ ॥
कदाचिच्चित्रकारेण विहिता तत्र पार्वती ।
रूपकारेण चोत्कीर्णा बभौ साक्षादिवागता ॥ १५६ ॥
चतुःसमे तु लिम्पन्तं तत्र पृष्ठं समाकृति ।
भक्त्या गौरीप्रणामाप्ता कापि विद्याधराङ्गना ॥ १५७ ॥
कान्तिनिश्चयदत्तं तं ददर्श स्मरशालिनी ।
पार्वतीभक्तिसंतोषान्मूर्तं फलमिवागतम् ॥ १५८ ॥
अभिलाषवती साथ सुन्दरी तस्य विग्रहम् ।
करेण कङ्कणवता पस्पर्शालक्षिताकृतिः ॥ १५९ ॥
स तत्स्पर्शामृतासिक्तः परेऽह्नि प्राप्य तत्करम् ।
जग्राह दर्शनाकाङ्क्षी ततः सा प्रकटाभवत् ॥ १६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्टा निश्चयदत्तेन साब्रवीत्क)मलानना ।
सौरभाकृष्टमधुपैः पुनरुक्तालकावली ॥ १६१ ॥
अहं चिन्तापराख्यस्य[1] हिमवद्वासिनः सुता ।
अनुरागपरा नाम कन्या विद्याधरी प्रभो ॥ १६२ ॥
इति निश्चयदत्तस्तां ब्रुवाणां[2] चारुहासिनीम् ।
विदग्धोपक्रमैस्तैस्तैः संगमाभिमुखीं व्यधात् ॥ १६३ ॥
सावदन्नाथ गच्छामि त्वं चेन्मे गृहमेष्यसि ।
तज्जाया ते भविष्यामि सत्यवाचो हि खेचराः ॥ १६४ ॥
इत्युक्त्वा सा ययौ दिक्षु[3] किरन्ती कान्तिकौमुदीम् ।
तत्संगमाशया सोऽपि ययौ हैमवतीं दिशम् ॥ १६५ ॥
उत्तरापथमासाद्य संगतोऽन्यैर्वणिक्सुतैः ।
पदं कुरुप्वचीनानां[4] मण्डलैर्विमलैर्ययौ ॥ १६६ ॥
विक्रीतस्ताडितः सोऽथ विषमं प्राप्य बन्धनम् ।
ययौ गौरीवरान्मुक्तः सह तैः सचिवैस्त्रिभिः ॥ १६७ ॥
एकस्ततः प्रस्थितोऽसौ काश्मीरं प्राप्य मोक्षदम् ।
तैरन्वितस्तां व्रतिभिश्चतुर्भिः पथि संगतः ॥ १६८ ॥
तैः खट्वाङ्गकपालाङ्कैः स गच्छन्नुत्तरां दिशम् ।
वनं विवेश विषमं घोरव्यालमृगाकुलम् ॥ १६९ ॥
तमूचुर्भारिका[5] यक्षी घोररूपेह दृश्यते ।
या श्रृङ्गोत्पादिनी नाम सर्वलोकस्य संहृतिः ॥ १७० ॥
भारिकेभ्यो निशम्येति सह तैर्व्रतगर्वितैः ।
डाकिनीभूतवेतालं[6] विवेश निशि काननम् ॥ १७१ ॥
ततः शुष्ककरीषाग्निं[7] महादारुचयोच्छ्रितम् ।
विधाय जापिनस्तस्थुस्ते भस्मकृतमण्डलाः ॥ १७२ ॥

---

१. 'विन्ध्यपुरा' ख. २. 'ब्राह्मणीं' ख. ३. 'हृष्टा' ख. ४. 'तुरुष्कची' ख. ५. 'चुः काम्लिका' ख. ६. 'उत्तालभू' ख. ७. 'ग्निभस्मकूटचयोपरि । विहायसि ततस्तस्थुस्ते भस्मकृतमण्डनाः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः समाययौ दीप्तः केशी नीलाश्मसच्छविः ।
असिताद्रितटी दाववह्निव्याप्तेव जङ्गमा ॥ १७३ ॥
कायच्छायेव[2] तमसो मृत्योर्मुक्तेव वेणिका ।
केशकन्थेव[3] कालस्य ततो यक्षीं[4] व्यदृश्यत ॥ १७४ ॥
पारीव लम्बितोद्दामस्थानवाहितसौष्ठवम् ।
नृत्यन्ती वादयन्तीव किन्नरं मण्डलान्तिके ॥ १७५ ॥
कल्पान्तोद्भ्रान्तचण्डीशलडङ्डमरुकस्वरा ।
मन्त्रमालां पपाठोच्चैर्घटयन्तीव दिक्छटान् ॥ १७६ ॥
ततो व्रतिनमेकं सा स्फारनेत्रा व्यलोकयत् ।
दृष्टमात्रः स संजातशृङ्गो[6] वह्नौ पपात च ॥ १७७ ॥
तमर्धदग्धं भुक्त्वैव द्वितीयं सा व्यलोकयत् ।
क्रमेणान्येषु भक्तेषु वणिग्धूर्तो व्यचिन्तयत् ॥ १७८ ॥
न भक्षितोऽनया यावदहमत्युग्रया मया ।
तावद्युक्तिमुपाश्रित्य करिष्यामि यथोचितम् ॥ १७९ ॥
श्रुतश्चास्या मया मन्त्रः स विचिन्त्यैत्य संभ्रमम् ।
व्यग्रायां मांसभोगेऽस्यां तं जहाराशु किन्नरम् ॥ १८० ॥
पपाठ च ततो मन्त्रं तेनोद्यच्छृङ्गकन्दर्ली ।
पतिता सावदद्वीर त्वामस्मि शरणं गता ॥ १८१ ॥
ततो निश्चयदत्तस्तां ररक्ष शरणं गताम् ।
सापकारेऽपि वीराणां न हि भीते पराक्रमः ॥ १८२ ॥
स निवेद्यात्मवृत्तान्तं कृत्वा तामेव वाहनम् ।
विद्याधरसुतां द्रष्टुं ययौ व्योम्ना हिमाचलम् ॥ १८३ ॥
अथोद्ययौ सहस्रांशुर्जपाकुसुमपाटलः ।
(चक्रवाककुलोत्सृष्टं मूर्तं रागमिवोद्वहन् ॥ १८४ ॥

---

१. 'भ्र' ख. २. 'च' ख. ३. 'क्ष्ये' ख. ४. 'क्षीत्यदृश्य' ख. ५. 'जजापो' ख.
६. 'ङ्गमागौर्मेमार च । तं दृष्टिदग्धं भु' ख. ७. 'क्पुत्रो' ख. ८. 'रं' ख.
९. 'सविका' ख. १०. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो निश्चयदत्तं सा प्राह यक्षी कृताञ्जलिः।
नाहं शक्ता स्थिते भानौ गन्तुं लोकैकचक्षुषि) ॥ १८५ ॥
दिनं हि शर्वरीभूतं यक्षवेतालरक्षसाम्।
रात्रौ पुनः समेष्ये त्वामित्युक्त्वा सा ययौ क्षणात् ॥ १८६ ॥
स तस्यां संप्रपातापां चचारैको वनान्तरे।
ततो ददर्श मग्नाङ्गं मर्कटं शुष्ककर्दमे ॥ १८७ ॥
महौघविप्लवानीते रक्तलोचनसूचितम्।
मामुद्धरेति क्रन्दन्तं १समुद्धृत्य स कौतुकी।
कोऽसीत्यपृच्छत्पृष्टस्तु कपिर्वक्तुं प्रचक्रमे ॥ १८८ ॥
वाराणस्याममूद्विप्रश्चन्द्रस्वामीति विश्रुतः।
सोमस्वामीति विख्यातस्तस्याहं तनयः प्रभो ॥ १८९ ॥
श्रीगर्भनाम्नो वणिजो वन्धुदत्ताभिधा सुता।
भार्या वराहदत्तस्य स्वैरिणी मामसेवत ॥ १९० ॥
गूढं तत्प्रेमविश्रम्भसंभोगसुभगस्थितेः।
सुमहानपि कालो मे सुखिनः क्षणवद्ययौ ॥ १९१ ॥
ततः प्रति गृहान्नेतुं तां प्राप्ते निजभर्तरि।
सा दुःखिता मद्वियोगात्प्रदध्यौ साश्रुलोचना ॥ १९२ ॥
वयस्या योगिनी दृष्ट्वा तस्या विरहवेदनाम्।
मां चक्रे मन्त्रसूत्रेण मर्कटं गमनक्षमम् ॥ १९३ ॥
मन्त्रसूत्राङ्कितगलं सा समादाय मां कपिम्।
हृष्टा भर्तुर्गृहं यातुं प्रतस्थे मन्मुखोन्मुखी ॥ १९४ ॥
पुरुषस्य ततः स्कन्धे स्थितं मां वनमर्कटाः।
जहुस्तस्यां सकरुणं क्रोशन्त्यां पथि दुर्मदाः ॥ १९५ ॥
नाना(२वनसहस्रेषु भ्रान्त्वा प्राप्तो महीमिमाम्।
भवता कृच्छ्रमग्नोऽहं धर्मेशेन समुद्धृतः ॥ १९६ ॥

१. 'तमुद्धृ' ख. २. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ)नेन कण्ठसूत्रेण न विपन्नोऽसि संकटे ।
अतीतानागतज्ञश्च(जातस्तिर्यग्गतावपि ॥ १९७ ॥
श्रुत्वेति जातसौहार्दे निजां तस्मै न्यवेदयत् ।
कथां निश्च)यदत्तोऽथ तां श्रुत्वा प्राह मर्कटः ॥ १९८ ॥
सखे विद्याधरीं मा गा दूरे हि तुहिनाचलः ।
त्वया सह कृतासक्तिर्न च वश्या शुचिस्मिता ॥ १९९ ॥
लतानां च नदीनां च स्त्रीणां राज्ञां च जायते ।
सखे कालेषु कालेषु सत्यं नवनवो रसः ॥ २०० ॥
(नाभिनन्दति चेतसा त्वां प्राप्तां मकरलोचना ।
तदीयान्विपुलः क्लेशः कस्मिन्नु परिगण्यते) ॥ २०१ ॥
हसन्त्यन्यैर्वदन्त्यन्यैस्तिष्ठन्त्यन्यैश्च निर्जने ।
भुञ्जते रतिमन्यैश्च लक्ष्यन्ते न हि योषितः ॥ २०२ ॥
निर्मोकवद्यास्त्यक्ष्यन्ति विलवत्प्रलपन्ति याः ।
को हि ताभिर्भुजङ्गीभिः कण्ठग्रहणमिच्छति ॥ २०३ ॥
विश्रम्भसुभगो भोगः स्त्रीभिः कस्य न वल्लभः ।
किं त्वसौ विरसः पश्चान्मायाचटुलचेष्टितैः ॥ २०४ ॥
भवशर्मा द्विजः पूर्वं सुमदां नाम योषितम् ।
जघान रागकलुषो मूर्ध्नि यष्ट्या भृशाकुलः ॥ २०५ ॥
तत्कोपान्मन्त्रसूत्रेण सा तं चक्रे महावृषम् ।
विभ्राम्य तं ददर्शान्या सानुगा क्वापि योगिनी ॥ २०६ ॥
वार्यमाणानुयायिन्या तस्य सा कण्ठसूत्रकम् ।
व्यदारयत्ततो दैवादाययौ सुमदा पुरः ॥ २०७ ॥
सा दृष्ट्वा मुक्तसूत्रं तं क्रुद्धा तां प्राह योगिनी ।
मया बद्धस्त्वया मुक्तः प्रातस्ते भविता क्षयः ॥ २०८ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. २. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तकेऽधिकः. ३. 'विलपन्त्यविशान्ति याः' ख. ४. 'नागकलहे' ख. ५. 'भ्राम्यन्तं तं' ख. ६. 'न्ययोगिन्या' ख. ७. 'मन्त्रसू' ख. ८. 'न्यवार' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उक्त्वेति तस्यां यातायां योगिनी प्राह तं द्विजम् ।
खड्गं गृहीत्वा संनद्धो भव धैर्यसमः सखे ॥ २०९ ॥
त्वत्कृते सा महावैरात्सुमदा प्रातरेष्यति ।
विधाय कृष्णतुरगीरूपं युद्धाय दुःसहम् ॥ २१० ॥
अहं तु श्वेततुरगी भविष्यामि तया सह ।
संप्रस्तुते प्रहारे च हन्तव्या सासिना त्वया ॥ २११ ॥
इति श्रुत्वा तथेत्याह खड्गमादाय स द्विजः ।
ततः प्रातर्महायुद्धे तयोर्दन्तैः खुरैरपि ।
प्रवृत्ते कृष्णवडवां निजघान स खड्गवान् ॥ २१२ ॥
मायामन्त्रादिचकितो हत्वा तामपरामपि ।
स्वशिष्यां खड्गपट्टेन [1]हत्वा स्वस्थोऽविशद्गृहम् ॥ २१३ ॥
इति मित्रेण कथितं पुरा मे भवशर्मणा ।
[2]ब्रह्मदत्तगृहे [3]गूढकामिनीव्यसनस्थितेः ॥ २१४ ॥
इत्थं स्त्रियः सुविषमा रक्ताकृष्टिपिशाचिकाः ।
स्त्रीनाम्नीं छेत्तुमिच्छामि ग्रीवामपि सखे निजाम् ॥ २१५ ॥
इति निश्चयदत्तस्तं ब्रुवाणमवदत्कपिम् ।
अनुरक्तैव सा साध्वी मम विद्याधराङ्गना ॥ २१६ ॥
खेचराणां गृहे तत्र कांचित्प्राप्स्यामि योगिनीम् ।
मन्त्रसूत्रकृताद्बन्धात्त्वां हि या मोचयिष्यति ॥ २१७ ॥
एवं कथयतोरेव तयोः कमलिनीप्रियः ।
संध्यां त्यक्त्वा जगामाशु प्रशमं रक्तदीधितिः ॥ २१८ ॥
संगता रविणा क्षिप्रं शशिनालिङ्गिता ततः ।
मुहूर्तरागिणी संध्या बभार कुलटाव्रतम् ॥ २१९ ॥
अत्रान्तरे समायातां स समारुह्य यक्षिणीम् ।
प्रतस्थे निश्चितं गन्तुं व्योम्ना विद्याधरीपुरीम् ॥ २२० ॥

---

१. 'छित्त्वा' ख. २. 'वन्धुदत्त' ख. ३. 'गूढं कामिन्ये व्यसनागमे' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमाह मर्कटो दूराद्यत्नः कार्यस्त्वया सखे ।
अस्य मे मन्त्रसूत्रस्य दारणे प्रणयादिति ॥ २२१ ॥
तथेत्युक्त्वा स संप्राप क्षणात्तुहिनभूधरम् ।
मासि मासि शशाङ्कानामाकल्पमिव संचयम् ॥ २२२ ॥
अनुरागपरां भेजे न च संगमनिर्वृतः ।
गान्धर्वेण विवाहेन स तां तत्र मृगेक्षणाम् ॥ २२३ ॥
तया स्मररसस्मेरभवसंभोगसुन्दरम् ।
अवाप प्रेमसर्वस्वमतीतां कथयन्कथाम् ॥ २२४ ॥
प्रेयस्या दत्तविद्योऽथ सुहृदं मर्कटं ययौ ।
द्रष्टुं कदाचित्सोत्कण्ठः कण्ठसूत्रं व्यचिन्तयत् ॥ २२५ ॥
तस्मिन्गते निर्जनस्थां तां तारुण्यतरङ्गिणीम् ।
कश्चिद्विद्याधरसुतो ददर्श स्तबकस्तनीम् ॥ २२६ ॥
करिणीदन्तकान्तेषु तस्या गात्रेषु बिम्बितः ।
स सुधालहरीमग्नः शशाङ्कश्रियमाययौ ॥ २२७ ॥
भज मामिति तेनोक्ता सा लिलेख ह्रिया नता ।
हेलया चरणाग्रेण कटाक्षशबलां भुवम् ॥ २२८ ॥
मौनाद्दत्तावकाशां स तामालिङ्ग्य ससाध्वसम् ।
कण्ठे जग्राह सोत्कण्ठं नीवीविस्रंसनाकुलः ॥ २२९ ॥
मा मा परवधूरसि त्वर्धोक्तिगलिताक्षरम् ।
स चुचुम्ब मुखं तस्या लज्जामीलितलोचनम् ॥ २३० ॥
क्षामाननाब्जपर्यस्तहारफेनप्रकम्पिनीम् ।
स दूषयित्वा प्रययौ तां मातङ्ग इवाब्जिनीम् ॥ २३१ ॥
तस्मिन्प्रयाते सा तस्थावतृप्ता तत्समागमे ।
स्वेदार्द्रस्रस्तधम्मिल्लच्छिन्नहाराङ्कितस्तनी ॥ २३२ ॥
अत्रान्तरे समामन्त्र्य कपिं कान्तानिकेतनम् ।
तूर्णं निश्चयदत्तोऽपि प्रेमाकृष्टः समभ्ययात् ॥ २३३ ॥

१. 'श्यामान' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं दृष्ट्वा नोदतिष्ठत्सा पर्यङ्कार्धं न वात्यजत्।
चाटुकारे कृतोद्वेगा नर्मोक्तिषु निरादरा ॥ २३४ ॥
चुम्बने कूणितमुखी सकोपा नीविमोक्षणे।
आलिङ्गने परावृत्ता प्राह मिथ्याशिरोरुजम् ॥ २३५ ॥
स च[1] गाढानुरक्तस्तन्नाज्ञासीत्तद्विचेष्टितम्।
स्त्रीमतिः स्वप्नमायेव नाप्रबुद्धैर्विचार्यते ॥ २३६ ॥
ततः प्रातः समुत्थाय स ययौ मर्कटान्तिकम्।
सर्वज्ञः स च तं प्राह सा विनष्टा वधूरिति ॥ २३७ ॥
असत्यशङ्किने तस्मै मन्त्रयोगेन मर्कटः।
विद्याधरेणावभिन्नतनुं तां समदर्शयत् ॥ २३८ ॥
स विद्याधरसंसक्तां प्रत्यक्षं वीक्ष्य वल्लभाम्।
रागनिद्रां परित्यज्य वैराग्यालोकमाप्तवान् ॥ २३९ ॥
तूर्णं निश्चयदत्तोऽथ तपसे कृतनिश्चयः।
कपिना सह निर्द्वन्द्वं ययौ सिद्धतपोवनम् ॥ २४० ॥
दयिताविप्रलब्धानामैश्वर्यसुखदुःखिनाम्।
नीचावमानदग्धानां नान्यत्राणं वनं विना ॥ २४१ ॥
ततः पुष्पोच्चयावाप्ता तद्वनं सिद्धयोगिनी।
कपेः स्वरूपसंप्राप्त्यै मन्त्रसूत्रमदारयत् ॥ २४२ ॥
सोमस्वामी निजं रूपं संप्राप्य मुनिवत्ततः।
सह निश्चयदत्तेन क्षीणपापो दिवं ययौ ॥ २४३ ॥
इति शीलं विना देव रक्ष्यन्ते केन योषितः।
गोमुखेनेति कथितं श्रुत्वा सर्वे मुदं ययुः ॥ २४४ ॥

इति निश्चयदत्ताख्यायिका ॥ ५ ॥

गोमुखाश्चर्यकथया प्रहृष्टं नरवाहनम्।
रत्नप्रभासखं दृष्ट्वा मरुभूतिरभाषत ॥ २४५ ॥

---

१. 'जग्राहानु' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेकतुरगोदारकुञ्जरानीकसंकुलः ।
विक्रमादित्यनामाभून्नृपः पाटलिपुत्रके ॥ २४६ ॥
प्रतिष्ठानाधिनाथेन नरसिंहेन भूभुजा ।
जितः[1] प्रतिज्ञां विदधे स वीरस्तत्पराजये ॥ २४७ ॥
रुद्धप्रवेशं मे द्वारि सूच्यमानं पुरःसरैः ।
द्रक्ष्यन्ति सेवकाः सर्वे नरसिंहं न संशयः ॥ २४८ ॥
प्रतिज्ञायेति स ययौ तत्पुरं वेषयोषितः ।
गूढं कार्पटिको भूत्वा राजपुत्रशतैर्वृतः ॥ २४९ ॥
गृहं मदनमालायाः प्राप्य राजोमृतोपमः[2] ।
रममाणस्तया तस्थौ ([3]तत्काञ्चनकृतव्ययः ॥ २५० ॥
अयं कोऽपि महासत्त्वः पृथिवीपालनोचितः ।
ध्रुवमित्यनिशं ध्यात्वा सा तस्थौ) तत्प्रियव्रता ॥ २५१ ॥
प्रददौ नित्यमर्थिभ्यः स सुवर्णशतायुतम् ।
विद्यासु गुरुणा नूनं नकारं न हि शिक्षितः ॥ २५२ ॥
ततो मदनमालायास्तां भक्तिं गणयन्मुहुः ।
प्राह बुद्धिवरं नाम मन्त्रिणं वसुधाधिपः ॥ २५३ ॥
अकृत्रिममहो प्रेम धनत्यागो निरर्गलः ।
निर्विकारमहो सत्त्वमस्यास्तरलचक्षुषः ॥ २५४ ॥
शरीरविक्रयो यासां हेतुर्द्रविणसंचये ।
([4]मया तदर्थाः क्षपिताः पश्य प्रेम्णो विजृम्भितम् ॥ २५५ ॥
प्रत्यहं दिव्यरत्नेन श्रमणेनास्मि सेवितः ।
प्रपञ्चबुद्धिमापूर्वं मन्त्रसाचिव्यसिद्धये) ॥ २५६ ॥
तथेति प्रतिपन्नोऽहं मुक्तः स्वप्नेऽसुरारिणा ।
यागे त्वामेष पशुतां श्रमणो नेतुमुद्यतः ॥ २५७ ॥
हन्तुं पापो वक्ष्यति त्वां प्रणतिः क्रियतामिति ।
त्वं दर्शयेति वाच्योऽसौ त्वया तद्वधसिद्धये ॥ २५८ ॥

१. 'यतः' ख. २. 'जगृहोपमम्' ख. ३–४. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्मिन्हते व्योमगतिर्भवितासीति शासनम् ।
स्वप्ने भगवतः प्राप्य तदकार्षं यथोदितम् ॥ २५९ ॥
ततः प्रभृति मे जातः कुबेरो [1]वरदः सखा ।
तद्धनैः पूरयाम्येनामद्य वारविलासिनीम् ॥ २६० ॥
इत्युक्त्वा धनदं ध्यात्वा सुवर्णपुरुषान्ददौ ।
पञ्च तस्मै सदा येषां छिन्नमङ्गं प्रजायते ॥ २६१ ॥
तान्दत्वा व्योमगो गूढं स निजं नगरं ययौ ।
तद्वियोगाग्नितप्ता च सा तस्थौ [2]निधनोद्यता ॥ २६२ ॥
छित्त्वा तान्बहुशो दत्वा द्विजेभ्यः [3]काञ्चनान्नरान् ।
षण्मासानवधिं चक्रे प्राणत्यागे प्रियं विना ॥ २६३ ॥
([4]अत्रान्तरे तत्कनकपूर्णाञ्ज्ञात्वा द्विजन्मनः) ।
भक्तिं मदनमालाया भूपतिः पुनराययौ ॥ २६४ ॥
चिरं संगमसंतोषप्रत्युज्जीवितया तया ।
रममाणश्चिरं तस्थौ स राजा गुप्तमन्दिरे ॥ २६५ ॥
नरसिंहोऽपि नृपतिस्तां पूर्वपरिसेविताम् ।
वाराङ्गनां समभ्यायात्ततः स्मृत्वा स्मरातुरः ॥ २६६ ॥
द्वारपालेन विधृतो नाम्ना तेनैव सूचितः ।
([5]विक्रमादित्यदेवोऽत्र तिष्ठति ब्रुवतेत्यतिः) ॥ २६७ ॥
ततः प्रतिज्ञासाफल्यं [6]मेने राजान्तरं स्थितः ।
मनोरथाँर्थमुत्तीर्य [7]सौहार्दं तेन भूभुजा ॥ २६८ ॥
विधाय विक्रमादित्यस्तां निनाय निजां पुरीम् ।
([8]इति देव मृगाक्षीणां सहजप्रेमशालिनी ।
कुलेऽपि पण्यनारीणां भक्तिरव्यभिचारिणी) ॥ २६९ ॥

इति मदनमालाख्यायिका ॥ ६ ॥

१. 'धनदः' ख. २. 'त्सुका°' ख. ३. 'नोत्तरान्' ख. ४. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. ५. एतत्स्थाने ख-पुस्तके 'भग्नां वले व्यकश्चेति नामार्थं मान्धैरपि' इति पाठः. ६. 'स्मरन्राजा पुरः स्थितः' ख. ७. 'र्धिं' ख. ८. एतत्कोष्ठान्तर्गत-पाठः ख-पुस्तके त्रुटितः.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति प्रत्यक्षभङ्गे च कथिते मरुभूतिना ।
कथानुगं हरिशिखो राजपुत्रमभाषत ॥ २७० ॥
अभूद्वीरभुजो नाम वर्धमानपुरे नृपः ।
जायाशतादभूत्तस्य प्रिया गुणवराभिधा ॥ २७१ ॥
स पुत्रार्थी भिषग्वाक्यात्स्वयमादाय लुब्धकैः ।
वनच्छागं महाकायं सूदेन विदधे रसम् ॥ २७२ ॥
औषधीचूर्णसंयुक्तं वैद्योऽपि श्रुतवर्धनः ।
सर्वाभ्यो राजकान्ताभ्यो ददौ गुणवरां विना ॥ २७३ ॥
सा हि सर्वार्थिने पत्युर्व्यग्राभूत्पुत्रकाङ्क्षिणी ।
राजदारान्सुगुप्तांस्तु वैद्यो जानाति तां कथाम् ॥ २७४ ॥
ततो दुःखाकुलो राजा दयितां वीक्ष्य वञ्चिताम् ।
चुकोप कुपितं दृष्ट्वा तं च प्राह भिषग्वरः ॥ २७५ ॥
छागशृङ्गद्वयं शेषं कथितं सूपकारिणा ।
तद्रसेन सुतं देवी चूर्णयोगादवाप्स्यति ॥ २७६ ॥
इत्युक्त्वा शृङ्गपूषेण ददौ तस्यै स भेषजम् ।
तेन गर्भवती साभूद्दोहदापाण्डुरच्छविः ॥ २७७ ॥
अथ सर्वेषु जातेषु पुत्रेषु प्राप सा सुतम् ।
कान्तं शृङ्गभुजं नाम गुणविक्रमशालिनम् ॥ २७८ ॥
ततो गुणवरां दृष्ट्वा सपुत्रामधिकप्रियाम् ।
राज्ञः सर्ववधूवक्त्रं चिन्ताव्याकुलतां ययौ ॥ २७९ ॥
संमन्त्र्य नृपं प्राहुस्ताः पृथग्भावाः कथान्तरे ।
सक्ता गुणवती राजन्नन्तःपुरपतेरिति ॥ २८० ॥
सर्वासामेकवाक्येन गाढं शङ्काकुलो नृपः ।
तीर्थयात्रापदेशेन निरोसान्तःपुराधिपम् ॥ २८१ ॥
सर्वतीर्थमयं पुण्यं याते काश्मीरमण्डलम् ।
तस्मिन्देवीमपि क्रोधाद्गूगृहान्तर्न्यवेशयत् ॥ २८२ ॥

१. 'मन्यो' ख. २. 'रसान्तः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्यासत्यविभागेन मन्दशोकां महीपतिः ।
तामाह मासानष्टौ त्वं सहस्वान्धगृहव्यथाम् ॥ २८३ ॥
राज्ये ममायुषि च ते प्रतिकूलं समुत्थितम् ।
दैवज्ञेनाथ कथितं त्वत्क्लेशेन प्रणश्यति ॥ २८४ ॥
इति राजवचः श्रुत्वा सा तथेत्याह दुःखिता ।
भर्तुरभ्युदयैकाग्रसंकल्पा हि कुलाङ्गनाः ॥ २८५ ॥
अत्रान्तरे महाकायो बहुरूपी निशाचरः ।
आयादग्निशिखो नाम तं देशं लोककण्टकः ॥ २८६ ॥
दैवज्ञवचनाज्ज्ञात्वा खेलन्तो राजसूनवः ।
चिक्षिपुस्तं समुद्दिश्य बाणांस्ते चाफला ययुः ॥ २८७ ॥
ततः शृङ्गभुजो वीरः शृङ्गमादाय काञ्चनम् ।
रक्षो जघान तद्वीक्ष्य परे लज्जार्तिं[1] ययुः ॥ २८८ ॥
ईर्ष्याकलुषितस्तत्र मात्रा पूर्वं च बोधितः ।
निर्वासभुजनामा[2] तं सभ्रूभङ्गमभाषत ॥ २८९ ॥
अयं तातस्य दयितो भ्रातः कनकसायकः ।
क्षिप्तस्त्वया शरीराग्रमग्नो नीतश्च रक्षसा ॥ २९० ॥
एतन्न क्षमते तातः शरं हैमं प्रयच्छ तम्[3] ।
नो चेत्त्वदुपरि भ्रातर्वयं मर्तुं समुद्यताः ॥ २९१ ॥
इत्याकृष्टः स तैर्द्वेषात्सानुबन्धो निरुत्तरः ।
ययौ शृङ्गभुजो रक्षोरक्तधारां समुन्नयन् ॥ २९२ ॥
ततो धूमपुरं नाम नगरं तस्य रक्षसः ।
प्रविश्य तत्सुतां कान्तां ददर्श हरिणीदृशम् ॥ २९३ ॥
सापि तं वीक्ष्य सहसा यौवनस्येव यौवनम् ।
अभिलाषवती मेने मन्मथस्यापि मन्मथम् ॥ २९४ ॥
परस्परकथां ज्ञात्वा तौ संजातमनोभवौ ।
मिथो जीवितसर्वस्वपदे विविशतुः क्षणात् ॥ २९५ ॥

---

१. 'ता' ख. २. 'निर्वास भुजनामानं' ख. ३. 'नः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो रूपशिखाभिख्या पितरं सा व्यजिज्ञपत् ।
दृष्टो मया समुचितो वरस्तस्मै प्रयच्छ माम् ॥ २९६ ॥
इति पुत्रीवचः श्रुत्वा तं च दृष्ट्वा तथेति सः ।
सुतामग्निशिखः प्राह तद्वञ्चनसमुद्यतः ॥ २९७ ॥
राजपुत्रं समवदत्स्वैरं रूपशिखा ततः ।
भगिन्यो मम पञ्चाशत्सन्ति तुल्या विधाय ताः ॥ २९८ ॥
त्वां ततो वक्ष्यति ज्ञात्वा गृहाण दयितामिति ।
मुक्तावल्यो गले सन्ति सर्वासामेव किं त्वहम् ॥ २९९ ॥
कण्ठान्मूर्ध्नि विधास्यामि तत्क्षणान्मौक्तिकावलीम् ।
तया मां प्रत्यभिज्ञाय प्राप्स्यसि प्रौढकिल्बिषः ॥ ३०० ॥
न च त्वां वञ्चकस्तातः संशये पातयत्यसौ ।
तिलखारीशतं क्षेत्रे क्षिप्त्वा क्षिप्रमिति प्रभो ॥ ३०१ ॥
त्वं संक्षिपेति च पुनस्त्वां वक्ष्यति सुलोचनः ।
प्रेरयिष्यति घोरस्य भ्रातुर्धूमशिखस्य च ।
गृहं निमन्त्रणाय त्वां मृषा वैवाहकोत्सवे ॥ ३०२ ॥
इत्येतास्त्वद्विनाशाय मायास्तातेन कल्पिताः ।
मद्विद्यारक्षिताः सर्वास्तव धैर्यमहोदधे ॥ ३०३ ॥
इति प्रियावचः श्रुत्वा सर्वं शृङ्गभुजोऽभ्यधात् ।
यथोक्तं रूपशिखया तेन रक्षः स्वयं ययौ ॥ ३०४ ॥
ततः प्रभाते तां पित्रा परिणीय समर्पिताम् ।
तत्र तस्थौ दिशल्लीलाविलासे मदनोत्सवम् ॥ ३०५ ॥
हेमकाण्डं ततः प्राप निजवल्लभयार्पितम् ।
भ्रातृभिर्यत्कृते दूरं द्वेषाद्युक्त्या विवासितः ॥ ३०६ ॥
कदाचिदथ सोत्कण्ठः पितुर्मातुश्च दर्शने ।
ययौ शृङ्गभुजः कान्तां समादाय तुरङ्गमैः ॥ ३०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलक्षितं गतं ज्ञात्वा सं[1] सभार्यं निशाचरः।
प्रक्षोभितनभोवातः पश्चात्कोपाकुलो ययौ ॥ ३०८ ॥
ततः प्रभाते तां पित्रा परिणीय समर्पिताम्।
तमागतमतिक्रुद्धं दृष्ट्वा रूपशिखावदत् ॥ ३०९ ॥
अस्मानग्निशिखः कोपादयमायाति भीषणः।
प्रेषितः पुष्करावर्तैः क्षतदूत इवावनिम् ॥ ३१० ॥
तदेषा वञ्चयाम्येनं मायया मन्दचेतसम्।
पापकर्ममहा[2]म्भोधिनिमग्नमिव संस्मृतिः[3] ॥ ३११ ॥
इत्युक्त्वा विद्यया साभूत्सहसा काष्ठहा[4]रिकः।
जवाद्राक्षसमायान्तं पृच्छन्तं साभ्यभाषत ॥ ३१२ ॥
पञ्चतां राक्षसेन्द्रोऽद्य दैवादग्निशितो गतः।
तदर्थमिदमानीतं काष्ठं यत्नेन काननात् ॥ ३१३ ॥
इति तद्वचनं श्रुत्वा मौर्ख्यादग्निशिखस्ततः।
अमन्यत मृतोऽस्मीति स्वभावजडमानसः ॥ ३१४ ॥
ततो निजगृहं गत्वा स पप्रच्छ स्वयोषितः।
अपि सत्यं मृतोऽस्मीति श्रुत्वा नेत्यूचिरे च ताः ॥ ३१५ ॥
ततः पुनः समभ्यायाद्धन्तुं जामातरं जवात्।
तं दृष्ट्वा लेखहारोऽभूत्क्षिप्रं रूपशिखा पुनः ॥ ३१६ ॥
अपि दृष्टौ त्वया मार्गे दम्पती तुरगस्थितौ।
इति पृच्छन्तमवदत्तमसौ लेखहारकः ॥ ३१७ ॥
दर्पादग्निशिखो युद्धे जीवशेषः कृतोऽरिभिः।
वार्ता तन्भ्रातुरानीता मया लेखेन सत्वरम् ॥ ३१८ ॥
इति श्रुत्वा मूढमतिः स गत्वा स्वगृहं पुनः।
पप्रच्छ हासविवशाः स्वस्य वृत्तान्तमङ्गनाः ॥ ३१९ ॥
इत्यसौ वञ्चितः पुत्र्या मूर्खः सुप्त इव द्विपः।
हास्योपमानतां प्राप्तः प्रज्ञासु निरवग्रहः ॥ ३२० ॥

१. 'तं' ख. २. 'दा' ख. ३. 'स्मृतिः' ख. ४. 'भा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्मिन्नवसरे प्राप्ते निजं शृङ्गभुजः पुरम् ।
आत्रे हेमशरं दत्त्वा द्रष्टुं जनकमभ्ययात् ॥ ३२१ ॥
राजा तु ज्ञातवृत्तान्तः पुत्रं दृष्ट्वा वधूसखम् ।
हृष्टो महोत्सवं चक्रे सिन्दूरारुणिताङ्गणम् ॥ ३२२ ॥
याति काले नरपतिः प्रविश्यान्तःपुरं वचः ।
शुश्राव मधुमत्ताया जायायाः स्वप्नविभ्रमे ॥ ३२३ ॥
युक्त्या गुणवती तावन्मिथ्या संदूषिता सती ।
चिन्तनीयस्तु तत्पुत्रः श्रुत्वेति प्रययौ नृपः ॥ ३२४ ॥
भूगृहात्तामथोद्धृत्य प्रसाद्य निजवल्लभाम् ।
संजातप्रत्ययो राजा यौवराज्ये सुतं न्यधात् ॥ ३२५ ॥
(अन्तःपुरेभ्यः कुपितं पुत्रेभ्यश्च न्यवारयत् ।
यत्नाद्गुणवरा देवी तत्पुत्रश्च नराधिपम् ॥ ३२६ ॥
अत्रान्तरे समभ्यायात्स विप्रोऽन्तःपुराधिपः ।
स्नात्वा पुण्येषु तीर्थेषु नानाव्रतकृशाकृतिः ॥ ३२७ ॥
संपूज्य तं महीपालः पश्यञ्शृङ्गभुजं सुतम् ।
विजिताशेषपातालं जहर्ष दयितासखः) ॥ ३२८ ॥
इत्येवं शीलशालिन्यो देव भर्तृहिते रताः ।
कुलालंकरणं कान्ताः सन्ति रूपशिखा यथा ॥ ३२९ ॥

इति रूपशिखाख्यायिका ॥ ७ ॥

श्रुत्वा हरिशिखेनेति कथितं नरवाहनः ।
रत्नप्रभासखः प्रायात्पितुरन्तःपुरं कृती ॥ ३३० ॥
तत्र प्रणम्य वत्सेशं देव्यौ च स मधूत्सवम् ।
भेजे वयस्यसहितो दयितानन्दनिर्भरः ॥ ३३१ ॥
निजमन्तःपुरं गत्वा रत्नपर्यङ्कमास्थितः ।
रत्नप्रभाङ्कविन्यस्तपूर्वदेहो रराज सः ॥ ३३२ ॥

---

१. 'प्य' ख. २. 'प्यज्ञा' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मरुभूतिमथ क्षीवं विलोक्य स्खलिताक्षरम्।
गोमुखः प्राह राजेन्द्र गृहे किं न[1] स संयतः॥ ३३३॥
संक्रुद्धश्चासि मद्वाक्ये नीतिबाह्य इवेक्षसे।
अथ वा दुर्ग्रहरतावनुनेतुं क ईश्वरः॥ ३३४॥
प्रतिष्ठानपुरे पूर्वं तपोदत्ताभिधो द्विजः।
गङ्गाकूले तपस्तेपे विद्यार्थी शंसितव्रतः॥ ३३५॥
तस्य घोरेण तपसा सहस्राक्षो विषण्णधीः।
विप्ररूपः समभ्यायात्तदाश्रमनदीतटम्॥ ३३६॥
तत्र दोर्भ्यां समादाय सिकताः स मुहुर्मुहुः।
बबन्ध सेतुं सावेगप्रवाहे[2] बहिरन्तरे॥ ३३७॥
तं दृष्ट्वा स तपःस्थोऽपि विस्मितः स्मितशुभ्रया।
गिरा तमाह किमयं मिथ्या तव परिश्रमः॥ ३३८॥
सैकतः सेतुबन्धोऽयं तव हासाय निष्फलम्।
औदार्यं निर्धनस्येव मूर्खस्येव नयक्रमः॥ ३३९॥
इति तस्य वचः श्रुत्वा स तं प्राह द्विजाकृतिः।
अहो परोपदेशेषु विद्वान्सर्वात्मना जनः॥ ३४०॥
विस्मयस्ते द्विजश्रेष्ठ निष्फले मम कर्मणि।
कथमश्रुतपाण्डित्यमब्रुवंस्त्वं समीहसे॥ ३४१॥
इयं शशविषाणेच्छा व्योम्नि वा चित्रकल्पना।
अनक्षरोऽपि विन्यासो यद्विद्याध्ययनं विना॥ ३४२॥
निशम्यैतत्तपोदत्तः साधूक्तमिति चेतसा।
निश्चित्य दुर्ग्रहात्तस्माद्विरराम महातपाः॥ ३४३॥
इत्येवमुपदेशेन निवर्तन्ते विपर्ययात्।
साधवो न तु मूर्खोऽयं मरुभूतिः शृणोति मे॥ ३४४॥
इति नर्मोपहासाय गोमुखेनोपवर्णिते[3]।
हसन्हरिशिखः प्राह मरुभूतिं व्यलोकयन्॥ ३४५॥

१. 'त्वसमं यतः' ख. २. 'हसरिदन्तरे' ख. ३. 'चेतसे' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विप्रो विभूतिसोमाख्यो वाराणस्यामभूत्पुरा ।
दरिद्रश्च कुलीनानां नित्यं हि श्रीः पराङ्मुखी ॥ ३४६ ॥
धनिनो रूपसंपन्नान्स दृष्ट्वा पर्यतप्यत ।
किमहं विहितो धात्रा शुष्ककुब्ज इव द्रुमः ॥ ३४७ ॥
इति संचिन्त्य स ययौ रूपद्रविणकाङ्क्षया ।
मानी तपोवने तीव्रतपःक्षपितविग्रहः ॥ ३४८ ॥
अनेकसंयमक्षामं तमेत्य त्रिदिवेश्वरः ।
उवाच जम्बुकाकारः पूतिविस्रवणाकुलः(?) ॥ ३४९ ॥
([1]अहो नैवास्ति संतोषः कस्यचिद्भगवान्द्विजः ।
धनार्थी पुण्यमात्मानमिदं न बहु मन्यसे) ॥ ३५० ॥
अहो सुकृतिनं[2] राजा यस्त्वं मानुषयोनिजः ।
ब्राह्मणश्च तपस्वी च स्पृहणीयोऽसि सुव्रतः ॥ ३५१ ॥
अहो धन्योऽसि यन्नाखुर्न मण्डूको न कुक्कुटः ।
न पुष्कसो न चाण्डालो न कुष्ठी न जडोऽपि वा ॥ ३५२ ॥
इति तस्य वचः श्रुत्वा विचिन्त्य मनसा क्षणम् ।
सत्यमेतदिति ज्ञात्वा त्यक्तकामो ययौ गृहान् ॥ ३५३ ॥
इति बुद्धिमतां देव देवनस्खलिता मतिः ।
युक्तिमात्रोपदेशेन सहसैव प्रसीदति ॥ ३५४ ॥
एवं नर्मकथाभिस्ते कोपमन्तः परस्परम् ।
सचिवा नरवाहस्य हसन्तश्च मुदं ययुः ॥ ३५५ ॥
ततो रत्नप्रभा प्राह ([3]धन्यो बत मम प्रियः ।
सर्वे स्निग्धाश्च यस्यैते सुहृदश्चित्तदर्पणाः ॥ ३५६ ॥
इति रत्नप्रभावाक्यं श्रुत्वा प्राह) तपन्तकः ।
देवि धन्या वयं येषां भक्तिः श्रीनरवाहने ॥ ३५७ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. २. 'ना राज्ञा यस्त्वं समुपयोजितः' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं च हेमप्रभकुले वैजयन्ती कुलोज्ज्वला ।
धन्या धराशशी[1] यस्याः प्रणयी नरवाहनः ॥ ३५८ ॥
विलासशीलो भूपालः श्रीकण्ठविषये पुरा ।
बभूव चारुचरितः स्वच्छप्रकृतिमानसः ॥ ३५९ ॥
तस्य पद्मप्रभा नाम पद्मिनीव रवेः प्रिया ।
बभूव कामवसतिर्लावण्यगुणशालिनी ॥ ३६० ॥
स कदाचिन्निजं दृष्ट्वा जराधवलमाननम् ।
सतुषारमिवाम्भोजमभूच्चिन्ताग्नितापितः ॥ ३६१ ॥
शृङ्गारसुभगाभोगं शोभते तावदद्भुतम् ।
यावद्भृङ्गाङ्गनाजालश्यामलः केशसंचयः ॥ ३६२ ॥
मृत्युसिंहमहादंष्ट्राकालकोपसितच्छटाः ।
जरा हि नाम रूपस्य शमलस्येव चन्द्रिका ॥ ३६३ ॥
उष्ट्रस्येव विलासेन गीतेनेव खरस्य च ।
वृद्धस्य स्मरभोगेन हास्यं कस्य न जायते ॥ ३६४ ॥
इति ध्यात्वा महीपालो यौवनार्थी रसायनम् ।
वैद्यं तरुणचन्द्राख्यमपृच्छत्पुरतः स्थितम् ॥ ३६५ ॥
कालक्लृप्तां जरां मूर्खो ([2]बलात्संत्यक्तुमिच्छति ।
वैद्यः क्षणं विचिन्त्येति नराधिपमभाषत ॥ ३६६ ॥
देव भूमिगृहे गुप्ते मासानष्टौ स्थिताय ते) ।
भैषज्यैर्यौवनं युक्त्या विधास्यामि स्थिरो भव ॥ ३६७ ॥
इत्युक्ते भूगृहे भूपं प्रविष्टं यौवनेच्छया ।
हत्वा बलेन तरुणं सोऽन्यं नरमवेशयत् ॥ ३६८ ॥
बहिः स्थानान्तरस्थस्य ([3]प्रतीहारेण कीर्तितान् ।
अमात्यान्नामभिस्तस्य शनकैर्विदितान्व्यधात् ॥ ३६९ ॥
द्वारि संभाषणव्यग्र)मन्तःपुरकदम्बकम् ।
तेनोपदिष्टमज्ञासीच्छ्रुत्वान्ध इव नामभिः ॥ ३७० ॥

१. 'समा' ख. २–३. 'एतत्कोष्ठान्तर्गतपाठः' ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो निर्गत्य तरुणो जनानां विस्मयप्रदः ।
सान्तःपुरपुरामात्यं सुकुमारं चरं महत् ॥ ३७१ ॥
भेजे राज्यमहोत्साहः स युवा पूजयन्द्विजान् ।
अजरोऽयमिति प्राप प्रसिद्धिं विबुधोपमः ॥ ३७२ ॥
ततो यदृच्छयावाप्तौ वयस्यौ निजसंपदाम् ।
विस्तीर्णविभवौ चक्रे पद्मदर्शविचिन्तकौ ॥ ३७३ ॥
कदाचिदथ तं प्राह स भिषग्विजने नृपम् ।
तव राज्यं मया दत्तं मामेवाद्य न मन्यसे ॥ ३७४ ॥
इति वैद्यवचः श्रुत्वा भूपतिः प्राह सस्मितम् ।
स्वकर्ममुद्रितो लोकः कः कस्मै किं प्रयच्छति ॥ ३७५ ॥
प्राग्जन्मविहितं नाम तत्तु नान्यदवाप्यते ।
प्राप्तमन्यैः सुदूरस्थं करस्थं हारितं परैः ॥ ३७६ ॥
अहं जातिस्मरो वैद्य मत्कथां ज्ञास्यसीति तम् ।
भूमिपालः समाभाष्य ययौ स्नातुं नदीतटम् ॥ ३७७ ॥
राजपुत्रैर्वृतस्तत्र स ददर्श जलान्तरे ।
पञ्च काञ्चनपद्मानि दृष्ट्वा वैद्यमुवाच च ॥ ३७८ ॥
भिषग्वर कुतो नाम हेमाब्जानामिहागमः ।
गच्छ केदारकं क्षिप्रं जानीहि चतुरो ह्यसि ॥ ३७९ ॥
ततो राजाज्ञया गत्वा नदीतीरेण सत्वरः ।
दूरे तीर्थतटासक्तं सोऽपश्यच्छैवमालयम् ॥ ३८० ॥
तत्र स्नातः स्मरारातिं प्रणम्य शशिशेखरम् ।
विश्रान्तो वृक्षशाखाग्रे नरास्थीनि व्यलोकयत् ॥ ३८१ ॥
अत्रान्तरे जलधरैर्मुक्ते धाराकदम्बके ।
शाखास्थितास्थिपतितं नद्यां तदपतज्जलम् ॥ ३८२ ॥
तत्क्षणे तीर्थमासाद्य प्रयातं हेमपद्मताम् ।
इति दृष्ट्वा तदाश्चर्यं तीर्थे क्षिप्त्वास्थिसंचयम् ॥ ३८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यवेदयद्यथादृष्टं गत्वा भूमिभुजे भिषक् ।
ततोऽब्रवीन्नृपो वैद्यं विविक्ते मित्रयोः पुरः ॥ ३८४ ॥
शरीरं शंभुनिलये त्यक्तं तस्मिन्मया पुरा ।
त्वं चैतौ च बभूवुर्मे सुहृदस्तीर्थसेवनात् ॥ ३८५ ॥
तान्यस्थीनि मदीयानि तीर्थे क्षिप्तान्यथो त्वया ।
अधुना कृतकृत्योऽहमित्युक्त्वा निर्वृतिं ययौ ॥ ३८६ ॥
इत्येवं पूर्वसंबन्धाद्भवन्ति प्रीतयो नृणाम् ।
प्राक्सेवितोऽयं धन्यानां ध्रुवं भो नरवाहन ॥ ३८७ ॥

इत्यजराख्यायिका ॥ ८ ॥

तपन्तकस्येति वचः श्रुत्वा भक्तिपुरःसरम् ।
सर्वे साधूक्तमित्यूचुः प्रहर्षोत्फुल्ललोचनाः ॥ ३८८ ॥
अथान्तःपुरपर्यन्ते श्रुत्वा विक्रोशतां स्वनम् ।
निर्गत्य पृष्ट्वा तत्रस्थान्प्रविश्य प्राह गोमुखः ॥ ३८९ ॥
देव कञ्चुकिनः पुत्रो यातो धर्मगिरेर्दिवम् ।
तं निशम्याप्तमोहोऽसौ नीतो निजजनैर्गृहम् ॥ ३९० ॥
इति श्रुत्वा सकरुणं विषण्णे नरवाहने ।
क्षणं रत्नप्रभायां च मरुभूतिरभाषत ॥ ३९१ ॥
अश्वत्थपत्रतरलान्यायूंषि किल देहिनाम् ।
किं तु नागार्जुनस्यासीत्तत्स्थैर्यकरणे श्रमः ॥ ३९२ ॥
चिरायुरिति भूपालश्चिरायुनगरेऽभवत् ।
रससिद्धोऽभवत्तस्य मन्त्री नागार्जुनाभिधः ॥ ३९३ ॥
राज्ञस्तदौषधजुषो याते वर्षशताष्टके ।
भार्यापुत्राश्च बहवः कालेन त्रिदिवं गताः ॥ ३९४ ॥
ततो जीवहरं नाम यौवराज्ये स भूपतिः ।
विदधे तनयं सोऽपि मात्रे हृष्टो न्यवेदयत् ॥ ३९५ ॥
सावदद्बहवः पुत्रा यौवराज्ये महीभुजा ।
अभिषिक्ताः पुरा तेन दिवं याताः क्षतायुषः ॥ ३९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिरायुरेष नृपतिर्नागार्जुनकृतौषधैः ।
द्विषष्टिवर्षतां प्राप्तो न कदाचिद्विनङ्क्ष्यति ॥ ३९७ ॥
राज्यकामोऽसि चेत्पुत्र त्वं नागार्जुनमेव तम् ।
गत्वा याचस्व मूर्धानं हते तस्मिन्नराधिपः ॥ ३९८ ॥
दिवं प्रयास्यति क्षिप्रं त्वं तु राजा भविष्यसि ।
अनिषेधव्रतो नित्यं स च नागार्जुनोऽर्थिषु ॥ ३९९ ॥
इति मातुर्वचः श्रुत्वा लुब्धो राजकुमारकः ।
तथेत्युक्त्वा प्रतिययौ नागार्जुननिवेशनम् ॥ ४०० ॥
अत्रान्तरे प्रिये पुत्रे बाल एव दिवं गते ।
नागार्जुनो जगत्सर्वं साम्रतं कर्तुमुद्ययौ ॥ ४०१ ॥
ततो भीतः सहस्राक्षो विमृश्य सहसाश्विनौ ।
न्यवारयत सौहार्दाद्रसायनविधानतः ॥ ४०२ ॥
अत्रान्तरे राजसुतस्तं मूर्धानमयाचत ।
छिन्धीति वादिनस्तस्य ग्रीवां चिच्छेद सोऽसिना ॥ ४०३ ॥
कण्ठे कुलिशसारस्य राजपुत्रेण पातिताः ।
प्रययुः खण्डशः खड्गा बिसकन्दाङ्कुरा इव ॥ ४०४ ॥
स्वयं तेन वितीर्णे तु मस्तके राजसूनवे ।
चिरायुस्तच्छुचा[2] राज्यं त्यक्त्वा मुनिरभूद्वने ॥ ४०५ ॥
तं च राजसुतं क्रूरं प्रेक्ष्य राजनयानुगाः ।
हत्वा नागार्जुनसुता द्वितीयं चक्रिरे नृपम् ॥ ४०६ ॥
इत्येवं देवराजेन करुणाब्धिर्निवारितः ।
पुंसाममरताधाने स गृहीतव्रतोऽमृतैः[3] ॥ ४०७ ॥
इति नागार्जुनाख्यायिका ॥ ९ ॥
इति सत्त्ववचोवृत्तं कथितं मरुभूतिना ।
वसन्तकः समभ्येत्य नरवाहनमभ्यधात् ॥ ४०८ ॥

१. 'स्र' ख. २. 'रपि तच्छुचा त्यक्त्वा' ख. ३. 'त' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृगयारसिको गन्तुं देवो वत्सनरेश्वरः ।
प्रस्तुतस्त्वं च सोत्कण्ठो वनिनं द्रष्टुमिच्छसि ॥ ४०९ ॥
इत्याकर्ण्य प्रियतमामामन्त्र्य विरहाकुलाम् ।
वनं गजरथानीकैः सह पित्रा ययौ क्षणात् ॥ ४१० ॥
([1]निघ्नन्कुञ्जरशार्दूलवराहहरिणान्वने ।
विजहार तुरङ्गेण कान्तां रत्नप्रभां स्मरन् ॥ ४११ ॥
ततः स च जवोत्कृष्टतुरङ्गो) निश्चलासनः ।
ललास गुलिकाकेलितालटङ्कारसुन्दरः ॥ ४१२ ॥
तस्य कङ्कणझाङ्कारकरस्फाटिकनिर्मिता ।
गुलिका मूर्च्छिता यस्याः पपात विशदत्विषः ॥ ४१३ ॥
साब्रवीद्रतसौभाग्यदर्पस्ते राजपुत्रक ।
कर्पूरमञ्जरीं कान्तां प्राप्य किं न करिष्यसि ॥ ४१४ ॥
नरवाहो निशम्येति प्रसाद्य मुनियोषितम् ।
कर्पूरमञ्जरी क्वासाविति पप्रच्छ कौतुकात् ॥ ४१५ ॥
सावदज्जलधेः पारे कर्पूरद्वीपवासिनः ।
राज्ञः कर्पूरचन्द्रस्य सुता कर्पूरमञ्जरी ॥ ४१६ ॥
यस्याः कुवलयच्छायैर्लोचनांशुभिरङ्कितम् ।
शङ्के शशाङ्कं लावण्यशेषेण विदधे विधिः ॥ ४१७ ॥
गच्छ तां प्राप्स्यसि क्षिप्रमित्युक्त्वा सा तिरोदधे ।
प्रतस्थे गोमुखसखो नरवाहोऽपि तां दिशम् ॥ ४१८ ॥
चिरात्प्रतिनिवृत्तोऽथ वनाद्वत्सनरेश्वरः ।
([2]अपश्यन्दयितं पुत्रमभूच्छोकानलाकुलः ॥ ४१९ ॥
रत्नप्रभा ततोऽभ्येत्य वत्सराजं व्यजिज्ञपत् ।
ज्ञातं मयार्यपुत्रस्य वृत्तं प्रज्ञप्तिविद्यया ॥ ४२० ॥
तापसीवचसा ज्ञात्वा कान्तां कर्पूरमञ्जरीम् ।
स यातो वारिधेर्द्वीपं तत्समागमलालसः ॥ ४२१ ॥

१-२. 'एतत्कोष्ठान्तर्गतपाठः. ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आर्यपुत्रस्य रक्षायै मयातिविषमेऽध्वनि ।
विद्या मायावती नाम प्रेषिता क्लेशमञ्जरी ॥ ४२२ ॥
इति स्नुषावचः श्रुत्वा हृष्टो वत्सनरेश्वरः) ।
अमृतेनेव संसिक्तः सहसा धृतिमाप्तवान् ॥ ४२३ ॥
नरवाहनदत्तोऽपि तुरङ्गेण सगोमुखः ।
व्रजन्ब्रह्मप्रभां विद्यां विवेद श्रेयसे स्थिताम् ॥ ४२४ ॥
तत्प्रभावेण दिव्यानि फलानि प्राप्य निर्वृतः ।
सरश्च क्षुत्परिश्रान्तितृष्णाः स सहसात्यजत् ॥ ४२५ ॥
ततो दिनैः कतिपयैरवाप्य गहनं महत् ।
दिवाकरकरक्रान्तं तमभाषत गोमुखः ॥ ४२६ ॥
अभूदिरावती नाम त्रिदिवस्पर्धिनी पुरी ।
त्यागसेनाभिधो राजा तस्यां शक्रप्रभोऽभवत् ॥ ४२७ ॥
बभूवतुः प्रिये तस्य भार्ये रूपगुणाधिके ।
काव्यालंकारनाम्नी च देवी चाधिकसंगमा ॥ ४२८ ॥
स पुत्रार्थी फलयुगं तपसा पार्वतीवरात् ।
प्राप्य प्रत्ययमभ्यायात्प्रियामधिकसंगमाम् ॥ ४२९ ॥
सा प्राप्य विधिना हृष्टा फलमेकं वरार्पिता ।
द्वितीयमपि चौर्येण भुक्त्वासूत सुतद्वयम् ॥ ४३० ॥
तमिन्दीवरसेनाख्यमनिच्छासेनमप्यसौ ।
विलोक्य काव्यालंकारा बभूव भृशदुःखिता ॥ ४३१ ॥
ततः प्रवृत्तौ तौ जेतुं पृथिवीं पितुराज्ञया ।
सामात्यैर्विपुलानीकैर्जग्मतुः कुलशालिनौ ॥ ४३२ ॥
विचिन्त्य काव्यालंकारा करलेखैर्दिदेश तान् ।
अमात्यान्नृपतेर्नाम्ना वध्यौ राजसुताविति ॥ ४३३ ॥
विचारयन्सुलेखार्थं करुणार्द्रेषु मन्त्रिषु ।
शङ्कितौ तौ प्रययतुर्नृपपुत्रौ महाटवीम् ॥ ४३४ ॥

१. 'थो' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विन्ध्याटव्यां परिश्रान्तौ तृष्णार्तौ पार्वतीस्मृते।
बभूवतुः क्षणात्स्वस्थौ सिच्यमानाविवामृतैः॥ ४३५॥
अवाप तत्र सहसा खड्गं दुर्गावरात्कृती।
येनेन्दीवरसेनोऽभूद्दुर्जयस्त्रिदशैरपि॥ ४३६॥
अत्रान्तरे त्यागसेनो ज्ञात्वा पुत्रौ विवासितौ।
काव्यालंकारया कूटं लेखैर्मन्त्रिसमर्पितैः॥ ४३७॥
कारागृहे तां विन्यस्य निरस्यामात्यमण्डलम्।
शोचन्प्रदध्यौ तनयावश्विनाविव रूपिणौ॥ ४३८॥
अथेन्दीवरसेनोऽपि खड्गी शैलपुराधिपम्।
राक्षसं शैलदंष्ट्राख्यं हत्वा मायाविनं रणे॥ ४३९॥
अवाप खड्गदंष्ट्राख्यां तनयां नवयौवनाम्।
तथा मदनदंष्ट्राख्यां पुष्पेषोर्जैत्रमायुधम्॥ ४४०॥
तत्र लीलावतीकेलिसरसो विलसन्मुहुः।
निनाय सुबहून्मासान्सेव्यमानोऽनुजेन सः॥ ४४१॥
ततः खड्गप्रभावाप्तविद्यया धिष्ण्यगामिनम्।
सोऽनुजं प्रेषयामास स्ववृत्ताख्यापने पितुः॥ ४४२॥
(तस्मिन्गते खड्गदंष्ट्रा स्नात्वा तूर्णं समागता।
प्रियं मदनदंष्ट्रायाः कण्ठलम्बितमैक्षत॥ ४४३॥
ईर्ष्यावत्यथ तं खड्गं वह्नौ कोपाज्जुहाव सा।
खड्गे निष्प्रभतां याते राजपुत्रोऽभवद्व्यसुः॥ ४४४॥
अत्रान्तरे निजकथां जनकाय निवेद्य सः।
अनुजस्तं समभ्येत्य ददर्श शवमग्रजम्॥ ४४५॥
शताभ्यां भ्रातृपत्नीभ्यां सह मर्तुं समुद्यतः।
शुश्रावाकाशवचनं सुधाभ्रनिनदोपमम्॥ ४४६॥
खड्गे गौरीवरादस्मिन्पुनर्निर्मलतां गते।
जीवत्येष निजां जातिं स्मृत्वा शापक्षयादिति॥ ४४७॥

१. 'यो' ख. २. 'लेङ्गाख्यां' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजपुत्रस्तत्र खड्गं दग्धं गौरीवरात्पुनः ।
क्षिप्रं निर्मलमाधाय भ्रातरं समजीवयत् ॥ ४४८ ॥
अथेन्दीवरसेनस्तं प्राप्तजीवोऽभ्यभाषत ।
तुषारशैलशिखरे मुक्तापुरनिवासिनः ॥ ४४९ ॥
सुतोऽस्मि मुक्तसेनस्य त्वं च विद्याधरप्रभो ।
पद्मसेनाभिधानोऽहं रूपसेनस्तथा भवान् ॥ ४५० ॥
पद्मा चन्द्रावती चेमे प्राग्भार्ये मे बभूवतुः ।
परस्परेर्ष्याकलहैरेताभ्यां तापितः पुरा ॥ ४५१ ॥
अवदं पितरं नित्यं वनं यामीति दुःखितः ।
स मद्वियोगनिर्विण्णो मां शशापाहितग्रहम् ॥ ४५२ ॥
येनाहं मर्त्यतां प्राप्तस्त्वं च मद्भक्तिसंश्रयात् ।
मर्त्यत्वं पृथिवीं जित्वा यदा पित्रे प्रदास्यसि ॥ ४५३ ॥
शापं तदा त्यक्ष्यसीति शान्तकोपोऽब्रवीत्स माम् ।
ततः परस्परं शापात्पत्न्यौ मे मत्कृते रुषा ।
अवाप्ते रक्षसो भावमित्युक्त्वा विरराम सः ॥ ४५४ ॥
ततो विद्याधरपुरं प्रापतुस्ते सुलोचने ।
ते च जातिस्मराः सर्वे त्यागसेनपुरं ययुः ॥ ४५५ ॥
प्रणम्य पितरं तत्र सभार्यः सानुजोऽथ सः ।
विजित्य पित्रे पृथिवीं ददौ खड्गबलोत्कटः ॥ ४५६ ॥
अथ वैद्याधरीं जातिं निवेद्य जनकाय सः ।
व्योम्ना मुक्तापुरं गत्वा भेजे लक्ष्मीं सहानुज ॥ ४५७ ॥
इत्येवं पृथुसत्त्वानां महतां क्लेशविप्लुषः ।
भवन्ति धैर्ययोगेन क्षिप्रमेव प्रयान्ति च ॥ ४५८ ॥

इतीन्दीवरसेनाख्यायिका ॥ १० ॥

गोमुखेनेति कथितं निशम्य नरवाहनः ।
धीरः प्रतस्थे सोत्कण्ठवल्लभाध्यासितां दिशम् ॥ ४५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो ददर्श रुचिरं सुमेरुशिखरोपमम् ।
संगमं नाम नगरं काञ्चनोत्तालतोरणम् ॥ ४६० ॥
न तत्र पुरुषः कश्चिद्दृश्यते ललनापि वा ।
केवलं यन्त्ररचिता भान्ति काष्ठमया नराः ॥ ४६१ ॥
स प्राप्यान्तःपुरं हैमं ददर्श स्फटिकासने ।
सजीवमेकं पुरुषं सेवितं यन्त्रचेटकैः ॥ ४६२ ॥
नरवाहनदत्तस्तं दृष्ट्वा विपुलविस्मयः ।
पप्रच्छ पृष्टः सोऽप्याह वितीर्णकनकासनः ॥ ४६३ ॥
राज्ञो महाबलाख्यस्य पुरे काञ्चीति विश्रुते ।
अहं वज्रधरो नाम तक्षकृत्कुशलः प्रभो ॥ ४६४ ॥
यन्त्रमायाकृतौ यस्य मयस्येव यशो भुवि ।
मम प्राणधरो नाम भ्राता कुशल········ ॥ ४६५ ॥
वेश्याविलासरसिको दिवसैर्निर्धनोऽभवत् ।
स यन्त्री किल काहंसैः कोशाद्रत्नानि भूपतेः ॥ ४६६ ॥
जहार वार्यमाणोऽपि मया निग्रहभीरुणा ।
परेऽह्नि तेषु बद्धेषु कोशपालेषु पक्षिषु ॥ ४६७ ॥
स ययौ यन्त्रचक्रेण राजभीत्या दिगन्तरम् ।
भीतोऽहमपि यन्त्रेण यत्र द्विगुणरंहसा ॥ ४६८ ॥
प्राप्तः शिवप्रसादेन शून्यं हैममिदं पुरम् ।
इह स्थितस्य मे देव वस्त्रालंकारभोजनम् ॥ ४६९ ॥
चिन्तितं संभवत्येव विना मानुषसंगमम् ।
निर्जनस्थितिखिन्नेन दिव्यभोगेऽपि तिष्ठता ।
निर्मिता यन्त्रपुरुषा मया चेतोविनोदिना ॥ ४७० ॥
इति यस्य वचः श्रुत्वा विस्मितो नरवाहनः ।
विधातृशक्तिश्चित्रेति ध्यात्वा स्वं वृत्तमभ्यधात् ॥ ४७१ ॥

इति वज्रधराख्यायिका ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूजितो ज्ञातवृत्तेन स्वादु भुक्त्वामृतोपमम् ।
सुष्वाप रत्नपर्यङ्के नरवाहः सगोमुखः ॥ ४७२ ॥
वीतनिद्रो निशि स्वैरं स्मरन्कर्पूरमञ्जरीम् ।
विनोदिनीं वज्रधरकथां सोऽपृच्छदुत्सुकः ॥ ४७३ ॥
सोऽब्रवीदर्थलोभाख्यो मन्त्री भूमिपतेरभूत् ।
धनी बाहुबलाख्यस्य यो लोभ इव जङ्गमः ॥ ४७४ ॥
तस्य मातापरा नाम भार्याभूद्वरवर्णिनी ।
लावण्यदर्पणे यस्याः संक्रान्त इव मन्मथः ॥ ४७५ ॥
देशान्तरगतं ज्ञात्वा वणिजं स तुरङ्गमान् ।
धनेन तस्मादाहर्तुं निजजायां विसृष्टवान् ॥ ४७६ ॥
कथं कुलाङ्गनावृत्ते परैः संभाषणं क्षमम् ।
इत्यनिच्छामपि सतीं प्रेषयामास मन्दधीः ॥ ४७७ ॥
गत्वा सुखधनं प्राह तरुणं सा भिषग्वरम् ।
धनेनाश्वान्प्रयच्छेति श्रुत्वा सोऽप्याह विस्मितम् ॥ ४७८ ॥
किं धनेन विशालाक्षि निधानं त्वं मनोभुवः ।
गृहाणाश्वसहस्रं (¹मे रात्रिमेकां भजस्व माम् ॥ ४७९ ॥
श्रुत्वेति लज्जिता तन्वी लतेव भ्रमराकुला ।
क्षणं नम्रानना साभू) नेत्रांशुशबलस्तनी ॥ ४८० ॥
सा मत्वा वणिजो वाक्यं सती (²भर्त्रे न्यवेदयत् ।
अर्थलोभोऽपि तां प्राह को दोषस्त्वं भज क्षणम् ॥ ४८१ ॥
अथ सा वाजिलोभेन) भर्त्रा संप्रेषिता बलात् ।
आदायाश्वान्निशामेकां कान्तां भेजे वणिक्सुतः ॥ ४८२ ॥
सोऽभवद्वल्लभस्तस्या रतावमृतनिर्झरः ।
सद्यः प्ररूढविश्रम्भविलासरसनिर्भरः ॥ ४८३ ॥
हीनसत्त्वं ततो बाला सा तत्याज निजं पतिम् ।
ऐक्षवं स्यन्दमासाद्य को हि निम्बरसं पिबेत् ॥ ४८४ ॥

१–२. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिनमेकं वितीर्णां तां ज्ञात्वा तत्रैव सुन्दरीम् ।
स्थितां क्रोधादर्थलोभो वणिजं योद्धुमाययौ ॥ ४८५ ॥
प्रवराश्ववरानीकैर्निर्लज्जः सज्जितो जवात् ।
वणिजा तेन राजानं जगाम शरणं निजम् ॥ ४८६ ॥
राजापि स्वयमालोक्य तया न्यायं विचारधीः ।
अर्थलोभस्य सर्वस्वं हृत्वा परमपूजयत् ॥ ४८७ ॥
इति वज्रधरेणोक्तां कथां श्रुत्वा नृपात्मजः ।
प्रातर्यन्त्रविमानेन तद्दृचेनाम्बुधिं ययौ ॥ ४८८ ॥

इत्यर्थलोभाख्यायिका ॥ १२ ॥

कर्पूरद्वीपमासाद्य नरवाहः सगोमुखः ।
व्रजन्विवेश वृद्धायाः क्षमामेकां निवेशनम् ॥ ४८९ ॥
कर्पूरमञ्जरीवृत्तं तेन पृष्टा च सावदत् ।
राजहंसी बभूवैषा कन्यका पूर्वजन्मनि ॥ ४९० ॥
राजहंसेन सहिता नीडे चन्दनशाखिनः ।
शावकानब्धिकल्लोलहतान्दृष्ट्वा शुशोच सा ॥ ४९१ ॥
ततो जले तनुं त्यक्त्वा जाता जातिस्मरा सती ।
स्मृत्वा हंसं तमस्नेहं विवाहविमुखी स्थिता ॥ ४९२ ॥
इति वत्सेश्वरसुतः श्रुत्वा गोमुखसंमतः ।
मिथ्याप्रलापमुखरो राजधानीं समभ्ययात् ॥ ४९३ ॥
हा हंसीत्यसकृत्तत्र विक्रोशन्तं विलोक्य तम् ।
पप्रच्छुर्गोमुखं राजकन्यकान्तःपुरस्त्रियः ॥ ४९४ ॥
सोऽब्रवीद्राजहंसोऽयमभूज्जलनिधेस्तटे ।
पोतशोकात्प्रिया चास्य तत्याज सलिले तनुम् ॥ ४९५ ॥
तद्वियोगादयमपि प्राक्षिपद्वपुरम्बुधौ ।
जातिस्मरोऽद्य तामेव स्मरन्हंसीं प्रसर्पति ॥ ४९६ ॥
इति तद्वचनं दास्यो राजपुत्र्यै न्यवेदयन् ।
सा चाभूद्भर्तृविद्वेषं त्यक्तुं परिणयोत्सुका ॥ ४९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो ययाचे तां कन्यां नृपमभ्येत्य गोमुखः ।
नामाभिजनमावेद्य नरवाहस्य विश्रुतम् ॥ ४९८ ॥
दृष्ट्वा स्मराकृतिजुषां लक्षणैश्चक्रवर्तिनाम् ।
ददौ नरपतिः पुत्रीं स तस्मै विपुलोत्सवः ॥ ४९९ ॥
ततो विवाहवसुधां प्राप्तां कर्पूरमञ्जरीम् ।
मञ्जरीं यौवनतरोर्ददर्श नरवाहनः ॥ ५०० ॥
उत्सवं पुष्पधनुषो विभ्रमस्योद्भवावनिम् ।
संगीतशालां लीलाया निधानं रूपसंपदः ॥ ५०१ ॥
परिणीय मनोजन्मत्रैलोक्यजयमालिकाम् ।
रराज वत्सेशसुतः प्राप्य गौरीमिवेश्वरः ॥ ५०२ ॥

इति कर्पूरमञ्जरीविवाहः ॥ १३ ॥

अत्रान्तरे प्राणधरः समभ्येत्य स तक्षकृत् ।
ददौ यन्त्रविमानं तत्तस्मै वज्रधरानुजः ॥ ५०३ ॥
तदाकर्ण्य नरेन्द्रेण पूजितो दयितासखः ।
सगोमुखप्राणधरः प्रययौ नरवाहनः ॥ ५०४ ॥
पुनस्त्वां प्राप्तविद्योऽहं समेष्यामीति सादरम् ।
स वज्रधरमाभाष्य कौशाम्बीं तूर्णमभ्ययात् ॥ ५०५ ॥
तत्र प्रणम्य वत्सेशं प्रहर्षविहितोत्सवम् ।
जनन्यौ च प्रियां प्राप्य विरहापाण्डुराननाम् ॥ ५०६ ॥
रत्नप्रभां स्फुरत्काममौलिरत्नप्रभामिव ।
कर्पूरमञ्जरीं भेजे मदनोद्यानमञ्जरीम् ॥ ५०७ ॥

अथ विलसदमन्दानन्दनिष्यन्दसिन्धुः
प्रणयभुवि दधानश्चारु कर्पूरवल्लीम् ।
स्मरविजयपताकां तां च रत्नप्रभाख्या-
मुचितसचिवनर्मस्मेरवक्रो रराज ॥ ५०८ ॥

इति श्रीक्षेमेन्द्रविरचितायां बृहत्कथामञ्जर्यां रत्नप्रभा नाम चतुर्दशो लम्बकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलंकारवतीलम्बकः ।

पायाद्वो दयिताकेलिकोपे शंभोः प्रणामिनः ।
चन्द्रलेखानिषक्तेव तत्प्रसादस्मितच्छटा ॥ १ ॥
ततः कदाचित्स्वपुरीपर्यन्तविपिनावनिम् ।
मृगयारसिकः प्रायात्सानुगो नरवाहनः ॥ २ ॥
(राजपुत्रसहस्राणि परित्यज्य सगोमुखः ।
विलोलहारः प्रययौ वाजिना वातरंहसा ॥ ३ ॥
स्फुटस्वरपदं दूराच्छ्रुत्वा कर्णरसायनम् ।
गीतध्वनिं सयाक्रान्तो विवेश त्र्यम्बकालयम् ॥ ४ ॥
प्रणम्य तत्र श्रीकण्ठं दिव्यकन्यां ददर्श सः ।
दासीसहस्रानुगतां गायन्तीं शंकरस्तुतिम् ॥ ५ ॥
स्वप्रभाभरणा रत्नभूषणानि बभार या ।
कान्ता सुकविवाणीव पुनरुक्तं प्रमादजम् ॥ ६ ॥
तद्गीतश्रवणाश्चर्यलोलमौलेः पिनाकिनः) ।
या चूडा चन्द्रलेखेव तन्वी निपतिता पुरः ॥ ७ ॥
विभ्रमारम्भवलितैर्विलासललितायतैः ।
फुल्लोत्पलवनानीव कटाक्षैर्वितितार या ॥ ८ ॥
तां विलोक्य सुधापद्ममनोजन्मजयश्रियम् ।
नरवाहनदत्तोऽभूदमन्दानन्दसुन्दरः ॥ ९ ॥
सापि साङ्गमिवानङ्गं तं वीक्ष्य कमलेक्षणम् ।
हर्षकम्पोत्तरङ्गाभूत्सरसीवानिलाकुला ॥ १० ॥
तयोरभिन्नयोद्भिन्नमन्मथारम्भविभ्रमे ।
अवतीर्णाम्बराद्दिव्ययोषिदायात्तदन्तिकम् ॥ ११ ॥
अनुद्धतार्थवेषेण सूचितात्यन्तगौरवाम् ।
जननीमिव सोमस्य स्फटिकस्वच्छविग्रहाम् ॥ १२ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. २. 'र्थपरा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तां [1]तथा कन्यया तत्र हृष्टयाभ्येत्य संगताम् ।
प्रणनामादराल्लोलकुण्डलो नरवाहनः ॥ १३ ॥
सा कन्याजननी तेन पृष्टा विद्याधराङ्गना ।
निजाभिजनवृत्तान्तं प्रोवाच मृदुवादिनी ॥ १४ ॥
सुन्दराख्ये पुरे तुङ्गशृङ्गे तुहिनभूभृतः ।
अस्त्यलंकारशीलाख्यो विद्याधरधराधिपः ॥ १५ ॥
तस्याहमग्रमहिषी वल्लभा काञ्चनप्रभा ।
मयि जातोऽस्य मतिमान्धर्मशीलाभिधः सुतः ॥ १६ ॥
कन्या चेयं शशिमुखी नयनामृतवाहिनी ।
अलंकारवती नाम स्वप्रभालंकृताकृतिः ॥ १७ ॥
स धर्मशीलो भ्रातास्याः ([2]प्रययौ तपसे युवा ।
अस्माभिः प्रार्थ्यमानोऽपि विरक्तो भवविभ्रमे ॥ १८ ॥
राजालंकारशीलोऽपि तमेवानु) तपोवनम् ।
प्रययौ मयि विन्यस्य राज्यं कन्यामिमां च सः ॥ १९ ॥
नरवाहनदत्ताय भविष्यच्चक्रवर्तिने ।
इयं विद्याधरेन्द्राय दातव्या मत्सुता त्वया ॥ २० ॥
अलंकारवती शंभुनिर्दिष्टा श्रीस्तथाखिला ।
इति मां पतिराभाष्य ससुतः काननं ययौ ॥ २१ ॥
ततोऽहं भर्तृरहिता निःशशाङ्केव शर्वरी ।
शोकान्धतिमिराक्रान्ता स्थिता राज्ञे तदाज्ञया ॥ २२ ॥
चिन्तयन्त्या तव शुभं पुत्रीपरिणयाशया ।
कृच्छ्रादब्दशतायामो नीतः संवत्सरो मया ॥ २३ ॥
अद्येयं मत्सुता पृथ्वीं भ्रान्त्वा दृष्ट्वा मदाज्ञया ।
स्वयंभूशंभुनिलया प्रणम्य व्योमगामिनी ॥ २४ ॥
प्रथमं त्रिपुराराति नत्वा कश्मीरमण्डले ।
विजयं चामरेशं च तां च देवीं [3]महेश्वरीम् ॥ २५ ॥

१. 'या' ख. २. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. ३. 'सुरेश्वरी' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौशाम्बीविपिनोपान्तशिवालयमिमं शनैः।
प्राप्ता दृष्टा त्वया देवनिर्दिष्टेयं तव प्रिया॥ २६॥
त्वद्दिशागोचरायातां ज्ञात्वाहं विद्यया सुताम्।
पुत्र तूर्णमिहायाता द्रष्टुं त्वां[1] चिरकाङ्क्षितम्[2]॥ २७॥
मद्भर्त्रा पूर्वमादिष्टो भविता शुभलग्नतः।
अनया तव पुत्र्या मे प्रातः परिणयोत्सवः॥ २८॥
उक्त्वेति लज्जाविनतं पुत्रीवदनपङ्कजम्।
विलोकयन्ती संहृष्टा सा सती गन्तुमुद्ययौ॥ २९॥
प्रस्थिता सा समालोक्य सहसा विरहाकुलम्।
उत्कण्ठानिर्भरं प्राह सस्मिता[3] नरवाहनम्॥ ३०॥
राजपुत्र क्षपामेकां सहस्वौत्सुक्यविक्रियाम्।
समागमो मत्सुतायाः प्रातस्ते भवितानया॥ ३१॥
स्निग्धैर्विनोदय मनो दिनमेकं सुहृज्जनैः।
सेहे[4] संवत्सरं रामो जानकीविरहं पुरा॥ ३२॥
राज्ञो दशरथस्यासीदयोध्याधिपतेः सुतः।
रामो गुणगणारामो विरामो वैरिसंपदाम्॥ ३३॥
प्रेयस्या सीतया सार्धं लक्ष्मणेनानुजेन च।
वनं विवेश स[5] वधूप्रेरितस्य पितुर्गिरा॥ ३४॥
मारीचहेमहरिणाकारवञ्चितचेतसः।
तत्र सीतां जहारास्य भिक्षुवेषो दशाननः॥ ३५॥
जानकीकरुणाक्रन्दक्रोधात्समरसंमुखम्।
जटायुषं गृध्रराजं हत्वा यातेऽथ रावणे॥ ३६॥
विरहायासविधुरः प्रलापमुखराननः।
रामः कपीन्द्रं सुग्रीवं प्राप्य मित्रपदे व्यधात्॥ ३७॥
वैरिणं भ्रातरं तस्य हत्वा बाणेन वालिनम्।
किष्किन्धाराज्यलक्ष्मीं च ददौ विरहनिःसहः॥ ३८॥

१–२. 'तां' ख. ३. 'समन्तान्' ख. ४. 'लेभे' ख. ५. 'कैकेयीप्रे' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुग्रीवेण कृतज्ञेन रामं दृष्ट्वा स्मरातुरम् ।
दिक्षु सीतां समन्वेष्टुं विसृष्टे कपिमण्डले ॥ ३९ ॥
हनूमान्मारुतसुतो विलङ्घ्य मकराकरम् ।
सीतां स[1] तां समालोक्य दग्ध्वा लङ्कामनाकुलः ॥ ४० ॥
न्यवेदयत्प्रियावृत्तं रामाय हतराक्षसः ।
राघवोऽप्यम्बुधिं[2] बद्ध्वा सेतुं प्राप्य रिपोः पुरीम् ॥ ४१ ॥
सानुगं रावणं[3] हत्वा भेजे जनकनन्दिनीम् ।
अथायोध्यां समभ्येत्य प्राप्य राज्यं सहानुजः ॥ ४२ ॥
मिथ्यापवादं सीतायाः शुश्राव रघुनन्दनः ।
तदाज्ञया लक्ष्मणस्तां वने गर्भभरालसाम् ।
तत्याज साश्रुनयनो वाल्मीकेराश्रमान्तिके ॥ ४३ ॥
तां तत्र मुनयो दृष्ट्वा शोचन्तीं लक्ष्मणे गते ।
ऊचुर्दिव्यदृशो ज्ञात्वा शुद्धचारित्रभूषणाम् ॥ ४४ ॥
टिट्टिभोऽब्धितटे जायां दृष्ट्वान्येन समागताम् ।
प्रतिश्रयार्थिना भर्तृधिया निर्व्याजमानसाम् ॥ ४५ ॥
ईर्ष्याशङ्काकुलस्त्यक्तुमुद्यतस्तां नभस्तलात् ।
श्रुत्वा साध्वीति वचनं शीलेऽस्याः प्रत्ययं ययौ ॥ ४६ ॥
तिरश्चामपि चारित्रशुद्ध्या निर्मलतां मनः ।
इति प्रयाति तत्कोपं रामस्याप्यात्मविप्लवः ॥ ४७ ॥
इति ब्रुवाणे करुणाकुलिते मुनिमण्डले ।
वाल्मीकेराश्रमं प्राप्य सीतासूत सुतद्वयम् ॥ ४८ ॥
तौ तेन मुनिना तत्र[4] कृतराजोचितव्रतौ ।
सविद्यौ ययतुर्वाजिमेधे रामं समास्थितम् ॥ ४९ ॥
पुत्रौ कुशलवाभिख्यावुक्तौ वाल्मीकिना स्वयम् ।
तौ प्राप्य रामो दयितां विशुद्धामानिनाय ताम् ॥ ५० ॥

१. 'सतीं' ख. २. 'धौ' ख. ३. 'क्षसं' ख. ४. 'स्वामभाषत' ख. ५. 'पुत्रौ' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येवं राघवः कान्तावियोगं धैर्यसागरः ।
सेहे क्षणं त्वमप्येवं सहस्व स्वप्रियागमे ॥ ५१ ॥

इति रामाख्यायिका ॥ १ ॥

उक्त्वेति तस्यां यातायां व्योम्नादाय निजां सुताम् ।
नरवाहनदत्तोऽभूद्विरहध्याननिश्चलः ॥ ५२ ॥
तं च श्लथमतिं दृष्ट्वा निःश्वसन्तं स्मरातुरम् ।
गोमुखः प्राह धैर्याब्धेः कोऽयं ते मतिविभ्रमः ॥ ५३ ॥
एकैव शर्वरी मध्ये स्थिता ते तत्समागमे ।
एवंविधां विक्रियां किं यातोऽस्यत्रैव मे शृणु ॥ ५४ ॥
पृथिवीरूप इत्यासीत्प्रतिष्ठानपुरे नृपः ।
अनङ्गतां स्मरो भेजे मेने यत्कान्तिनिर्जितः ॥ ५५ ॥
स नानादेशसंचारचतुरैः सद्यभिक्षुभिः ।
शुश्राव वर्णितां कान्तां मुक्ताद्वीपपतेः सुताम् ॥ ५६ ॥
राज्ञो रूपधराख्यस्य पुत्रीं रूपलताभिधाम् ।
श्रुत्वा ययाचे दूतेन सोऽथ दूरनिवासिनः ॥ ५७ ॥
मिथश्चित्रपटाकारदर्शनाज्जातमन्मथम् ।
नृपः पुत्रीं च विज्ञाय रम्यं रूपधरोऽवदत् ॥ ५८ ॥
दूतं मद्वचसा गत्वा राजानं तूर्णमानय ।
पृथिवीरूपमस्या मे स पुत्र्याः सदृशः पतिः ॥ ५९ ॥
इति तेन समादिष्टो दूतः संकल्पशीघ्रगः ।
समुत्तीर्याम्बुद्धिं प्राप्य प्रतिष्ठानपुरोत्तमम् ॥ ६० ॥
मुक्तापुराधिनाथेन दत्ता रूपलता सुता ।
स्वयमेहीति दूतस्तं क्षितिपालं व्यजिज्ञपत् ॥ ६१ ॥
ततः प्रतस्थे नृपतिर्गजवाजिरथाकुलः ।
अब्धिद्वीपं परिणयश्रिये श्रीपतिसंनिभः ॥ ६२ ॥
स व्रजन्नटवीं प्राप्य शबरीरणकर्कशान् ।
जघान बाणजालेन निहतानेककुञ्जरान् ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समुद्रतटमासाद्य स पुत्रपुरभूभुजः[1] ।
उदारचरिताख्यस्य गृहे विश्रम्य पूजितः ॥ ६४ ॥
समारुह्यानुकूलेन प्रेरितं मातरिश्वना ।
महत्प्रवहणं राजा राजकानुगतो ययौ ॥ ६५ ॥
कालेन जलधिद्वीपे प्राप्य मुक्तापुरं नृपः ।
ददर्श मुक्तासेरां[2] स राजधानीं मनोरमाम् ॥ ६६ ॥
प्रत्युद्गतेन विधिवत्पूज्यमानोऽथ सादरम् ।
राज्ञा रूपधरेणासौ विवाहवसुधां ययौ ॥ ६७ ॥
ददर्श राजतनयां तत्र रूपलतां नृपः ।
अङ्गव्ययादनङ्गस्य शक्तिं मूर्तिमतीमिव ॥ ६८ ॥
परिणीयेन्दुवदनां तामायतविलोचनाम् ।
हृष्टः प्रवहणेनैव पुनरुत्तीर्य सागरम् ॥ ६९ ॥
प्रतिष्ठानपुरं प्राप्य तामग्रमहिषीपदे ।
अभिषिच्य मनोजन्मसंभोगसुभगोऽभवत् ॥ ७० ॥
इति रूपलता राज्ञा तेन सत्त्वोदितेन सा ।
प्रायाद्विद्याधरसुतां त्वमप्येवमवाप्स्यसि ॥ ७१ ॥

इति रूपलताख्यायिका ॥ २ ॥

गोमुखेनेति कथितं निशम्य नरवाहनः ।
बभूव दयितासङ्गसंकल्पध्याननिश्चलः ॥ ७२ ॥
राजधानीमथाभ्येत्य निःसहो निःश्वसन्मुहुः ।
नान्तःपुरे न हर्म्येषु नोद्यानेषु धृतिं ययौ ॥ ७३ ॥
सुहृद्भिः सहितो वीतनिद्रस्तत्कथया निशाम् ।
दीर्घां निनाय कृच्छ्रेण रत्नद्वीपे निषक्तदृक् ॥ ७४ ॥
ततः प्रभाते श्रीकण्ठं प्रणम्य पितरं तथा ।
वरोद्यानस्थितोऽपश्यत्कान्तिपिञ्जरितं[3] नभः ॥ ७५ ॥

---

१. 'पत्तनं पुरभूभुज' ख. २. 'मौक्तिकसेरां राज' ख. ३. 'त्पद्मपि' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोऽदृश्यत लोलाक्षी पित्रा सह नभस्तलात्।
अवतीर्णा स्वयं मात्रा भ्रात्रा चाधिकभूषिताम्॥ ७६॥
तां चन्द्रवदनां दृष्ट्वा सानुगो नरवाहनः।
भेजे पीयूषसिक्तस्य छायाममरशाखिनः॥ ७७॥
वत्सराजेन संयम्य तां सुतां खेचरोत्तमः।
नरवाहनदत्ताय दिव्येन विधिना ददौ॥ ७८॥
विद्याधरेन्द्रतनयां तां प्राप्य हरिणेक्षणाम्।
तद्धाम सुन्दरपुरं प्रययौ पितुराज्ञया॥ ७९॥
मन्दारवल्लीललिते स तत्र दयितासखः।
सानुगः सुचिरं स्थित्वा कौशाम्बीं पुनराययौ॥ ८०॥
ततोऽभिनवसंभोगामवाप्यानन्ददीक्षितः।
अलंकारवतीं कान्तां ललास नरवाहनः॥ ८१॥
कदाचिदथ पौरस्त्री काचिन्मुखरभूषणा।
भीता सभार्यं शरणं वत्सराजात्मजं ययौ॥ ८२॥
परिसान्त्व्य शनैः पृष्टा तेन सा प्राह सुन्दरी।
सत्रासकारणं तन्वी कम्पमाना घनस्तनी॥ ८३॥
देवाहं बलसेनस्य तनया क्षत्रजन्मनः।
अशोकमालात्रैलोक्यरक्षांर्[२]हं परिरक्ष माम्॥ ८४॥
हठशर्माभि[३]धानेन पापमाश्रित्य पापिना।
अनिच्छन्ती वृता देव कुरूपेण द्विजन्मना॥ ८५॥
तेन निन्दितरूपेण परिणीता बलादहम्।
कान्तेन संगतान्येन रूपलु[४]ब्धा हि योषितः॥ ८६॥
ततो यदृच्छयायातां पथि दृष्ट्वाथ मां रुषा।
आकृष्टख[५]ड्गः सावेगमागतो मद्व[६]धोद्यतः॥ ८७॥
तद्भीता शरणं देवीमलंकारवतीमहम्।

---

१. 'रूपिता' ख. २. 'र्थं' ख. ३. 'धेनाहं प्राणमा' ख. ४. 'लोभ्या हि' ख. ५. 'शस्त्रः' ख. ६. 'द्विघोद्यमः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यातेत्याकर्ण्य तं विप्रमानिनाय नृपात्मजः ॥ ८८ ॥
स पृष्टो ब्राह्मणः प्राह मर्तुमाहितनिश्चयः ।
देवैनां हन्मि दुःशीलां स्त्रियं प्राणांस्त्यजामि वा ॥ ८९ ॥
अथाशरीरिणी वाणी प्रोच्चचार नभस्तलात् ।
इयं विद्याधरी शापात्पित्रोर्मर्त्यत्वमागता ॥ ९० ॥
तुषारशिखरे रम्ये पञ्चकूटाभिधे पुरे ।
अस्त्यशोकवरो नाम विद्याधरमहीपतिः ॥ ९१ ॥
अशोकमाला तस्येयं तनया स्नेहभाजनम् ।
विद्याधरैर्याच्यमाना विवाहं नाभ्यमन्यत ॥ ९२ ॥
यदा तदा रुषा पित्रा शप्तेयं रूपमानिनी ।
विरूपा मानुषी भूत्वा द्वेष्यं भर्तारमाप्स्यसि ॥ ९३ ॥
इति शापादियं बाला प्राप्ता तच्छासनं भुवि ।
शापोऽधुनास्याः प्रक्षीणो वागित्युक्त्वा शशाप सा ॥ ९४ ॥
ततो मर्त्यशरीरं सा परित्यज्य स्वविद्यया ।
अशोकमाला प्रययौ व्योम्ना विद्याधराङ्गना ॥ ९५ ॥
हठशर्मापि संस्मृत्य जातिं स्मृत्वा विरूपताम् ।
वैद्याधरं वपुः प्राप्य प्रोवाच नरवाहनम् ॥ ९६ ॥
अहं लम्बभुजाख्यस्य विद्याधरपतेः सुतः ।
युवा स्थूलभुजो नाम कन्यां प्राप्तां स्वयंवरे ॥ ९७ ॥
कान्तां सुरभिदत्ताख्यामनादृत्य स्मरातुराम् ।
गुरुशापाद्विरूपत्वं प्राप्तोऽहं मर्त्यतां गतः ॥ ९८ ॥
इत्युक्त्वा क्षीणशापोऽसौ द्विजः प्रायाद्विहायसा ।
प्रियं कलेवरं त्यक्त्वा जाह्नव्यां तुहिनाचले ॥ ९९ ॥
तद्वीक्ष्य विस्मितं प्राह गोमुखो नरवाहनम् ।
शृणु स्त्रीचरिताश्चर्यमत्रैव कथयाम्यहम् ॥ १०० ॥

---

१. 'शैलशिरे' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महावराह इत्यासीद्वीरः शूरपुरे नृपः।
वराह इव विस्तीर्णां भुजेनोवाह यो भुवम् ॥ १०१ ॥
तस्यानङ्गवती नाम सुन्दरी तनयाभवत्।
तत्याज सायकान्मन्ये यत्कटाक्षार्धरः स्मरः ॥ १०२ ॥
शूरः स्वरूपो बलवान्भर्ता योग्यो ममेति सा।
निजोद्वाहविधौ चक्रे प्रतिज्ञां दृढनिश्चया ॥ १०३ ॥
तद्याचकेषु विमुखं यातेष्वखिलराजसु।
चत्वारो वीरपुरुषा दाक्षिणात्याः समाययुः ॥ १०४ ॥
ते तमेत्य महीपालं कन्यकां तां ययाचिरे।
क्रमेण कर्म जातिं च निवेद्य मदनेरिताः ॥ १०५ ॥
एकोऽब्रवीद्युवा शूरो दानशूरो वराकृतिः।
अहं पञ्चपुरो नाम मह्यं कन्या प्रदीयताम् ॥ १०६ ॥
अपरः प्राह वैश्योऽहं भाषाज्ञः सर्वपक्षिणाम्।
उवाचान्यः क्षत्रियोऽहं वीरः खड्गधराभिधः ॥ १०७ ॥
चतुर्थोऽप्यवदद्विप्रो जीवदत्तोऽहमग्रजः[२]।
मृतसंजीवनाभिज्ञो दैवार्त्कि तु दुराकृतिः ॥ १०८ ॥
इति तैरर्थितां पुत्रीं प्रहृष्टः पृथिवीपतिः।
ईप्सितः कस्तवेत्याह सा च पृष्टा तमब्रवीत् ॥ १०९ ॥
द्विजसूनुर्विरूपोऽयं वैश्यशूद्रौ च सेवकौ।
अराजा क्षत्रियश्चायमित्युक्त्वा नाभ्यमन्यत[३] ॥ ११० ॥
प्रतीहारगृहे राज्ञा ततस्ते विहिताश्रयाः।
न्यवसन्पूजिताः किंचित्कालं परिणयाशया ॥ १११ ॥
ततः कदाचिन्मृगयासक्तस्य वसुधापतेः।
अदर्शयन्वने तस्य[४] हत्वा सिंहान्पराक्रमम् ॥ ११२ ॥
तेषां शौर्यं समालोक्य सुतां प्राह महीपतिः।
भजैकं पुत्रि नैतेषां तुल्यं पश्यामि भूतले ॥ ११३ ॥

---

१. 'युधः' ख. २. 'ममाग्रजः' ख. ३. 'नन्दत' ख. ४. 'भासान्' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्त्वा नृपतिः पुत्रीं पप्रच्छ गणकं ततः ।
ब्रूह्यनङ्गवतिः कस्य भाविनीयं वधूरिति ॥ ११४ ॥
नृपेण पृष्टो दैवज्ञः सोऽवदद्दिव्यलोचनः ।
सुता विद्याधरीयं ते शापान्मर्त्यपदं स्थिता ॥ ११५ ॥
याते मासत्रये शापं[1] त्यजत्येषा[2] सुलोचना ।
गणकस्येति वचनं श्रुत्वाश्चर्यं[3] महीपतिः ॥ ११६ ॥
चतुर्भिः सहितो[3] वीरः संदेहाकुलितोऽभवत् ।
ततो मासत्रये याते सा परित्यज्य सुन्दरी ॥ ११७ ॥
तनुं मर्त्योचितां[4] बाला प्राप्य वैद्याधरं पदम् ।
ततः सुतावियोगार्तस्तत्रासीनः पुरे नृपे ॥ ११८ ॥
विस्मृते जीवदत्तस्य मन्त्रे च मृतजीवने ।
([5]वीरेषु तत्र यातेषु तत्संगमनिरासताम् ।
आश्वास्यमाने तेनैव दैवज्ञेन महीपतौ ॥ ११९ ॥
जीवदत्तस्तनुत्यागे दृढनिश्चयमानसः) ।
निजं खड्गेन दुःखार्तः शिरश्छेत्तुं समुद्ययौ ॥ १२० ॥
अथोच्चचार[6] वाग्व्योम्नो विप्र मा साहसं कृथाः ।
प्रसादाद्विन्ध्यवासिन्यास्तां प्राप्स्यसि मृगेक्षणाम् ॥ १२१ ॥
इति श्रुत्वा स तपसे गत्वा विन्ध्यं द्विजँस्ततः ।
कात्यायनीं निराहारस्तुष्टां स्वप्ने व्यलोकयत् ॥ १२२ ॥
प्रणताय वितीर्यास्मै खड्गरत्नं महर्न्निजम् ।
उवाच देवी तं पुत्र गच्छ प्राप्नुहि तां प्रियाम् ॥ १२३ ॥
अस्ति वीरपुरे श्रीमांस्तुषारगिरिशेखरे ।
विद्याभृत्समरो नाम सुता सा तस्य सुन्दरी ॥ १२४ ॥

---

१. 'देहं' ख. २. 'क्ष्य' ख. ३. 'तैर्वीरैः' ख. ४. 'ताचारां' ख. ५. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके न दृश्यते. ६. 'दिवं वचो व्योम्नि' ख. ७. 'जात्मजः' ख. ८. 'द्विदम्' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्पादमन्यतं तया तुल्यरूपा[२]न्स्वयंवरे ।
पितानङ्गप्रभां पुत्रीं शशाप क्रोधमूर्च्छितः ॥ १२५ ॥
विरूपं मानुषी भूत्वा ब्राह्मणं पतिमाप्स्यसि ।
([२]ततोऽनुपुरुषासङ्गं बहुशश्च समेष्यसि) ॥ १२६ ॥
परदारापहारेण प्राग्जन्मनि स च द्विजः ।
त्वद्वियोगाग्निसंतप्तो भविष्यति मुहुर्मुहुः ॥ १२७ ॥
जनकेनेति शप्तासौ भुवि राजसुताभवत् ।
प्राप्ताद्य स्वपुरं दिव्यं गच्छ प्राप्नुहि तां प्रियाम् ॥ १२८ ॥
([३]इति श्रुत्वा प्रबुद्धोऽसौ खड्गं वीक्ष्य स्वहस्तगम् ।
तत्प्रभावोदितगतिर्ययौ व्योम्ना हिमाचलम् ॥ १२९ ॥
तत्र विद्याधराञ्जित्वा समरे तां तदात्मजाम् ।
प्रापानङ्गप्रभां मूर्तां प्रभामिव मनोभुवः ॥ १३० ॥
तत्र विद्याधरपुरे स्थित्वा संभोगतत्परः ।
मनुष्यलोकं सोत्कण्ठो ययौ व्योम्ना तया सह ॥ १३१ ॥
ततः शिखरिपर्यन्तविपुले कटकस्थले ।
फुल्लचूतलताहूतविलोलालिकुलाकुले ॥ १३२ ॥
विजहार द्विजवरस्तया राजीवनेत्रया ।
तत्र लीलारतिश्रान्तः स निद्रामुद्रितेक्षणः ॥ १३३ ॥
सुष्वाप ता[४]लपवनैर्व्यजनैरिव [५]वीजितः ।
अत्रान्तरे मृगर[६]णक्रीडायै तां वनस्थलीम् ॥ १३४ ॥
राजा हरिवरो नाम दाक्षिणात्यः समाययौ ।
स तां विद्याधरीं दृष्ट्वा जीवविद्यां मनोभुवः ॥ १३५ ॥
कम्पँ[७]त्तरङ्गतां भेजे ज्योत्स्नामिव सरित्पतिः ।
([८]सापि तं वीक्ष्य राजानं रजनीराजसुन्दरम् ॥ १३६ ॥

१. 'मानासं' ख. २. 'पं' ख. २–३. एतत्कोष्ठान्तर्गतपाठः क-पुस्तके न दृश्यते. ४. 'शीतप' ख. ५. 'जीवितः' ख. ६. 'स' ख. ७. 'म्योत्त' ख. ८. 'एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्न्यस्तमानसा प्राप कामपि स्मरविक्रियाम् ।
स्वयं कृताभ्युपगमां ततस्तां स महीपतिः) ॥ १३७ ॥
निनाय स्वपुरं हृष्टो धन्योऽस्मीति व्यचिन्तयत् ।
तस्य तत्केलिसक्तस्य तद्विभ्रमविकासिनः ॥ १३८ ॥
कोऽप्यन्तःपुरसंक्तेषु बभूव प्रचुरोत्सवः ।
जीवदत्तः प्रबुद्धोऽपि तामपश्यन्मनःप्रियाम् ॥ १३९ ॥
वने शुशोच सुचिरं मृगीभिः साश्रु[2]वीक्षितः ।
ततो ग्रामं शनैर्दृष्ट्वा तस्या दुःखात्पतिव्रताम् ॥ १४० ॥
प्रि[3]यादत्ताभिधां दिव्यचक्षुषा लोकिताखिलाम् ।
शुश्राव दयितावृत्तं स तयैव निवेदितम् ॥ १४१ ॥
राज्ञा हरिवराख्येन सा नीतेति सविस्मयः ।
प्रणम्य दिव्यनेत्रां तां विरक्तः सोऽभवत्ततः ॥ १४२ ॥
रागानलेन दग्धानां वैराग्यं जायते कुतः ।
स विन्ध्यवासिनीं गत्वा तावत्तेपे तपस्ततः ॥ १४३ ॥
यावत्साक्षाद्भगवती तमुवाच कृताञ्जलिम् ।
गणस्त्वं मे विरूपाख्यः सहितोऽन्यैर्गणैस्त्रिभिः ॥ १४४ ॥
कन्याभिलाषी मुनिना शप्तो मर्त्यत्वमागतः ।
अधुना क्षीणशापस्त्वं ते च प्राप्ताः पदं मम ॥ १४५ ॥
इति देवीवचः श्रुत्वा गणतां प्राप स द्विजः ।
साप्यनङ्गप्रभा तस्य राज्ञः प्रणयिनीपदम् ॥ १४६ ॥
संप्राप्य रागिणी विद्यां विसस्मार सुलोचना ।
ततो लब्धवराभिख्यो नाट्याचार्यो नरेश्वरम् ॥ १४७ ॥
तत्त्यों[4]गिनं कलाभिज्ञो द्रष्टुमभ्याययौ युवा ।
संपूजितो भृशं राज्ञा चा[5]नङ्गप्रभया रहः ॥ १४८ ॥

१. 'सौधेषु' ख. २. 'स्रमी' ख. ३. 'यंवदाभि' ख. ४. 'द्रागिणं' ख.
५. 'तामनङ्गप्रभां' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशिक्षयन्नृपादेशान्नाट्यं तां जातमन्मथाम्[1]।
चित्रं करणशिक्षां ये देहीत्यभिहितस्तया॥ १४९॥
स तां स्वैरं शशिमुखीं भेजे सुरतकोविदः।
सा गाढरागिणी तेन सह प्रायादलक्षिता॥ १५०॥
क वा तिष्ठन्ति सुचिरं निम्नगा इव योषितः।
नाट्याचार्यो निजं देशं तया सह समागमः[2]॥ १५१॥
प्राप्य लेभे रतिसुखं तद्विलासरसोचितम्।
कदाचिदथ कालेन युवा द्यूतकृतादरः[3]॥ १५२॥
सुहृत्सुदर्शनो नाम तं नाट्याचार्यमाययौ।
स तस्य केलिदूतेन धनं हृत्वा सुदर्शनः॥ १५३॥
स्वयं कृताभ्युपगमां भेजेऽनङ्गप्रभां रहः।
नाट्याचार्यं परित्यज्य निर्धनं विगतद्युतिम्॥ १५४॥
द्यूतकारेण सहिता सा ललास घनस्तनी।
कालेन द्यूतकारोऽपि चौरैर्निर्द्रविणः कृतः॥ १५५॥
त्यक्त्वा हिरण्यगुप्ताख्यमासाद्य वणिजं तदा।
([4]बभूव प्रेमसर्वस्वं तस्य सा रतिलालसा)॥ १५६॥
द्यूतकृत्तद्वियोगाग्निदग्धः स च [5]धराधिपः।
विरक्तौ संनिपातेन जग्मतुः परमं पदम्॥ १५७॥
वणिजः प्रेमसर्वस्वं कालेनाम्भोधिगामिनः।
वातभग्ने प्रवहणे संप्राप्ता धीवरेण सा॥ १५८॥
तेन [6]सागरतीरेण चिरं दासेन कामिताम्।
युवा विजयधर्माख्यस्तां प्राप कुलपुत्रकः॥ १५९॥
यदृच्छया गतो दृष्ट्वा तां सागरपुराधिपः।
राजा सागरदत्ताख्यो[7] रागिणीमभजत्ततः॥ १६०॥

---

१. 'संजातमन्मथः' ख. २. 'महाधनः' ख. ३. 'तां वरः ख. ४. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. ५. 'नटाधि' ख. ६. 'दाशप्रवीरेण सेनादासेन कासिताम्' ख. ७. 'वर्माख्यो' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कान्ता भूमिभुजा तेन विलासरसिकेन सा ।
सेविता सुचिरं प्रेम्णा[1] कालेनासूत पुत्रकम् ॥ १६१ ॥
सुतः समुद्रदत्ताख्यस्तस्याः स शशिसुन्दरः ।
विद्याकलाकलितधीः कालेन प्राप यौवनम् ॥ १६२ ॥
कन्यां कमलिनीं नाम राज्ञः समरवर्मणः ।
स प्राप विभ्रममहीं कान्तः परिणयोत्सवे ॥ १६३ ॥
निर्जिताशेषवसुधं तं गुणोचितमात्मजम् ।
अभिषिच्य ततः प्रायाद्राजानङ्गप्रभासखः ॥ १६४ ॥
तौ प्रयागे निराहारौ दृष्ट्वा स्वप्ने महेश्वरम् ।
क्षीणशापौ प्रययतुर्निजं वैद्याधरं पदम् ॥ १६५ ॥

इत्यनङ्गप्रभाख्यायिका ॥ ३ ॥

गोमुखेनेति कथितं श्रुत्वा वत्सेश्वरात्मजः ।
जहास तस्या वृत्तान्तमलंकारवतीसखः ॥ १६६ ॥
कदाचिदथ तं प्राह राजपुत्रं सुहृद्युतम्[2] ।
मरुभूतिः कृपाविष्टो दृष्ट्वा कार्पटिकं पुरः ॥ १६७ ॥
शीतवातातपसहो सदैव त्वत्परायणः ।
नाद्यापि परमां लक्ष्मीं प्राप्त इत्यद्भुतं महत् ॥ १६८ ॥
प्राग्दत्तं भुञ्जते सर्वे कर्तुं वा कस्य कः क्षमः ।
तवापि यत्कार्पटिकः पदं नाद्यापि संपदाम् ॥ १६९ ॥
इत्युक्ते राजपुत्रस्य पुरतो मरुभूतिना ।
गोमुखः प्राह सदृशं श्रूयतामेवमत्र च ॥ १७० ॥
अभूत्लक्षपुरे श्रीमान्लक्षदत्ताभिधो[3] नृपः ।
लब्धदत्ताह्वयस्तस्य[4] भक्तः कार्पटिकोऽभवत् ॥ १७१ ॥
चिरसेवापरिक्लिष्टं तं विज्ञाय स पार्थिवः ।
गूढं रत्नैः समापूर्य फलं तस्मै ददौ स्वयम् ॥ १७२ ॥

---

१. 'श्रेष्ठं' ख. २. 'द्वृ' ख. ३. 'लक्षदन्ताभिधो' ख. ४. 'न्ता' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातुलुङ्गफलं प्राप्य सोऽपि राज्ञा समर्पितम्।
अभिदध्यौ तदद्यापि नाहं लक्ष्मीनिरीक्षितः॥ १७३॥
इति चिन्तापरो गत्वा यदृच्छोपगताय सः।
भक्तः कार्पटिकस्तस्य तत्फलं भिक्षवे ददौ॥ १७४॥
राजा नन्दिरिति[1] ख्यातः स भिक्षुस्तन्महीभुजे।
हस्तोपायनमास्थाने मातुलुङ्गफलं ददौ॥ १७५॥
राजापि रत्नसंपूर्णं तत्परिज्ञाय सस्मितः।
([2]पुनः कार्पटिकायैव स तस्मै प्रददौ फलम्॥ १७६॥
राज्ञा दत्तं तदादाय दुःखितोऽसौ व्यचिन्तयत्)।
अहो रत्नाकरजुषा मया प्राप्तः कपर्दकः॥ १७७॥
इति ध्यात्वा मयाख्यस्य तद्ददौ राजसेविनः।
([3]वस्त्रयुग्मेन संतुष्टो मन्यमानोऽधिकं धनम्॥ १७८॥
अभयोऽपि फलं गत्वा भूभुजे तन्न्यवेदयत्।
भूयः कार्पटिकायैव प्रादात्तच्च फलं नृपः॥ १७९॥
तद्विलासवती नाम फलमादाय नर्तकी।
मूल्येन तस्मादनयद्भूपालोपायनास्पदम्)॥ १८०॥
राजा पुनस्तदासाद्य सावेगं स्मितसुन्दरः।
तं कार्पटिकमुद्दिश्य चिक्षेप मणिमत्फलम्॥ १८१॥
वेगावपानस्फुटितफलोदरविनिर्गतैः।
रत्नैरिन्द्रायुधच्छायैस्तस्योत्सङ्गमपूर्यत॥ १८२॥
प्रक्षीणदुष्कृतो लक्ष्म्याः कटाक्षैरिव लक्षितः।
तैर्महारत्ननिकरैः सोऽभवत्संपदां निधिः॥ १८३॥
इत्यनिस्तीर्णदुष्कर्मसंकटैः श्रीर्न लभ्यते।
तवापि सेवको देव यन्नाद्यापि पदं श्रियः॥ १८४॥

इति कार्पटिकाख्यायिका॥ ४॥

१. 'दन्दि' ख. २-३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निशम्य गोमुखेनेति कथितं नरवाहनः ।
निजं कार्पटिकं चक्रे क्षणेन क्षितिपोपमम् ॥ १८५ ॥
ततः कदाचिदभ्यायात्सेवितुं नरवाहनम् ।
लम्बबाहुरिति ख्यातो विप्रः शस्त्रभृतां वरः ॥ १८६ ॥
वितीर्णे राजपुत्रेण तस्मै प्रत्यहवेतने ।
जाम्बूनदशते प्राह गोमुखो हृष्टमानसः ॥ १८७ ॥
एतद्विधाः प्रभुहितव्रतधीराः सुदुर्लभाः ।
येषां पुरुषरत्नानां पृथ्वीमूल्यं विडम्बना ॥ १८८ ॥
पुरा विक्रमतुङ्गाख्यो राजा विरजसा वरः ।
द्विजं वीरवरं नाम सेवकं विदधे धनैः ॥ १८९ ॥
श्रुत्वा निशि प्रलापिन्याः पृथ्व्याः स पृथिवीपतेः ।
पर्यन्तमानुषप्राप्तं वज्राहत इवाभवत् ॥ १९० ॥
स तद्गिरा शिरः सूनोश्छित्त्वा सुश्रेयसे प्रभोः ।
देवीमतोषयद्येन शतायुरभवन्नृपः ॥ १९१ ॥
ततो ररक्ष तं देवी स्वसिरश्छेत्तुमुद्यतम् ।
जीवयित्वास्य (सुचिरं प्रसादामृतनिर्झरैः ॥ १९२ ॥
इत्येवं स्वामिनां भृत्या भवन्त्यभ्युदयश्रिये ।
अयं द्विजवरो देव वीरो भृत्यस्तवोचितः ॥ १९३ ॥

इति वीरवराख्यायिका ॥ ५ ॥

गोमुखेनेति कथितं श्रुत्वा वत्सेश्वरात्मजः ।
ननन्द सचिवैः सार्धमलंकारवतीसखः ॥ १९४ ॥
ततः कदाचिन्मृगयारसिको नरवाहनः ।
पराक्रमं लम्बबाहोर्ददर्श हरियोधिनः ॥ १९५ ॥
विपिने सरसस्तीरे स्वप्रभाभरणैस्ततः ।
चतुर्भिर्दिव्यपुरुषैर्धन्यः प्राप समागमम् ॥ १९६ ॥

---

१. 'वरप्रसादेन' ख. २. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीतो नारायणं द्रष्टुं श्वेतद्वीपं विहायसा ।
तैस्तूर्णजातसौहार्दैः सोऽपश्यच्छेषशायिनम् ॥ १९७ ॥
श्रीपतिं पुण्डरीकाक्षं पद्मनाभमनामयम् ।
दृष्ट्वा प्रणम्य वरदं तुष्टाव नरवाहनः ॥ १९८ ॥

ॐ जय अजय अजित अव्यय अप्रमेय अनन्त अच्युत अपरिमित अचल अचिन्त्य अप्रतिहत अभय महाविभव निरतिशय निरञ्जन निर्लेप निष्पपञ्च निरुपम निर्विकार निर्गुण नित्योदित विश्वेश्वर विश्वरूप विश्वाश्रय विश्वसमुद्धरण शुद्ध सूक्ष्म ध्रुव शाश्वत शान्त सच्चित्स्वरूप परमानन्दमन्दिर स्वेच्छाशक्तिव्यक्तीकृतनिजप्रसर लक्ष्मीलतावसन्तातप मधुवधूगण्डपाण्डिमप्रद असुरमहिषीश्रमविराम अखण्डितप्रसादमण्डिताखण्डल कौस्तुभप्रभारचितकमलाकुचकुङ्कुमपत्रभङ्ग अपरिष्वङ्गसंगमाकुलीभूतस्वर्भानुभामिनीलोकाब्जेन्दुकमलालाञ्छनलेखायितवसुधाभिराममहावराह हिरण्यकशिपुकाननप्रलयानिल वामनलीलासंपदवामनीकृतसुरैश्वर्य चरणनखमयूखायितस्वर्वाहिनीप्रवाह क्षत्रक्षपाधरोद्दीपितकुठारानल दशवदनवदनकन्दुकविनोदानन्दित कालियकुलकामिनीकुञ्जर रुक्मिणीकपोलदन्तपत्रीकृतपाञ्चजन्यप्रभामयूर विद्रुमद्रुमायमाणकैटभरुधिरारुणोरुस्तम्भ ब्रह्मपद्माकरतुरगमुखखलीनखणखणायमानसामवेदोद्गिरा

इति स्तुत्वा हृषीकेशं तद्दत्ता दिव्ययोषितः ।
प्राप्य राजसुतः प्रायात्स दिव्यपुरुषालयम् ॥ १९९ ॥
रूपसिद्धिमुखास्तेऽथ समुद्रद्वीपवासिनः ।
अपूजयन्देवपुत्राः स्वगृहे नरवाहनम् ॥ २०० ॥
ततस्तद्विहितोदारगतिः प्राप्य निजां पुरीम् ।
अलंकारवतीं भेजे दृष्टो विरहनिःसहः ॥ २०१ ॥

इति नारायणदर्शनम् ॥ ६ ॥

ततः कदाचिदाकर्ण्य तूर्यशब्दं पुरान्तिके ।
किमेतदिति पप्रच्छ सचिवान्नरवाहनः ॥ २०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो हरिशिखः प्राह भद्रस्य वणिजो गृहे ।
कौशाम्बीवासिनो देव वर्तते विपुलोत्सवः ॥ २०३ ॥
लब्धो निजगृहोपान्तान्निधिस्तेन महाधनः ।
कृपया वत्सराजेन न चात्तस्तन्निवेदितः ॥ २०४ ॥
तत्प्रसादादहं तस्य वणिजः प्रस्तुतोत्सवे ।
सुतारस्तूर्यशब्दोऽयं रुणद्धि निखिलां पुरीम् ॥ २०५ ॥
उक्ते हरिशिखेनेति गोमुखः प्राह सस्मितः ।
अस्त्येवमेव धन्यानां विधाता वाञ्छितप्रदः ॥ २०६ ॥
पुरा समुद्रशूरेण वणिजा द्वीपगामिना ।
भग्ने प्रवहणे प्राप्तो जलोच्छूनः शवोऽम्बुधौ ॥ २०७ ॥
तेनैवोत्तीर्य जलधेर्हेमद्वीपमवाप्य सः ।
शववस्त्राञ्चलासक्तां मणिमालामवाप्तवान् ॥ २०८ ॥
तां कण्ठसूत्रिकां पूर्वं स चौरो राजमन्दिरात् ।
हृत्वा जलौघान्निःसृत्य ममज्ज जलधौ भयात् ॥ २०९ ॥
तां व्यसोस्तस्य चोरस्य स गृहीत्वा पुरान्तरम् ।
प्रविश्य पादपतले श्रान्तो निद्रां समाययौ ॥ २१० ॥
मणिमालां परिज्ञाय स राजपुरुषैर्बलात् ।
नृपतेरन्तरं नीतस्तत्कोपाकुलिताकृतेः ॥ २११ ॥
अत्रान्तरे रत्नमालां गृध्रस्तामहरच्छलात् ।
(हृतेयमिति भूपालपुरः प्रतिसृता जनैः ॥ २१२ ॥
आदिष्टे वणिजे राज्ञा वधे शब्दोऽभवद्दिवि ।
वणिक्समुद्रशूरोऽयं निर्दोष इति कर्मतः) ॥ २१३ ॥
ततः संपूजितो राज्ञा शतैस्तद्वाक्यगौरवात् ।
तीर्त्वा प्रवहणेनाब्धिं वेलातटमवाप्तवान् ॥ २१४ ॥
तत्रास्य शबराः सर्वं जगृहुर्धनसंचयम् ।
स हृतद्रविणो गत्वा निषसाद तरोरधः ॥ २१५ ॥

१. 'नौ' ख. २. 'द्व' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीडे महाद्रुमस्याधस्तामेव मणिसूत्रिकाम् ।
लम्बमानां विलोक्याराद्धन्यस्तामवाप्तवान् ॥ २१६ ॥
पृथ्वीमूल्यानि रत्नानि तस्मादिव खगालयात् ।
स प्राप्य स्वगृहं प्रायाद्वणिग्वैश्रवणोपमः ॥ २१७ ॥
इति लाभक्षयाभ्यासाद्धन्यानामेव पुण्यतः ।
उदयान्ता भवन्त्येवमुक्त्वैव विरराम सः ॥ २१८ ॥

इति समुद्रशूराख्यायिका ॥ ७ ॥

अलंकारवतीवक्त्रपद्मचुम्बनषट्पदः ।
ततः सुहृद्वृतः कालं निनाय नरवाहनः ॥ २१९ ॥
अथ तं प्राह सेनानीस्तवासौ बालसेवकः ।
राजा विक्रमतुङ्गाख्यो देव प्राप्तो जयश्रियम् ॥ २२० ॥
तव भ्रूभङ्गमात्रेण हेलया तव सैनिकैः ।
समरे विजितास्तस्य रिपवः पञ्च पार्थिवाः ॥ २२१ ॥
ते च विक्रमतुङ्गेन स्वयं बद्ध्वा महारणे ।
त्वत्पादमूलमानीता मानिनो वसुधाधिपाः ॥ २२२ ॥
श्रुत्वेति राजतनये प्रहृष्टे प्राह गोमुखः ।
राजा विक्रमसेनस्ते सिद्धये देवसेवकः ॥ २२३ ॥
अत्रान्तरे वीरवृत्तं श्रूयतां कथयाम्यहम् ।
बभूव हास्तिनपुरे चमरो नाम भूपतिः ॥ २२४ ॥
स गोत्रशत्रुस्तस्यासीत्प्रतापो नाम पार्थिवः ।
सहान्यैर्वसुधाधीशैः स तं जेतुं समुद्ययौ ॥ २२५ ॥
विजयारम्भवार्तायां प्रतापेन महीभुजा ।
पृष्टस्तं प्राह दैवज्ञो जयस्तव न दृश्यते ॥ २२६ ॥
न कालोऽयं तवोद्योगे मा प्रमादे मनः कृथाः ।
सुकाले विहितं सर्वमयत्नेनैव सिध्यति ॥ २२७ ॥

१. 'तुङ्ग' ख. २. 'सुभटो' ख. ३. 'यात्रायां' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौतुकाख्ये पुरवरे राजा बहुसुवर्णकः ।
बभूव सर्वजनतासंकल्पसुरपादपः ॥ २२८ ॥
यशोधर्माभिधानस्तं कदाचिच्चिरसेवकः ।
व्यजिज्ञपद्दुर्गतिर्मे क्ष्मापते वार्यतामिति ॥ २२९ ॥
पुनः पुनः प्रार्थ्यमानस्तेन राजा निरुत्तरः ।
दिवमालोक्य सुचिरादूचे सचिवसंसदि ॥ २३० ॥
जानामि सेवकस्त्वं मे दीर्घकालमनन्यगः ।
दातुमिच्छामि ते सर्वं किं तु सूर्यो रुणद्धि माम् ॥ २३१ ॥
इति राज्ञो वचः श्रुत्वा मौनमूके सभातले ।
यशोधर्मा विनिःश्वस्य विधिं मेने दिवाकरम् ॥ २३२ ॥
ततः कदाचित्स नृपं राहुग्रस्तेंऽशुमालिनि ।
व्यजिज्ञपत्कुरुक्षेत्रे हेमरत्नाम्बरप्रदम् ॥ २३३ ॥
त्वत्प्रसादनिषेद्धा मे देवोऽयं भास्करो रिपुः[1] ।
राहुणा शत्रुणाक्रान्तो देह्यस्मिन्मे[2] क्षणे धनम् ॥ २३४ ॥
इति नर्मवता तेन विज्ञप्तः स महीपतिः ।
प्रहस्य सानुगस्तस्मै तुष्टो भूरि धनं ददौ ॥ २३५ ॥
[3]महाव्ययोऽयं सुचिरान्न प्राप्य तद्धनक्षयम् ।
विविग्नहृदयः प्रायात्तपसे विन्ध्यवासिनीम् ॥ २३६ ॥
सा तुष्टा प्राह तं भोगान्धनं वासमवाप्नुहि ।
इति देव्या समुद्दिष्टो द्रष्टुं प्रायाद्वणिक्सुतौ ॥ २३७ ॥
एकं स संचयपरं ददर्श कृपणाशयम् ।
भोज्यलेशापराधेन प्राप्तः प्राप्तविसूचिकाम् ॥ २३८ ॥
धीरं निःसंचयं चान्यं सदा संभोगतत्परम् ।
स तौ दृष्ट्वा गिरिसुतां ययाचे भोगसंपदम् ॥ २३९ ॥

---

१. 'विभुः' ख. २. 'धे' ख. ३. 'नद्यव्यम्रोऽथ' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवीवरात्प्राप्य भोगान्स संपूर्णमनोरथः ।
इत्येवं कालविहितं सर्वं भवति सिद्धये ॥ २४० ॥

इत्यन्तराख्यायिका ॥ ८ ॥

नायं जयस्य ते कालो गणकेनेति ते नृपाः ।
वारिता अपि युद्धाय राजानं चमरं ययुः ॥ २४१ ॥
चमरोऽपि सुसंनद्धो धीरं नाम च भूपतिम् ।
पुरस्कृत्य महानीको निर्ययौ समरोन्मुखः ॥ २४२ ॥
निहतानेकसुभटान्विदारितहयद्विपान् ।
स तान्नरेन्द्रान्संग्रामे बबन्ध वलिताम्बरः ॥ २४३ ॥
विजयश्रियमासाद्य स्वपुरे विहितोत्सवः ।
तद्वधूपातिनो भूपान्स तांस्तत्याज सत्त्ववान्[2] ॥ २४४ ॥
इत्युत्साहपरा धीराः समरे व्यवसायिनः ।
लभन्ते विजयं देव यान्ति वा त्रिदिवं हताः ॥ २४५ ॥

इति चामराख्यायिका ॥ ९ ॥

गोमुखेनेति कथिते सुहृद्भिर्नरवाहनः ।
निरर्गलकथासक्तो ननन्द [3]दयितासखः ॥ २४६ ॥
ततो नर्मकथाबन्धे हसन्हरिशिखोऽब्रवीत् ।
मरुभूतिरयं देव साक्षाल्लोभः किमुच्यते ॥ २४७ ॥
वृत्तिं सांवत्सरीं योऽयं भृत्यानां मीलितेक्षणः ।
करोति [4]पाठमौनानां मौनमर्ममयो यथा ॥ २४८ ॥
उक्ते हरिशिखेनेति गोमुखः प्राह सस्मितः ।
नर्महासविलासो हि गोष्ठीष्वमृतनिर्झरः ॥ २४९ ॥
देव लुब्धा भवन्त्येव तथा च क्षितिपोऽभवत् ।
चिरदाता यथार्थेन नाम्नैव कथिताशयः ॥ २५० ॥

---

१. 'सभो' ख. २. 'रा' ख. ३. 'नरवाहनः' ख. ४. 'याचमानानां' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसङ्गोऽर्थमुखश्चेति तस्यासन्सेवकास्त्रयः ।
तेषामवृत्तिक्षुण्णानां प्रययुः पञ्च वत्सराः ॥ २५१ ॥
दारिद्र्यदुःखाद्राजानं सदा याचितुमुद्यतौ[2] ।
प्रसङ्गाख्येन कालोऽयं नेत्यन्यौ विनिवारितौ ॥ २५२ ॥
अत्रान्तरे नृपसुते बाले दैवाद्दिवं गते ।
प्रसङ्गोऽभ्येत्य शोकार्तं नरनाथं व्यजिज्ञपत् ॥ २५३ ॥
देव यातः सुविपुलः कालस्त्वत्पादसेवनम्[3] ।
अस्माकं कर्मबन्धेन केनापि हतसंपदाम् ॥ २५४ ॥
नृपाद्वर्षशतेनापि नैवास्मादस्ति नः फलम् ।
एतत्सुतो दास्यतीति बद्धोऽस्माभिर्मनोरथः ॥ २५५ ॥
सोऽद्य बालस्तव सुतो नीतोऽस्मद्भाग्यसंक्षयात् ।
दैवेन त्वदनुज्ञाता गच्छामः स्वस्ति ते प्रभो ॥ २५६ ॥
इति तद्वचनेनासौ वृद्धः शोकाकुलो नृपः ।
ददौ तेभ्यो बहुधनं पुत्रकीर्तनमोहितः ॥ २५७ ॥
इत्यादि गोमुखेनोक्तं मरुभूतिविडम्बनम् ।
श्रुत्वा जहास मुदितो राजपुत्रः प्रियासखः ॥ २५८ ॥

इति लुब्धाख्यायिका ॥ १० ॥

पृष्टोऽलंकारवत्याख्या कथां चित्तविनोदिनीम् ।
गोमुखः सादरं प्राह तस्यां सचिवसंसदि ॥ २५९ ॥
हिरण्यवर्ण इत्यासीद्वसुधाधिपशेखरः ।
यशस्वी काञ्चनपुरे पञ्चबाण इवापरः ॥ २६० ॥
स तु चित्रपटाकारदर्शनाज्जातमन्मथाम् ।
विदर्भराजतनयां लेभे मदनमञ्जरीम् ॥ २६१ ॥
रममाणस्तया तत्र हरिणीहारिनेत्रया ।
मेने वराकं त्रैलोक्यजयिनं रतिवल्लभम् ॥ २६२ ॥

---

१. 'सचिवास्त्र' ख. २. 'यौ' ख. ३. 'नात्' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कदाचिदथ दुःस्वप्नं विलोक्याकुलितो नृपः ।
कार्तिकेयवने देवं कुमारं समतोषयत् ॥ २६३ ॥
विघ्नादसम्यग्विहितां[१] मतिं तस्य षडाननः ।
ज्ञात्वा प्रियवियोगस्ते भूयादिति शशाप तम् ॥ २६४ ॥
नृपोऽपि शापदुःखं तद्विस्मृत्य शनकैः प्रियाम् ।
कण्ठावलम्बिनीं कृत्वा धन्योऽस्मीति मुदं ययौ ॥ २६५ ॥
ततः कालेन सा गर्भदोहदा पाण्डुरच्छविः ।
बभूवासन्नचन्द्रेव लहरी दुग्धवारिधेः ॥ २६६ ॥
अथासूत सुतं कान्तं[२] बालकं समवर्चसम् ।
चक्रवर्तिपदोदारलाञ्छनाकलिताकृतिम् ॥ २६७ ॥
दिनेषु षट्सु यातेषु ततो धर्षितदिक्तटाः ।
उद्यत्तरुजटालग्ना विकटा मरुतो ववुः ॥ २६८ ॥
पांशुरूपान्धकारेण नद्धे भुवनमण्डले ।
प्रविश्य सूतिकावेश्म काली पिङ्गललोचना ॥ २६९ ॥
दंष्ट्राविकटवदना तडित्तरलकुण्डला ।
भयंकरी कापि योषित्तं जहार शिशुं बलात् ॥ २७० ॥
पुत्रस्नेहादनुययौ यातां तां च नृपप्रिया ।
सलिलान्तरनिर्मग्नां तामेवानुममज्ज ह ॥ २७१ ॥
राजापि तिमिरे शान्ते यातां क्वापि सपुत्रकाम् ।
ज्ञात्वा प्रियतमां शोकाद्भेजे शतगुणं तमः ॥ २७२ ॥
राजधानीं परित्यज्य हा प्रिये चित्तचन्द्रिके ।
क्व यातासीति विलपन्बभ्राम विपुलां महीम् ॥ २७३ ॥
स काननं समासाद्य कान्तं विद्याधरं पदम् ।
ददर्श तं च पप्रच्छ संतप्तः शोकभेषजम् ॥ २७४ ॥
स च विद्याधरः प्राह द्विजोऽहं तत्प्रतिग्रही[३] ।
बन्धुदत्ताभिधो राजंस्त्वद्गृहे कृतभोजनः ॥ २७५ ॥

---

१. 'पत्नीं' ख. २. 'कान्ता बालार्कसमवर्चसम्' ख. ३. 'त्परिग्र' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वयैव कृतसाहाय्यः पुरा वेतालसाधकः ।
वैद्याधरीमहं प्राप्तः श्रियमेतां महीपते ॥ २७६ ॥
इतो गत्वा भगवतीमाराध्य हरवल्लभाम् ।
अचिरात्प्राप्स्यसि सतीं तामेव सुचिरात्प्रियाम् ॥ २७७ ॥
इत्युक्तस्तेन स शनैर्गत्वा विन्ध्यमहीधरम् ।
अतोषयद्भगवतीं तपसा शंकरप्रियाम् ॥ २७८ ॥
मयैव रक्षिता पत्नी तव सा ससुता प्रिया ।
इत्युक्त्वा पार्वती तस्मै ददौ तां तनयं तदा ॥ २७९ ॥
प्रहृष्टो दयितां प्राप्य प्राप पुत्रं च भूपतिः ।
हिरण्यवर्णः स्वपुरं गत्वा चक्रे महोत्सवम् ॥ २८० ॥

इति हिरण्यवर्णाख्यायिका ॥ ११ ॥

गोमुखेनेति कथिते प्रहृष्टे नरवाहने ।
तत्स्पर्धाबन्धसंरब्धो मरुभूतिरभाषत ॥ २८१ ॥
चन्द्रस्वामीति विप्रोऽभून्नगरे कमलाभिधे ।
भार्या देवमती नाम तस्याभूदुचितव्रता ॥ २८२ ॥
महीपालाभिधं तस्यां स प्राप तनयं प्रियम् ।
अलंकारं निजकुले कन्यां चन्द्रवतीं तथा ॥ २८३ ॥
कदाचिदथ दुर्भिक्षे भार्यामामन्त्र्य तां ययौ ।
श्वशुरावसथे न्यस्तं तं पुत्रं कन्यकां च ताम् ॥ २८४ ॥
पथि ग्रीष्मोपसंतप्तं संप्राप्तो जीवनं वनम् ।
शुशोच दृष्ट्वा तृष्णार्तौ बालौ शुष्यन्मुखाम्बुजौ ॥ २८५ ॥
निधाय तौ तथैकान्ते तदर्थं जलकाङ्क्षया ।
स व्रजञ्शबराधीशमपश्यद्दारुणाकृतिम् ॥ २८६ ॥
तेन दुर्गोपहाराय नीते तस्मिन्निजालयम् ।
तौ बालकौ महाशोकवह्निसंतापमापतुः ॥ २८७ ॥

---

१. 'धं:' ख. २. 'र्षो' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो यदृच्छयायातो वणिक्सार्थवराभिधः ।
निजं निनाय कृपया तौ गृहं श्रुततत्कथः ॥ २८८ ॥
चन्द्रवत्या समं स्वस्रा महीपालोऽथ तद्गृहे ।
श्रुतिस्मृतिक्रियासक्तश्चिरं तस्थौ द्विजाग्रणीः ॥ २८९ ॥
ततस्तारावलोकस्य नृपतेः सचिवो द्विजः ।
श्रीमाननन्तस्वामीति तं मित्रं प्राप सार्थपम् ॥ २९० ॥
स तद्गृहे द्विजसुतं दृष्ट्वा कन्यां च विस्मितः ।
दत्तः सार्थवरेणैव प्रीतः पुत्रपदे व्यधात् ॥ २९१ ॥
अनन्तस्वामिनानीतौ तारापुरनिवासिनौ ।
तद्वधूभ्यां च यत्नेन सुताविति विवर्धितौ ॥ २९२ ॥
अस्मिन्नवसरे चन्द्रस्वामी शबरमन्दिरे ।
तुष्टाव भास्करं गाढनिगडाबन्धपीडितः ॥ २९३ ॥
तत्स्तोत्रतुष्टो भगवान्स्वप्ने शबरमंशुमान् ।
आदिदेश कृपाविष्टो द्विजोऽयं त्यज्यतामिति ॥ २९४ ॥
तदाज्ञया परित्यक्तस्तेन सोऽथ सुताशया ।
चिन्तासंतप्तहृदयो बभ्राम निखिलां महीम् ॥ २९५ ॥
स पृच्छन्पथिकान्सर्वाञ्शुश्राव जलधेस्तटे ।
बालौ केनापि वणिजा प्राप्तावित्यस्फुटं पथि ॥ २९६ ॥
समुद्रद्वीपविषयनगरग्रामगह्वरम् ।
स विविच्य शनैः प्राप क्षपायां निर्जनं वनम् ॥ २९७ ॥
ददर्श मातृकास्तत्र देवतायोगिनीगणैः ।
सेविताः कलिसंसक्ता नृत्यगीतरसाकुलाः ॥ २९८ ॥
तत्रैका योगिनी प्राह निजां दृष्ट्वानुयायिनीम् ।
निरीक्ष्यमाणां विप्रं सा साभिलाषं सविभ्रमाम् ॥ २९९ ॥
अयि किं त्वमदृष्टेऽसि विप्रेऽस्मिन्नभिलाषिणी ।
पुरा नपुंसकं प्राप सुन्दरी राजकन्यका ॥ ३०० ॥

१-२ 'प' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भर्तारं निशि शय्यायां तं दृष्ट्वा दुःखिताभवत् ।
सा पित्रे प्रेषयामास दूतं सोऽप्यायया रुषा ॥ ३०१ ॥
नपुंसकेन मत्कन्या दूषितेति रणोन्मुखः ।
भयात्तस्याथ जामाता मन्त्रेणाराध्य गुह्यकम् ॥ ३०२ ॥
अवाप्य पौरुषं लिङ्गं सिषेवे सुन्दरीं पुनः ।
त्वमप्यज्ञातशीलेऽस्मिन्मा कृथाः सादरं मनः ॥ ३०३ ॥
तामित्युक्त्वा समभ्येत्य पप्रच्छ ब्राह्मणं ततः ।
अप्यस्यां साभिलाषस्त्वं न वेति द्विज कथ्यताम् ॥ ३०४ ॥
सोऽब्रवीद्देवि मनसः स्वभावो ह्यभिलाषिता ।
किं त्वहं त्वविवेकेन रक्षाम्यनुचितादिति ॥ ३०५ ॥
तच्छ्रुत्वा वरदा देवी तस्मै नीलोत्पलं ददौ ।
सर्वार्थसिद्धिमेतेन प्राप्स्यसीत्यभिधाय सा ॥ ३०६ ॥
तत्प्राप्य स व्रजन्प्रातर्गत्वा तारापुरं शनैः ।
हा कष्टमिति शुश्राव जनकोलाहलं महत् ॥ ३०७ ॥
किमेतदिति पृष्ट्वासौ पौरेभ्यः स्वामिनो महत् ।
अनन्तस्वामिनः सूनुर्दत्तको नृपमन्त्रिणः ॥ ३०८ ॥
सर्पेण दष्टः श्रुत्वेति तमपश्यद्व्यसुं ततः ।
नीलोत्पलप्रभावेन जीवयित्वा स तं क्षणात् ॥ ३०९ ॥
कण्ठे जग्राह सोत्कण्ठं परिज्ञाय निजात्मजम् ।
ततो बन्धुमतीं नाम तनयां गुणशालिनीम् ॥ ३१० ॥
ददौ तारावलोकोऽस्मै राज्यार्धं च नरेश्वरः ।
प्राप्तराज्यं महीपालं चन्द्रस्वामी ततः सुतम् ॥ ३११ ॥
तं रहः प्राह जननीं द्रष्टुमेहि निजां पुरीम् ।
सा हि दीर्घवियोगेन किं तु जीवति वा न वा ॥ ३१२ ॥
तामादाय पुनः पुत्र समेष्यावः क्षणादिति ।
तव संप्राप्तराज्यस्य गुरुभक्तिर्विभूषणम् ॥ ३१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लक्ष्मीलताकुठारो हि गुरुशापः सुदुःसहः।
चक्रस्य वणिजः पूर्वं पितुरादेशखण्डनात् ॥ ३१४ ॥
ज्वालाकुलं मूर्ध्नि चक्रं पपातात्यन्तदुःसहम्।
पितरौ सेवमानस्य धर्मव्याधस्य कोऽप्यभूत् ॥ ३१५ ॥
ज्ञानप्रकाशो येनास्य शिष्यतां मुनयो ययुः।
इति पित्रा समादिष्टः स ययौ मातुरन्तिकम् ॥ ३१६ ॥
याते तस्मिन्वियोगार्ता बन्धुमत्यभवत्ततः।
सा दुःखिता मातृगिरा सत्रागारमकारयत् ॥ ३१७ ॥
नानादेशगतामेकद्विजविश्रान्तिपादपम्।
ततः संगमदत्ताख्यो द्विजन्मा तीर्थशालिनीम् ॥ ३१८ ॥
भ्रान्त्वा वसुमतीं लेभे स तत्र स्नानभोजनम्।
बन्धुमत्या स पृष्टोऽथ वियोगे दुःखभेषजम् ॥ ३१९ ॥
उवाच पुण्ययोगेन निजं भर्तारमाप्स्यसि।
स्वयमेव मयाश्चर्यं दृष्टं शृणु पतिव्रते ॥ ३२० ॥
भ्रान्त्वा निखिलतीर्थानि हिमशैलसरोवरे।
उत्थितं दिव्यपुरुषं दिव्याभरणभूषितम् ॥ ३२१ ॥
अपश्यं दिव्यनारीभिः सेव्यमानं सरोवरात्।
रममाणे ततस्तस्मिंस्तत्र लीलावतीसखे ॥ ३२२ ॥
केलिक्लान्ते क्षणं सुप्ते कोऽपि राजा समाययौ।
स समभ्येत्य निद्रालोः खड्गं तस्यान्तिके स्थितम् ॥ ३२३ ॥
गृहीत्वा तत्प्रभावेण तं जघान पदा ततः।
तस्मिन्निरस्ते विभ्रष्टविद्ये निपतिते तटात् ॥ ३२४ ॥
स राजा तद्वधूयुग्मं प्राप्य मामवदत्ततः।
एष पाशुपताचार्यो मया सह पुरा व्यधात् ॥ ३२५ ॥
पातालसिद्धिखड्गोऽयं दिव्यः प्राप्तस्ततो मया।
छद्मना मम सुप्तस्य हृत्वा खड्गमिमं निशि ॥ ३२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पापः प्रयातो नभसा दिव्यस्त्रीसङ्गसिद्धिदम् ।
अद्य द्वादशभिर्लब्धः सोऽयं संवत्सरैर्मया ॥ ३२७ ॥
निधनार्होऽपि न हतः सिद्धयोऽपि हृतास्तु ताः ।
इत्युक्त्वा सरसो मध्ये दिव्यमाणिक्यमन्दिरम् ॥ ३२८ ॥
सहैवामरकान्ताभ्यां स विवेश नरेश्वरः ।
इति बन्धुमती श्रुत्वा चित्रमुक्तं द्विजन्मना ॥ ३२९ ॥
बबन्ध धैर्यं धर्मस्था सती दयितसंगमे ।
कदाचिदपरोऽभ्येत्य तां द्विजः सत्रशालिकाम् ॥ ३३० ॥
भुक्त्वा विज्ञातवृत्तान्तः प्राह बन्धुमतीं कृशाम् ।
निषधेषु नलो नाम भूपालो ललिताकृतिः ॥ ३३१ ॥
अभूद्गुणगणोद्यानविकाशकुसुमाकरः ।
मृगयारसिकः सोऽथ कदाचित्कनकप्रभाम् ॥ ३३२ ॥
बबन्ध हंसांस्ते चाहुर्मुञ्चास्मांस्त्वं महीपते ।
सुता विदर्भराजस्य भीमस्यास्ति सुमध्यमा ॥ ३३३ ॥
दमयन्तीति विख्याता वयं तत्केलिसारसाः ।
ते वयं भवता मुक्ताः करिष्यामः प्रियं तव ॥ ३३४ ॥
भविष्यसि तृतीयेन तन्मुखाम्भोजषट्पदः ।
इति श्रुत्वैव [1]तत्याज हंसान्व्यासो मनोभुवा ॥ ३३५ ॥
श्रुतेनापीप्सितं वस्तु कस्य धैर्यं न कर्षति ।
ते गत्वा दमयन्त्यै तं कथयन्तो न्यवेदयन् ॥ ३३६ ॥
सौभाग्यमिव साकारं प्रत्यक्षमिव मन्मथम् ।
शनकैर्विरहक्षामौ तौ गुणाँ[3]कर्णनान्मिथः ॥ ३३७ ॥
दिनैर्बभूवतुः प्रौढशरताकाण्डपाण्डुरौ ।
अथ राजसुता ध्यात्वा नलसंगमवाञ्छया ॥ ३३८ ॥
नृपेभ्यः प्राहिणोद्दूतान्पितुर्वाक्यात्स्वयंवरे ।
समागतेषु भूपेषु लोकपालाः समाययुः ॥ ३३९ ॥

---

१. 'सोद्विग्नो हंसात्प्राप्तमनोभवम्' ख. २. 'तमत्रे' ख. ३. 'णश्रवणा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्राद्या नारदगिरा कन्यावरणलोलुपाः ।
साभिलाषां नले ज्ञात्वा दमयन्तीं दृढव्रताम् ॥ ३४० ॥
तद्रूपा एव विविशुः स्वयंवरसभां सुराः ।
निर्विशेषान्नलान्दृष्ट्वा दमयन्ती भुवि स्थिता ॥ ३४१ ॥
छायाद्वितीयमवृणोत्परिज्ञाय नलं धिया ।
ज्ञात्वा देवाः स्वमाकारं विधाय प्रददुर्वरान् ॥ ३४२ ॥
नलरूपाय संतुष्टाः स्मरणाच्च स संनिधिम् ।
दमयन्तीं समादाय स्वपुरं नैषधे गते ॥ ३४३ ॥
द्वापरेण कलिः सार्धं कन्यालोभात्समाययौ ।
वृतस्तया नलो राजा गच्छ वृत्तः स्वयंवरः ॥ ३४४ ॥
श्रुत्वेति देववचनं वृद्धः प्रायात्कलिर्नलम् ।
तदाविष्टः स नृपतिः सगोत्रेणाथ शत्रुणा ॥ ३४५ ॥
केनापि पुष्कराख्येन जित्वारण्यं विवासितः ।
दमयन्त्या स सहितः काननं प्राप्य निर्जनम् ॥ ३४६ ॥
गृहीतुं वाससा हंसान्क्षुत्क्षामः क्षिप्रमुद्ययौ ।
कलिद्वापरनिर्दिष्टास्ते हंसास्तूर्णमंशुकम् ॥ ३४७ ॥
जहुस्तस्य ततः सोऽपि दयितार्धाम्बरं श्रितः ।
तावेकवसनाद्दूरं गत्वा प्राप्य वनान्तरम् ॥ ३४८ ॥
निषण्णौ स्थण्डिले तृष्णाशुष्यद्वदनपङ्कजौ ।
दमयन्त्यां प्रसुप्तायां नलः कलिविमोहितः ॥ ३४९ ॥
कृत्वा[2] शस्त्रेण वस्त्रार्धं प्रययौ दैवविप्लुतः ।
स गत्वा पुनरभ्यायात्पुनः प्रायात्स दुःखितः ॥ ३५० ॥
दोलाविलोलहृदयो रागान्मोहाच्च[3] भूपतिः ।
त्रायस्वेति समाकर्ण्य शब्दं गत्वा वनान्तरम् ॥ ३५१ ॥
दावानलादुज्जहार कर्कोटं पन्नगोत्तमम् ।
ततस्तद्विषफूत्कारैर्यातः क्षिप्रं विवर्णताम् ॥ ३५२ ॥

१. 'व्रतम्' ख. २. 'छित्त्वा वस्त्रं स प्रययौ मोहितो देवविप्लवः' ख. ३. 'ना' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्रस्वोऽविटङ्कवदनः सोऽभवन्नृपशेखरः ।
ऋतुपर्णस्य नगरीमयोध्यां प्राप्य दुःखितः ॥ ३५३ ॥
प्राप्तनागांशुकस्तस्थौ सूदसारथ्यकर्मणि ।
दमयन्ती प्रबुद्धापि प्राणनाथविनाकृता ॥ ३५४ ॥
विललापातिकरुणं दृषदामपि दारणम् ।
क्वासि मे हृदयाधीश फुल्लपद्मदलेक्षण ॥ ३५५ ॥
तां दुष्टाजगरेणाशु ग्रस्तां वा क्रोशतीं मुहुः ।
तामाकर्ण्यागतो व्याधो हत्वा दुष्टं मुमोच ताम् ॥ ३५६ ॥
ततः कामातुरो भूतकोपाद्भस्म चकार तम् ।
इति क्षामाक्षरं बाला शोचन्ती सा ययौ शनैः ॥ ३५७ ॥
कालेन वैदर्भपुरीं पितुः प्राप्य सुमध्यमा ।
एकवेणीव्रता तस्थौ नलसंगमवाञ्छया ॥ ३५८ ॥
सा ततः प्राहिणोद्विप्रान्विचेतुं निषधाधिपम् ।
पृथिवीं ते च तद्गाथां गायन्तो बभ्रमुश्चिरम् ॥ ३५९ ॥
ऋतुपर्णपुरे धीमानेको विप्रश्चरन्मुहुः ।
जगौ विगुणयंस्तत्र नलस्याद्भुतचेष्टितम् ॥ ३६० ॥
मनोरथमपि च्छित्वा वाससोऽर्धं गतो ह्यसि ।
प्राणेश्वर प्रियां भार्यां क्व नु त्यक्त्वा विमोहिताम् ॥ ३६१ ॥
द्विजस्येत्यथ सारथ्यच्छन्नस्तुरगमन्दिरम् ।
श्रुत्वैव विकटाकारः सास्रोऽभूद्बाहुकाभिधः ॥ ३६२ ॥
सोऽब्रवीद्दैवदग्धानां दुष्कर्महतचेतसाम् ।
निकारं करुणापूर्णाः सहन्ते सरलाशयाः ॥ ३६३ ॥
बाहुकस्येति वचनं श्रुत्वा साश्रुदृशो वचः ।
अयोध्यां ब्राह्मणो गत्वा दमयन्त्यै न्यवेदयत् ॥ ३६४ ॥
सापि स्वयंवरव्याजादृतुपर्णं महीभुजम् ।
एकेनैव निनायाह्ना लङ्घितानेकयोजनम् ॥ ३६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स वाजिहृदयज्ञेन बाहुकेनाश्ववाहिना ।
ध्यात्वायोध्याधिपं प्राप्तं नलं सूतमशङ्कत ॥ ३६६ ॥
ऋतुपर्णप्रदिष्टं च प्राप्याक्षहृदयं नलः ।
नागांशुकेन तत्याज बाहुकस्तां विरूपताम् ॥ ३६७ ॥
कर्कोटविषदग्धोऽथ तच्छरीराद्विनिर्गतः ।
कलिर्विभीतकतरुं विवेश भयविह्वलः ॥ ३६८ ॥
ततः स्वरूपसुभगं नलं पद्मदलेक्षणम् ।
दमयन्ती समासाद्य हृष्टा निर्वृतिमाययौ ॥ ३६९ ॥
नलोऽपि स्वपुरं गत्वा सानुगो वल्लभासखः ।
द्यूतेन पुष्करं जित्वा निजं राज्यमवाप्तवान् ॥ ३७० ॥
इति वैदर्भतनया दयितं प्राप सुन्दरी ।
त्वमप्येवं महीपालं द्विजेन्द्रं पतिमाप्स्यसि ॥ ३७१ ॥

इत्यन्तर्नलाख्यायिका ॥ १२ ॥

इति विप्रवचः श्रुत्वा भेजे बन्धुमती धृतिम् ।
कालेन तत्पतिस्तस्य पितरौ च समाययुः ॥ ३७२ ॥
प्रियां बन्धुमतीं प्राप्य राज्यं च स जनप्रियः ।
वरादनन्तनागस्य सहस्रायुरभूद्द्विजः ॥ ३७३ ॥

इति बन्धुमत्याख्यायिका ॥ १३ ॥

इति प्रियसखः श्रुत्वा कथितं मरुभूतिना ।
सुहृत्केलिकलालोलस्तुतोष नरवाहनः ॥ ३७४ ॥
अथ सचिवकथाभिः कामिनीकेलिसक्तो
गुरुचरणसपर्याकल्पितोत्तंसशोभः ।
रिपुकुवलयवह्निश्चन्द्रचूडाङ्घ्रिसेवा-
विकसदमलसत्त्वो राजपुत्रो बभूव ॥ ३७५ ॥

इति श्रीक्षेमेन्द्रविरचितायां बृहत्कथामञ्जर्यामलंकारवती नाम पञ्चदशो लम्बकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्तियशोलम्बकः ।

अनङ्गीकृतकामाय नमो वामार्धधारिणे ।
शिवायाश्चर्यरूपाय निष्कलाय कलाभृते ॥ १ ॥
ततः कदाचिदास्थानस्थितं वत्सनरेश्वरम् ।
वणिग्व्यजिज्ञपत्प्रह्वः प्रतीहारेण सूचितः ॥ २ ॥
देवाभवद्दुर्गतो मे दासो वसुधराभिधः ।
मयाद्य तस्य शिखरे कापि संपद्विलोकिता ॥ ३ ॥
मया सकौतुकं पृष्टः प्राह मद्यमदाकुलः ।
प्राप्तो मया नृपद्वारादनर्घ्यो रत्नकङ्कणः ॥ ४ ॥
रत्नत्रयवतस्तस्मादुपात्तैको मणिर्मया ।
दत्तो रूपकलक्षेण वणिजा विजनस्थिते ॥ ५ ॥
इति तद्वचनं श्रुत्वा मयान्विष्टो वणिक्स्वयम् ।
हिरण्यगुप्तो धनवान्विपुलक्रयविक्रयः ॥ ६ ॥
वणिजा रत्नदत्तेन श्रुत्वेत्यावेदितं नृपः ।
तं विसृज्य प्रतीहारसंदिष्टावानिनाय तौ ॥ ७ ॥
ताभ्यां कङ्कणमासाद्य रत्नमुत्पाटितं च तौ ।
कृपया वत्सभूपेन मूर्खाविति न दण्डितौ ॥ ८ ॥
ततो नर्मसुहृत्प्राह हासशीलो वसन्तकः ।
अहो नु पुण्यहीनेन हारितोऽनेन कङ्कणः ॥ ९ ॥
दैवाद्वा कर्मयोगाद्वा लक्ष्मीः प्राप्तापि गोचरम् ।
प्रमादादल्पबुद्धीनां सहसैव विनश्यति ॥ १० ॥
वराको विप्रलब्धोऽत्र कटकेन सुदुर्गतः ।
स्वप्नवन्मन्दभाग्योऽसौ तत्रैव श्रूयतामिति ॥ ११ ॥
भारिकः शुभदत्ताख्यः पुरे पाटलिपुत्रके ।
काष्ठान्याहर्तुमगमद्वनं विपुलपादपम् ॥ १२ ॥

---

१. 'विपुले रत्नयुक्तेन कटकेन सुदुर्गते' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिव्यमाल्याम्बरधरं तत्र यक्षचतुष्टयम्।
ददर्श विगतस्तत्र प्राहुस्ते तमथादरात्[1] ॥ १३ ॥
अरे चतुररूप त्वं मनुष्यः परिदृश्यसे।
निर्जनेऽस्मिन्वने भद्र परिचर्यां कुरुष्व नः।
(भोजनं[2] तावदधुना देहि नानारसोचितम् ॥ १४ ॥
अमुष्माद्भद्रघटकाद्यदिष्टं तदवाप्यते।
इति तद्वचसा तूर्णं घटकात्तत्प्रदर्शितात्) ॥ १५ ॥
यथोदितं समुद्धृत्य तेभ्यो भोगान्वरान्ददौ।
तदाज्ञया स्वयं प्राप यथेच्छमशनं ततः ॥ १६ ॥
दिव्यं विलेपनं मालां शयनं च घटोद्धृतम्।
तेभ्यो भुक्तोत्तरं दत्त्वा स परं विस्मयं ययौ ॥ १७ ॥
इत्थं तत्सेवया नित्यं कंचित्कालं निनाय सः।
कालेन तुष्टास्ते यक्षास्तमेवास्मै ददुर्घटम् ॥ १८ ॥
नमोऽस्तु तस्य सेवायै सर्वसिद्धिभुवा यया।
यक्षा अपि वशं यान्ति दुर्लक्षा विषमाशया ॥ १९ ॥
स भद्रघटमादाय भारिकः स्वगृहं ययौ।
चिन्तामणिप्रभावात्तस्मात्परामृद्धिमवाप्तवान् ॥ २० ॥
ततस्तदुद्धृतैर्भोगैः सुहृद्बन्धुजनैर्वृतः।
महोत्सवं स विदधे सदा मधुमदाकुलः ॥ २१ ॥
विभूतिकारणं पृष्टः कौतुकात्स्वजनैरथ।
हर्षाद्भद्रघटं स्कन्धे कृत्वा क्षीबो ननर्त सः ॥ २२ ॥
मददोषात्पपातासौ सशब्दं वसुधातले।
तस्मिन्निपतिते मत्ते ययौ शकलतां घटः ॥ २३ ॥
भग्ने मनोरथैः सार्धं घटे यक्षान्तिकं गते।
स्वप्नवद्वञ्चितः प्राप दशां स्वामेव भारिकः ॥ २४ ॥

१. 'ताशङ्कस्ते च वाहुस्तमम्वरात्' ख. २. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येवं क्षीणभाग्यानामयोग्यानां प्रमादिनाम् ।
दृष्टनष्टा भवन्त्येव विद्युत्तुल्या विभूतयः ॥ २५ ॥

इति भद्रघटाख्यायिका ॥ १ ॥

इति वत्सेश्वरः श्रुत्वा सामात्यो दयितासखः ।
क्षणं स्मितसुधाधौतकपोलफलकोऽभवत् ॥ २६ ॥
ततो मध्यं समारूढे व्योम्नः कमलिनीप्रिये ।
वत्सराजो नृपशतैः सहोत्थाय सभातलात् ॥ २७ ॥
स्नात्वार्चयित्वा श्रीकण्ठं भुक्त्वान्तःपुरमभ्यगात् ।
नरवाहनदत्तोऽपि निशि शय्यागृहं ययौ ॥ २८ ॥
वयस्यैः सहितस्तत्र नर्मकेलिकथान्तरे ।
बहिः स्थितानां शुश्राव गीतं हरिणचक्षुषाम् ॥ २९ ॥
वाराङ्गनानां गीतेन संजातपुलकं ततः ।
मरुभूतिं समालोक्य हसन्प्राह तपन्तकः ॥ ३० ॥
देव वेश्याङ्गनागीतध्वनिना पश्य ते सुहृत् ।
आकृष्यमाणहृदयः कुरङ्ग इव लक्ष्यते ॥ ३१ ॥
श्रुत्वेति तद्वचः प्राह मरुभूतिः स्मिताननः ।
मृषा तपन्तकेनोक्तं जानेऽहं वैशिकीं स्थितिम् ॥ ३२ ॥
क्रूराणां क्षणरक्तानामवसाने तमःस्पृशाम् ।
संध्यानामिव वेश्यानां गुणिसङ्गकथैव का ॥ ३३ ॥
चपलाः क्षिप्ररुचयस्तूर्णं स्रस्तपयोधराः ।
निरम्बरदशा यान्ति पर्यन्ते वारयोषितः ॥ ३४ ॥
दर्शनेष्वेव सुखदा वेश्या वेशोज्ज्वलश्रियः ।
भोगवैरस्यकारिण्यः काठिन्यकटुकास्ततः ।
श्रूयतां गणिकावृत्तं विचित्रं कथयाम्यहम् ॥ ३५ ॥
नगरे चित्रकूटाख्ये रत्नधर्माभवद्वणिक् ।
श्रीमानीशानधर्माख्यस्तस्याभूत्तनयः प्रियः ॥ ३६ ॥

१. 'कुटिला' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कलाकलापकुशलो विद्यासु च कृतश्रमः ।
पित्रा महाधनेनासौ श्रीरक्षार्थं समर्पितः ॥ ३७ ॥
कुट्टिन्यै यमजिह्वायै वेश्यावञ्चनशिक्षणे ।
पुत्रप्रीत्या ददौ तस्यै शिक्षामूल्यं वणिग्वरः ॥ ३८ ॥
अशिक्षितेऽस्मिन्द्विगुणं ग्रहीष्यामीति संविदा ।
शिष्यतां प्रतिपन्नं तं सा गृहीत्वा वणिक्सुतम् ॥ ३९ ॥
संवत्सरेण विदधे वेश्यावञ्चनकोविदम् ।
ततः कदाचित्स युवा विसृष्टो द्रविणार्जने ॥ ४० ॥
पित्रा जलनिधेस्तीरे स्थितं हेमपुरं ययौ ।
पञ्चकोटीः समादाय रूप्याणां सचिवैर्वृतः ॥ ४१ ॥
प्रविश्य तत्पुरं प्राप देवायतनमुत्तमम् ।
ददर्श तत्र नृत्यन्तीं हरिणायतलोचनाम् ॥ ४२ ॥
तरुणीं सुन्दरीं नाम गणिकां रतिजीविनीम् ।
प्रदाय सुहृदा तस्यै ताम्बूलं मन्मथाकुलः ॥ ४३ ॥
धन्याहमिति वादिन्या गृहं तस्या विवेश सः ।
महार्हभूषणे तत्र कर्पूरागुरुधूपिते ॥ ४४ ॥
पुष्पोपहासरुचिरे वद्धपट्टवितानके ।
शय्यागृहे हिमस्वच्छन्यस्तचीनोत्तरच्छदे ॥ ४५ ॥
उपविष्टः समायातां लतां वाताकुलामि(१व ।
सोऽपश्यत्सुन्दरीं हृष्टामग्राम्यहितमण्डनाम् ॥ ४६ ॥
तस्यां समुपविष्टायां प्रवृत्ते पानकोत्सवे) ।
यथेष्टवादो मित्राणां निर्मर्यादमवर्तत ॥ ४७ ॥
ततो मकरदंष्ट्राख्या सुन्दर्या जननी शनैः ।
स्वयं गृहीतताम्बूला हर्षपूर्णा समाययौ ॥ ४८ ॥
संशुष्कविकटाकारां जरतीपूतनामिव ।
रक्तक्षयकरीं चौरां पिशाचीमिव वञ्चकाम् ॥ ४९ ॥

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रणनाम वणिक्पुत्रस्तां वलीनालिताङ्गिकाम् ।
कामिसर्वस्वसंहारसंख्यारेखाङ्किताामिव ॥ ५० ॥
तस्य त्यागप्रधानैः सा विपुलैर्गुणसंस्तवैः ।
जग्राह हृदयं तूर्णं सुहृदां च यथोचितैः ॥ ५१ ॥
ततो नीते विजनतां तस्मिन्क्रीडनमण्डपे ।
स लीलारसिको भेजे सुन्दर्याः सुरतोत्सवम् ॥ ५२ ॥
वैदग्ध्यमौग्ध्यसंदिग्धै रसारम्भैश्च विभ्रमैः ।
सद्भावभावितैर्भावैः स विवेश तदाशयम् ॥ ५३ ॥
ततः प्रभाते सानन्दौ गाढालिङ्गननिःसहौ ।
चक्रतुस्तौ समुत्थाय शृङ्गारोचितमाह्निकम् ॥ ५४ ॥
इत्थं प्रतिदिनं श्रीमान्स तयाराधितः शनैः ।
हेमरत्नाम्बराश्वादि तस्यै कोटिसमं ददौ ॥ ५५ ॥
स किंचिच्छेषसर्वस्वः कालेन सुहृदो गिरा ।
पित्रा लेखेन चाज्ञप्तो द्वीपं गन्तुं समुद्ययौ ॥ ५६ ॥
ततः कृतकबाष्पाम्बुप्लावितोच्चकुचस्थली ।
आश्लिष्टानेन मूढेन सव्यथेन मुहुर्मुहुः ॥ ५७ ॥
पाणिपङ्कजविन्यस्तकपोलकलिताकृतिः ।
आश्वास्यमाना बहुशो मात्राकृतकसंचयैः ॥ ५८ ॥
सा प्रस्थितं तमवदच्छेषार्थहरणोद्यता ।
त्वां विना नैव जीवामीत्युक्त्वाभूद्गुम्फिताधरा ॥ ५९ ॥
आकृष्टः प्रेमपाशेन तया भीत्या पितुश्च सः ।
दोलाविलोलहृदयः प्रतस्थे भृशदुःखितः ॥ ६० ॥
ततः प्रविदधे कूपे कुट्टिनी रज्जुजालकम् ।
विसृज्य गूढं पुरुषान्सुतां तत्रैव चाक्षिपत् ॥ ६१ ॥
हा हा त्वद्विरहायासनिःसहा सहसात्यजत् ।
कूपे क्षिप्ता च सुन्दर्या चुक्रोशेत्यथ कुट्टिनी ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुत्वा प्रतिनिवृत्तस्तां सुहृद्भिस्तूर्णमुद्धृताम् ।
कण्ठे गृहीत्वा सोत्कण्ठं स रुरोद वणिक्सुतः ॥ ६३ ॥
ततस्तत्रैव तां कान्तां सेवमानः कृशोदरीम् ।
अनल्पेनैव कालेन निःशेषविभवोऽभवत् ॥ ६४ ॥
चिरात्प्रतिगृहं प्रायात्स्वबाहुस्वस्तिकांशुकः ।
कृशो विच्छायवदनस्तदाहूतोऽतिलज्जितः ॥ ६५ ॥
ततस्तज्जनकः कोपाद्यमजिह्वामुपेत्य ताम् ।
उवाच बत मत्पुत्रस्त्वयासौ शिक्षितः कलाः ॥ ६६ ॥
वञ्चितः काञ्चनपुरे कुट्टिन्या प्रीतमायया ।
विनष्टाः पञ्च कोट्यो मे शिक्षामूल्यं प्रयच्छ मे ॥ ६७ ॥
इति श्रुत्वा वणिग्वाक्यं पृष्ट्वा वृत्तं च तत्सुतम् ।
यमजिह्वावदत्पुत्र पुनर्गच्छ धनाप्तये ॥ ६८ ॥
एको जालप्रयोगोऽस्ति सत्यं मोहात्स विस्मृतः ।
तत्प्रत्यस्त्रं गृहाणेदमित्युक्त्वास्मै ददौ कपिम् ॥ ६९ ॥
अनेन तद्दशगुणं तया भक्षितमाप्स्यसि ।
धनमस्य प्रभावश्च प्रत्यक्षं परिदृश्यताम् ॥ ७० ॥
इत्युक्त्वा रूप्यकशतं मर्कटायैव सा ददौ ।
निगीर्य स ततः प्रादाद्यावद्यो यः समीहते ॥ ७१ ॥
आलं नाम तमादाय मर्कटं प्रत्ययाद्वणिक् ।
बहुलद्रविणापूर्णः पुनर्हेमपुरं ययौ ॥ ७२ ॥
आसाद्य सुन्दरीं तत्र रागिणीं धनगौरवात् ।
पुनर्महोत्सवं चक्रे तद्गृहे रतिलालसः ॥ ७३ ॥
निगीर्णरूपकं तस्यै तं मर्कटमदर्शयत् ।
उद्गीर्य वक्त्रादसकृत्प्रददौ रूपकानि यः ॥ ७४ ॥
दृष्ट्वा तं सहिता मात्रा सुन्दरी समचिन्तयत् ।
अहो निधानरूपोऽयं चिन्तामणिनिभः कपिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहूपायैरसंपूर्णैः किं धनैः क्लेशचिन्तितैः ॥ ७५ ॥
इति संचिन्त्य सा मात्रा शनैः प्रियमयाचत ।
मर्कटं तं च न ददौ निजोत्सङ्गगतं वणिक् ॥ ७६ ॥
प्रीत्या विपुलनिर्बन्धात्सुन्दर्या प्रार्थितश्चिरम् ।
ददौ कोटिशतेनास्यै रूपकष्ठीविनं कपिम् ॥ ७७ ॥
तत्सर्वस्वं समादाय क्रयविक्रयसंचितम् ।
वणिङ्निजपुरं प्रायात्ततो वैश्रवणोपमः ॥ ७८ ॥
अथाज्ञया पितुः श्रीमान्परिणीय कुलोचितम् ।
कैलां गुणवतीं नाम विललास कलानिधिः ॥ ७९ ॥
कुट्टिन्या याच्यमानोऽपि स चिरात्क्षीणरूपकः ।
मर्कटो न ददौ किंचिदस्थितं दीयते कुतः ॥ ८० ॥
स सान्त्वितोऽपि बहुशः कशाभिश्चाहतो मुहुः ।
महाधनव्ययरुषा ताडितश्च महाश्मना ॥ ८१ ॥
निर्जीवितः कृतस्ताभ्यामालो मर्कटपोतकः ।
इत्यालजालैर्गणिका वञ्च्यन्ते वञ्चयन्ति च ॥ ८२ ॥
इति राजसुतः श्रुत्वा कथितं मरुभूतिना ।
बभूव गणिकासङ्गसंकल्पशिथिलादरः ॥ ८३ ॥

इत्यालजालाख्यायिका ॥ २ ॥

अत्रैव गोमुखः प्राह प्रस्तावसदृशीं कथाम् ।
राजा विक्रमसिंहाख्यः प्रतिष्ठानपुरेऽभवत् ॥ ८४ ॥
बभूव शशिलेखाख्या प्रिया तस्य सुलोचना ।
अनन्तगुणनामा च सचिवो धीमतां वरः ॥ ८५ ॥
स कदाचिन्महीपालो बलिभिः पञ्चभिर्नृपैः ।
निरुद्धनगरो मानी स्वयं युद्धाय निर्ययौ ॥ ८६ ॥
स तैः समरभङ्गाद्यैर्विजितो युधि शत्रुभिः ।
सहानन्तगुणेनैव छन्नो देशान्तरं ययौ ॥ ८७ ॥

---

१. 'कन्यां गुणश्रियं ना' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आसाद्य सुन्दरीं चैव रागिणीं धनगौरवात् ।
शनैरुज्जयिनीं प्राप्य गणिकाया निवेशनम् ।
रम्यं कुमुदिकाख्यायाः सोऽविशन्मन्त्रिणा सह ॥ ८८ ॥
तं राजलक्षणोपेतं सिंहस्कन्धं महाभुजम् ।
सिषेवे सा महीपालं प्रेमबन्धैः सविभ्रमैः ॥ ८९ ॥
स राजा द्रविणं तस्या गृहादादाय भूरिदः ।
याचकेभ्यो ददौ नित्यं निजवद्विपुलाशयः ॥ ९० ॥
अत्यन्तरागिणीं मत्वा नृपतिस्तां सविस्मयः ।
मन्त्रिणं प्राह पश्येमां मदेकशरणामिति ॥ ९१ ॥
([1]अमात्यः प्राह मा राजन्वेश्यासु प्रत्ययं कृथाः ।
द्रव्यसंविभागमप्येता नैव कुर्वन्त्यकारणम् ॥ ९२ ॥
इति) श्रुत्वा नृपश्चक्रे परीक्षायै मृगीदृशः ।
मिथ्यैवातुरमात्मानं कृतकत्यक्तजीवितम् ॥ ९३ ॥
सोऽथ कूटमृतस्तेन मन्त्रिणा कृतसंविदा ।
नीतः श्मशानं हा राजन्निति तारप्रलापिना ॥ ९४ ॥
ततः सा गणिका दुःखात्कल्पिते प्रवरेऽनले ।
कण्ठे गृहीत्वा तं कान्तं त्यक्तुमात्मानमुद्ययौ ॥ ९५ ॥
अत्रोत्तस्थौ नरपतिः संजातप्रमदाकुलः ।
तां गाढरागिणीं ज्ञात्वा तं निनिन्द च मन्त्रिणम् ॥ ९६ ॥
संजाताधिकविश्रम्भं सेवमानं घटस्तनी ।
कान्ता क्ष्मापालतिलकं बभाषे मन्त्रिपुंगवः ॥ ९७ ॥
([2]दृष्टानुमरणात्तस्यास्त्वदेकशरणा मतिः ।
तथापि देव जानेऽहं कूटमेतद्विचेष्टितम् ॥ ९८ ॥
इति मन्त्रिवरो राजा श्रद्दधे नैव सस्मितः) ।
संजातप्रत्ययो रागः कस्य वाचा निवर्तते ॥ ९९ ॥
अत्रान्तरे स भूपालः शुश्राव महिषीं निजाम् ।

१–२. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मिन्रणे मानभङ्गशोकात्संत्यक्तजीविताम् ॥ १०० ॥
ततो दुःखाकुलं दृष्ट्वा क्षिप्रं श्रुत्वा च तत्कथाम् ।
प्रगल्भललना स्वैरं नृपं कुमुदिकावदत् ॥ १०१ ॥
राज्ञो न शोभते शोकस्तव [1]दोर्दर्पशालिनः ।
पराक्रमो हि वीराणां मानभङ्गे प्रतिक्रिया ॥ १०२ ॥
सन्त्येव मे सहस्राणि मत्तवारणवाजिनाम् ।
हेम्नश्चैतैः कृतोद्योगो जहि शत्रून्धनुर्धर ॥ १०३ ॥
इति तद्वचसा राजा हविषेव हुताशनः ।
स्फूर्जत्प्रतापः प्रययौ परांस्तु तुरगद्विपैः ॥ १०४ ॥
बलिना सुहृदा सार्धं राज्ञा धवलकीर्तिना ।
गत्वा जघान ताञ्शत्रून्सानुगानुग्रविक्रमः ॥ १०५ ॥
श्रीमान्विक्रमसेनोऽथ राज्यं प्राप्य निजं पुनः ।
वराङ्गनानां विदधे प्रधानान्तःपुरे स्त्रियम् ॥ १०६ ॥
ततः सा प्राह भूपालं कृतज्ञ शृणु देव मे ।
संकल्पकल्पविटपी सर्वदैव प्रवर्तसे ॥ १०७ ॥
शत्रवो विजिताः सर्वे प्राप्ता श्रीर्यशसा सह ।
त्वया धैर्यसहायेन प्रणयिप्रियकारिणा ॥ १०८ ॥
अद्य चेत्करुणा चित्ते तवास्मिन्प्रेमलेशके ।
तन्मे वितर भूपाल सतताभीप्सितं वरम् ॥ १०९ ॥
उज्जयिन्यां नरेन्द्रेण बद्धो मे हृदयप्रियः ।
द्विजन्मा श्रीधरो नाम स बलान्मुच्यतां त्वया ॥ ११० ॥
तदर्थमेव राजेन्द्र सेवितोऽसि मया चिरम् ।
इति श्रुत्वा महीपालस्तथेत्याह सविस्मयः ॥ १११ ॥
ततः स विपुलानीको विजित्योज्जयिनीपतिम् ।
मोक्षयित्वा द्विजसुतं पुनः स्वपुरमाययौ ॥ ११२ ॥
प्रहृष्टां संगतां तेन चिराद्यूना द्विजन्मना ।

---

१. 'दैण्ड' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दत्त्वा बहुगुणं हेम क्ष्मापतिर्विससर्ज ताम् ॥ ११३ ॥
अथानन्तगुणो मन्त्री विहस्य नृपमब्रवीत्।
एतदर्थं पुरा देव सा भवन्तमसेवयत् ॥ ११४ ॥
दृशान्यत्र गिरान्यत्र चेतसान्यत्र कृत्रिमम्।
प्रेम संदर्शयन्त्येव कुशला वेशयोषितः ॥ ११५ ॥
इति मन्त्रिवचः श्रुत्वा भूपालो विस्मयाकुलः।
एवमेतदिति प्राह तन्मतिं प्रशशंस च ॥ ११६ ॥
गोमुखेनेति कथितं श्रुत्वा वत्सेश्वरात्मजः।
कुटिलं गणयामास गणिकावृत्तमद्भुतम् ॥ ११७ ॥

इति वेश्याख्यायिका ॥ ३ ॥

तपन्तकस्ततः प्राह विचित्रं स्त्रीविचेष्टितम्।
सोऽपि सर्वगतो धाता न परिच्छेत्तुमीश्वरः ॥ ११८ ॥
अद्यापि नैव विज्ञाताः कैश्चित्तत्त्वेन योषितः।
आसेव्यमानाः सततं संसारगतयो यथा ॥ ११९ ॥
कौशाम्ब्यां बलवर्माख्यो वणिगासीन्महाधनः।
चन्द्रश्रीर्नाम तस्याभूद्भार्या हरिणलोचना ॥ १२० ॥
कदाचिद्यौवनोन्मत्ता सा हर्म्यशिखरस्थिता।
नरं शीलवरं नाम ददर्श [1]रुचिरं तदा ॥ १२१ ॥
[2]स्वसख्या तं समानाय्य दूत्या प्रच्छन्नकामिनी।
सिषेवे चौर्यसुरतं प्रत्यहं सा सुमध्यमा ॥ १२२ ॥
सततं रममाणायाः स्वैरं तेन विलासिना।
एका निशेव सहसा तस्या मासत्रयी ययौ ॥ १२३ ॥
अत्रान्तरे जगामाशु कौमारश्च पतिर्ज्वरात्।
पञ्चतां बान्धववधूकृतकोलाहले गृहे ॥ १२४ ॥
तत्क्षणं सा रतिसुखं भुक्त्वोपपतिना सह।
समेत्य भर्तुर्जग्राह मृतस्य चरणं शुचा ॥ १२५ ॥

---

१. 'तरुणं पथि' ख. २. 'सखीगृहे तमानाय्य दूत्या' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वजनैर्वार्यमाणापि तेनैव सहसा चिताम् ।
आरुह्य तूर्णं तत्याज प्रियान्प्राणानकम्पिता ॥ १२६ ॥
इत्येवं गहनं स्त्रीणां ज्ञायते केन चेष्टितम् ।
गण्यते केन सर्पाणां करेण रदनावली ॥ १२७ ॥

इति स्त्रीवृत्ताख्यायिका ॥ ४ ॥

उक्ते तपन्तकेनेति ततो हरिशिखोऽब्रवीत् ।
एवमेव स्त्रियः क्रूरास्तुषकेशविषैरिव ॥ १२८ ॥
देवदासाभिधानस्य वाराणस्यां कुटुम्बिनः ।
बभूव तरुणी भार्या दुःशीला नाम रूपिणी ॥ १२९ ॥
कदाचित्करदानाय पत्यौ रुद्धे नृपालये ।
सा गूढकामिना भेजे निःशङ्कं सुरतं निशि ॥ १३० ॥
प्रत्यहं तोषयन्ती तं नानाभोजनपानकैः ।
मा भूयाद्बन्धमोक्षो मे भर्तुरित्याशशंस सा ॥ १३१ ॥
ततः कालेन मुक्तोऽसौ राजा स्वगृहमागतः ।
दृष्टो दुःखितया सद्यः कृतकानन्दया तया ॥ १३२ ॥
गृहीत्वाशु तमुत्सङ्गे सा प्रणम्याब्रवीत्पतिम् ।
नाथ स्वप्ने मयाद्यैव सा प्रणम्याब्रवीत्पतिम् ॥ १३३ ॥
इत्युक्त्वा प्रददौ तस्मै भोजनं बहुलासवम् ।
सोऽपि भुक्त्वा बहुक्षीबो निद्रां भेजे रतिश्रमात् ॥ १३४ ॥
ऊर्ध्ववेश्मस्थितं सान्यं संज्ञयाहूय वल्लभम् ।
भर्तारं घातयामास दारकस्यैव पश्यतः ॥ १३५ ॥
तस्मिन्प्रयाते चुक्रोश चौरैरभिहतो ह्यसौ ।
ततः ससंभ्रमाः सर्वे बान्धवास्तूर्णमाययुः ॥ १३६ ॥
देवदासं हतं दृष्ट्वा तद्भ्राता शोकविह्वलः ।
विललापाश्रुलुलितं चेष्टमानो महीतले ॥ १३७ ॥
स्वभार्यया हतं ज्ञात्वा बालकस्य गिरा ततः ।
तां च तत्कामुकं च द्रागजघ्नुरन्विष्य बान्धवाः ॥ १३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमागतं निष्प्रतिभं भीमं नीचं निराश्रयम्।
निरुत्तरं विलोक्यैव लज्जिता शुचमाययौ ॥ १६४ ॥
अहो नु योषितः पापा यदयं तादृशं पतिम्।
धीरं विस्मृत्य नीचेऽस्मिन्नभिलाषमुपागता ॥ १६५ ॥
इति संचिन्त्य सा युक्त्या तं निरस्य नराधमम्।
निनिन्द मुहुरात्मानं जहास नरकातरम् ॥ १६६ ॥
अत्रान्तरे पराञ्जित्वा राजा सिंहबलो युधि।
राज्यमासाद्य दयितां निनाय स निजां पुरीम् ॥ १६७ ॥
इत्येवमाशयः स्त्रीणां दुर्विज्ञेयः सुरैरपि।
इति श्रुत्वा शनैर्निद्रामवाप नरवाहनः ॥ १६८ ॥

इति सिंहबलाख्यायिका ॥ ७ ॥

ततः प्रातः समुत्थाय राजपुत्रः सुहृद्वृतः।
कृताह्निको वरोद्यानं प्रययौ फुल्लपादपम् ॥ १६९ ॥
तत्र मत्तालिमालाङ्ककुमुदस्मेरविभ्रमे।
अवतीर्णां दिवः कान्तां ददर्श वरकन्यकाम् ॥ १७० ॥
कन्याशतैरनुगतां सतारामिव रोहिणीम्।
नवलावण्यपीयूषप्लाविताखिलदिङ्मुखाम्।
मुग्धाश्चकोरवनिता यत्कान्तिनिवहं ययुः ॥ १७१ ॥
तां वीक्ष्य कार्तिकीचन्द्रवदनां मदनावनिम्।
विस्मितो राजतनयो हर्षोत्कर्षोक्तिमप्यभूत्[1] ॥ १७२ ॥
नेत्रपेयं वपुस्तस्याः पश्यन्ननिमिषेक्षणः।
पप्रच्छ मन्मथाक्रान्तस्तां नामाभिजनश्रियम् ॥ १७३ ॥
तेन कामाभिरामेण रामा हृदयहारिणी[2]।
सा पृष्टा प्राह सोत्कम्पकुचविन्यस्तलोचना ॥ ॥ १७४ ॥
शिखरे काञ्चनाशैले तुषारधरणीभृतः।

---

१. 'त्सिक्तः किमप्यभू' ख. २. 'णा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्फटिकाह्वयशाः श्रीमानस्ति विद्याधरेश्वरः ॥ १७५ ॥
([1]तस्य शक्तियशा नाम सुताहं पार्वतीवरात् ।
जाता हेमप्रभाख्यायां देव्यां देवाधिपप्रिया ॥ १७६ ॥
कालेन मम शर्वाण्या सदाराधनतुष्टया ।
यौवनश्रियमालोक्य वितीर्णः प्रवरो वरः ॥ १७७ ॥
वत्सभूपालतनयो भाविविद्याधरेश्वरः) ।
नरवाहनदत्तस्ते भविष्यत्यचिरात्पतिः ॥ १७८ ॥
इति देव्या समादिष्टा प्रहृष्टा पितुराज्ञया ।
विद्याभिस्तद्वराप्ताभिस्त्वामहं द्रष्टुमागता ॥ १७९ ॥
व्रजामि तावदचिरात्संगमो नौ भविष्यति ।
इत्युक्त्वा सानुगा व्योम्ना प्रययौ मञ्जुभाषिणी ॥ १८० ॥
स्वप्नदृष्टमिवाशेषं मन्यमानस्तदद्भुतम् ।
नरवाहनदत्तोऽभूच्चिन्तालोचननिश्चलः ॥ १८१ ॥
स शनैर्विरहाक्रान्तः स्मरसंतापनिःसहः ।
विनोदिनीं कथां कांचित्कथयेत्याह गोमुखम् ॥ १८२ ॥
स प्राह काञ्चनपुरीपतिरासीत्सुमानसः ।
राजा विराजमानानां श्रेयसां यशसां निधिः ॥ १८३ ॥
([2]तं कदाचित्सभास्थानस्थितं शबरकन्यका ।
कान्ता मुक्तालता नाम प्रतीहारेण सूचिता ॥ १८४ ॥
पञ्जरस्थं समादाय शुकं मरकतच्छविम् ।
अन्तः प्रविष्टा प्रोवाच प्रणम्य जगतीपतिम् ॥ १८५ ॥
शुकोऽयं देव योग्यो मे विज्ञानमधुरध्वनिः) ।
इत्युक्त्वा भूमिपालस्य पञ्जरं निदधे पुरः ॥ १८६ ॥
ततः कृताह्निको राजा शुकमाहूय तं रहः ।
पप्रच्छ सर्वशास्त्रज्ञं विज्ञानावाप्तिकारणम् ॥ १८७ ॥
राज्ञा स पृष्टः प्रोवाच श्रूयतामद्भुतं विभो ।

१.–२. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अस्ति हेमवती नाम संसारविपुलाटवी ॥ १८८ ॥
तत्र रोहीतकतरौ शुक्लक्षसमाश्रये) ।
जनितोऽहं प्रवयसा शुकेनात्यन्तपेशलः ॥ १८९ ॥
दैवान्मां जननीहीनमवर्धयत वत्सलः ।
मत्पिता बन्धुहीनेषु याति स्नेहो ह्यनल्पताम् ॥ १९० ॥
कदाचिन्मृगयासक्तैर्वने तस्मिन्विलोडिते ।
हतेभक्रोडहरिणैः पुलिन्दैः पिशिताशिभिः ॥ १९१ ॥
जरन्निषादेनैकेन तमारुह्य महीरुहम् ।
ग्रीवामोटननिर्जीवा नीतास्तेनाखिलाः शुकाः ॥ १९२ ॥
ततः स्वकर्मणः शेषात्पतितः पर्णसंचये ।
स्नातुं प्राप्तेन नीतोऽहं मुनिना करुणाब्धिना ॥ १९३ ॥
मारीचनाम्ना तेनाहं स्थापितः कृपयाश्रमे ।
दृष्टः पुलस्त्यमुनिना सहासं दिव्यचक्षुषा ॥ १९४ ॥
आत्मनो दुर्नयस्येदं भुङ्क्ते फलमयं शुकः ।
इति ब्रुवाणं पप्रच्छुः पुलस्त्यं मत्कथां द्विजाः ॥ १९५ ॥
सोऽभ्यधादभवच्छ्रीमान्रत्नाकरपुरे नृपः ।
ज्योतिःप्रभाख्यो भूपालमौलिलालितशासनः ॥ १९६ ॥
सोमप्रभोऽभवत्तस्य चन्द्रांशः स्वप्नसूचितः ।
पुत्रः कान्तिनिधिर्लोकलोचनानन्दनिर्झरः ॥ १९७ ॥
यौवराज्ये धृतः पित्रा सोऽथ दिग्विजयोद्यतः ।
निर्ययौ विपुलानीकैरसतिविभवाशनिः ॥ १९८ ॥
सह प्रियकराख्येन मन्त्रिपुत्रेण धीमता ।
विजित्य पृथिवीं सर्वां विपुलं प्राप काननम् ॥ १९९ ॥
कान्तां वनश्रियं तत्र लीलयैव विलोकयन् ।
ददर्श किन्नरं दिव्यरत्नाम्बरविभूषितम् ॥ २०० ॥
तं कौतुकादनुसरन्स्फटिकस्वच्छविग्रहम् ।

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः पवनवेगेन तुरगेण धुतांशुकः ॥ २०१ ॥
अमानुषीं भुवं प्राप्य विश्रम्य सरसि क्षणात् ।
कैलासशिखराकारमपश्यत्त्र्यम्बकालयम् ॥ २०२ ॥
तत्रोपवीणयन्तीं च दिव्यकन्यां विलोक्य सः ।
पप्रच्छाकालतपसः कारणं यौवनावनीम् ॥ २०३ ॥
सा प्राह हिमशैलेन्द्रशिखरे काञ्चनाह्वये ।
पद्मकूटाभिधानोऽस्ति श्रीमान्विद्याधराधिपः ॥ २०४ ॥
मनोरथप्रभा नाम सुताहं स्नेहशालिनः ।
तस्य रत्नप्रभाख्यायां पत्न्यां जाता यशस्विनः ॥ २०५ ॥
कालेन यौवनवती कदाचित्स्नातुमागता ।
सरस्तत्र स्मराकारमपश्यं मुनिपुत्रकम् ॥ २०६ ॥
ततोऽहं तं विलोक्यैव पुष्पायुधवशीकृता ।
अभवं कम्पकलिकालतेव पवनाकुला ॥ २०७ ॥
अथ तत्सचिवः पृष्टो मत्सख्या पद्मलेखया ।
उवाच बुधदत्ताख्यस्तज्जन्मक्रमशः[1] कथाम् ॥ २०८ ॥
अस्ति दीधितिमान्नाम मुनीन्द्रो विजितेन्द्रियः ।
तं सरः स्नातुमायान्तं सरोलक्ष्मीर्व्यलोकयत् ॥ २०९ ॥
तं दृष्ट्वैव सकामायां मानसस्तनयः क्षणात् ।
जातोऽयं रश्मिमान्नाम तस्यां साक्षादिव स्मरः ॥ २१० ॥
इति तद्वचनं श्रुत्वा सखी नाम कुलं च मे ।
तस्मै न्यवेदयज्ज्ञात्वा स्मरसंयोगमावयोः ॥ २११ ॥
ततोऽहं पितुरादेशादाहूता शशिलेखया ।
मुषितेवायतध्याना सशल्येवाहितव्यथा ।
भूतग्रस्तेव सोन्मादा ततोऽहमभवं क्षणात् ॥ २१२ ॥
मां विना मुनिपुत्रोऽपि स मनोभवतापितः ।
बभूव बालनलिनीवलयालंकृतस्थितिः ॥ २१३ ॥

१. 'कुलसंक' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ततः सखीं विसृज्यासौ ताम्यन्मानसमायया ।
आनीतो निजमुद्यानं निशीथे संगमाशया ॥ २१४ ॥
तत्र फुल्ललताजालगुञ्जन्मधुकराकुले ।
प्रौढचन्द्रकरस्मेरः स्मृत्वा मां जीवितं जहौ ॥ २१५ ॥
ततोऽहं तूर्णमायाता तमपश्यं तथागतम् ।
रूपद्वेषादिवाभ्येत्य हतं मकरकेतुना ॥ २१६ ॥
हा प्रियेति विलप्याहं यावन्न पतिता भुवि ।
अवतीर्य दिवस्तावदनैषीत्कोऽपि तत्तनुः ॥ २१७ ॥
ततः प्रवेष्टुकामां मामनले शोकसंस्थिताम् ।
प्राप्स्यसीमं पुनरपि प्राह मां कोऽपि खेचरः ॥ २१८ ॥
तदाशालम्बनधृतिस्ततः शीतांशुशेखरम् ।
इति स्थिताहं वरदं ध्यायन्ती पार्वतीपतिम् ॥ २१९ ॥
इति सोमप्रभः श्रुत्वा तत्र विद्याधरीवचः ।
तां प्राह विस्मितः क्वासौ पद्मलेखा सखी तव ॥ २२० ॥
इति सा राजपुत्रेण पृष्टा प्रोवाच सुन्दरी ।
सिंहविक्रमनामास्ति श्रीमान्विद्याधराधिपः ॥ २२१ ॥
अस्ति तस्येन्दुवदना तनया मकरन्दिका ।
दग्धोऽपि हरकोपेन यत्कान्त्या जीवितः[2] स्मरः ॥ २२२ ॥
अपांशुलेखनात्सा मे सखी प्राणा बहिश्चराः ।
तया मद्दुःखमाकर्ण्य विवाहे नियमः कृतः ॥ २२३ ॥
तां बोधयितुमद्यैव पद्मलेखा सखी मया ।
विसृष्टा तत्पितुर्वाक्यात्सुतानियमदुःखितः ॥ २२४ ॥
इत्युक्तवत्यां विद्याभृत्कन्यकायां समाययौ ।
तस्मिन्नेव क्षणे क्षिप्रं तद्विसृष्टैव सा सखी ॥ २२५ ॥
विद्याधरेणानुगता पद्मलेखा समेत्य ताम् ।
उवाच सखि नोद्वाहं मन्यते मकरन्दिका ॥ २२६ ॥

१. एकत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. २. 'जीवति स्मरः' इत्यपि पाठः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयं देवजयो नाम विद्याधरकुमारकः ।
तया विसृष्टस्त्वां वक्तुमिहैवागम्यतामिति ॥ २२७ ॥
ततो देवजयेनापि तदेवोक्ता व्यचिन्तयत् ।
मनोरथप्रभा किंचिद्ध्यानस्तिमितलोचना ॥ २२८ ॥
सख्या परिणयेनैवं मद्दुःखान्नियमः कृतः ।
रूपवान्राजपुत्रोऽयं तस्याः समुचितः पतिः ॥ २२९ ॥
गृहीत्वैनं प्रयाम्येव तदन्तिकमहं यतः ।
एतन्मुखेन्दुमालोक्य सा प्रतिज्ञां विमोक्ष्यति ॥ २३० ॥
मत्वेति राजपुत्रेण सह देवजयेन सा ।
मनोरथप्रभा प्रायात्पद्मलेखानुगा सखीम् ॥ २३१ ॥
अन्तःपुरे तामासाद्य ततः सा मकरन्दिकाम् ।
([1]परिष्वज्य मिथो भेजे सा मुग्धा स्फटिकासनम् ॥ २३२ ॥
सोमप्रभं विलोक्यैव सुन्दरं मकरन्दिका) ।
बभूवानन्दनिष्यन्दमकरीकृतमानसा ॥ २३३ ॥
राजपुत्रोऽपि तां वीक्ष्य हरिणायतलोचनाम् ।
लक्ष्यतां पञ्चबाणस्य प्रययौ विस्मयाकुलः ॥ २३४ ॥
तयोः परस्परस्मेरस्मरसंरम्भनिर्भरः ।
यूनोरभून्महत्स्वेदप्रकम्पपुलकोत्सवः ॥ २३५ ॥
अत्रान्तरे राजसूनोर्मन्त्रिपुत्रः प्रियंकरः ।
तुरङ्गखुरमुद्राङ्कां शनकैः प्राप पद्धतिम् ॥ २३६ ॥
अस्मिन्नेवान्तरे शीघ्रसंचारो लेखहारकः ।
ज्योतिःप्रभस्य संदेशाद्राजपुत्रं समाययौ ॥ २३७ ॥
तूर्णमेहीति स पितुः श्रुत्वाज्ञां मन्त्रिसूनुना ।
संगतो दयितामेव ध्यायन्मूढ इवाभवत् ॥ २३८ ॥
अचिरात्त्वां समेष्यामीत्येवं हि कृतसंविदम् ।
विद्याधरेन्द्रसुतया सानुगः स्वपुरं ययौ ॥ २३९ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः सा विग्रहोन्मत्ता शनकैर्मकरन्दिका ।
निजकर्मविपाकाच्च तत्पिताप्यभवच्छुकः ॥ २४० ॥
सोऽयमेव शुकस्तस्याः पिता विद्याधरेश्वरः ।
पुलस्त्येनेति भवतो श्रुत्वाहं जातिमस्मरम् ॥ २४१ ॥
असौ निषादी मत्पुत्री दत्ता तुभ्यमियं तया ।
सोमप्रभो राजपुत्रः शिवादिष्टः समेष्यति ॥ २४२ ॥
अथैनां निजरूपं तदास्थितां मकरन्दिकाम् ।
मनोरथप्रभापि त्वामद्यैव समुपैष्यति ।
सरोजिन्या मुनिवरस्त्वं हि लक्ष्मीसुतः प्रभो ॥ २४३ ॥
इत्युक्त्वा स शुकः प्राप निजं वैद्याधरं वपुः ।
जातिस्मरो विधायैव तं राजानं सुमानसम् ॥ २४४ ॥
अत्रान्तरे समाक्रान्तश्चिन्तयन्मकरन्दिकाम् ।
आदिष्टः शंभुना स्वप्ने तद्वृत्तान्तं निवेद्य तम् ॥ २४५ ॥
तेनैवासौ समभ्यायाद्देशं सोमप्रभोऽथ तम् ।
मुक्तां निषादभा॑वाचामवाप्य मकरन्दिकाम् ॥ २४६ ॥
मनोरथप्रभा ज्ञात्वा विद्यया तद्विचेष्टितम् ।
समेत्य भेजे राजानं तं यातं मुनिपुत्रताम् ॥ २४७ ॥
ततो मिथो ननन्दुस्ते गत्वा तुहिनभूधरम् ।
इत्येव खेचरासङ्गो नृणां भवति कर्मतः ॥ २४८ ॥
त्वं च तां शक्तियशसं विद्याधरनृपात्मजाम् ।
अचिरात्प्राप्स्यसि विभो गौर्यादिष्टं न संशयः ॥ २४९ ॥
एवमुत्तमसत्त्वानां गाढं प्रणयरागिणाम् ।
कुलाचारोपपन्नानां भवत्येव समागमः ॥ २५० ॥
स तामसमनारीभिः कुलाचारविपर्ययात् ।
संगमप्रान्तविरसः शीलध्वंसादिदुर्णयैः ॥ २५१ ॥

इति सुमानसाख्यायिका ॥ ८ ॥

१. 'शापान्ता' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शूर[1]वर्माभिधानस्य कुलपुत्रस्य मानिनः ।
जलशायिन्यभिख्याभूद्भार्या नीचकुलोद्भवा ॥ २५२ ॥
ग्रामान्तरगते तस्मिन्सा तन्मित्रेण संगता ।
मृगदत्ताभिधानेन सिषेवे सुरतोत्सवम् ॥ २५३ ॥
शूर[2]वर्मा समभ्येत्य ज्ञात्वा तस्या विचेष्टितम् ।
तत्याज नो वधार्हेति निकारे गतविक्रियः ॥ २५४ ॥
उक्त्वेति राजतनयं पुनः प्रोवाच गोमुखः ।
श्रूयतामधुना देव कथां चित्तविनोदिनीम् ॥ २५५ ॥
दाक्षिणात्ये जनपदे विबुधव्रातसेवितम् ।
मिहिलारोप्यनामास्ति पुरं सुरपुरोत्तमम् ॥ २५६ ॥
वर्धमानकनामाभूत्तत्रातिधनदो वणिक् ।
प्रस्थितो द्वीपयात्रायां स विवेश महावनम् ॥ २५७ ॥
तत्रास्य विषमग्रावविदीर्णपदविक्लवः ।
धुर्योऽवसन्नो वृषभो वृषाङ्कवृषसंमितः ॥ २५८ ॥
याते वणिग्वरे त्यक्तस्तन्नियुक्तैः स रक्षिभिः ।
न[3]वौषधिचयाहारः कालेन स्वास्थ्यमाययौ ॥ २५९ ॥
पीनदर्पाकृतिजले तस्मिन्संजीवकाभिधे ।
निर्झरोपान्तपारीषु स्वच्छन्दसुखवारिणि ॥ २६० ॥
उदकार्थं समभ्यायात्पिङ्गलाख्यो मृगाधिपः ।
वनं यत्केसरैः स्फारैः साट्टहासमिवाभवत् ॥ २६१ ॥
स शुश्राव वृषस्योग्रं शृङ्गाघातं स्फुटं तटे ।
टाङ्कारनादमुखरं हुंकारनिविडध्वनिम् ॥ २६२ ॥
श्रुत्वा तदुग्रनिनदं विषमं स्थगितक्रमः ।
स तस्थौ फुल्लरोमाञ्चैः पीनलाङ्गूलपल्लवः ॥ २६३ ॥
करटो दमनश्चैव सचिवौ तस्य जम्बुकौ ।
दूरतश्चित्तसंक्षोभं विलोक्य स्वैरमूचतुः ॥ २६४ ॥

१–२. 'श' ख. ३. 'वनौ' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वसंस्कारयोगेन सत्त्वान्मुनिवरेण वा।
संस्फुटोच्चरति प्रायः पशूनामपि भारती॥ २६५॥
ततोऽब्रवीद्दमनकः सखे किमयमीश्वरः।
अदृष्टशब्दमात्रेण क्षोभाकुल इवेक्ष्यते॥ २६६॥
तच्छ्रुत्वा धीमतां धुर्यो हसन्करटकोऽब्रवीत्।
निरर्थचिन्तायोगेन किं प्रयोजनमावयोः॥ २६७॥
अप्रयोजनकर्ता यः सर्वथा दुःखभाजनम्।
अकार्यदुर्ग्रहग्रस्तः कीलो[1]त्कर्षकवानरः॥ २६८॥
श्रूयते नगराभ्यासे गृहनिर्माणकारिणः।
अर्धस्फुटितकाष्ठाग्राः परं स्थपतयो ययुः॥ २६९॥
गतेषु तेषु विपुलः कपिसार्थः समाययौ।
वल्लीतानैकविन्यस्तसं[2]भाविभवनिर्मितः॥ २७०॥
तत्रैकश्चापलात्कीलं स्फाटिकस्तम्भमस्तकात्।
स्पृशन्नुवाच केनायमस्थाने विनिवेशितः॥ २७१॥
तस्मिन्नभ्युद्धृते यन्त्रकीलके मुष्कपीडनात्।
स संघटितसर्वाङ्गः सहसा निधनं ययौ॥ २७२॥

इति वानराख्यायिका॥ ९॥

निशम्येति वचस्तस्य ययौ दमनकः प्रभोः।
समीपं संशयस्थाने सेवा[3]कालो हि धीमताम्॥ २७३॥
स विज्ञाय प्रभोश्चेतः शब्दमात्रविसंस्थुलम्।
प्राह प्रायो भवन्त्येव बाढशब्दा घनादिषु॥ २७४॥
मांसपूर्णेति विज्ञाय भेरीप्रध्वानमन्थरम्।
क्रोष्टापश्यत्समुत्पाट्य पुरा काष्ठं च चर्म च॥ २७५॥
इत्युक्त्वा स्वामिनं धीमान्ययौ शब्दानुगः शनैः।
विलोक्य वृषभं तत्र साक्षेपमिदमब्रवीत्॥ २७६॥

---

१. 'लोत्पाटीव वा' ख. २. 'स्तम्भादिनवनामितः' ख. ३. 'सदा कालो हि' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहो मूढ न जानीषे स्वामिनं पिङ्गलं हरिम् ।
तत्पादसेवाबाह्यस्य का नु रक्षा वने तव ॥ २७७ ॥
तच्छ्रुत्वा कम्पितमनास्ततः संजीवकोऽभवत् ।
दत्ताभयोऽथ तेनैव नीतः पिङ्गलकान्तिकम् ॥ २७८ ॥
स प्रणम्य प्रसादार्द्रदृशा तेनावलोकितः ।
कृतकृत्यमिवात्मानं मेने विगतसंभ्रमः ॥ २७९ ॥
स कालेनान्तरङ्गोऽभून्मृगराजस्य सेवकः ।
आसन्न एव प्रह्वेण नृपाः कान्ताश्च सादराः ॥ २८० ॥
तयोर्विश्रम्भमालोक्य बाह्यत्वाददितातापितौ ।
क्षुत्क्षामौ पेततुर्दुःखैः सचिवौ जम्बुकौ हरेः ॥ २८१ ॥
ततो दमनकः प्राह सचिवो मन्दबुद्धिना ।
संजीवसिंहयोः प्रीतिर्विनाशायात्मनः कृता ॥ २८२ ॥
उपायश्चिन्तनीयोऽत्र जाने तावद्विभेदने ।
([1]उपायक्रमसाध्यं यद्बलसाध्यं न तद्भवेत् ॥ २८३ ॥
श्रूयते कृष्णसर्पो हि धिया काकेन पातितः ।)
वृक्षमूलाश्रयः सर्पः पुरा वायसपोतकान् ।
भक्षयामास तद्दुःखकृशाभूद्वायसप्रिया ॥ २८४ ॥
गोमायुकः सुहृत्पृष्टस्तया तामाह दुःखिताम् ।
समाश्वसिहि सर्पोऽयं विनंक्ष्यति बको यथा ॥ २८५ ॥
कंपटव्रतमास्थाय मत्स्यान्प्राह पुरा बकः ।
प्रस्तुतो धीवरैर्युष्मद्ध्रदे प्रातर्महाक्षयः ॥ २८६ ॥
युष्मद्विनाशे नष्टोऽहं यूयं वृत्तिर्यतो मम ।
इत्युक्तिचकितान्मत्स्यात्रक्षार्थं नेतुमुद्यतः ॥ २८७ ॥
[2]बकस्तान्भक्षयन्कालं स निनाय यथारुचि ।

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. २. 'विश्वस्तांस्तद्धयात्का' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतिलौल्योद्धृतेनाथ कर्कटेन निपातितः ॥ २८८ ॥
उपायश्चिन्त्यतां सर्पवधे श्रुत्वेति वायसी ।
जहार राजनिलयात्सहसा हेमसूत्रिकाम् ॥ २८९ ॥
आदाय स्वकुलायाग्रनम्रशाखावलम्बिनीम् ।
चकार ददृशुस्तां च नराः सर्पदुरासदाम् ॥ २९० ॥
विधाय दलशो बाणैर्व्याजमारोहणोद्यताः ।
दृष्ट्वा विलोक्य तत्काकी स्वयं भूषणमत्यजत् ॥ २९१ ॥

इति काकबकाख्यायिका[1,2] ॥ १० ॥

अस्माभिरप्युपायांशः कर्तव्यो वृषभेदने ।
उपायेन हतः पूर्वं शशकेनापि केसरी ॥ २९२ ॥
अभूत्समस्तहरिणव्रातसंहारतत्परः ।
सिंहं समेत्य सारङ्गाः क्षयार्ता इदमब्रुवन् ॥ २९३ ॥
प्राणयात्राकृते स्वामिन्कोऽयं सर्वक्षयादरः ।
वारेण प्रेषयामस्ते मृगमेकं सदा क्षयम् ॥ २९४ ॥
एवमस्त्विति सिंहस्य विज्ञाय हरिणा मतम् ।
प्रेषयामासुरव्यग्रा एकैकं कृतसंविदः ॥ २९५ ॥
अथ कालेन शशको वारेण प्रेषितो हरेः ।
अचिन्तयद्बुधः कालं दंष्ट्रापातेऽप्यसंभ्रमः[3] ॥ २९६ ॥
आहारकालेऽतिक्रान्ते क्षुत्क्षामे कुञ्जरद्विषि ।
गमिष्यामीति सोऽगच्छच्छशकः कुपितं हरिम् ॥ २९७ ॥
गर्जता तेन पृष्टोऽसौ वेलातिक्रान्तिकारणम् ।
अब्रवीद्देव सिंहेन संनिरुद्धोऽसि वर्त्मनि ॥ २९८ ॥
श्रुत्वेति कोपादास्फाल्य लाङ्गूलं धूतकेसरः ।
सोऽवदद्दर्शय क्वासौ किं मत्तोऽप्यधिको हरिः ॥ २९९ ॥

१. एतदग्रे ख-पुस्तके 'बकाख्यायिका' इत्युपलभ्यते. २. 'गर्भकाख्यायिका' इति ख-पुस्तकस्थः पाठः. ३. 'खसंभ्रमात्' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्रेसरोऽथ शशको भूत्वा करटिवैरिणः ।
वैदूर्यस्फटिकस्वच्छं महाकूपमदर्शयत् ॥ ३०० ॥
प्रतिबिम्बाकृतिं दृष्ट्वा स्वां तत्राकुलकेसरः ।
स कूपमग्नः प्रययौ प्रलयं शशवञ्चितः ।
भवन्त्येवमुपायेषु धीमतां कार्यसिद्धयः ॥ ३०१ ॥

इति शशकाख्यायिका ॥ ११ ॥

इत्युक्त्वा पिङ्गलं द्रष्टुं यातो दृष्ट्वा प्रणम्य च ।
इदं दमनको वाक्यमेकान्ते विरतोऽब्रवीत् ॥ ३०२ ॥
कुलक्रमागता भृत्या हितवाक्येषु मूकताम् ।
यत्प्रायान्ति सदोत्सेकाः स्वामिनः सावलिप्तता ॥ ३०३ ॥
संजीवकोऽयं वृषभः स्वामिद्रोहे समुद्यतः ।
यथा वक्राञ्चितग्रीवः संग्रामार्थीव लक्ष्यते ॥ ३०४ ॥
अयं चाभेषजो दोषो यदेतत्ककुदुद्भवः ।
क्रमयो नित्यसंग्रामव्रणेषु विषमास्तव ॥ ३०५ ॥
अविज्ञातस्वभावैर्हि संगतिर्विपदां पदम् ।
हता मत्कुणदोषेण यूका मन्दविसर्पिणी ॥ ३०६ ॥
दुग्धाब्धिफेनधवलक्ष्मापशय्यातलाश्रया ।
यूका ददर्श पवनानीतं टिट्टिभमत्कुणम् ॥ ३०७ ॥
तं दृष्ट्वा साब्रवीद्द्येयो न ते तीक्ष्णमुखाश्रयः ।
तच्छ्रुत्वा सोऽवदद्दीनमेकरात्रिं वसाम्यहम् ॥ ३०८ ॥
दत्ताश्रयोऽथ कृपया तया स सहसा नृपम् ।
अदशद्येन तत्कोधाद्धता यूकैव सेवकैः ॥ ३०९ ॥

इति यूकाख्यायिका ॥ १२ ॥

कुलक्रमागतत्यागो जन्मापूर्वैश्च संगतिः ।
मौर्ख्याच्चण्डरवस्येव विनाशायैव भूपतेः ॥ ३१० ॥

१. 'प्राणे' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नगरोपान्तनिलयः पुरा चण्डरवाभिधः ।
जम्बुको वृत्तिलोभेन प्रविवेश पुरान्तरम् ॥ ३११ ॥
स रात्रौ श्वगणाक्रान्तः पलायनकृतश्रमः ।
नीलीकरससंपाताद्विचित्रं वर्णमाययौ ॥ ३१२ ॥
शृगाला दुद्रुवुर्दृष्ट्वा तं स्वजातिविलक्षणम् ।
दर्पान्मोहात्समभ्येत्य व्याघ्रादिष्वधिकोऽभवत् ॥ ३१३ ॥
तदुपाहृतमांसाद्यैः पुष्टिविस्मृतदुर्गतिः ।
क्रोष्टुकानां विलोक्यैव कदाचिद्वाचमुद्धताम् ।
प्रतिजग्राह नादेन स्वजातिसदृशेन सः ॥ ३१४ ॥
तच्छ्रुत्वैव परिज्ञाय तं लज्जाकुटिलाननाः ।
वञ्चिताः स्म खलेनेति जघ्नुस्तं व्याघ्रचित्रकाः ॥ ३१५ ॥

इति चण्डरवाख्यायिका ॥ १३ ॥

उपपत्तिसहैर्वाक्यैर्विरक्तहृदयं नृपम् ।
विधायेति हरिं गत्वा चक्रे शङ्काकुलं वृषम् ॥ ३१६ ॥
सोऽब्रवीद्धूर्तमध्ये हि दुर्लभं जीवितं सखे ।
मुग्धसिंहाश्रयं जघ्नुरुष्ट्रं काकादयः पुरा ॥ ३१७ ॥
विकटाक्षं पुरा सिंहं संग्रामक्षतविग्रहम् ।
क्षुधार्ताः सचिवा ऊचुर्द्वीपिगोमायुवायसाः ॥ ३१८ ॥
अशक्ता विग्रहे स्वामिन्नवसन्ना वयं वने ।
निराहारा न चास्माकं स्वामित्यागः शुभावहः[1] ॥ ३१९ ॥
एष सार्थपरिभ्रष्टो य उष्ट्रस्त्वामुपागतः ।
महाकायः स पर्याप्तमस्मत्संघस्य भोजनम् ॥ ३२० ॥
तच्छ्रुत्वा भृशमुद्विग्नमाश्रितद्रोहकीर्तनात् ।
तमङ्गीकारपदवीं धूर्ता निन्युः शनैर्हरिम् ॥ ३२१ ॥
अथोष्ट्रसंनिधौ प्राह व्याजकल्पितसंविदा ।
वायसो मच्छरीरेण स्वामिन्वृत्तिः प्रकल्प्यताम् ॥ ३२२ ॥

---

१. 'कुलक्रमः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेत्युक्तवाक्ये शार्दूले तदेव प्राह जम्बुकः ।
प्रतिषिद्धे पुनस्तस्मिन्द्वीपिन्यपि निराकृते ॥ ३२३ ॥
अचिन्तयत्करभकः संरम्भस्पृष्टमानसः ।
नैवेह भक्ष्यते कश्चिदौचित्यं दर्शयाम्यहम् ॥ ३२४ ॥
स्वामिन्नसच्छरीरेण क्रियतां प्राणवर्तनम् ।
इत्युक्तमात्रे जघ्नुस्तं द्वीपिजम्बुकवायसाः ॥ ३२५ ॥

इत्युष्ट्राख्यायिका ॥ १४ ॥

इत्युक्तो वृषभस्तस्थौ सिंहापकृतिचिन्तकः ।
तन्मतं तस्य विज्ञाय स्वैरं दमनकोऽब्रवीत् ॥ ३२६ ॥
शक्तः सिंहप्रतीकारे न कश्चिदिति चिन्त्यताम् ।
अचिन्तितान्यदर्पस्य लज्जाब्धेरपि टिट्टिभात् ॥ ३२७ ॥
आसन्नप्रसवा पूर्वं टिट्टिभं दयितावदत् ।
प्रसवस्थानमन्यन्मे कल्प्यतां निर्भयं विभो ॥ ३२८ ॥
पूर्वस्थितिः समुद्रोर्मिभीषणा मे न रोचते ।
इति तद्वाक्यमाकर्ण्य टिट्टिभः प्राह विस्मितः ॥ ३२९ ॥
नैवापकर्तुं शक्तो मे समुन्नद्धोऽपि सागरः ।
भर्तुरित्युद्धतं श्रुत्वा प्रौढा प्रोवाच टिट्टिभी ॥ ३३० ॥
आसन्नाकुशला नूनं न शृण्वन्ति हितं वचः ।
श्रूयते मित्रवचनानादरात्कच्छपो हतः ॥ ३३१ ॥
हंसद्वयसखः पूर्वं कच्छपः स्थानदोषतः ।
दन्तावष्टब्धकाष्ठाग्रो नीतस्ताभ्यां विहायसा ॥ ३३२ ॥
ह्रदान्तराभिगमने तौ हंसौ कूर्ममूचतुः ।
मौनावलम्बिना भाव्यं त्वयैव बहुशः पथि ॥ ३३३ ॥
ततः पौरजना दृष्ट्वा विदितं शकटाकृतिम् ।
अहो किमिदमित्यासन्महाकोलाहलाकुलाः ॥ ३३४ ॥
किमेतदिति कूर्मोऽपि प्राह विस्मृततद्वचः ।
दारुस्खलितदन्तत्वात्पतितो निहतो जनैः ॥ ३३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनागतभयाभिज्ञो वियत्प्राप्तौ च बुद्धिमान्।
द्वावेतौ संपदां पात्रं विपदां दैववादिनः॥ ३३६॥
अनागतविधिश्चैव[1] प्रत्युत्पन्नमतिस्तथा।
यद्भविष्यश्च मत्स्याः प्राक्शुश्रुवुर्धीवरीं गिरम्॥ ३३७॥
जालं क्षिपामः प्रत्यूषे ह्रदेऽस्मिन्निति तद्भयात्।
अनागतविधिः प्रायात्त्यक्त्वान्यौ गन्तुमर्थितौ॥ ३३८॥
ततः प्रभाते जालौघकृष्टे मत्स्यकदम्बके।
प्रत्युत्पन्नमतिश्चक्रे कृतकं मृतवद्वपुः॥ ३३९॥
निःशङ्कैर्धीवरैर्न्यस्तः स शनैः प्रययौ जलम्।
यद्भविष्यस्तु लगुडैर्जर्जराङ्गो व्यपद्यत॥ ३४०॥
इत्युक्त्वा टिट्टिभी भर्तुर्वाक्यात्तत्रैव शावकान्।
असूत तांस्तरङ्गौघैर्जहार च सरित्पतिः॥ ३४१॥
गृहिणीभर्त्सितश्चक्रे दुःखितः पक्षिसंगमम्।
टिट्टिभं तन्महानादं गरुत्मानशृणोत्ततः॥ ३४२॥
तत्प्रेरितेन हरिणा निरस्तो मकराकरः।
लज्जाविकुण्ठवदनष्टिट्टिभ्यै शावकान्ददौ॥ ३४३॥

इति कच्छपमत्स्यटिट्टिभाख्यायिका॥ १५॥

एवं शक्तविनोदेन महतामपि नोदयः।
किमुतैकान्तभक्षाणामस्माकं मूढचेतसाम्॥ ३४४॥
कृत्वेति भेदनोपायं ययौ करटकान्तिकम्।
हसन्दमनकोऽभ्येत्य हृष्टोऽखिलमुवाच तम्॥ ३४५॥
पैशून्योऽसि[2] ततस्तेन पुनः प्राह च जम्बुकः।
हृदये तैक्ष्ण्यमादायावदच्चामृतसंनिभः॥ ३४६॥
एकद्रव्यार्थिनं हन्यां किं मामङ्ग विगर्हसे।
परामिघातादश्नाति विभूतिं विबुधो जनः॥ ३४७॥

१. 'धाता च' ख. २. 'न्याङ्गर्सितस्तेन' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलक्ष्यप्रतिभाच्छेदो मांसं चतुरको यथा ।
करभः शङ्कुकर्णाख्यः क्रोष्टा चतुरकश्च सः ॥ ३४८ ॥
साचिव्यं कुशलौ सिंहं वज्रदन्तमुपाश्रितौ ।
ततो युद्धार्दिततनौ कदाचिद्वारणद्विषि ॥ ३४९ ॥
वृत्तिच्छेदाच्चतुरकः शङ्कुकर्णमभाषत ।
सखे वक्रं कया बुद्ध्या स्वामिने किं न दीयते ॥ ३५० ॥
शरीरेणातिपुष्टेन किमनेन प्रयोजनम् ।
एवमस्त्विति तेनोक्तः सिंहमभ्येत्य सोऽवदत् ॥ ३५१ ॥
बृहत्प्रस्थाङ्कमानेन शरीरं संप्रयच्छति ।
करभो वः स्वया बुद्ध्या प्रसादः क्रियतां विभो ॥ ३५२ ॥
तद्वाक्यादथ शार्दूलः शङ्कुकर्णं विदार्य तम् ।
ययौ स्नानाय धृत्वास्य द्वितीयं परिचारकम् ॥ ३५३ ॥
तमाह क्रव्यवदनं जम्बुकं चतुरस्ततः ।
भक्षयावो बृहन्मांसमिति श्रुत्वाब्रवीच्च सः ।
तच्छ्रुत्वा चतुरः प्राह तदा मे दृष्टिमर्पय ॥ ३५४ ॥
अथ संभक्षिते मासे संप्राप्ते च मृगाधिपे ।
आलुलोके भयाक्रान्तः स क्रोष्टा चतुराननम् ॥ ३५५ ॥
भक्षयित्वा किमद्यापि वदनं मम वीक्ष्यसे ।
चतुरः प्राह तच्छ्रुत्वा तं जघान मृगेश्वरः ॥ ३५६ ॥
अत्रान्तरे महासार्थभ्रष्टं करभकं परम् ।
कष्टाहवादिनं[1] दृष्ट्वा चतुरः सिंहमब्रवीत् ॥ ३५७ ॥
बृहत्प्रस्थं समादाय सोऽयं करभ आगतः ।
धिक्कष्टमन्धकर्णत्वं वनमन्यदितो व्रज ॥ ३५८ ॥
तस्मिन्गते यथेष्टं स भक्षयन्वासयन्बहून् ।
प्रमोदमाप दुर्लक्ष्यः स्वार्थसिद्ध्यै सतां धियः ॥ ३५९ ॥

इति चतुराख्यायिका ॥ १६ ॥

---

१. 'अष्टकं व्याहतं' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुत्वेति कर्कशं तस्य वक्रं बुद्धिविचेष्टितम् ।
पैशुन्यभेदचकितो धर्म्यं करटकोऽब्रवीत् ॥ ३६० ॥
लक्ष्मीः परोपतापेन कष्टार्नैन्यधनक्षयैः ।
भूतदाहेन चागारं गच्छन्ति बत दुर्जनाः ॥ ३६१ ॥
सखे विरम पापात्त्वं शृणु मत्तोऽनुशासनम् ।
अथ वा मूर्खशास्तारो हतः सूचीमुखो यथा ॥ ३६२ ॥
हेमन्तकर्षिताः पूर्वं वानराः काष्ठसंचयम् ।
आहृत्य गत्वा खद्योतं मध्ये सर्वेष्वपात्रजन् ॥ ३६३ ॥
दृष्ट्वा सूचीमुखः पक्षी तत्तेषां मूर्खचेष्टितम् ।
प्राह व्यर्थश्रमेणालं खद्योतोऽयं न पावकः ॥ ३६४ ॥
इति शिक्षां ब्रुवाणस्य कश्चिच्छुश्राव नो वचः ।
यदा तदा स कर्णान्ते वानरानवदत्पुनः ॥ ३६५ ॥
तत्रैको वचनं श्रुत्वा तस्य निर्बन्धभाषितम् ।
गृहीत्वा तं जघानाशु शिलायां भर्त्सयन्कपिः ॥ ३६६ ॥
एवं तवोपदेष्टारो न वयं कुशलास्पदम् ।
येनेयं स्वामिनो लक्ष्मीः पैशुन्यात्संशये धृता ॥ ३६७ ॥

इति सूचीमुखाख्यायिका ॥ १७ ॥

अबुद्धियोगादधमाः सर्वदा विपदास्पदम् ।
पिता धूमेन निहतः सुतेनाधर्मबुद्धिना ॥ ३६८ ॥
धर्मबुद्धिरबुद्धिश्च द्वावेव सुहृदौ पुरा ।
वणिक्पुत्रावलभतां सहस्रपरमं धनम् ॥ ३६८ ॥
ततो गृहीत्वा दशमं भूमौ भागं निधाय तम् ।
जग्मतुस्तौ ततो गूढमबुद्धिः प्रजहौ धनम् ॥ ३७० ॥
स एव हृत्वा प्रोवाच हृतं मे धर्मबुद्धिना ।
साक्षी वक्ष्यति तत्रत्यो वृक्ष इत्यब्रवीत्सभाम् ॥ ३७१ ॥

---

१. 'प्राप्य' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF.

तच्छ्रुत्वा विस्मिताः सर्वे धर्माधिकारिणो द्विजाः ।
प्रातर्विचार इत्येवं चक्रुः प्रतिभुवा स्थितम् ॥ ३७२ ॥
अबुद्धिरथ कृत्वा तं वृक्षस्य सुषिरान्तरे ।
पितरं गूढवचनैस्त(दुक्तो न्यजयत्परम् ॥ ३७३ ॥
धर्मबुद्धिर्जितस्तत्र विचिन्त्य क्षणमात्मना ।
हृतं तन्निधिपालेन तं तु दासी)त्यभाषत ॥ ३७४ ॥
ततो विधाय बहुलं तुषपर्णतृणानलम् ।
धूमेनापूरयामास विवरं मार्गशाखिनः ॥ ३७५ ॥
धूमातिक्वथितप्राणो दुर्बुद्धेर्जनकस्ततः ।
निर्गत्य प्राह पुत्रेण हा हतोऽस्मीति विह्वलः ॥ ३७६ ॥
धिगुपायानपायैकपर्यन्तान्मूर्खकल्पितान् ।
पुरा स्वयं समानीतैर्नकुलैर्भक्षिता बकाः ॥ ३७७ ॥
बाध्यमाना भुजङ्गेन बकाः श्रुत्वा कुलीरकान् ।
उपायं नकुलाह्वाने मत्स्यमांसं ददुः पथि ॥ ३७८ ॥
आहुता नकुला जघ्नुर्मत्स्यमांसानुसारिणः ।
सर्पे तस्मिन्हते ज्ञात्वा मार्गे जघ्नुर्बकानपि ॥ ३७९ ॥
एवं कुतनयेनाहं निहतो दुष्टबुद्धिना ।
वदन्निति जगामास्तं धूमस्फुटितलोचनः ॥ ३८० ॥
ततो यथार्थं विज्ञाय दुष्टबुद्धिर्हतो द्विजैः ।
एवं त्वमपि दौरात्म्यात्पैशुन्यान्नाशमेष्यसि ॥ ३८१ ॥

इति वणिक्पुत्रबकाख्यायिका ॥ १८ ॥

अस्माकमपि नाश्वासस्त्वयि मिथ्यासुहृद्द्रुहि ।
यस्योपजीव्ये न प्रीतिः कुतस्तस्योपजीवके ॥ ३८२ ॥
पुरा लोहसहस्राङ्कां न्यासीकृत्य तुलां वणिक् ।
वणिग्गेहे चिरं भ्रान्त्वा दिगन्तात्पुनराययौ ॥ ३८३ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. २. एतत्स्थाने ख-पुस्तके तु 'बकाख्यायिकागर्भा वणिक्पुत्रान्तराख्यायिका' इत्युपलभ्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं याचमानं स्वतुलामब्रवीन्मधुरं वणिक् ।
भक्षिता मूषकैः सार्धं तच्छ्रुत्वा सोऽभ्यभाषत ॥ ३८४ ॥
मूषका भक्षयन्त्येव लोहं मधुरपेशलम् ।
निशम्येति वचस्तुष्टस्तस्मै तथ्यमकल्पयत् ॥ ३८५ ॥
तत्पुत्रं सोऽप्यथैकान्ते हृत्वा निक्षेपहारिणः ।
श्येनेन ते हृतः सूनुरित्याह विकृताननः ॥ ३८६ ॥
ततो विवादे संप्राप्ते नगराधिपतेः पुरः ।
कथं श्येनो हरेद्बालं विस्मितानित्युवाच सः ॥ ३८७ ॥
यत्र लोहसहस्रस्य भक्षयन्त्याखवस्तुलाम् ।
श्येनः कुञ्जरहृत्तत्र किं चित्रं यदि बालहृत् ॥ ३८८ ॥[1]
.... ।
.... ॥ ३८९ ॥

इति लोहतुलाख्यायिका ॥ १९ ॥

अत्रान्तरे पिङ्गलको दृष्ट्वा संकोचकुञ्चिताम् ।
ग्रीवां वृषस्य साशङ्कं नखराग्रैरदारयत् ॥ ३९० ॥
हत्वा तमनुतापार्तः[2] स्वैरमायासितो हरिः ।
कर्कशा राजचर्येति दमनेन[3] धृतिं ययौ ॥ ३९१ ॥

इति सिंहवृषाख्यायिका ॥ २० ॥

मिहिलारोप्यनगरे पुरासीद्वायसाधिपः ।
शाल्मलिस्कन्धवसतिर्लघुपातीति विश्रुतः ॥ ३९२ ॥
स कदाचिददर्शाग्रे कपोतेशं सहानुगम् ।
चित्रग्रीवाभिधं जाले पतितं पाशजीविनाम् ॥ ३९३ ॥
जालं हरन्तमालोक्य कौतुकात्तं विहायसा ।
वायसोऽनुययौ द्रष्टुं तस्य बुद्धिचिकीर्षितम् ॥ ३९४ ॥

---

१. अत्र त्रुटिचिह्नाभावेऽपि 'तच्छ्रुत्वा कौतुकात्पृष्टवृत्तान्तैस्तस्य दापिता । सभ्यैस्तुला स्वा तेनापि स चानीयार्पितोऽर्भकः ॥' इति कथासरित्सागरे दृष्टत्वेन त्रुटिचिह्नं स्थापितम्.
२. 'मनुलापात्तैः स्वैरमाश्वासितो' ख. ३. 'वदनेन' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चित्रग्रीवोऽपि संप्राप्य सुहृदं वृद्धमूषकम् ।
हिरण्याख्यं महापाशच्छेदेने[1] तमनोदयत् ॥ ३९५ ॥
छिन्नपाशं हिरण्येन ततस्तं वीक्ष्य वायसः ।
सख्यं यत्नेन विदधे तेन विस्रब्धमाखुना ॥ ३९६ ॥
[2]प्ररूढतां ययौ प्रेम प्रीतिभुक्तिपुरःसरम् ।
याति काले रहः काकः कदाचिन्मित्रमब्रवीत् ॥ ३९७ ॥
वृत्तियुक्तमपि स्थानमिदं मम न रोचते ।
सखे जातारतिर्देहे पुष्टिर्हि प्रथमा रतिः ॥ ३९८ ॥
तदेहि मन्थरो नाम मित्रं मे कच्छपाभिधः[3] ।
जाह्नव्यामस्ति गच्छामो विहाराय तदन्तिकम् ॥ ३९९ ॥
[4](.......................................कच्छपम् ।
कुशलानामयं पृष्ट्वा चक्रतुर्विविधाः कथाः) ॥ ४०० ॥
अपापः खिन्नः प्राप्तोऽयमित्युक्तो वायसेन सः ।
पृष्टो हिरण्यः प्रोवाच निजागमनकारणम् ॥ ४०१ ॥
परिव्राड् गूढकर्णोऽस्ति प्रख्यातो नगरान्तिके ।
तदाश्रमेऽहं सततं पूर्णां वृत्तिमकल्पयम् ॥ ४०२ ॥
नागदन्ताग्रसंसक्तभिक्षाभोजनसंस्थितेः ।
[6]....नारदपरिष्कारं स्निग्धाव(न्न)मृदुभोजनैः ॥ ४०३ ॥
याति काले ततस्तस्य परिव्राडाययौ परः ।
स भुक्त्वा निशि विश्रब्धं प्रोवाच विविधाः कथाः ॥ ४०४ ॥
गूढकर्णस्तु मामेव चिन्तयञ्जर्जरं मुहुः ।
अवादयत्कथाविघ्ने बृहत्स्फिक्कुपितोऽब्रवीत् ॥ ४०५ ॥
अहो विद्यावयोवृद्धो निःसङ्गोऽपि भवान्सखा ।
कथास्वनादरो दर्पोन्मदान्ध इव लक्ष्यते ॥ ४०६ ॥

---

१. 'च्छेदाय' ख. २. 'प्ररूढेऽथ तयोः प्रेम्णि' ख. ३. 'धिपः' स्यात्. ४. कोष्ठान्तर्गतपाठः क-पुस्तके त्रुटितः. ५. 'क्वति वायसे' क. ६. क-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्छ्रुत्वा लज्जितः किंचिद्गूढकर्णोऽप्यभाषत ।
न दर्पादन्यचित्तोऽहं श्रूयतामत्र कारणम् ॥ ४०७ ॥
सततं मूषकः पापो भैक्ष्यपात्रादलक्षितः ।
समश्नाति भिया तस्य जर्जरं वादयाम्यहम् ॥ ४०८ ॥
बृहत्स्फिग्गूढकर्णस्य श्रुत्वेति प्राह सस्मितः ।
यत्त्वावहितस्यापि भक्षयत्येष भोजनम् ॥ ४०९ ॥
अवश्यं कारणेनात्र भवितव्यं तपोधन ।
करोति शाण्डिलीमाता नाकस्मात्तिलविक्रयम् ॥ ४१० ॥
पुरापश्यमहं पान्थः स्थितो ब्राह्मणवेश्मनि ।
ब्राह्मणी कुपिता पत्युः सर्वान्नव्ययकारणात् ॥ ४११ ॥
लुब्धामवोचतां भर्ता भद्रे नाशोऽतिसंचये ।
संचयेनातिलुब्धो हि निहतो जम्बुकः पुरा ॥ ४१२ ॥
अरण्ये प्राप गोमायुः परस्परहतान्पुरा ।
लुब्धकक्रोडहरिणान्यत्रारूढं च कार्मुकम् ॥ ४१३ ॥
अयत्नोपनतं प्राप्य हर्षपूर्णोऽथ जम्बुकः ।
तान्संचयं विधायैव कार्मुकं भोक्तुमुद्यतः ॥ ४१४ ॥
चापचर्वणसक्तस्य तस्य यन्त्रेषुणा दृढम् ।
दारितस्य ययुः प्राणास्तस्मान्नाशोऽतिसंचयः ॥ ४१५ ॥
पत्युः श्रुत्वेति वचनं पर्वयागानुकारिणी ।
स्नानाय तं विसृज्याशु पाकसक्ताभवत्क्षणात् ॥ ४१६ ॥
तत्तिलान्कृशराहेतोः शिष्येण स्थापितान्पुरः ।
अभ्येत्य श्वा क्रियायोग्यांश्चक्रे जिह्वावलेहनैः ॥ ४१७ ॥
तिलानां विक्रयं कर्तुमुद्यतामपरैस्तिलैः ।
दृष्ट्वा परो गृहस्वामी विचिन्त्य क्षणमब्रवीत् ॥ ४१८ ॥

१. 'अहीवा' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करोति ब्राह्मणवधूर्नाकस्मात्तिलविक्रयम् ।
तस्मादाखुस्तथैवैष न शक्तः कारणं विना ॥ ४१९ ॥

इति जम्बुकाख्यायिका ॥ २१ ॥

इत्युक्त्वा मद्बिलद्वारं स विदार्यातिकोविदः ।
येनाहमभवं द्रष्टा तत्सुवर्णं जहार मे ॥ ४२० ॥
ततो मे शक्तिहीनस्य क्षीणवृत्तेर्गतत्विषः ।
त्यक्तस्य भृत्यस्वजनैरिदमासीन्मनोगतम् ॥ ४२१ ॥
अहो नु धनहीनानां मरणं सुगतिः परा ।
गतासुः सेव्यते गृध्रैर्न तु केनापि निर्धनः ॥ ४२२ ॥
इति चिन्तापरीतोऽहमनेन लघुपातिना ।
संगतो जाह्नवीकूले प्राप्तो भद्र त्वदन्तिकम् ॥ ४२३ ॥
तच्छ्रुत्वाश्वासयामास हिरण्यं कच्छपाधिपः ।
उद्योगशीलो विभवं प्राप्स्यसीति पुनः पुनः ॥ ४२४ ॥
एवं प्रब्रुवतां तेषां लुब्धकस्तत्र(?) (आययौ ।
चित्राङ्गो नाम सारङ्गः प्रशंसन्निव मित्रताम्) ॥ ४२५ ॥
तेषां विश्रम्भसौहार्दे वर्धमाने परस्परम् ।
मृगः कदाचित्संकेतवेलायां न व्यलम्बत ॥ ४२६ ॥
ततस्ते शङ्किता मित्रं बद्धं विज्ञाय वायसात् ।
अचोदयत्कुरङ्गस्य बन्धच्छेदाय मूषकम् ॥ ४२७ ॥
नीतोऽथ मूषकस्तत्र वायसेन विहायसा ।
दृष्ट्वा कुरङ्गं प्रोवाच देशकालज्ञता क्व ते ॥ ४२८ ॥
इति श्रुत्वाब्रवीदेनं प्राप्तोऽहं दैवशासनात् ।
क्रीडार्थं राजपुत्राणां दृष्टबन्धोऽप्यहं पुरा ॥ ४२९ ॥
देशकालबलज्ञो हि दृष्टोपायोऽपि पण्डितः ।
सखे पराङ्मुखे दैवे समर्थोऽपि करोति किम् ॥ ४३० ॥

---

१. 'गर्भतिला' क. २. 'कथयतां' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. ४. 'व्यदृश्यत' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं तयोः कथयतोर्मकरोऽपि सुहृत्प्रियः।
आययौ शनकैर्यत्र मृगमूषकवायसाः॥ ४३१॥
दृष्ट्वा कच्छपमायान्तं मूषकः कुपितोऽब्रवीत्।
धिक्त्वामदेशकालज्ञं यत्प्राप्तोऽसि छलैरिति॥ ४३२॥
ततः कुरङ्गपाशाग्रे कृत्ते सत्वरमाखुना।
लुब्धकः सहसा प्राप्य बबन्धाभ्येत्य कच्छपम्॥ ४३३॥
ते च जग्मुर्भयात्तस्य गत्वा चाचिन्तयत्क्षणम्।
ततः संमन्त्र्य चक्रुस्ते व्याजेन पतितं मृगम्।
नेत्रे विपाटयन्तं तं तस्यैवोपरि वायसम्॥ ४३४॥
तं दृष्ट्वा लुब्धके[1] मुग्धे त्यक्त्वा कच्छपमञ्जसा।
अभिद्रुते कुरङ्गाय कूर्ममाखुरमोचयत्॥ ४३५॥
स तस्मिन्मूषके याते सारङ्गोऽपि सवायसः।
जगाम तूर्णमि(त्[2]येवं बुद्धिः सर्वार्थसाधिनी॥ ४३६॥
इति मूषककाककूर्मकच्छपाख्यायिका॥ २२॥
न्यग्रोधशाखिनिलयो वायसाधिपतिः पुरा।
बभूव वर्णमेघाख्य)[3]स्तमालश्यामलच्छविः॥ ४३७॥
तस्योलूकपतिर्वैरी रिपुमर्दः कुलक्षयम्।
चकार निशि सर्वो हि देशकालाश्रयाद्बली॥ ४३८॥
स सैन्यकृतशोकार्तः पञ्च पप्रच्छ वायसान्।
([3]प्रधानामात्यसंस्थासु नियुक्तान्मुनिकोविदान्)॥ ४३९॥
देशत्यागमुवाचैकः कालहारं तथापरः।
बलिना संधिमन्योऽथ तूर्णमन्यपराक्रमम्॥ ४४०॥
पञ्चाङ्गं पञ्चमो मन्त्रमपैरः[4] शत्रुनाशनम्।
दुर्जया हि सदा घू[5]काः शत्रवो वा[6]कृतेन नः॥ ४४१॥

१. 'को मुग्धो' ख. २.–३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. ४. 'वद-च्छत्रु' ख. ५. 'लो' ख. ६. 'वायसे नभः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुत्वेति वायसपतिर्मन्त्रिणं चिरजीविनम् ।
पप्रच्छ कारणं पृष्टः सोऽप्याह श्रूयतामिति ॥ ४४२ ॥
मित्राणि शत्रुतां यान्ति शत्रवो यान्ति मित्रताम् ।
वाक्कृतेनैव वाग्दोषाच्छ्रूयते गर्दभो हतः ॥ ४४३ ॥
द्वीपिचर्मावनद्धाङ्गो रजकेन पुरा खरः ।
पोषाय परसस्येषु ग्रीष्मे त्यक्तः स दुर्बलः ॥ ४४४ ॥
सस्यगोप्ताथ तं दृष्ट्वा चकितो द्वीपिरूपिणम् ।
दुद्राव छन्नकोदण्डः कम्बलच्छन्नविग्रहः ॥ ४४५ ॥
सस्यपुष्टशरीरोऽथ तं मत्वा गर्दभीं खरः ।
उद्दण्डमेहनोऽधावदत्युत्तालखुरद्वयः ॥ ४४६ ॥
मां द्वीपिनं ज्ञास्यतीति तं मनोहरया गिरा ।
घटयन्निव संमत्तोऽवदत्सामोचितं खरः ॥ ४४७ ॥
गर्दभं च गिरा ज्ञात्वा जघान स धनुर्धरः ।
वाग्दोषेणेति निहतो गर्दभो बुद्धिलाघवात् ॥ ४४८ ॥

इति रासभाख्यायिका ॥ २३ ॥

उलूकं पक्षिणं राज्ये विहङ्गान्कर्तुमुद्यतान् ।
दृष्ट्वा वंशकरः काकः पुरा प्रोवाच दुःखितः ॥ ४४९ ॥
अमङ्गलो दिनान्धश्च यत्रोलूकः क्षितीश्वरः ।
का तत्र कुशले वार्ता [1]स्वस्ति गच्छाम्यहं दिशः ॥ ४५० ॥
प्रसिद्धो हि महीनाथः कार्यः सर्वसुखावहः ।
प्रसिद्ध्याशंसिनो नाम शशकाः सुखभागिनः ॥ ४५१ ॥
अनावृष्टिहते काले पुरा द्वादशवार्षिके ।
विग्रस्तः क्षुत्कृशैर्नागैश्चतुर्दन्ताधिपो द्विपः ॥ ४५२ ॥
विनष्टा एव कालेऽस्मिन्पयसो विरहाद्वयम् ।
इत्युक्त्वा द्रष्टुमगमन्नुदकं निखिलां महीम् ॥ ४५३ ॥

१. 'प्रस्त' क.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्तश्चन्द्रसरो ज्ञात्वा जलपूर्णं तथा द्विपः।
संहृष्टो वाततारांशुमृणालवलयाकुलम् ॥ ४५४ ॥
तत्रोपकण्ठे शशकान्गजेन्द्रचरणैर्हतान्।
दृष्ट्वा शशपति(र्दूतं[1] विलयं प्राहिणोद्गजे ॥ ४५५ ॥
स कपोलतलालीनमत्तालिवलयं द्विपम्।
विसृष्टः शशिनासीति जगादाभ्येत्य निर्भयः ॥ ४५६ ॥
यल्लाञ्छितः) शशाङ्कोऽहं पाल्यास्ते शशका मम।
तेषां क्षयमिमं कृत्वा मत्कोपान्न भविष्यसि ॥ ४५७ ॥
इत्युक्तिचकितस्याथ द्विपस्यादर्शयज्जले।
प्रतिमाचन्द्रममलं गजस्तं प्रणनाम च ॥ ४५८ ॥
स च चन्द्रसरो दृष्ट्वा करस्पर्शचलज्जलम्।
शशवाक्याद्ययौ नागो ननन्दुः शशकास्ततः ॥ ४५९ ॥

इति नागशशाख्यायिका[2] ॥ २४ ॥

स्वामिनो व्यपदेशेन सुखमित्यश्नुते जनः।
अयं तु क्षुद्रनृपतिर्जिताजितविनाशनः ॥ ४६० ॥
कपिञ्जलशशौ पूर्वं वेश्मदानविनोदिनौ।
मार्जारं दधिकर्णाख्यं न्यायं पप्रच्छतुः पुरा ॥ ४६१ ॥
मिथ्याविनीतः सद्धर्मादेष्टा शान्तिपरायणः।
जपस्थ इव सुप्ताक्षः सोऽब्रवीत्पेशलस्वनः ॥ ४६२ ॥
अहिंसा परमो धर्मो मोक्षः परहितं नृणाम्।
प्राणिद्रोहप्रसक्तानामन्धे तमसि संस्थितिः ॥ ४६३ ॥
श्रुत्वेत्याश्वासपदवीं तदा तावागतौ ततः।
अभक्षयत्क्षुद्रनृपो दुष्टः[3] सर्वविनाशकृत् ॥ ४६४ ॥

इति मार्जाराख्यायिका ॥ २५ ॥

---

१. एतत्कोष्ठान्तर्गतपाठः ख पुस्तके त्रुटितः. २. 'नाग' इति पदं ख पुस्तके नोपलभ्यते. ३. 'रूप्यस' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मादुलूको नार्होऽयमिति तद्वचसा पुरा ।
नष्टराज्योऽभवद्वैरी काकानामित्यमङ्गलः ॥ ४६५ ॥
छलेन पातय रिपून्सर्वोपायपरिक्षये ।
छलेन भ्रंशितः स्थानाद्धूर्तैः शत्रुभिरग्रजः ॥ ४६६ ॥
स्कन्धे छगलमादय व्रजन्तं ब्राह्मणं पथि ।
(वेञ्चनायान्नुवन्धूर्ताः संघशः कृतसंविदः) ॥ ४६७ ॥
अहो श्वा मृगहा नूनमयं कस्य द्विजर्षभ ।
स्कन्धेन वोढो मार्गेषु नृपोपायनमेष वा ॥ ४६८ ॥
एकस्मिन्नित्यपक्रान्ते दूरमन्यावथोचतुः ।
अहो विचित्रं पश्यावः स्कन्धेन यदयं द्विजः ॥ ४६९ ॥
श्वानं वहति किं नु स्यादयं व्याधो द्विजाकृतिः ।
तयोः श्रुत्वेति विप्रस्तं निधाय भुवि शङ्कितः ॥ ४७० ॥
परपर्श पाणिना पुच्छविषाणवृषणादिषु ।
उन्मत्ता विलपन्त्येते छागो नायमिति स्वयम् ॥ ४७१ ॥
पुनः स्कन्धे समादाय तं ययौ चतुरो द्विजः ।
ततः परे समभ्येत्य कक्षानियमिताम्बराः ।
ऊचुर्द्विजोऽयमस्पृश्यः श्वपाक इव पापभाक् ॥ ४७२ ॥
अहो महाजने नायं लज्जते कुलपांसनः ।
श्वानं वहति यः स्कन्धे पथि याति च संस्पृशेत् ॥ ४७३ ॥
इत्याकर्ण्य भृशोद्विग्नस्त्यक्त्वाजं दुःखितो द्विजः ।
बहूनामेकवाक्येन संजातप्रत्ययोऽभवत् ॥ ४७४ ॥
मायावी राक्षसो नूनमजोऽयं स्यान्न संशयः ।
इति संचिन्त्य तत्याज तं द्विजो धूर्तवञ्चितः ॥ ४७५ ॥
छागमादाय भुक्त्वा ते धूर्ता मुमुदिरे परम् ।
इति व्याजेन शत्रूणां कुर्यात्संपदि वञ्चनाम् ॥ ४७६ ॥

इति छागाख्यायिका ॥ २६ ॥

१: 'श्छागा' ख. २. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उक्त्वेति वायसामात्यश्चिरंजीवी निजं प्रभुम् ।
विसृज्य कृतकच्छन्नपक्षस्तस्थौ मृतोपमः ॥ ४७७ ॥
अभ्येत्य वायसावासं चतुरः सानुगो निशि ।
उलूकः पतितं काकं ददर्श चिरजीविनम् ॥ ४७८ ॥
केचिदाहुरवध्योऽयं वध्योऽयमिति चापरे ।
मन्त्रिणो घूकराजस्य मुख्यामात्योऽब्रवीत्ततः ॥ ४७९ ॥
कृपणः शरणं यातो रक्ष्योऽयं विपदि स्थितः ।
ददौ सार्थपतिः पूर्वं चौरायापि स्वयं धनम् ॥ ४८० ॥
वृद्धं पुरा सार्थवाहं भार्या हरिणलोचना ।
बाला पिशाचसदृशं न सेहे द्रष्टुमुल्बणम् ॥ ४८१ ॥
कदाचिदथ शर्वर्यां चौरं वीक्ष्य स्वमन्दिरे ।
चकिता सहसा वृद्धमालिलिङ्ग घनस्तनी ॥ ४८२ ॥
सदा पराङ्मुखीं दृष्ट्वा स्वयं कण्ठावलम्बिनीम् ।
कान्तां वृद्धोऽवदच्चौरमकाण्डामृतनन्दितः ॥ ४८३ ॥
नेक्षते[1]ऽपाङ्गलोलाक्षी सैवमालिङ्गति स्वयम् ।
हर चौर धनं सर्वं प्रियकृद्दयितोऽसि मे ॥ ४८४ ॥

इति दयिता[2]ख्यायिका ॥ २७ ॥

इति चौरोऽपि वणिजा कारणेन सुहृत्कृतः ।
अयं काकस्तु शत्रूणां सर्वं वक्ष्यति चेष्टितम् ॥ ४८५ ॥
पुरा राक्षसचौराभ्यां श्रूयते रक्षितो द्विजः ।
तुल्यं कालं द्विजगृहं जग्मतुश्चौरराक्षसौ ॥ ४८६ ॥
शरीरधनहिंसार्थमहंपूर्विकया तयोः ।
विवादोऽभून्निशि महानूचतुस्तौ द्विजं ततः ॥ ४८७ ॥
अयं ते धनहृत्प्राप्तस्तव चायं शरीरकृत् ।
विप्रस्तयोरिदं श्रुत्वा बलमन्त्रैर्जघान तौ ॥ ४८८ ॥

इति चौरराक्षसाख्यायिका ॥ २८ ॥

---

१. 'या मां नेक्षत लोलाक्षी सैव' ख. २. 'चौराख्यायिका' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अरिमर्दं[1] तदाकर्ण्य काकानुक्रोशमालिनी ।
तद्वचोविरतौ[2] प्राहुरपरे घूकमन्त्रिणः ॥ ४८९ ॥
अहो कुमन्त्रिणानेन संशये स्वामिनो धृताः ।
लक्ष्मीः शत्रुप्रयुक्तेऽस्मिन्काके कारुण्यचेतसा ॥ ४९० ॥
वञ्च्यते धूर्तवचनैः प्रभवः सरलाशयाः ।
जायां सजारां शिरसा रथकारः पुरावहत् ॥ ४९१ ॥
कृत्वा[3] प्रयोजनमिषं निर्गत्य शिबिराल्लघु ।
भार्यां जारवतीं द्रष्टुं विवेश रथकृत्पुनः ॥ ४९२ ॥
गूढे शयनपर्यङ्कतले तस्मिन्नधःस्थिते ।
प्रियोपपतिना चक्रे सुरतं तेन तद्वधूः ॥ ४९३ ॥
सा ज्ञात्वा पादसंस्पर्शान्निजं पतिमलक्षितम् ।
उवाच धर्मपत्न्या मे तत्परो नास्ति वल्लभः ॥ ४९४ ॥
तज्ज्ञात्वा मूढहृदयो रथकारो मुदान्वितः ।
उवाह शिरसा भार्यां सजारां हासयन्पथि ॥ ४९५ ॥

इति रथकाराख्यायिका ॥ २९ ॥

इत्थं विमूढहृदया वञ्च्यन्ते प्रियवादिभिः ।
चिरजीवी च काकोऽयं संधेयो नेति मे मतिः ॥ ४९६ ॥
ततो मुखाद्धमद्रक्तः कृतकस्रस्तपक्षतिः ।
खञ्जन्नुलूकनृपतिं चिरंजीवी न्यजिज्ञपत् ॥ ४९७ ॥
देव त्यजाम्यहं प्राणान्कृतघ्नैर्वायसैर्हतः ।
त्वत्कृते तद्वधायाहं जातिं वाञ्छामि कौशिकीम् ॥ ४९८ ॥
काकस्येति वचः श्रुत्वा घूकामात्योऽवदद्बुधः ।
उलूकजातिर्न प्राप्या त्वया वक्रेण वायस ॥ ४९९ ॥
त्यक्ताप्यहो रविमुखैः स्वयोनिं मूषिका ययौ ।
गङ्गातीरे मुनिः कश्चिन्मूषिकां श्येनपातिताम् ॥ ५०० ॥

---

१. 'अमात्य(?)सौ तदाकर्ण्य वाचोऽनुक्रोशशालिनः' ख. २. 'तद्वधे विर' ख. ३. 'ज्ञात्वा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृपालुः कन्यकां चक्रे तपसा ववृधे च सा।
तां यौवनस्थामालोक्य मुनिर्दातुं समुद्यतः॥ ५०१॥
आजुहाव सहस्रांशुं कन्येयं गृह्यतां विभो।
प्रभावतो गरीयांस्त्वमित्युक्तो रविरब्रवीत्॥ ५०२॥
मत्प्रभावाधिका मेघा ये कृत्स्नं छादयन्ति माम्।
आहूतास्तेऽप्यथ प्राहुरस्मत्तोऽभ्यधिकोऽनिलः॥ ५०३॥
सोऽप्यब्रवीदथाहूतो गिरिर्मत्तो बलाधिकः।
आहूताः पर्वताः प्राहुर्मूषकैर्निर्जिता वयम्॥ ५०४॥
गृहाण कन्यामित्याखुर्निर्दिष्टो मुनिनावदत्।
कन्या बिले मम कथं प्रविशेदिति सादरः॥ ५०५॥
ततः सा मूषिकैवाभूद्बिलयोग्या मुनेर्गिरा।
इत्यात्मजातिमुत्सृज्य न यान्त्यभ्यधिकं खलाः॥ ५०६॥
सूर्यं भर्तारमुत्सृज्य पर्जन्यं मारुतं गिरिम्।
स्वयोनिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा॥ ५०७॥

इति मूषिकाख्यायिका॥ ३०॥

उक्त्वेति विरते तस्मिन्नमात्ये नीतिशंसिनि।
उलूकः काकमादाय स्वमेव शिबिरं ययौ॥ ५०८॥
तं शत्रुसंश्रयासन्ननाशं वीक्ष्य स्वयं प्रभुम्।
उलूकमन्त्री प्रययावागामिभयशङ्कया॥ ५०९॥
चिरजीवी समाश्वास्य छिद्रं दुर्गं समीक्ष्य च।
आहूय वायसपतिं ददाहोलूकमण्डलम्॥ ५१०॥
दग्धोलूकगुहां पूर्णामभिषिच्य निजं प्रभुम्।
चिरजीवी निजजनैः पूज्यमानो मुदं ययौ॥ ५११॥
ततः पप्रच्छ सद्भृत्यं राज्यमासाद्य वायसः।
कथं शत्रुगृहे कालस्त्वया नीतोऽतिदुःसहः॥ ५१२॥
सोऽब्रवीद्विपुलं दुःखमवाप्तं कालकाङ्क्षिणा।
शत्रुः स्कन्धेन वोढव्यः प्राज्ञैः सपदि सर्पवत्॥ ५१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्पस्तडागमासाद्य वृत्तिच्छेदकृशः पुरा ।
धूर्तः प्रोवाच मण्डूकान्पुरा दष्टो मया द्विजः ॥ ५१४ ॥
तच्छापादेव यातोऽस्मि सर्वमण्डूकवाहनम् ।
मण्डूकराजस्तच्छ्रुत्वा चक्रे तं वाहनं मुदा ॥ ५१५ ॥
स्कन्धे गृहीत्वा मण्डूकं स नानागतिकोविदः ।
ययाचे भोजनं मन्दं वपुः कृत्वा मृदुस्वरः ॥ ५१६ ॥
शनैः शनैस्तदादेशात्सर्वमण्डूकसंक्षयम् ।
चक्रे शत्रुगृहेष्वेवं तिष्ठेत्कार्यवशागतः ॥ ५१७ ॥

इति मण्डूकाख्यायिका ॥ ३१ ॥

वृद्धवाक्यं हितं राज्ञा श्रोतव्यं तत्त्वया सदा ।
श्रूयते हंसनिचयो वृद्धवाक्येन रक्षितः ॥ ५१८ ॥
हंसानामधिपः पूर्वं क्षीरोदो नाम शाल्मलौ ।
उवास तमुवाचार्थं स भृत्यो वृद्धहंसारसः ॥ ५१९ ॥
व्याधैरुप्तमिदं बीजं विनाशाय कुलस्य नः ।
निरस्यतां तदित्याह कश्चिच्छुश्राव नो वचः ॥ ५२० ॥
ततः कालेन वृद्धेषु हंसेषु खगजीविभिः ।
वृद्धहंसोऽब्रवीदत्र तिष्ठन्तु कृतकं मृताः ॥ ५२१ ॥
तथेति निश्चितैस्तैस्तु जालादुद्धृत्य धीवराः ।
राशीभूतान्खगांश्चक्रुरुड्डीय प्रययुश्च ते ॥ ५२२ ॥

इति हंसाख्यायिका ॥ ३२ ॥

चिरजीवीवचः श्रुत्वा मेघवर्णः श्रिया युतः ।
ननन्द शत्रुनाशेन राज्येन सह बान्धवः ॥ ५२३ ॥

इति काकोलूकाख्यायिका ॥ ३३ ॥

वानरः शिशुमारश्च पुरा मित्रे बभूवतुः ।
उदुम्बरफलाहारौ विस्रम्भप्रीतिसेवनात् ॥ ५२४ ॥

---

१. 'वायसः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]मित्रैकसेविनो जाया शिशुमारस्य दुःखिता ।
बभूवास्वस्थहृदया क्ष[2]यरोग([3]निपीडिता ॥ ५२५ ॥
तां वीक्ष्य शिशुमारोऽपि दुःखितस्तत्सखीगिरा ।
वानरस्यैव हृदयं विवेद व्याधिभेषजम् ॥ ५२६ ॥
स गत्वा वानरं प्राह करे गाढं) निपीड्य तम् ।
मित्र जाया ममास्वस्था हृदयं देहि भेषजम् ॥ ५२७ ॥
श्रुत्वेत्यशनिसंकाशं विषण्णो वानरोऽब्रवीत् ।
किं पूर्वमेव नोक्तं मे([4]........................... ॥ ५२८ ॥
............................पश्चाद्दो[5]षैः पलाण्डुवत् ।
पला[6]ण्डुदोषमादाय प्राहुर्नगररक्षिणः ॥ ५२९ ॥
रूपकाणां शतं देहि लगुडा[7]नां सहस्र वा ।
पलाण्डोर्भ[8]क्षयेदं वा शतं कटुरसोत्कटम् ॥ ५३० ॥
स[9] तच्छ्रुत्वाददे भोक्तुं पलाण्डुं तेन तापितः ।
[10]सेहे प्रहारांस्तैर्व्यस्तो रूपकानां शतं ददौ ॥ ५३१ ॥

इति चौराख्यायिका) ॥ ३४ ॥

उदुम्बरं समारुह्य दास्यामि हृदयं तव ।
इत्युक्त्वा वृक्षमारुह्य भयं त्यक्त्वा तमब्रवीत् ॥ ५३२ ॥
व्रज दुष्टाशय सखे विज्ञातोऽसि चिरान्[11]मया ।
नास्मि गर्दभवन्मूर्खो वञ्चनीयो भवद्विधैः ॥ ५३३ ॥
व्याधिक्षामं पुरा सिंहं जम्बुकः सचिवोऽब्रवीत् ।
केन नश्यति ते व्याधिरवसन्ना वयं प्रभो ॥ ५३४ ॥

---

१. 'पृष्ठैक' ख. २. 'क्षुधा' ख. ३. एतत्कोष्ठकान्तर्गतः पाठः ख-पुस्तके त्रुटितः. ४. इयं कोष्ठकान्तर्गतचौराख्यायिका पुस्तकद्वयलब्धापि खण्डितास्फुटार्था, कथासरित्सागरे तु नोपलभ्यते. ५. 'देष' ख. ६. 'ण्डुं चौरमादय' ख. ७. 'निसहस्रधा' ख. ८. 'र्वर्जयेदं वा' ख. ९. 'तेन श्रुत्वा' ख. १० 'सोऽहं प्रहरां' ख. ११. 'तिते' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिंहोऽब्रवीद्यदि भवेत्कुतश्चित्सरसोद्धृतम्[1] ।
गार्दभं कर्णहृदयं तेन शाम्यति मे गदः ॥ ५३५ ॥
तच्छ्रुत्वा जम्बुको गत्वावदद्रजकगर्दभम् ।
भारपीडाकृशोऽत्र त्वं वनमेवैहि[2] वृत्तिमत् ॥ ५३६ ॥
तिष्ठन्ति तत्र गर्दभ्यस्तच्छ्रुत्वा स समाययौ ।
तस्य पृष्ठे ययावुग्रः[3] स सिंहस्वनदुःसहः[4] ॥ ५३७ ॥
मुक्तः[5] कृच्छ्रेण दुद्राव ततः सपदि रासभः ।
क्रोष्टा विलोक्य शार्दूलं निनिन्द मृदुवादिनम्[6] ॥ ५३८ ॥
गर्हयित्वा मृगपतिं प्रोवाचाभ्येत्य गर्दभम् ।
अपक्रान्तोऽसि किं मूर्ख गर्दभ्यो हारितास्त्वया ।
प्रथमं सर्वसिद्धीनां सोढा विघ्नं सुखी भवेत् ॥ ५३९ ॥
इति तस्य गिरायातं खरं हत्वा मृगेश्वरे ।
स्नानाय याते तत्कर्णहृदयं जम्बुकोऽहरत् ॥ ५४० ॥
क यातं तत्समभ्येत्य ब्रुवाणे वारणद्विषि ।
क्रोष्टावदत्र जानीषे प्रकृतः सरलाशयः ॥ ५४१ ॥
अकर्णहृदयो मूर्खो यदि न स्यादयं खरः ।
गतोऽपि दृष्टत्रासोऽपि किं पुनर्व्यसनं विशेत् ॥ ५४२ ॥

इति खराख्यायिका ॥ ३५ ॥

गच्छाधुना न ते मित्रमहं कुटिलचेतसः ।
शिशुमारो निशम्येति वानरं प्राह दुखितः ॥ ५४३ ॥
न ददाति प्रतिश्रुत्य यः सत्यपदविच्युतः ।
निरालम्बी तमो[7] याति स शिलाशतताडितः ॥ ५४४ ॥
वानरस्तद्वचः श्रुत्वा प्रोवाच मतिरस्ति ते ।
न पुण्यं सत्यमात्रेण सत्यान्नाशोऽस्ति केवलात् ॥ ५४५ ॥

---

१. 'ह' ख. २. 'ह्येहि' ख. ३, 'पपाताशु' ख. ४. 'हस्तस्य दुःसहम्' ख.
५. 'तत्कृच्छ्रेण स दुद्राव' ख. ६. 'घातिनम्' ख. ७. 'मे' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरा खर्परघाताङ्कललाटः पुरुषो नृपम् ।
अवाप्य विपुलां वृत्तिं लेभे विक्रमलाञ्छितः ॥ ५४६ ॥
कालेन पृष्टो राज्ञा च स प्रहारस्य कारणम् ।
[1]पूर्यद्भटप्रपातेन खर्पराघातमभ्यधात् ॥ ५४७ ॥
तज्ज्ञात्वा राजपुरुषैर्निरस्तः प्रच्युतः क्षणात् ।
इति केवलसत्त्वेन न भवन्ति हितश्रियः ॥ ५४८ ॥

इति सत्याख्यायिका ॥ ३६ ॥

इत्याकर्ण्य हरेर्वाक्यमनुतापहताशयः ।
शिशुमारो ययौ मन्दं ननन्द च चिरं कपिः ॥ ५४९ ॥

इति वानरशिशुमाराख्यायिका ॥ ३७ ॥

गौडेषु देवशर्माख्यो बभूव ब्राह्मणः पुरा ।
स हृष्टो गर्भिणीं जायां निजामवददुत्सुकः ॥ ५५० ॥
भविष्यत्येव पुत्रस्ते मम वंशविवर्धनः ।
इति श्रुत्वाब्रवीज्जाया भाविषु प्रत्ययः कथम् ॥ ५५१ ॥
आशां विधाय भावेषु यो हि भावेषु हृष्यति ।
स सज्जेत सक्तुघटं भङ्क्त्वैव स्वयमग्रतः ॥ ५५२ ॥
भिक्षार्जितं सक्तुघटं निधाय ब्राह्मणः पुरा ।
अचिन्तयदनावृष्ट्यां तस्य मूल्यं चतुर्गुणम् ॥ ५५३ ॥
तन्मूल्ये छागिकाः कृत्वा ताभिः प्राप्स्यामि गोधनम् ।
कृषिं तेन समाधाय परिणेष्यामि कन्यकाम् ॥ ५५४ ॥
महाधनस्य पुत्रो मे सोमशर्मा भविष्यति ।
रोदिष्यति सुते तस्मिन्स्तनपानाय तत्क्षणम् ॥ ५५५ ॥
ताडयिष्यामि लगुडैर्गृहिणीमतिकोपनः ।
इति भ्रमेण लगुडोत्क्षेपैर्घटमताडयत् ॥ ५५६ ॥
भग्नं सक्तुघटं दृष्ट्वा ततो लज्जां समाययौ ।

---

१. 'अपहृष्टप्र'–ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्याशां नैव कुर्वन्ति बुधा भावेषु भाविषु ।
श्रुत्वेति ब्राह्मणीवाक्यं तूष्णीमासीद्द्विजः क्षणम् ॥ ५५७ ॥

इति घटाख्यायिका ॥ ३८ ॥

जाते ततः सुते विप्रः कदाचिन्निर्गतो गृहात् ।
रक्षायै नकुलं धृत्वा पुत्रस्य गृहयोषितम् ॥ ५५८ ॥
अथ सर्पं महाभोगं बालहिंसार्थमुत्थितम् ।
नकुलः खण्डशः कृत्वा रक्ताक्तो निर्ययौ गृहात् ॥ ५५९ ॥
तमभ्येत्य द्विजो दृष्ट्वा शिशुं मत्वा हतं सुतम् ।
अयोमुखेन कोपान्धो जघान नकुलं क्षणात् ॥ ५६० ॥
गेहं प्रविश्य निहतं वीक्ष्य सर्पं भयंकरम् ।
स्थितं च बालकं स्वस्थं शुशोचानुशयाकुलः ॥ ५६१ ॥
असम्यग्वीक्षितं द्रष्टुं पण्डितो नानुवर्तते ।
अनुकारात्परिभवं याति नापितवन्नरः ॥ ५६२ ॥
वणिक्क्षीणधनोऽपश्यत्स्वप्ने भिक्षुत्रयं पुरा ।
तैश्च स व्याहृतः सोऽस्मान्हत्वा द्रविणमाप्स्यसि ॥ ५६३ ॥
स प्रबुद्धो वणिक्प्रातर्दृष्ट्वा भिक्षुत्रयं पुरः ।
अताडयत्ताडिताश्च बभूवुर्धनराशयः ॥ ५६४ ॥
तद्वृत्तं नापितो दृष्ट्वा वणिग्वेश्मनि दुर्मतिः ।
धनार्थी स्वगृहं गत्वा जघान किल भिक्षुकान् ॥ ५६५ ॥
तं भिक्षुकवधाद्राजा शुनि जग्राह नापितम् ।
अत्यनालोच्यकार्येषु प्रवृत्तिर्दुःखकारणम् ॥ ५६६ ॥

इति नापिताख्यायिका ॥ ३९ ॥

([1]इति जायावचः श्रुत्वा ब्राह्मणोऽभूदवाङ्मुखः ।
ब्राह्मणार्थेन नकुलाहतः स्वर्गेऽभवत्सुखी ॥ ५६७ ॥

इति नकुलाख्यायिका) ॥ ४० ॥

---

१. एतत्कोष्ठान्तर्गतः पाठः क-पुस्तके नोपलभ्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं मतिमतामस्ति तिरश्चामपि कौशलम्।
हासंकारं[1] त्ववुद्धीनां शृणु पुंसां विचेष्टितम् ॥ ५६८ ॥
वणिङ्मूर्खः पुरा चक्रे द्वीपेष्वगरुविक्रयम्।
कपर्दकेन तत्सर्वं ददौ विक्रयमित्यसौ ॥ ५६९ ॥
चतुः पञ्चावुधः कश्चिद्दीर्घलोमनिवृत्तये।
वह्नौ चिक्षेप तेनास्य स निःशेषमदह्यत ॥ ५७० ॥
भुक्त्वा भर्जि[2]तिलान्कापि पुरा मूर्खेण केनचित्।
भ्रष्टा एव तिला उप्तास्तेनास्योज्झहसुर्जनाः ॥ ५७१ ॥
अवुधो भाण्डदारिद्र्यादेकस्मिन्निदधे घटे।
वह्निं जलं च कार्यार्थं येनासौ[3] हास्यतां ययौ ॥ ५७२ ॥
हृत्वा गुरोः सुप्तस्य[4] कश्चित्सुस्पष्टनासिकाम्।
वक्रां नासां स्वभार्यायाश्छित्वा तां समरोपयत् ॥ ५७३ ॥
अन्विष्टा त्वत्कृते कन्या दत्ता जातस्तवात्मजः।
मिथ्या गिरैवेत्यकृती[5] धूर्तैर्निर्द्रविणः[6] कृतः ॥ ५७४ ॥
कश्चिद्व्यधाच्च जायाया लब्ध्वालंकरणं वहु।
रशनामबुधः कण्ठे हारं च जघनस्थले ॥ ५७५ ॥
वह्निना शोधितं हेम क्वचिद्दृष्ट्वा स्वकर्पटम्।
मलिनं ज्वलने कश्चिदवुधः शुद्धये व्यधात् ॥ ५७६ ॥
खर्जूरीफलमाहर्तुं यातैः कैश्चिदवुद्धिभिः।
दुरारोहतया छिन्नाः सर्वे खर्जूरपादपाः[7] ॥ ५७७ ॥
कस्यचिद्दिव्यनेत्रस्य निधानशतदर्शिनः।
मा गच्छत्विति भूपालो नेत्रे मौर्ख्यादपाटयत् ॥ ५७८ ॥
दृष्ट्वा गोपालकः कश्चिद्गामेकां सिंहभक्षिताम्।
खण्डेन किं गोकुलेनेत्यन्यांश्चिक्षेप भूधरान् ॥ ५७९ ॥

१. 'हासकारि' ख. २. 'भ्रष्टति' ख. ३. 'ते' ख. ४. 'दृष्ट्वा' ख. ५. 'प्र' ख. ६. 'कुधो' ख. ७. 'जीवितः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रामीणो नगरे भुक्त्वा भोज्यं कश्चित्सुसंस्कृतम् ।
प्रधानं लवणं कृत्वा तन्मुष्टिं समभक्षयत् ॥ ५८० ॥
एकस्मिन्नेव गोक्षीरं ग्रहीष्यामि दिने बहु ।
इति मासेन गां मूर्खो दुदोह न च सा ददौ ॥ ५८१ ॥
कपित्थैस्तरुणैः कोऽपि खल्वाटो मूर्ध्नि ताडितः ।
सहते[1] स व्यथां मूर्खो माधुर्यरसगौरवात् ॥ ५८२ ॥
इत्यनेकमूर्खाख्यायिका[2] ॥ ४१ ॥
गोमुखेनेति कथिते कथां पृष्टो विनोदिनीम् ।
नरवाहनदत्तेन सुहृत्प्राह तपन्तकः ॥ ५८३ ॥
मालवे विषये विप्रः श्रीमानासीद्यशोधरः ।
लक्ष्मीधरश्रीधराख्यौ तस्याभूतां प्रियौ सुतौ ॥ ५८४ ॥
कदाचित्पितुरादेशात्तौ विद्यार्थितया गतौ ।
देशान्तरं विनोद्योगं विद्या कथमवाप्यते ॥ ५८५ ॥
अटवीं तौ समासाद्य दूराध्वश्रमपीडितौ ।
पृथुपादपसुच्छाये[3] सरस्तीरे न्यषीदताम् ॥ ५८६ ॥
ततः स्नात्वा फलाहारौ[4] यातेऽस्तं तिग्मरोचिषि ।
भिन्नाञ्जनचयश्यामैस्तिमिरैः[5] पूरितेऽम्बरे ॥ ५८७ ॥
महातरुं समारुह्य तस्थतुर्व्याघ्रशङ्कया ।
तौ बालपल्लवैः कृत्वा शयनं विटपान्तरे ॥ ५८८ ॥
अथोदिते गजवधूनवदन्ताङ्कुरत्विषि ।
त्रुट्यत्तमःकञ्चुकाग्रे शशाङ्के यामिनीस्तने ॥ ५८९ ॥
सरोमध्यात्समुत्थाय क्रमेण परिचारिकाः ।
संमार्ज्य तां च वसुधामाकीर्य कुसुमोत्करैः ॥ ५९० ॥
आस्तीर्य हेमपर्यङ्के शय्यां स्वच्छोत्तरच्छदाम् ।
निधाय रत्नपात्रेषु दिव्यमाल्यविलेपनम् ॥ ५९१ ॥

---

१. 'सेहे तीव्रव्यथां' ख. २. ख-पुस्तके तु 'अबुधाख्यायिका' इत्येवमुपलभ्यते.
३. 'मृदु' ख. ४. 'कृताहा–' ख. ५. 'तैः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पानं च [1]पृथुकर्पूरसहकाराधिवासितम् ।
ममज्जुर्[2]लघुसंचारास्तस्मिन्नेव सरस्तटे ॥ ५९२ ॥

ततो दिव्याम्बरधरः कान्तो रुचिरकुण्डलः ।
मन्दारमालाधवलः कोऽप्युत्तस्थौ महाभुजः ॥ ५९३ ॥

अथ पर्यङ्कशयने तत्र तस्य विलासिनः ।
निषण्णस्य मुखाम्भोजान्निर्ययौ कापि कामिनी ॥ ५९४ ॥

[3]सुतारहारधवला रणन्मुखरमेखला ।
[4]मंदविस्खलितक्काणा कलहंसीव शारदी ॥ ५९५ ॥

तस्यामभ्यु[5]दितायां च द्वितीयाप्याययौ वधूः ।
वि[6]र्भूषणाङ्गी ललिता लावण्येन विभूषिता ॥ ५९६ ॥

ततः पूर्वोदितां कान्तां स दिव्याभरणोज्ज्वलाम् ।
जग्राह कण्ठे सोत्कण्ठं [7]सविलासं ससंभ्रमम् ॥ ५९७ ॥

[8]समेत्य सुरतश्रान्ते तस्मिन्निद्रामुपागते ।
पादसंवाहनं चक्रे सा परा तस्य सुन्दरी ॥ ५९८ ॥

लक्ष्मीधरश्री[9]धरौ च तद्दृष्ट्वा कौतुकाकुलौ ।
अवतीर्य तरुस्कन्धात्तदन्तिकमुपागतौ ॥ ५९९ ॥

विनिद्रनयना साथ कान्तकण्ठावलम्बिनी ।
तौ दृष्ट्वा लघुसंचारा समुत्तस्थौ स्मराकुला ॥ ६०० ॥

भर्तुः पिधाय वदनं निद्रालोर्वाससा शनैः ।
सा श्रीधरमुपेत्याह निर्लज्जं भज मामिति ॥ ६०१ ॥

सोऽब्रवीद्दिव्यरूपेण कान्तेनानेन सुन्दरि ।
[10]रमस्व परदारेषु मातर्नो मादृशां गतिः ॥ ६०२ ॥

---

१. 'दृष्ट्वा संपूर्य नरालंकारवासिताम्' ख. २. 'क्तस्य ततस्तस्मान्नि–' ख. ३. 'आता' ख. ४. 'भेदसंस्रव' ख. ५. 'त्थितायां च निरगादपरा वधूः' ख. ६. 'निर्भू' ख. ७. 'विलासरसविभ्रमाम्' ख. ८. 'शतैस्तत्सु' ख. ९. 'राख्यौ तां दृष्ट्वा' ख. १०. 'रमणं' इति स्यात्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति तद्वचसा किंचिल्लज्जानतविलोचना ।
सावदत्[1]कम्पसंरम्भनिःश्वासस्खलिताक्षरा ॥ ६०३ ॥
नाहं न गम्या ते कान्त प्रच्छन्नशतकामिता ।
दृष्टपञ्चनरा गम्या किं न नाम श्रुतं त्वया ॥ ६०४ ॥
इहैवासेविता नित्यं मया प्रच्छन्नकामुकाः ।
येषां राग[2]कथाबन्धेष्वाप्तं हस्तादिदं मया ॥ ६०५ ॥
इत्युक्त्वांशुकपर्यन्तबद्धं सा समदर्शयत् ।
[3]रागाङ्गुलीयकशतं नानाधातुविनिर्मितम् ॥ ६०६ ॥
तद्दृष्ट्वा श्रीधरः कर्णौ पिधायापसृतस्ततः ।
सा विबोध्य पतिं प्राह कोप[4]कम्पतरङ्गिता ॥ ६०७ ॥
अनेन नाथ पान्थेन गाढं निद्रावृते त्वयि ।
कृताहं नष्टचारित्रा मुखं विष्टभ्य पाणिना ॥ ६०८ ॥
इति प्रियावचः श्रुत्वा खड्गमाकृष्य दुर्मदः ।
सकोपः श्रीधरं हन्तुमुद्ययौ भ्रुकुटीमुखः ॥ ६०९ ॥
अपरास्य सती भार्या सा निर्भूषणविग्रहा ।
असतीव्रतमावेद्य कोपानलमवारयत् ॥ ६१० ॥
सोऽप्यङ्गुलीयकशतं तस्या दृष्ट्वा पराञ्चले ।
प्रसाद्य विप्रं विदधे तां पापां कृत्तनासिकाम् ॥ ६११ ॥
सतीव्रतप्रत्ययाय दृशा दग्ध्वा महातरुम् ।
तत्रापरापि तज्जाया दृशैव समजीवयत् ॥ ६१२ ॥
ततः सोऽपि द्विजसुतौ प्राह प्रीतिरसाकुलः ।
काश्मीरे भवशर्माख्यो द्विजोऽहमभवं पुरा ॥ ६१३ ॥
अहं कदाचित्सद्धर्मश्रमणादाहितव्रतः ।
निवारितो ब्रह्मचर्यादनयैव बलान्निशि ॥ ६१४ ॥

---

१. 'कोप' ख. २. 'कथां तां धिक् दत्तं ह–' ख. ३. 'नानाङ्ग' ख. ४. 'कम्पोत्तर' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वौद्धादरादहं जातो जलेऽस्मिन्सिद्धिभाजनम्।
व्रतभङ्गान्न तु प्राप्तो गन्तुं तत्परमं पदम्॥ ६१५॥

इति ब्रुवाणः स तया वेध्वा चारित्रशुभ्रया।
नीतः स्वतपसा क्षिप्रं विमानेन सुरावनीम्॥ ६१६॥

लक्ष्मीधरश्रीधरौ च स्थितौ तत्रैव विस्मितौ।
प्रातर्ददृशतुर्दिव्यरूपं यक्षकुमारकम्॥ ६१७॥

तद्दिष्टदिव्यसंभोगौ तस्माद्विद्यामवाप्य तौ।
जग्मतुस्तौ समामन्त्र्य निजगेहं महाशयौ॥ ६१८॥

इति श्रीधराख्यायिका॥ ४२॥

कथां तपन्तकेनेति कथितां नरवाहनम्।
श्रुत्वा प्रहृष्टं प्रोवाच गोमुखोऽपि विनोदिनीम्॥ ६१९॥

उत्पलाख्येन वणिजा लक्ष्मीदत्ताभिधः सुतः।
पुरा विवासितः प्रायान्मालिन्या सह भार्यया॥ ६२०॥

निर्जलामटवीं प्रा(प्य प्रियां तृष्णानिपीडिताम्।
दृष्ट्वा स्वभुजमुत्पाट्य स तां रक्तमपाययत्॥ ६२१॥

दिनैर्बहुभिरासाद्य) श्रान्तः शीतजलां नदीम्।
स्नात्वा चकार तत्तीरे प्राणवृत्तिं वधूसखः॥ ६२२॥

ददर्श तत्र निर्लूनकरपादं विनासिकम्।
अन्तरूढं तरङ्गौघैर्नरमुत्तानशायिनम्॥ ६२३॥

तं कंचिज्जीवमालोक्य संजातकरुणोऽथ सः।
विगाह्य तटिनीं क्षिप्रमानिनाय वणिक्सुतः॥ ६२४॥

प्रत्यग्रनिग्रही तस्य वस्त्रचीरेण रुग्णिका।
वध्वा तस्य चिरं चक्रे विपिने भेषजक्रियाम्॥ ६२५॥

---

१. 'प्राप्तं सौगतं परमं' ख. २. 'बुद्धचारित्रशुभ्रया' ख. ३. 'खा' ख. ४. 'स चा-यौ' ख. ५. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. ६. 'पादान्तनासिक' ख. ७. 'उह्यमानं' ख. ८. 'मुत्तुङ्गशायिनम्' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्यौ प्रयाते स्नानाय मानिनी काममोहिता ।
ततः कदाचित्संरूढ[1]च्छेदतुण्डं तमब्रवीत् ॥ ६२६ ॥
भज मां चिरसंकल्पं मम पूरय निर्जने ।
स्त्रीणां हि ललितं चेतो न शाम्यति रतं विना ॥ ६२७ ॥
इत्यर्थितस्तया रुग्णो भुजाभ्यां गाढपीडिताम् ।
तां निर्दयपरामर्दैः[2] सुचिरं समतोषयत् ॥ ६२८ ॥
स्नात्वा प्रतिनिवृत्तोऽथ वणिक्पुत्रो ददर्श ताम् ।
मिथ्यैव विहितव्याधिं तथा दीर्घं प्रलापिनीम् ॥ ६२९ ॥
तटिनीप्रान्तसंजातां मह्यमेनां महौषधीम् ।
समाहरेति स तया प्रेरितो गन्तुमुद्ययौ ॥ ६३० ॥
तत्करालम्बिना वल्लीदाम्ना हासपदं गतः ।
तथैव त्यक्तपाशोऽसौ नदीमध्ये पपात च ॥ ६३१ ॥
स ततः सलिलोत्फालैर्गमनालिङ्गनक्षमैः ।
अविभावित(?)विक्रम्यैर्न्यस्तो हर्षपुरीतटे ॥ ६३२ ॥
तस्मिन्नवसरे राज्ञि हर्षपुर्यां दिवं गते ।
अभिषेकगजेन्द्रेण स गृहीतो वणिग्वरः ॥ ६३३ ॥
तत्राभिषेकपुण्याहे निर्गत्य द्विरदाधिपः ।
यमारोपयति स्कन्धे स राजेति स्थितिः सदा ॥ ६३४ ॥
स तेन कुञ्जरेन्द्रेण नीतो राज्यश्रिया युतः ।
योषित्सु न मतिं चक्रे स्मरन्भार्याविचेष्टितम् ॥ ६३५ ॥
पृथ्वीराज्यं समासाद्य प्रजापालनतत्परः ।
स तत्र कालमनयत्सर्वार्थिसुरपादपः ॥ ६३६ ॥
सापि तं रुग्णमादाय स्कन्धे रागवशीकृ[ताँ[3] ।
बभ्राम निखिलां पृथ्वीं भिक्षावाहितभोजना ॥ ६३७ ॥
अहो पतिव्रता कापि पश्येयं या पतिं निजम् ।
स्कन्धे वहति कृ]ताङ्गं जनास्तामित्यपूजयन् ॥ ६३८ ॥

---

१. 'रूपवरं रुग्णं त' ख. २. 'रतानन्दैः' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालेन सा हर्षपुरीं प्राप्ता तस्मै महीभुजे।
प्रदर्शिता मन्त्रिवरैस्तत्सतीव्रतविस्मितैः ॥ ६३९ ॥
सोऽपि तां प्रत्यभिज्ञाय तं च रुग्णं सयाकुलः।
राजा स सर्वं वृत्तान्तं सचिवेभ्यो न्यवेदयत् ॥ ६४० ॥
तौ निरस्य विरक्तोऽथ लक्ष्मीसेनोऽभवन्मुदा।
विपुले राज्यसारेऽपि ललनाविपुलाशयः ॥ ६४१ ॥

इति लक्ष्मीसेनाख्यायिका ॥ ४२ ॥

गोमुखेनेति कथितं श्रुत्वा वत्सेश्वरात्मजः।
प्रभाते निजमुद्यानं ययौ विरहनिःसहः ॥ ६४२ ॥
ततो विद्याधराधीशः समेत्य प्रमदाकुलः।
तां सुतां शक्तियशसं ददौ तस्मै सुलोचनाम् ॥ ६४३ ॥
अथ दिव्योचितोत्साहविपुलोत्सवशालिनीम्।
तया नरेन्द्रपुत्रस्य विवाहश्रीरवर्तत ॥ ६४४ ॥
परिणीयेन्दुवदनां प्रहृष्टः पितुराज्ञया।
विललास सरस्मेरो विलासोपवनेषु सः ॥ ६४५ ॥

विद्याधरीप्रणयिनं सुतमाकलय्य
वत्सेश्वरः किमपि हर्षसुधार्द्रचेताः।
देवीसखस्त्रिनयनार्चनकल्पवृक्ष-
सूतेः फलस्य कुसुमोद्गतिमभ्यमंस्त ॥ ६४६ ॥

इति क्षेमेन्द्रविरचितायां बृहत्कथामञ्जर्यां शक्तियशो नाम षोडशो लम्बकः।

महाभिषेकलम्बकः।

नवकुचकाञ्चनकलशाः श्रोणीसिंहासनाः सितच्छत्राः।
अभिषेकाय तरुण्यो यस्य स मकरध्वजो जयति ॥ १ ॥
अथ विद्याधरोऽभ्येत्य प्रतीहारेण सूचितः।
व्यजिज्ञपत्सभासीनं प्रणम्य नरवाहनम् ॥ २ ॥

---

१. 'रैः प्रणमितं' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपि स्मरसि मे देव संप्राप्य विजयश्रियम् ।
न दृश्यते स्थितः पश्चात्सदीपैरिव पार्थिवैः ॥ ३ ॥
यदा त्वं गौरीमुण्डेन पातितोऽग्निगिरेस्तटे ।
पुरा मया तदा देव रक्षितोऽसि हराज्ञया ॥ ४ ॥
दूरपातमहामूर्च्छामदसंस्कारसंविदा ।
मन्ये मां नाभिजानासि चिरवृद्ध इवाग्रगम् ॥ ५ ॥
पुराकृतावलम्बोऽपि हृदि प्रत्यग्रसंभ्रमे ।
अपराध इवार्यस्य मन्येऽहं विस्मृतोऽद्य ते ॥ ६ ॥
अमृतप्रभनामाहं[1] प्रपन्नस्तव शासनम् ।
वामदेवेन मुनिना प्रेषितो भवदन्तिकम् ॥ ७ ॥
मुनिस्त्वामाह रत्नानि गृहाणाभ्येत्य मद्गिरा ।
चक्रवर्तिश्रिये देव तूर्णमित्युत्तमप्रियः ॥ ८ ॥
इति विद्याधरवचो निशम्य नरवाहनः ।
तं परिज्ञाय नभसा वामदेवाश्रमं ययौ ॥ ९ ॥
तं प्रणम्य[2] मुनिं तत्र तदादिष्टो गुहान्तरात् ।
सोऽद्य विघ्नघ[3]नोत्पातं राज्यप्रसवभूतये ॥ १० ॥
ध्वजं छत्रं सुधाबिम्बं खड्गांश्च रथकुञ्जरान् ।
दण्डरत्नं च संप्राप्य स निजं कटकं ययौ ॥ ११ ॥
अथ श्रीमान्प्रशस्तेऽह्नि विमानं सचिवैः सह ।
प्रियाभिश्च समारुह्य जययात्रां दिदेश सः ॥ १२ ॥
ततो विद्याधरानीकसंछादितनभस्तलः ।
जेतुं मन्दरदे[4]वं स त्रिनेत्राद्रितटे ययौ ॥ १३ ॥
तत्र सेना बभौ तस्य स्फटिकप्रतिबिम्बिता ।
पूरितेव निजानीकैः सेवायै गर्भभूभृता ॥ १४ ॥
तत्र गीर्वाणतटिनीतीरविश्रान्तसैनिकः ।
विजहार मृगाक्षीभिः पारिजातलतावने ॥ १५ ॥

१. 'भ्रम' ख. २. 'साद्य' ख. ३. 'वनोपान्ते' ख. ४. 'सेनं' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुष्पेषुरुदितः कोऽयमस्य शस्त्रैः समुद्यमः ।
इति ताः स्पृहया वीक्ष्य जगदुर्गुह्यकाङ्गनाः ॥ १६ ॥
ततस्तं प्रस्थितं जेतुं वायुवेगः कृताञ्जलिः ।
व्यजिज्ञपदितो देव न पन्थाश्चक्रवर्तिनाम् ॥ १७ ॥
इहास्ते त्रिपुरारातिः सदा संनिहितो हरः ।
विभूतयः सुरेन्द्राणां यत्प्रसादात्सविप्रुषः ॥ १८ ॥
तमुल्लङ्घ्य विरूपाक्षं व्योम्नि यो याति मोहितः ।
पतति भ्रष्टविद्योऽसौ क्षीणपुण्य इव ग्रहः ॥ १९ ॥
शंकरेणैव विहिता गुहेयं चक्रवर्तिना ।
गिरिं विदार्य शूलेन स ते मार्गः शिवप्रदः ॥ २० ॥
इति विद्याधरपतिः सचिवानां च भाषितम् ।
श्रुत्वा प्रणम्य चण्डीशं गुहारन्ध्रेण निर्ययौ ॥ २१ ॥
त्र्यम्बकेन धृतां तत्र कालरात्रिं प्रणम्य सः ।
पुरं मन्दरदेवस्य प्रतस्थे विजयोत्सुकः ॥ २२ ॥
देवमायं महाकालं जित्वा विद्याधरेश्वरम् ।
तन्महावाहिनीपूर्णसेनाब्धिः प्रबभौ विभुः ॥ २३ ॥
ततोऽदृश्यत संरब्धो विद्याधरबलाग्रजः ।
प्रलयाम्बुधरध्वानधीरः सपदि मन्दरः ॥ २४ ॥
अथ युद्धमभूद्घोरं विद्याधरधराभुजाम् ।
मौलिरत्नविनिष्पाति खड्गज्वालाजटोत्कटम् ॥ २५ ॥
तद्रक्ततटिनीसिक्तफुल्लाशोकवनच्छविः ।
पद्मरागाचलः क्षिप्रं बभूव स्फटिकाचलः ॥ २६ ॥
ततो धनवतीविद्यामोहिते वाहिनीद्वये ।
स्वयं मन्दरदेवस्य पुरोऽभून्नरवाहनः ॥ २७ ॥
चतुर्विद्याधरपतौ (सायकास्तीक्ष्णपक्ष्मणः ।
नरवाहननामाङ्काः कटाक्षाः समरश्रियः ॥ २८ ॥

१. 'णाहितः' ख. २. 'लं' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो मन्दरदेवस्य) विद्याभिरभिपूरितम् ।
बभूव वक्त्रं कल्पान्तहुतभुग्भीमविभ्रमम् ॥ २९ ॥
नरवाहनदत्तोऽथ केशपाशमिव श्रियः ।
खड्गमाकृष्य जग्राह तमुत्क्रान्तशिरोरुहम् ॥ ३० ॥
भ्रातरं खड्गसंपातमन्त्रान्तरितजीवितम् ।
दृष्ट्वा मन्दरदेवीति नरवाहनमभ्यधात् ॥ ३१ ॥
भो भो प्रतापचण्डांशो कीर्तिज्योत्स्नासुधाकर ।
नरवाहनदत्त त्वं त्रातुमर्हसि मेऽग्रजम् ॥ ३२ ॥
इति तस्या वचः श्रुत्वा तं तत्याज नृपात्मजः ।
सन्तः प्रणयभङ्गेषु भीतानां नहि शिक्षिताः ॥ ३३ ॥
स्वस्रा मन्दरदेवोऽथ मोचितो लज्जया नतः ।
ययौ तपोवनं मानी मुनेः स्वपितुराश्रमम् ॥ ३४ ॥
विपत्सु च कुलीनानां वियोगेषु च धीमताम् ।
पराजये च शूराणां वृत्तिरेका तपोवनम् ॥ ३५ ॥
ततो धनवतीध्यानादुत्थिते रक्षिते बले ।
नरवाहनदत्तस्य जजृम्भे जयडिण्डिमः ॥ ३६ ॥
जम्भारिविजयोद्युक्तं तं समभ्येत्य नारदः ।
त्रिदशैर्नास्ति वो वैरमित्युक्त्वा विमुखं न्यधात् ॥ ३७ ॥
अभिषिच्यामितगतिं कैलासे गुलिकाभृतम् ।
कान्तां मन्दरदेवीं तां पित्रा दत्तामवाप्तवान् ॥ ३८ ॥
यन्मुखेनेक्षणच्छायाशबलेनाभवन्नभः ।
नीलोत्पलदलालोलहेमाब्जेनेव भूषितम् ॥ ३९ ॥
दत्तामकम्पनाख्येन पित्रा तां प्राप्य सुन्दरीम् ।
तद्वयस्याश्चतस्रोऽन्याः प्रापैकोद्वाहनिश्चयाः ॥ ४० ॥
ततः प्रणम्य श्रीकण्ठं प्रयातो वीक्ष्य शूलिनम् ।
ऋषभस्य गिरेः शृङ्गमभिषेकश्रिये ययौ ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र विद्याविकल्पोत्था दिव्याभिप्रायशालिनी ।
राजधानी बभूवास्य रत्नप्राकारतोरणा ॥ ४२ ॥
अथाययुः समुद्रेभ्यो रत्नकुम्भैः सुलोचनाः ।
हेमकुम्भोपमकुचा गृहीत्वाप्सरसो जलम् ॥ ४३ ॥
ततो वायुपथाहूतस्तं विद्याभिर्विहायसा ।
सामात्यः सह देवीभ्यामाययौ वत्सभूपतिः ॥ ४४ ॥
यत्नात्पित्राभ्यनुज्ञातः कथंचिद्विनताननः ।
रत्नसिंहासनं भेजे भूषितो नरवाहनः ॥ ४५ ॥
रोहणाद्रेरिवोत्सङ्गं नानारत्नविभूषितम् ।
स बभार महामौलिं क्रीडाशैलमिव श्रियः ॥ ४६ ॥
अथाभिषेकपुण्याहे विस्तीर्णे मङ्गलोदके ।
आसनार्धं प्रभोर्भेजे देवी मदनमञ्चुका ॥ ४७ ॥
रतिरस्य स्मृतिभुवो दयितेयमयोनिजा ।
कान्ताः श्रुत्वेति नभसो नावमानं ययुः पराः ॥ ४८ ॥
ततः कुण्डलिनः शूरा मौलिपिञ्जरिताम्बराः ।
तस्य विद्याधराधीशाः प्रणता विविशुः सभाम् ॥ ४९ ॥
मणिकुट्टिमसंप्राप्तप्रांशुरश्मिभृताम्बराः ।
त्रैलोक्यमिव रुन्धानास्ते बभुर्गुलिकाधराः ॥ ५० ॥
प्रबलश्रियमालोक्य सुतं वत्सनरेश्वरः ।
ब्रह्माण्डं संकटं मेने हर्षसंपूर्णमानसः ॥ ५१ ॥
देवी वासवदत्तापि शच्या पुत्रश्रिया पदम् ।
प्राप्ता कुमारविजयानन्दिनीव सती बभौ ॥ ५२ ॥
मङ्गलोदधिकल्लोलश्रीलताकुसुमाकरः ।
हर्षपीयूषजलदः कोऽप्यभूत्स महोत्सवः ॥ ५३ ॥
ततस्तनयमामन्त्र्य कौशाम्बीं प्रमदाकुलः ।
ययौ व्योम्ना सहामात्यो वत्सराजः प्रियासखः ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति स निखिलभूभृन्मौलिविश्रान्तकीर्ति-
र्मदकलसुरनारीगीयमानप्रतापः ।
अभिनवजयलक्ष्मीनम्रविद्याधरेन्द्र-
प्रकटमुकुटपीठस्पष्टपादो रराज ॥ ५५ ॥

इति क्षेमेन्द्रविरचितायां बृहत्कथामञ्जर्यां महाभिषेको नाम सप्तदशो लम्बकः ।

सुरतमञ्जरीलम्बकः ।

[1]सुभगाविभ्रमोद्भ्रान्तभ्रूविलासचलाः श्रि[2]यः ।
आकल्पं स्थिरतां यान्ति यद्वरात्स शिवोऽस्तु वः ॥ १ ॥
स विद्याधरसामन्तमस्तकन्यस्तशासनः ।
भेजे समस्त[3]कान्ताभिः स्मरलीलामहोत्सवम् ॥ २ ॥
प्रियाविलासरसिके [4]सानन्दे नरवाहने ।
सेवाक्षणमिवासाद्य वसन्तः प्रत्यदृश्यत ॥ ३ ॥
पल्लवेषु च वल्लीनां मानसेषु च सुभ्रुवाम् ।
कपोलेषु च मत्तानां ([5]रागः कोऽपि व्यवर्तत ॥ ४ ॥
नमोऽस्तु स्थाणवे तस्मै प्लुष्टो येन मनोभवः ।
सहकारमदर्धेनमित्यूचुः प्रोषितास्तदा ॥ ५ ॥
नवसंभोगसंगीततरङ्गमलसद्रवः ।
लुलोठ पिककण्ठेषु मान्मथो जयडिण्डिमः ॥ ६ ॥
सहसाङ्कुरितो लेभे मदनः कामपि श्रियम् ।
तटीषु वचनान्तानां) हृदयेषु च रागिणाम् ॥ ७ ॥
कूजन्मधुकरश्रेणीवितता चूतमञ्जरी ।
बभार तारकेंकारस्मरकार्मुकविभ्रमम् ॥ ८ ॥
स्तबकाः सिन्दुवारस्य तरलभ्रमराकुलाः ।
ययुः सितासितरुचो मधुलक्ष्मीकटाक्षताम् ॥ ९ ॥

---

१. 'तरुणीवि' ख. २. 'श्च यः' ख. ३. 'कन्या' ख. ४. 'समदे' ख. ५. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तरुणीचरणाघातफुल्लेनाशोकशाखिना।
अमन्यत स्मरस्यैव प्रतापो विभ्रमक्षतिः ॥ १० ॥
कान्तागण्डूषविकसद्बकुलोद्धतरेणुभिः।
यशोभिरिव पुष्पेषोः पाण्डुराः ककुभोऽभवन् ॥ ११ ॥
तस्मिन्नानन्दमधुरे मालतीकलिकाकुले।
काले विलासिनीलीलानुकूले कलितानिले ॥ १२ ॥
फुल्लवल्लीनिकुञ्जेषु लवङ्गामोदनिर्भरे।
पपौ मधु मृगाक्षीभिर्मित्रैश्च नरवाहनः ॥ १३ ॥
मधौ मधुमदालोलाः प्रियाः सुहृदयाः सुहृत्।
फलं राज्यतरोरेतच्छेषमाडम्बरं श्रियः ॥ १४ ॥
पुष्पाकरश्रियं वीक्ष्य दक्षिणानिलवीजिताम्[1]।
परागौघदुकूलाङ्कां[2] गोमुखः प्राह भूपतिम्[3] ॥ १५ ॥
भ्रमद्भ्रमरसंहार्[4]दभीमभ्रुकुटिविभ्रमः।
अयं विरहिणां कालः कालो देव विजृम्भते ॥ १६ ॥
अस्मिन्विकसिताशोकचूतचम्पककिंशुके।
कामकेलिकलाकाले वियुक्तः को नु जीवति ॥ १७ ॥
राजपुत्रः पुरा शूरः शूरसेनाभिधो वधूम्।
सुषेणां स्वैरमामन्त्र्य राजसेवापरो ययौ ॥ १८ ॥
गते तस्मिन्वनान्तेषु संततोत्फुल्लशा[5]लिना।
संतोषितालिजालेन वसन्तेन विजृम्भितम् ॥ १९ ॥
मधौ मधुरसंलापे कोकिलालिकुलाकुले।
सुषेणा वल्लभं स्मृत्वा बभूव[6] गतजीविता ॥ २० ॥
शूरसेनोऽपि तामेत्य दृष्ट्वा निपतितां प्रियाम्।
मुमोह को हि सहते सहसा दयिताक्षयम्[7] ॥ २१ ॥

१. 'जीविताम्' ख. २. 'गैरनुकूलाङ्ग–' ख. ३. 'षित' ख. ४. 'भार' ख. ५. 'खि' ख. ६. 'सुखिन्ना जीवितं विना' ख. ७. 'दयितां पतिः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परस्परानुरागाग्निदग्धौ वीक्ष्य च चण्डिका ।
कुलदेवी तयोर्जीवं दिदेशामृतसीकरैः ॥ २२ ॥

इति शूरसेनाख्यायिका ॥ १ ॥

श्रुत्वेति गोमुखवचो मधुलक्ष्मीं विलोकयन् ।
ललास दृष्टिचषकैः पिबन्मदनमञ्जुकाम् ॥ २३ ॥
ततो निशि निशाकान्तकान्तिसंतानर्निर्झरैः ।
पूरिते भुवनाभोगे स सुष्वाप प्रियासखः ॥ २४ ॥
स चन्द्रकान्तपर्यङ्के शशीव निजमण्डले ।
रतिश्रमोन्मिषन्निद्रः[2] स्वप्नेऽनिष्टं व्यलोकयत् ॥ २५ ॥
विबुद्धः शङ्कमानोऽथ पितुर्दैवपराभवम् ।
स लेभे न पुनर्निद्रां विरक्तामिव योषितम् ॥ २६ ॥
चिरं चिन्तयतस्तस्य शोकाग्निव्याप्तचेतसः ।
नवोढेवाविदग्धस्य धृतिर्दूरतरं ययौ ॥ २७ ॥
मैत्रीव साधुशीलानां स्त्रीणां परकथेव च ।
सा तस्य शर्वरी शोकात्प्रययौ दीर्घदीर्घताम् ॥ २८ ॥
प्रातर्विसृष्टा प्रज्ञप्तिविद्या तेन तदीक्षितुम् ।
आह तत्सेश्वरोदन्तं तूर्णमेत्य नभश्चरी ॥ २९ ॥
याते चण्डमहासेने सभार्ये कीर्तिशेषताम् ।
विधाय पालकं वीरं तत्पदे क्षितिपालकम् ॥ ३० ॥
गोपालकं निवेश्याशु भ्रूभङ्गेनात्मनः पदे ।
कालंजरभृगूत्सङ्गे दिवं वत्सेश्वरो ययौ ॥ ३१ ॥
स दिव्यपुरुषादिष्टं गत्वा यौधिष्ठिरं पदम् ।
भेजे ययातिशर्यातिहरिश्चन्द्रेन्द्रतुल्यताम् ॥ ३२ ॥

भ्रूभङ्गेन विवासिता रिपुवधूभ्रूभङ्गलीलाश्रमा
दृष्टा[3] श्रीः स्वयमर्पिता स्वसुहृदां मत्तेभकुम्भस्तनी ।

१. 'ञ्जु' ख. २. 'न्निद्रतन्द्रः' ख. ३. 'ष्ट्वा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवीभ्यां विहृतं हुतं द्विजमु[1]खे नित्यं स्मृतः शंकरः
कर्तव्यं स्पृहणीयमन्यदुचितं शेषं किमस्त्यायुषः ॥ ३३ ॥
उक्त्वेति देवं कामरिं ध्यात्वा विगलितो[2]ग्रहः।
धैर्येण सह पौराणां प्रययौ पौरवत्स[3]लः ॥ ३४ ॥

चन्द्रार्धमौलिविहितस्तुतिगीतिकाङ्क्षा-
मङ्के निधाय स तथाभिमतां विपञ्चीम्।
देवः प्रि[4]याग्रचरमित्रकृतानुयात्रः
सोऽस्ताचलादिव सहस्रकरः पपात ॥ ३५ ॥

तस्मिंल्लोकत्रयीनेत्रशतपत्रावलिप्रिये।
यातेऽस्तं जगतां मित्रे शोकान्ध्यमभजन्प्रजाः ॥ ३६ ॥

इति वत्सेश्वरभृगुपतनकथा ॥ २ ॥

विद्याध[5]रीवचः श्रुत्वा मूर्च्छितो नरवाहनः।
पपात सुहृदामग्रे वज्राहत इवाचलः ॥ ३७ ॥
(वि[6]द्याधरीभिरभितः कदलीपल्लवानिलैः।
वीज्यमानः शनैः संज्ञामवाप्य विललाप सः ॥ ३८ ॥
हा विलासरसावास हा गाम्भीर्यमहोदधे।
हा सप्तभुवनोद्यानफुल्लकीर्तिलतावन ॥ ३९ ॥
हा दाक्षिण्यनिधे देव हा तात सुतवत्सल।)
क्वासि मे वचनं देहि वत्सेत्यमृतनिर्भरम् ॥ ४० ॥
अहो नु निरनुक्रोशः सज्जनक्रकचोऽन्तकः।
कथाशेषः कृतो येन त्वमपि क्ष्माविशेषकः ॥ ४१ ॥

स त्वं वत्समहीपतेर[7]गणितं रूपेण चन्द्रस्मयः
पै[8]ठे न स्तुतिरञ्चिता न रचितश्चित्रं गुणेष्वञ्जलिः।

१. 'कुले' ख. २. 'तस्पृहः' ख. ३. 'लभः' ख. ४. 'यासचिवमि' ख. ५. 'र' ख. ६. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. ७. 'र्न गणितः' ख. ८. 'त्यागेन' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देव्यो येन सतीव्रतेन च कृता दूरान्नतिः केवला
कालः केवललोलुपः स निखिलां लोकावलीमश्नुते ॥ ४२ ॥
श्रीमत्तत्पृथुहारनिर्भरसुरः शौर्यापराद्रेस्तटं
तौ स्तम्भप्रतिभं भुजावपि जगत्प्राकाररक्षार्गले ।
कीर्तिः स्वर्गनदी सुवर्णकमलं वक्त्रं क्व तातस्य त-
द्दृष्ट्वाहं पुनरिन्दुवृन्[1]दयशसो धिङ्मे चिरं जीवितम् ॥ ४३ ॥
इत्युक्तवति शोकाग्निसंतप्ते नरवाहने ।
रुरुदुर्गोमुखमुखा देव्यस्ता बाष्पलोचनाः ॥ ४४ ॥
तेषां करुणमाक्रन्दं श्रुत्वाश्रु[2]लुलितेक्षणाः ।
बभूवुर्भुवनोद्यानकेलिबालकुरङ्गकाः ॥ ४५ ॥
ततो निभृतसंचारा विनया[3]नतदृष्टयः ।
विविशुः शोकविवशा विद्याधरधराधराः ॥ ४६ ॥
तेषां कुण्डलकेयूरपद्मरागारुणांशुकैः[4] ।
शोकाग्निना दह्यमाना मूर्तेनेवाभवन्दिशः ॥ ४७ ॥
ततः कृतोदकस्नानो वृतो विद्याधरेश्वरैः ।
मातरं साश्रुनयनः शुशोच नरवाहनः ॥ ४८ ॥
तं शोकवडवावह्निक्वथ्यमानमिवाम्बुधिम् ।
वीक्ष्य पिङ्गलगान्धारः प्राह वायुपथस्तथा ॥ ४९ ॥
देव धैर्यव्ययः कोऽयं तवापि महतां कुले ।
नहि निःसारसंसारविकाराः प्रभविष्णवः ॥ ५० ॥
नहि शोकः प्रियभ्रंशे कर्तव्यो वृद्धसेविभिः ।
भवेऽप्यभावसद्भावे भावा भ्रूभङ्गभङ्गुराः ॥ ५१ ॥
एकेऽद्य श्वस्तदपरे तत्परेऽह्नि तथापरे ।
यान्ति निःसीम्नि संसारे कः स्नाता योऽनुशोचति ॥ ५२ ॥

---

१. 'दस' ख. २. 'तिललि–' ख. ३. 'ता' ख. ४. 'भि' ख.
५ 'पीज्यमा' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्रुवं न कुर्युर्मुनयस्तपांसि विजने वने ।
यदि न स्युरमी भावाः पर्यन्तविशरारवः ॥ ५३ ॥
लक्ष्मीरम्भा[1]कुठारस्य भोगाम्भोदनभस्वतः ।
विलासवनदावाग्नेः को हि कालस्य विस्मृतः ॥ ५४ ॥
न गुणा हीनविद्यानां श्रीमतां क्षीणसंपदाम् ।
कृतान्तपण्यशालायां समानः क्र[2]यविक्रयः ॥ ५५ ॥
([3]अन्धस्य दर्पणेनेव गीतेनेव हतश्रुतेः ।
गतस्य कोऽर्थः शोकेन नेक्षते न शृणोति यः) ॥ ५६ ॥
अकस्मात्संगतो नाम यद्यकस्माद्विनश्यति ।
शोकः किं तत्र सर्वे हि यान्ति चायान्ति जन्तवः ॥ ५७ ॥
अ[4]श्रुतिर्बन्धुतां धत्ते कथं नष्टस्य नश्वरः ।
स्कन्धेन पङ्गुना पङ्गुर्वत वर्त्मनि नीयते ॥ ५८ ॥
जायते क्षणदृष्टेषु स्नेहो दुःखाय देहिनाम् ।
ममायमिति मुग्धानां नासौ तेषां न तस्य ते ॥ ५९ ॥
प्रयाति चपला लक्ष्मीः स्रवत्यायुरलक्षितम् ।
इति वस्तुस्वभावेऽस्मिन्कोऽनुशोचति तत्त्वधीः ॥ ६० ॥
गताञ्शोचति को नाम यः प्रातः शोच्यते परैः ।
छिन्नहस्तो विहस्तश्च कथं बध्नाति कङ्कणम् ॥ ६१ ॥
रुद्यते जीवतां पुंसां येषां कालो भयंकरः ।
निस्तीर्णकालभङ्गास्तु न शोच्या विगतासवः ॥ ६२ ॥
न तज्जगति पश्यामो विचिन्त्य निखिलं धिया ।
दुष्प्रापं यत्प्रयत्नेन न लीढं कालजिह्वया ॥ ६३ ॥
नृगनाभागसगरा निगीर्णा येन हेलया ।
जृम्भमाणे महाकाले तस्मिन्को नाम मुच्यते ॥ ६४ ॥

---

१. 'लता' ख. २. 'कील' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः. ४. 'श्रुभिर्बहुलं' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विकोशाशापलाशेऽस्मिन्संसाराभसरोरुहे ।
कालभृङ्गः पिबत्येव जनकिञ्जल्कमञ्जसा ॥ ६५ ॥
तेजो[1] नास्ते गुणाः सा श्रीस्तत्सुखं ताश्च केलयः ।
कालसंकल्पकलया नीयन्ते स्मृतिशेषताम् ॥ ६६ ॥
विकचत्कवलक्रीडा यस्य ब्रह्माण्डपिण्डकैः ।
सर्वंकषाय कालाय नमस्तस्मै महाशिने ॥ ६७ ॥
इति तद्वचनन्यस्तशोकाग्निर्नरवाहनः ।
भर्गग्रस्तविषस्याप दुग्धाब्धेरुपमां शनैः ॥ ६८ ॥
गोपालचरितं ज्ञातुं विसृष्टा पुनरागता ।
त्रिघा विद्याधरेन्द्राय ततः सर्वं न्यवेदयत् ॥ ६९ ॥
देव वत्सेश्वरादिष्टं दत्वा राज्यमुदारधीः ।
पालकाय स्वयं भ्रात्रे गोपालस्तपसे गतः ॥ ७० ॥
प्रणयात्प्रार्थ्यमानोऽपि स पौरैरनुयायिभिः ।
जटावल्कलभृत्प्राह न्यस्तसंसारवासनः ॥ ७१ ॥
स्मेरचामरहासिन्यो वल्लभाः कस्य न श्रियः ।
किंतु ताः पवनालोलकदलीदलचञ्चलाः ॥ ७२ ॥
सुखिनो जातनिर्बन्धकर्मबन्धो[2] हि वासना ।
विशरारुः समाहारः सर्वाग्रहपरिग्रहः ॥ ७३ ॥
तृष्णातन्तुरनाद्यन्तो विसानामिव देहिनाम् ।
सहजोऽन्तस्थितस्तस्य चिरादामूलमुद्धृतिः ॥ ७४ ॥
आशालतावलयितं बद्धमूलमविद्यया[3] ।
को हि पातयितुं शक्तः सुखेन भवपादपम् ॥ ७५ ॥
धनपुत्रकलत्रेषु स्वयमेवार्जितेष्वहो ।
अवसन्ना विनश्यन्ति क्षुद्राः क्षौद्ररसेष्विव ॥ ७६ ॥

---

१. 'तेजनास्ते' ख. २. 'पि मानसः' ख. ३. 'चलमू' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्मिन्शरीरकुसुमे भृङ्गवज्जीविते स्थिते ।
चपलेषु न भावेषु ताटस्था ममतोचिताः ॥ ७७ ॥
परिच्छिन्नाशिनः किं मे कोटिभिर्भूरिसंचयैः ।
न पश्यामि गतः किंचित्कोऽयं सर्वग्रहो मम ॥ ७८ ॥
अपर्याप्तसमस्तेच्छाः संक्ता दारैर्धनैः सुतैः ।
कालव्यालसमाक्रान्ता नीयन्ते हन्त जन्तवः ॥ ७९ ॥
तरङ्गतरलैरर्थैर्भोगैर्भ्रूभङ्गभङ्गुरैः ।
मुहूर्तशेषैस्तारुण्यैरविलब्धो रेराम कः ॥ ८० ॥
आत्मयज्ञात्मपुण्यानामात्मतीर्थोपसेविनाम् ।
त्यक्तापमानस्पर्शानां नैव शोचन्ति बान्धवाः ॥ ८१ ॥
जरन्मृगः शृङ्गमिव त्वचं वृद्ध इवोरगः ।
पक्षीवोन्मथितं शालं बन्धमुज्झति तत्त्ववित् ॥ ८२ ॥

भावाः स्वभावविशरारव एव ताव-
त्संश्लेषलेखैदृढरागि मनश्च तेषु ।
तत्सर्वथा बहुवियोगविषाकुलानां
शान्त्यै मणिस्तनुभृतां विततौ विवेकः ॥ ८३ ॥

इत्युक्त्वा पौरपुरतो बान्धवांस्तपसे गतः ।
कश्यपस्याश्रमं श्रीमानसिताचलकन्दरम् ॥ ८४ ॥
इति विद्यानिगदितं निशम्य नरवाहनः ।
जगाम मातुलं द्रष्टुं सुहृद्भिः सह सानुगः ॥ ८५ ॥
दयिताध्यासितपदं विमानं कमलासनम् ।
आरुह्य व्योममार्गेण सोऽविशत्कश्यपाश्रमम् ॥ ८६ ॥
प्रणम्य कश्यपं तत्र गोपालसचिवं ययौ ।
तं विलोक्य जटापुञ्जव्यञ्जितोरुतपःप्रभम् ॥ ८७ ॥

१. 'त्यक्ता' ख. २. 'ननाम' ख. ३. 'तालं' ख. ४. 'बद्ध' ख. ५. 'जनवि–' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसन्नतरुसच्छाये निर्वैरहरिकुञ्जरे ।
प्रणम्य साश्रुनयनः प्रोवाच नरवाहनः ॥ ८८ ॥
मातुल स्नेहजलधिं जनकं जननीं च ताम् ।
क्व पुनर्बत पश्येयमित्युक्त्वा कश्मलं ययौ ॥ ८९ ॥
तं शोकविवशं वीक्ष्य विद्याभृच्चक्रवर्तिनम् ।
गोपालः प्राह मा मैवं कुर्थास्त्वं धैर्यभूधरः ॥ ९० ॥
राजन्दलितकर्पूरपरागविशदं यशः ।
जगत्सु गीयते यस्य न शोच्यः स पिता तव ॥ ९१ ॥
सा च चारित्रसावित्री सौभाग्यगिरिपुत्रिका ।
याता वासवदत्ता ते धन्या कीर्तिसरस्वती ॥ ९२ ॥
मातुलस्येति वचसा मन्दशोकः सहानुगः ।
तत्रैव तस्थौ विद्याभिः कल्पितोदारमन्दिरः ॥ ९३ ॥

इति गोपालसंन्यासकथा ॥ ३ ॥

ततो विद्याधराधीशैर्मुनीन्द्रैश्च सह स्थितम् ।
व्यजिज्ञपत्समभ्येत्य प्रणतो वाहिनीपतिः ॥ ९४ ॥
कन्या लावण्यपीयूषलहरी हरिणेक्षणा ।
विक्रोशन्ती हृतासीति सोचिता सा मया विभो ॥ ९५ ॥
को हि देव भवद्वीर्यरक्षितो व्योममण्डले ।
कर्तुं लङ्घितमर्यादः सहसा विप्लवं क्षमः ॥ ९६ ॥
स मया ललनाचौरः पृष्टः प्राह विहाय ताम् ।
संरम्भललितोत्तालमाल्यशेखरषट्पदः ॥ ९७ ॥
अहं मदनवेगस्य पुत्रो विद्याधरप्रभोः ।
जातः कलिङ्गसेनायामितो नाम नभश्चरः ॥ ९८ ॥
इयं मतङ्गदेवेन पुत्री सुरतमञ्जरी ।
विद्याधरी पुरा मह्यं दत्ता वाचैव सुन्दरी ॥ ९९ ॥

१. 'गच्छ त्व' ख. २. 'भक्षिता' ख. ३. 'न्दरवेगस्य' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालेन पालकस्याद्य सुतायोज्जयिनीपतेः।
अवन्तिवर्धनाख्याय वितीर्णा तेन मानिना ॥ १०० ॥
ततो मया माययेयं हृता मानुषरागिणी।
स्त्रीकृते को हि सहते वीरो न्यक्कारमात्मनः ॥ १०१ ॥
इत्युक्तवाक्यः स ययौ मौनतां परदारहृत्।
पालकस्य स्नुषा चासौ मुक्ता सुरतमञ्जरी ॥ १०२ ॥
श्रुत्वा हरिशिखस्येति वचनं वाहिनीपतेः।
गोपालानुमते प्राह नरवाहो नभश्चरान् ॥ १०३ ॥
तदमात्यं च सुनयव्रतं भरतरोहकम्।
वृत्तं सुरतमञ्जर्यास्ततो विज्ञायतेऽखिलम् ॥ १०४ ॥
इति प्रभुगिरा गत्वा स समादाय खेचरः।
सभायां न्यस्तवांस्तौ च नरनाथं प्रणेमतुः ॥ १०५ ॥
मातुलेयं परिष्वज्य सोऽपश्यत्तस्य मन्त्रिणम्।
स च पृष्टोऽवदत्कन्यावृत्तं भरतरोहकः ॥ १०६ ॥
अस्ति वत्सेश्वरादिष्टः पालको लोकपालकः।
वीर प्रशास्ति वसुधां वसुधामशतप्रदः ॥ १०७ ॥
ततः कदाचित्संप्राप्तपुर्यामुदकदान्तिके।
महोत्सवे पौरजनो बभूवाबद्धकौतुकः ॥ १०८ ॥
हत्वा चण्डमहासेनो दैत्यमङ्गारकं पुरा।
प्रत्यब्दं तद्गिरा चक्रे वारिदानोत्सवस्थितिम् ॥ १०९ ॥
ततो महोत्सवारम्भो भूषिताशेषमण्डले।
यात्राकुलेषु लोकेषु प्रहृष्टो निर्ययौ गजः ॥ ११० ॥
स निर्गतो लम्बमानचरणालानशृङ्खलः।
भारपीडाभयेनेव भोगीन्द्रानुगतो बभौ ॥ १११ ॥
स लेभे लोलमत्तालिवलयश्यामलै रदैः।
मन्थोत्थकालकूटाम्बुसिक्तमन्दरविभ्रमम् ॥ ११२ ॥

१. 'यिना' ख. २. 'प्राचामुन्दकदा' ख. ३. 'क्षं' ख. ४. 'प्र' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्चण्डडिण्डिमध्वानपिण्डिते जनमण्डले ।
अकाले प्रलयभ्रान्तिभीमः कोलाहलोऽभवत् ॥ ११३ ॥
ततः कुतूहलाकृष्टा निर्ययुस्तरलेक्षणाः ।
पुरभङ्गपरित्रस्ता ग्रहाणामिव देवताः ॥ ११४ ॥
मुखाम्बुरुहहारिण्यस्ता बभ्रुर्नयनोत्पलाः ।
विलोडनभयात्प्राप्ता नलिन्य इव सेवितुम् ॥ ११५ ॥
विद्रुतेष्वथ लोकेषु तत्र चण्डालदारिका ।
तस्य तस्थावसामान्यलावण्यतटिनी पुरः ॥ ११६ ॥
भ्रूलतालास्यललितं स्तनस्तबकसुन्दरम् ।
उद्यानमिव पुष्पेषोर्विभ्राणामिव यौवनम् ॥ ११७ ॥
गुञ्जाहारानुकारीभिर्भूषिताधरकान्तिभिः ।
गौरी लीलाकिरातीव कटाक्षशिखिपिच्छिका ॥ ११८ ॥
दीर्घवेणीलता मौर्वीतनुमध्या मनोभुवः ।
त्रिवली मुष्टिमुद्रेव क्रीडाकोदण्डचन्द्रिका ॥ ११९ ॥
भयानभिज्ञा सा तत्र तस्थौ कौतुकनिश्चला ।
वल्लरीव निवातस्था कुटिलालकषट्पदा ॥ १२० ॥
तां जिघृक्षुः स सहसा कदलीमिव कुञ्जरः ।
ससर्पोद्दण्डशुण्डालो राहुश्चन्द्रकलामिव ॥ १२१ ॥
ह्रियमाणां गजेन्द्रेण वीक्ष्य तां चकितेक्षणाम् ।
ग्रस्तं रूपं गता कान्तिरिति पौराः प्रचुक्रुशुः ॥ १२२ ॥
मातङ्गानामियं लक्ष्मीः कामिनीति मतङ्गजः ।
रन्तुं करेण पस्पर्श सहसा त्यक्तविक्रियः ॥ १२३ ॥
अतिचन्द्रामृतः कोऽपि परिरम्भो मृगीदृशाम् ।
पशवोऽपि यमासाद्य भवन्ति सुखनिश्चलाः ॥ १२४ ॥
(तत्स्पर्शमीलिताक्षं तं विलोक्य करिणं जनाः ।
अहो चित्रमहो चित्रमित्यूचुः कौतुकाकुलाः) ॥ १२५ ॥

---

१. 'ण्ड' ख. २. 'रक्तन' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके त्रुटितः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवन्तिवर्धनस्तत्र राजपुत्रोऽप्यमुत्सुकः ।
दृष्ट्वा चण्डालकन्यां तामभवत्स्मरतापितः ॥ १२६ ॥
ततस्तद्विरहायासपाण्डुरः प्रतिवासरम् ।
कृष्णपक्षकृतालम्बः शशीव क्षामतां ययौ ॥ १२७ ॥
पालकोऽथ सुतं ज्ञात्वा सभार्यः पृथिवीपतिः ।
गाढाभिलाषं मातङ्ग्यां चिन्ताशोकाकुलोऽभवत् ॥ १२८ ॥
राजानं दुःखसंतप्तं तनयस्नेहयन्त्रितम् ।
प्राहावन्तिवती देवी धिगेवं कुलपांसनम् ॥ १२९ ॥
राजा राजकुले जातो विद्याभिरभिसंस्कृतः ।
अतीव कोऽप्ययोग्येषु विधत्ते साभिलाषताम् ॥ १३० ॥
पापः कोऽप्येष जठरे मया भारश्चिरं धृतः ।
अस्य शीलेन नः सर्वं संशये पतितं कुलम् ॥ १३१
शीलं राज्ञां दिशां चन्द्रस्तारुण्यं हरिणीदृशाम् ।
लतानां मधुमासश्च विभूषणमकृत्रिमम् ॥ १३२ ॥
विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥ १३३ ॥
इति जायावचः श्रुत्वा प्राह पालकभूपतिः ।
देवि चण्डालकन्यैषा दिव्यजातिरिवेक्ष्यते ॥ १३४ ॥
रूपमुत्तममम्लाना कान्तिः सप्रतिभं वचः ।
गणनीया गुणश्रीश्च सूचयन्ति न नीचताम् ॥ १३५ ॥
धात्रा शापावतीर्णासौ कापि स्वर्गवधूर्ध्रुवम् ।
रज्यते जातिदोषेण मर्त्यसंस्पर्शदूषणात् ॥ १३६ ॥
नगरे सुप्रतिष्ठाख्ये राज्ञः सेनाजितः पुरा ।
पुत्री कुरङ्गिका नाम विहर्तुं वनमाययौ ॥ १३७ ॥
अत्रान्तरे मदगजस्त्रुटितालानशृङ्खलः ।
धावञ्जग्राह तामेत्य नीलाद्रिरिव जङ्गमः ॥ १३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तां राजपुत्रीं नागेन दृष्ट्वा विप्रह्रदे जने ।
ररक्ष करिणं हत्वा कोऽपि चण्डालदारकः ॥ १३९ ॥
ततः परस्परप्रेमविलोकनमहोत्सवे ।
तयोर्बभौ मनोग्रन्थिविदग्धो मकरध्वजः ॥ १४० ॥
सेवाभिरौषधैर्मन्त्रैः प्रीतिः कालेन जायते ।
दृष्टमात्रस्तु वशद अतीव दयितो जनः ॥ १४१ ॥
स चण्डालकुमारोऽथ गत्वा तद्विरहाकुलः ।
श्मशाने वह्निमादाय जीवितं त्यक्तुमुद्ययौ ॥ १४२ ॥
तमुवाच ततस्तत्र भगवान्पावकः स्वयम् ।
कानीनस्त्वं मम सुतो न त्वं चण्डालदारकः ॥ १४३ ॥
कपिलाख्या ब्राह्मणस्य पुत्री कपिलशर्मणः ।
मया समागता पूर्वं त्वामसूत रविप्रभम् ॥ १४४ ॥
त्यक्तस्तया कन्ययैव कुन्त्या वैकर्तनि[२]र्यथा ।
चण्डालेनासि संप्राप्य गोक्षीरेण विवर्धितः ॥ १४५ ॥
गच्छ याचस्व तां कन्यां भूपालं ब्राह्मणो भव ।
प्राक्कर्मजोऽयं संसर्गदोषः प्लुष्टो मयाद्य ते ॥ १४६ ॥
श्रुत्वेति पावकवचो गत्वा सेनाजितं नृपम् ।
कन्यामयाचत प्रौढश्मश्रुकोपासै ततो नृपः ॥ १४७ ॥
ततस्तु जन्मवृत्तान्तं यथोक्तं स्वयमग्निना ।
देवदूतो दिवः प्राह तच्चामन्यत भूपतिः ॥ १४८ ॥
ततः कुरङ्गीं संप्राप्य चिरं विरहतापिताम् ।
पित्रार्पितामिति प्रायो देवा यान्त्यपि दुष्कुले ॥ १४९ ॥

इति कुरङ्गाख्यायिका ॥ ४ ॥

राजा मलयसिंहोऽभूत्पुरे राजगृहाभिधे ।
तस्य मायावती नाम तनयाभूत्सितस्मिता ॥ १५० ॥

१. 'सा राजपुत्री नागेन कृष्टा वि' ख. २. 'नो य' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वसन्ते संततामोदनन्दितेन्दीवराकुले ।
सा कदाचिद्वरोद्याने विजहार मनोहरे ॥ १५१ ॥
ततो यदृच्छया यातः सुप्रहाराभिधो युवा ।
ददर्श धीवरः कान्तां तां तारुण्यतरङ्गिणीम् ॥ १५२ ॥
दृष्ट्वैव तद्गुणक्षिप्तकंदर्पबडिशेन सः ।
तूर्णं हृतमनोमीनः शून्यो ह्रदं इवाभवत् ॥ १५३ ॥
स तु ध्यानपरो गत्वा मुमूर्च्छास्वस्थविग्रहः ।
पृष्टो जनन्या स्वं वृत्तं शनैर्लज्जानतोऽवदत् ॥ १५४ ॥
धीवरी धीवरी साथ ज्ञात्वा रक्षिमिकाभिधा ।
मत्स्योपायनहस्ता तां सेवितुं कन्यकां ययौ ॥ १५५ ॥
चिरेण सेवया तस्यास्तुतोष नृपपुत्रिका ।
प्रीतिजालैर्मनोमत्स्यः कस्य नाम न कृष्यते ॥ १५६ ॥
करवाणि प्रियं सत्यं तवेत्युक्तवतीं च ताम् ।
धीवरी प्राह पुत्रो मे त्वां विना याति पञ्चताम् ॥ १५७ ॥
राजपुत्री निशम्येति ध्यात्वोवाच तथेति ताम् ।
प्रतिश्रुतं हि महतां पश्चात्तापैर्न लुप्यते ॥ १५८ ॥
ततः स्नातस्तयाहूतो भूषितः सुरभीकृतः ।
न्यस्तः स धीवरयुवा शय्यायां गुप्तमन्दिरे ॥ १५९ ॥
सहिता गुह्यराजेन राजपुत्री ततोऽविशत् ।
निशि शय्यागृहं खिन्ना चन्द्रकान्तिरिवाम्बरम् ॥ १६० ॥
तमालिलिङ्ग सा तत्र हर्षपीयूषवर्षिणी ।
अदृष्टपूर्वसंस्पर्शकातरं भृशविह्वलम् ॥ १६१ ॥
चिरान्मनोरथप्राप्त्या प्रशान्तविरहानलः ।
स भेजे क्षीणवृत्तित्वात्क्षणं मोक्षोपमां दशाम् ॥ १६२ ॥
अप्राप्तसुरतासङ्गः स निद्रां क्षिप्रमाययौ ।
अधन्यः को हि दैवेन फलकाले न वञ्चितः ॥ १६३ ॥

१. 'मृत' ख. २. 'मत्स्यविक्रयम्' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निद्रानिश्चेष्टमालोक्य तं राजतनया ययौ ।
लघुसंचारनिभृता करस्थगितनूपुरा ॥ १६४ ॥
अहमभ्रष्टकौमारा प्राप्तकामश्च धीवरः ।
उभयोः कुशलं दिष्ट्या ध्यात्वेति प्रीतिमाप सा ॥ १६५ ॥
नष्टधीर्धीवरः कान्तां प्रबुद्धो वीक्ष्य निर्गताम् ।
उक्त्वा हा वञ्चितोऽस्मीति बभूव सहसा व्यसुः ॥ १६६ ॥
विज्ञाय तं तथाभूतं राजपुत्री सुदुःखिता ।
तस्यानुशरणं वह्निप्रवेशे निश्चयं व्यधात् ॥ १६७ ॥
ततो विदितवृत्तान्तः शोकलज्जाकुलो नृपः ।
तनयावत्सलश्चक्रे शंकराराधनव्रतम् ॥ १६८ ॥
तस्य सत्यव्रतस्याग्रे प्रोच्चचार वचो दिवः ।
नरेन्द्र सुप्रहारोऽयं पूर्वं विप्रो न धीवरः ॥ १६९ ॥
पुरा नागस्थलग्रामे द्विजन्माभून्महीधरः[२] ।
तस्यायं तनयो गङ्गातीरे तत्याज जीवितम् ॥ १७० ॥
प्राणप्रयाणसमये दृष्ट्वाग्रे[१] मत्स्यजीविनम् ।
स स्पृहावासनातुल्यां जातिं प्राप्तोऽद्य गर्हिताम् ॥ १७१ ॥
तस्यानुपतिता वह्निं तद्भार्येयं सुता तव ।
आयुषोऽर्धेन पुत्र्यास्ते जीवत्वेष द्विजाकृतिः ॥ १७२ ॥
इत्याकर्ण्य नभोवाणीं स तया लम्भितायुषे ।
तस्मै ददौ तां तनयामिति प्राग्जन्मसूचिकाम् ॥ १७३ ॥

इति धीवराख्यायिका ॥ ५ ॥

पुरायोध्याधिनाथेन भूभुजा वीरबाहुना ।
वीरचर्याप्रसक्तेन प्राप्तश्चौरो महार्थहृत् ॥ १७४ ॥
एकचारी स निहतः शूलेन गरशूलहृत् ।
दृष्टः पूर्वं वणिक्पुत्र्या रामदत्ताख्यया पुरा ॥ १७५ ॥

१. 'ष्ट्वा' ख. २. 'न्महाधनः' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा निबद्धा दृढस्नेहा दृढबन्धानुरागिणी ।
दुर्गोपहारमात्मानं तं विना कर्तुमुद्ययौ ॥ १७६ ॥
प्रसन्नवत्सला देवी प्राह तामथ पार्वती ।
मा कृथा साहसं पुत्रि स चौरो गुलिकाधरः ॥ १७७ ॥
विद्याधरी पूर्वभार्या तस्य त्वं हृदयप्रिया ।
शापः क्षीणोऽद्य युवयोर्भज विद्यां कुलोचिताम् ॥ १७८ ॥
इति देवीवरात्प्राप्तविद्या गत्वा च सा निशि ।
अजीवयत्स्थितं शूले चौरं प्रक्षीणकिल्बिषम् ॥ १७९ ॥
ततो विद्याधरपदं प्राप्य तौ बभतुर्दिवि ।
इति नीचदशां यान्ति खेचरा अपि कारणात् ॥ १८० ॥

इति चौराख्यायिका ॥ ६ ॥

पालकः कथयित्वेति सुतस्नेहादयाचत ।
दूतैरुत्पलदत्ताख्यं चण्डालं तां सुमध्यमाम् ॥ १८१ ॥
याचितः प्राह मातङ्गो भुञ्जते यदि मे गृहे ।
अष्टादशसहस्राणि द्विजानां राजशासनात् ॥ १८२ ॥
तदियं दीयते कन्या राज्ञे सुरतमञ्जरी ।
इति तत्प्रेरितो राजा भोक्तुं विप्रानचोदयत् ॥ १८३ ॥
भीता नृपादधर्माच्च द्विजास्ते शरणं ययुः ।
उज्जयिन्यां महाकालं चण्डालान्नविकूणिताः ॥ १८४ ॥
ततः कृशांस्तानवदद्दयात्राणं त्रिलोचनः ।
द्विजेन्द्रो न स चण्डालः शापाद्विद्याधरो हि सः ॥ १८५ ॥
युष्माभिर्दृष्टमात्रोऽसौ स्वां तनुं प्रतिपत्स्यते ।
न दूष्य इति रुद्रस्य शासनात्ते ययुर्द्विजाः ॥ १८६ ॥
ततस्तद्दर्शनादेव स विद्याधरतां गतः ।
उवाच पालकं हृष्टः स तामादाय सुन्दरीम् ॥ १८७ ॥

१. 'धर्मस' ख.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्येवं सत्त्वयुक्तानां नम्राणां सत्यवादिनाम् ।
क्षमाप्रसन्नमनसां स्वयमाया)न्ति संपदः ॥ २१४ ॥

इति तारावलोकाख्यायिका ॥ ८ ॥

इति मुनिवरवाक्यादाप्तसंतोषपोषो
गगनचरसहस्रैर्वन्द्यमानः [1]प्रसन्नः ।
शिखि[2]गरगरलालीश्यामलाम्भोदमाला-
कलितललितलोकाकामिनी([3]भिर्लसि) ॥ २१५ ॥

इति क्षेमेन्द्रविरचितायां बृहत्कथामञ्जर्यां सुरतमञ्जरी नामाष्टादशो लम्बकः ।

उपसंहारः ।

चक्रवर्तिपदं प्राप्य विद्याधरधराभुजाम् ।
अधुना निजवृत्तान्तं ब्रूते स नरवाहनः ॥ १ ॥
परत्वेनात्मचरितं ख्यापयंश्चन्द्रमौलिना ।
निबद्धकवितावक्राद्वत्सराजात्मजः स्वयम् ॥ २ ॥
कश्यपस्याश्रमे श्रीमानसिताचलकन्दरे ।
मातुलस्य मुनीनां च भार्याणां चाब्रवीत्पुरः ॥ ३ ॥
पुत्रोऽहं वत्सराजस्य हर्षेणाहं महत्पुरी ।
वर्धमानकथां श्रुत्वा शक्तिवेगेन वर्णिताम् ॥ ४ ॥
तां चतुर्दारिकासंज्ञां ततो वज्रप्रभोदितम् ।
सूर्यप्रभस्य विजयं श्रुत्वा विद्याधरप्रभोः ॥ ५ ॥
भाविनीं च निशम्याहमात्मनश्चक्रवर्तिताम् ।
विद्याधरीं खेचरेभ्यः सोत्साहचरितोऽभवम् ॥ ६ ॥
ततः कलिङ्गसेनायाः सुतां मदनमञ्चुकाम् ।
अवापं मन्मथः सोऽहं रतिं जन्मान्तरं गताम् ॥ ७ ॥

---

१. 'प्रतापः' ख. २. 'गलशवलालिश्या–' ख. ३. एतत्कोष्ठान्तर्गतपाठः ख-पुस्तके-नोपलभ्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लब्ध्वा जिनेन्द्रसेनाख्यां राजपुत्रीमहं ततः ।
केनापि भूतेनाश्रौषं हृतां मदनमञ्चुकाम् ॥ ८ ॥
अथ तद्विरहार्तोऽहं नीतो विद्याधरश्रिया ।
पिशङ्गजटनामाथ मुनिराश्वासयन्मुहुः ॥ ९ ॥
शशाङ्कवत्यामासक्तमनसो विपुलां कथाम् ।
ऊचे मृगाङ्कदत्तस्य वियोगानङ्गशालिनी ॥ १० ॥
ततः कण्वमुनिः प्राह मामन्यास्मिंस्तपोवने ।
राज्ञो विषमशीलस्य दिव्यं चरितमद्भुतम् ॥ ११ ॥
ततो द्विजसुताभ्यां च कथितां बद्धकौतुकाम् ।
अवाप्तिमिन्दिरावत्याः श्रुत्वाहं स्वपुरीं गतः ॥ १२ ॥
तत्र प्रियावियोगार्तं गोमुखः प्राह मां सुहृत् ।
मुक्ताकेतुः खेचरेन्द्रः प्राप पद्मावतीं यथा ॥ १३ ॥
अत्रान्तरे वेगवती नाम विद्याधरात्मजा ।
निनाय मत्प्रिया यत्र स्थिता मदनमञ्चुका ॥ १४ ॥
हत्वा मानसवेगं तमा....हस्तां प्रिया मम ।
प्राप्य विद्याधरीं तां च प्रयातोऽहं निजां पुरीम् ॥ १५ ॥
रत्नप्रभा ततः प्राप्ता मया विद्याधरप्रभोः ।
सुता हेमप्रभाख्यस्य तुहिनाचलवासिनः ॥ १६ ॥
ततोऽलंकारशीलस्य विद्याधरपतेः सुता ।
लब्धालंकारवत्याख्या मयालंकरणं रतेः ॥ १७ ॥
ततश्च शक्तियशसं ततः स्फटिकपुत्रिकाम् ।
अवापं त्यक्तचापस्य मन्मथस्यायुधं नवम् ॥ १८ ॥
ततो मन्दरदेवाख्यं जित्वा विद्याधराधिपम् ।
गौरीमुण्डं च विस्तीर्णामभजं चक्रवर्तिताम् ॥ १९ ॥
वत्सराजं ततः श्रुत्वा यातं शक्रोपमं दिवम् ।
संगतो मातुलेनास्मिन्कश्यपस्य तपोवने ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतीतमात्मचरितं प्रोवाचेत्यसिताचले ।
सुहृदां च मुनीनां च पुरतो नरवाहनः ॥ २१ ॥

इत्यनुक्रमणिका ॥ १ ॥

कथापीठे कथावक्रलम्बो लावानकस्ततः ।
नरवाहनजन्माख्यः स्याच्चतुर्दारिका ततः ॥ २२ ॥
सूर्यप्रभस्ततो ज्ञेयस्ततो मदनमञ्चुका ।
वेलालम्बस्ततः प्रोक्तः स्याच्छशाङ्कवती ततः ॥ २३ ॥
लम्बो विषमशीलाख्यस्तथा नु मदिरावती ।
पद्मावती नाम लम्बस्ततः स्यात्पञ्चलम्बकाः ॥ २४ ॥
रत्नप्रभा च तदनु ततोऽलंकारवत्यपि ।
मुख्यतः शक्तियशा नाम लम्बको बहुकौतुकः ॥ २५ ॥
महाराज्याभिषेकश्च पश्चात्सुरतमञ्जरी ।
इत्यष्टादशभिर्युक्तां लम्बैः शर्वोदितां कथाम् ।
काणभूतिर्गुणाढ्याय गणाच्छ्रुत्वा न्यवेदयत् ॥ २६ ॥

इति लम्बकसंग्रहः ॥ २ ॥

इत्येतां विपुलाश्चर्यां स राजा सातवाहनः ।
गुणाढ्याच्छिष्यसहितः समासाद्य बृहत्कथाम् ॥ २७ ॥
परामृतरसक्षीबो घूर्णमान इवानिशम् ।
सप्तलक्षाणि नामानीत्यभूत्सानुशयो मुहुः ॥ २८ ॥
सेयं हरमुखोद्गीर्णा कथानुग्रहकारिणी ।
पिशाचवाचि पतिता संजाता विघ्नदायिनी ॥ २९ ॥
अतः सुखनिषेव्यासौ कृता संस्कृतया गिरा ।
समां भुवमिवानीता गङ्गा श्वभ्रावलम्बिनी ॥ ३० ॥
काश्मीरको गुणाधारप्रकण्डश्चाभिधोऽभवत् ।
नानार्थिजनसंकल्पपूरणे कल्पपादपः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य मेरोरिवोदारकल्याणापूर्णसंपदः ।
अगणेयमभूद्गेहे यस्य भोज्यं द्विजन्मनाम् ॥ ३२ ॥
सूर्यग्रहे त्रिभिर्लक्षैर्दत्त्वा कृष्णाजिनत्रयम् ।
अल्पप्रदोऽस्मीत्यभवत्स लज्जानतकंधरः ॥ ३३ ॥
स्वयंभूनिलये श्रीमान्यः प्रतिष्ठाप्य देवताः ।
दत्वा कोटिचतुर्भागं देवद्विजमठादिषु ॥ ३४ ॥
पूजयित्वा स्वयं शंभुं प्रसरद्बाष्पनिर्भरः ।
गाढं दोर्भ्यां समालिङ्ग्य यस्तत्रैव व्यपद्यत ॥ ३५ ॥
क्षेमेन्द्रनामा तनयस्तस्य विद्वत्सु विश्रुतः ।
प्रयातः कविगोष्ठीषु नामग्रहणयोग्यताम् ॥ ३६ ॥
श्रुत्वाभिनवगुप्ताख्यात्साहित्यं बोधवारिधेः ।
आचार्यशेखरमणेर्विद्याविवृतिकारिणः ॥ ३७ ॥
श्रीमद्भागवताचार्यसोमपादाब्जरेणुभिः ।
धन्यतां यः परं यातो नारायणपरायणः ॥ ३८ ॥
कदाचिदेव विप्रेण स द्वादश्यामुपोषितः ।
प्रार्थितो रामयशसा सरसः स्वच्छचेतसा ॥ ३९ ॥
कथामेतामनुध्यायन्दिनेषु विपुलेक्षणैः ।
विदधे विबुधानन्दसुधास्यन्दतरङ्गिणीम् ॥ ४० ॥
स श्रीदेवधराख्यस्य द्विजराज्यपदस्थिते ।
सर्वज्ञस्याज्ञया चक्रे कथामेतां विनोदिनीम् ॥ ४१ ॥

इति व्यासदासापराख्यक्षेमेन्द्रविरचिता बृहत्कथा संपूर्णा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu